No. १४८६

Title गदाधर्यां →

Author गदाधरः

Extent ९७६ Age x

Subject न्याय शास्त्रं

१ पक्षता ग्रन्थ रहस्यं
२ परामर्श ग्रन्थ रहस्यं
३ लिंग करणता " "
४ केवलान्वयि " "
५ केवल व्यतिरे-
की ग्रन्थ रहस्यं

गादाधर्यां

१ पक्षताग्रंथरहस्यम्

२ परामर्शग्रंथर.

३ लिंगकारणताग्रंथर.

४ केवलान्वयिग्रंथर.

५ केवलव्यतिरेकिग्रंथरहस्यम्

१४८६

प. १७६
५-६-७-८-९
कर्तापाप्रभाव:
पक्षताग्रं. र. खण्डितम्

प. १७६
१५-६-७-८-९
[illegible]
[illegible]
पक्षता… र. आरब्ध

सं० ११६

पक्षता
परामर्श
लिंगकरणता
केवलव्यतिरेकि

गादाधरी

॥ पुस्तकमिदं पाठकोपनामक रामस्य ॥
इदम् गदाधरी पक्षता [illegible]
मरामर्शकेवलव्यतिरेकि पर्यन्त [illegible] ८१

प० ग०

३

श्रीरस्तु ॥ मूले व्याप्तिपक्षधर्मतयोः संगतिप्रदर्शनेन न्यूनतां परिजिहीर्षुस्तयोरेककार्यकारित्वरूपां संगतिं प्रदर्शयन्व्याप्त्यनंतरमि
त्यादिमूलमवतारयति । अनुमितीति । अनुमितिलक्षणं । अनुमितिस्वरूपं यदेककार्यं तदनुकूलत्वं संगतिः । तच्च प्रयोजकत्वरूपसंगत्याप्र
योजकत्वं कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः विषयितया परामर्शनिष्ठकारणतायामवच्छेदकत्वेनानुमित्यजनकत्वेपिन
क्षतिः । यद्यपि न पक्षतायाः कारणतावच्छेदकघटकत्वं तामनंतर्भाव्य पर्वतो वह्निमानिति ज्ञानत्वेनैवानुमितिजनकत्वात् । तथापि पक्षता
या अनुमितौ स्वातंत्र्येण कारणतया तदुपलक्षितधर्मविशिष्टतायाश्च कारणतावच्छेदकतया तद्घटितविशिष्टस्यैककार्यानुकूल
त्वमक्षतमिति ध्येयं । निरूपयितुमिति । निरूपणं प्रतियत्सनुकूलो व्यापारः । एवं च पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्म
ताप्रतिपत्त्यनुकूलत्वेन तन्निरूपणत्वमक्षतमेवेति मूले पक्षतानिरूपणेपि पक्षधर्मतां निरूपयितुमित्यस्य नासंगतिः । पक्षे धर्मत्वं यस्या
इति व्युत्पत्त्या पक्षधर्मतापदं पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित् । तच्चिंत्यं । तथात्वे लिखनेसंक्षेपनिर्वाधिनो दीधितिकार
स्य पक्षतां निरूपयितुमित्यस्योपेक्षायां बीजाभावात् । व्याप्तीति । व्याप्तिनिरूपणानंतरमिति मूलपाठाभिप्रायेण । व्याप्त्यनंतरमिति

१

पाठे च तत्रेकाराभावात् सपक्षे साधीत्युपेक्ष्य तत्सपक्षवितीसादिरीत्यात्र सपक्षोपजीवकत्वादित्यादिग्रंथधारकस्य तथाविधलिखनासंगतेः।
तत्रेति मूले तत्पदं पक्षधर्मतापरं · सप्तम्यर्थश्च घटकत्वं अन्वयश्चास्य पक्षत्वमित्यनेनेत्यवधेयं · संदिग्धेत्यादिमूले यं यस्य संदिग्धः सा
ध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसंदेहवत्त्वं · तादृशसंदेहपर्यवसितं पक्षतेत्यर्थः। तत्र साध्ये धर्मत्वनिवेशनमफ
लं · धर्मपदसार्थक्याय यस्मिन् संदिग्धसाध्यधर्मत्वं · बहुव्रीहिबलात् साध्यनिरूपितधर्मित्वपर्यवसितं पक्षत्वमित्युक्तौ साध्ये संदिग्धधर्म
त्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वस्य चाप्रसिद्धिस्थले वक्ष्यमाणानुपपत्तिप्रयोजकं तत् · एवं साध्यकोटिकसंशयस्य
निवेशे साध्यं पक्षवृत्ति न वा साध्यं पक्षनिष्ठाभावप्रतियोगि न वा इत्यादिसंशयासंग्रहः। तादृशसंशयोपादाने च पक्षः साध्यवान्न वेति संश
यादनुमित्यनुपपत्तिरतो धर्मत्वांशं परित्यज्य केवलाचर्यपि ग्रंथे मणिकृते वक्ष्यमाणतथाविधसकलसंशयसाधारणानुगमप्रकारं दर्शय
ति · यत्रेति · यत्र · यद्धर्मावच्छिन्ने · सप्तम्यर्थश्च निर्णयान्वयि विशेष्यत्वं · साध्यस्य · साध्यतावच्छेदकावच्छिन्नसाध्यस्य · षष्ठ्यर्थः प्रकारत्वं ·
तस्यापि निर्णयेऽन्वयः। तत्र · तद्धर्मावच्छिन्ने · सप्तम्यर्थोऽनुमित्यन्वयि विशेष्यत्वं · तादृशसंबंधेन साध्यानुमितौ · तादृशसंबंधावच्छिन्न

प०ग०
२
2

साध्यतावच्छेदकावच्छिन्नविधेयताकानुमितिजनकीभूतेत्यर्थः। पक्षविशेष्यकसाध्याभावविशिष्टबुद्धावैसाध्यधर्मिकपक्षावृत्तित्व
पक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपि पक्षः साध्यवान्नवेति निश्चयस्य प्राचीनमतेप्रतिबंधकत्वात्साध्यं पक्षवृत्तिनवेत्यादिसंश
यसंग्रहः। एवं च शुद्धपर्वतत्वाद्यवच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगावच्छिन्नशुद्धवह्नित्वाद्यवच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रतिपर्वतत्वा
द्यवच्छिन्नविशेष्यतानिरूपितसंयोगादिसंबंधावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबंधकताकसंशयोहेतुरितिप
र्यवसितं। तादृशनिश्चयप्रतिबध्यत्वस्य यथाश्रुतस्य घटादिविषयकसमूहालंबनात्मकवह्निमत्तानिश्चयप्रतिबध्यघटादिसंशयसाधार
णत्वात्तादृशनिश्चयत्वावच्छिन्नप्रतिबंधकताप्रवेशः। अवच्छिन्नत्वं चान्यूनवृत्तित्वं। न तु स्वरूपसंबंधविशेषः। तेन वह्निसामान्याभाववि
शिष्टबुद्धौ महानसीयत्वादिविषयतामनंतर्भाव्य वह्निमान्महानसीयवह्निमानित्यादिसकलज्ञानसाधारणवह्नित्वाद्यवच्छिन्नवत्तानिश्च
यत्वेनैव प्रतिबंधकताकल्पनात् महानसीयवह्निमान्वह्निसामान्याभाववान्नवा पक्ष इत्याद्याकारकसंशयं प्रति महानसीयवह्नित्वाद्यव
च्छिन्नप्रकारकनिश्चयत्वेनाप्रतिबंधकत्वेपि न तथाविधसंशयस्य महानसीयवह्नित्वाद्यवच्छिन्नानुमितौ पक्षतात्वानुपपत्तिः। नवाम

न
२

हानसीयवह्न्यभावादिविशिष्टबुद्धिप्रतिबंधकतावच्छेदककोटौवह्नित्वाद्यवच्छिन्नप्रकारकत्वादेर्निविष्टत्वेपिवह्निमान्स्यादनुमितेर्महानसीय
वह्निमान्नवापक्षइत्याकारकसंशयस्यपक्षतात्वापत्तिश्च। एवंचाहार्यस्यभ्रमत्वज्ञानास्कंदितस्यचनिश्चयस्याप्रतिबंधकतयानाहार्यत्वंभ्रमत्व
ज्ञानानास्कंदितत्वंचनिश्चयेविशेषणंदेयमतोनतथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबंधकत्वाप्रसिद्धिः।पर्वतोवह्निमान्नवेत्यादेःकस्यापिज्ञा
नस्यधर्मांतरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चयसाधारणसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकार
कनिश्चयत्वान्यूनवृत्तिप्रतिबंधकताकत्वंनसंभवतीतिप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेःप्रकारताविशेषण
त्वं। उपनीतभानात्मकबाधनिश्चयस्यापिसाध्यवत्तानिश्चयसामान्यनिवर्त्तनीयतयाभ्रमत्वज्ञानास्कंदितस्यचतस्यानुमित्यविरोधित
यातथाविधबाधदशायामनुमित्यापत्तिरतःसंशयत्वनिवेशनं। नचसाध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तस्यसंशयत्व
स्यदुर्वचतयापुनरननुगमतादवस्थ्यमितिवाच्यं।बाधनिश्चयनिवर्त्तनीयत्वस्यैवात्रसंशयपदेनविवक्षितत्वात्। केवलान्वयिनिचसा
ध्येपक्षनिष्ठाभावप्रतियोगित्वनिश्चयएवसुलभोबाधः।एकविधबाधोपादानेनैवविविधसंशयानुगमसंभवान्नदननुगमोनदो

प०ग०
३
3

षाय· अनुगतस्यापि कथंचित्संभवात्· यत्तु पक्षसाध्यवैशिष्ट्यावगाहित्वमेव संशयपदेन विवक्षितमिति तन्नानुगमः। साध्यं पक्षवृत्ति न वेति
साध्यविशेष्यकसंशयस्यापि तथात्वादिति· तदसत्· तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संश
यस्यासंग्रहप्रसंगात्· न च केवलान्वयिस्थले साध्यं पक्षवृत्ति न वेत्येतादृशसंशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहो न दोषायेति वाच्यं·
प्रमेयत्वं घटनिष्ठात्यंताभावप्रतियोगि न वेति संशयस्य केवलान्वयिग्रंथे मणिकृतैव संगृहीततया तद्विरोधात्· वस्तुतस्तु तादात्म्य
संबंधेन प्रमेयपक्षकवाच्यसाध्यकस्थले संशयाप्रसिद्धिः। तादात्म्यसंबंधेन पक्षसंबद्धत्वाभावरूपकोट्यप्रसिद्धेः। न च साध्ये पक्षनिष्ठा
भावप्रतियोगित्वसंशयस्य पक्षतात्वेपि उक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितेरुद्देश्यत्वे पक्षतावच्छेदकावच्छे
देन वर्त्तमानभेदप्रतियोगित्वकोटिकसंशयस्यैव साध्यवत्तानिश्चयप्रतिबंध्यतया पक्षतात्वमंगीकार्यं· तच्च न संभवति· प्रमेयत्वाव
च्छेदेन वर्त्तमानभेदाप्रसिद्ध्या कोट्यप्रसिद्धे~~[illegible]~~रिति वाच्यं। तत्र व्यासज्यवृत्तिधर्मावच्छिन्नभेदप्रतियोगित्वपि प्रत्येकं वर्त्तमानतया तादृ ३
शभेदस्यैव पक्षतावच्छेदकावच्छेदेन वर्त्तमानस्य प्रसिद्धेः। पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व

तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभावकोटिकसंशयस्य पक्षतात्वोपगमात्· एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले सा
ध्यपक्षवैशिष्ट्यावगाहिसंशयानुपपत्तेः। तत्र साध्यात्मकाभावप्रतियोगिनि पक्षवृत्तित्वादिसंशयस्यैव पक्षतात्वमभ्युपगंतव्यतया संशयपदेन पक्ष
साध्यवैशिष्ट्यावगाहिनिवेशनासंभव इति· अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकस्थले च वह्निमान्न वा पक्ष इत्यादिसं
शयस्य पक्षतात्वप्रसंगः। साध्यवत्तानिश्चयनिवर्त्यत्वात्· न च सिद्धसाधनस्थलेनुमितिवारणमेव पक्षताहेतुत्वकल्पनफलं· एवं चोक्तसंशयस्यानु
मितिहेतुत्वोपगमेपि सिद्धिदशायामनुमित्यापत्त्यसंभवात्· तस्य पक्षतात्वमिष्टमेवेति वाच्यं· साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मि
न्पक्षसंबंधावगाहिसंदेहस्यैव प्राचीनैः पक्षतात्वोपगमात्· अन्यथा बाधसाधारणपक्षतात्वोपगमेपि सिद्धिकालेनुमितिवारणसंभवाद्बाधवार
कसंशयत्वनिवेशस्याप्यप्रयोजकत्वापत्तेः। न च तादृशसंशयस्य वह्निव्याप्याद्यभाववत्तानिश्चयरूपबाधाद्यप्रतिबध्यतया नातिप्रसंग इति
वाच्यं· वह्निव्याप्याभावाभाववान्पर्वतः पर्वतो वह्निमान्न वेति संशयस्य तादृशबाधनिश्चयप्रतिबध्यतया तावतापि तद्वारणासंभवात्· मनुष्कृ
तसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशान्नोक्तातिप्रसंगः। वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नाया वह्निव्या

प॰ग॰
४

५

प्यवत्तानिश्चयप्रतिबध्यतायाअवच्छेदककोटौवह्निव्याप्यत्वाद्यवच्छिन्नविषयतायाअनंतर्भावादिति॰ तन्न॰ वह्न्यभावसाध्यकस्थले वह्निमान्नवेत्यादि
संशयस्यासंग्रहप्रसंगात्॰ वह्निविशिष्टबुद्धित्वाद्यवच्छिन्नायावह्न्यभावादिनिश्चयप्रतिबध्यतायाअवच्छेदकगर्भेवह्न्यभावत्वावच्छिन्नविषय
यतायाअनिवेशात्॰ अत्रचवह्निव्याप्यत्वाद्यवच्छिन्नस्यैवपक्षत्वंसाध्यत्वंचतत्रचवह्निव्याप्योवह्निमान्नवेतिसंशयवारणस्याप्यशक्यत्वात्॰ यत्तुसाध्य
वत्ताज्ञानप्रतिबंधकतावच्छेदकविषयिताघटितधर्मावच्छिन्नत्वेनप्रतिबध्यतायाविशेषणीयतयावह्निव्याप्यवत्ताज्ञानंप्रतिवह्न्यभावादिनि
श्चयत्वेनाप्रतिबंधकतयातद्विषयतायाःसाध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकत्वविरहेणनातिप्रसंगइति॰ तदपिन॰ तावतापिमहानसी
यवह्नित्वावच्छिन्नसाध्यकस्थलेमहानसीयवह्न्यभावाभाववान्पर्वतःसवह्निमान्नवेतिसंशयवारणासंभवात्॰ अत्रोच्यते॰ संशयत्वंस्वनिष्ठ
विषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यताशालित्वं॰ ज्ञानभेदेनविषयतानभ्युपगमात्॰ संशयनिष्ठवह्निमत्पर्वता
दिनिरूपितविषयतायाअपिप्रत्येकंनिश्चयप्रतित्वात्प्रतिबंधकतावच्छेदकघटकत्वोपपत्तेः॰ वह्न्यादिसाध्यकस्थलेवह्न्यभाववान्पर्वतोघटवान्न
वेत्याकारकसंशयस्यतादृशधर्माक्रांतस्यसाध्यवत्तानिश्चयप्रतिबध्यस्यचवारणायसाध्यवत्तानिश्चयप्रतिबंधकतावच्छेदकावच्छिन्नत्वेननिरू

४ भेदा

तादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या बलवत्वेन तस्या एवोत्पादसंभव इति अतो विशिष्टस्मरणानुसरणं· न्यूनताभंगाय प
रामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनंतरोत्पन्नेच्छास्थले तद्दर्शयति· अनुमितीति· यत्रेत्यनुषज्यते· इच्छासामग्र्याः संपत्तये· अनुमितीष्टसा
धनताविषयकेति· तादृशस्मरणात्· साध्यतद्व्याप्यविशिष्टपक्षस्मरणात्· पूर्वोक्तयुक्त्या चाक्षुषादिपरामर्शस्यानुमितीष्टसाधनतावगाहि
त्वं न संभवतीति· यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षण एव फलेच्छासंभवेन तस्याः परामर्शोत्पत्तिसमये नाशोत्तर
मनुमित्साया असंभवेन इष्टसाधनताविषयकपरामर्शस्यावश्यकत्वात्स्मरणानुसरणं· न्यूनतापरिहाराय प्रत्यक्षपरामर्शस्थले प्रयोजनमा
हानुमित्सापूर्वेति· अत्रापि यत्रेत्यनुषज्यते· प्रत्यक्षात्मकधूमादिविशेषणज्ञानस्थले तज्जनकसंनिकर्षादितस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भ
विष्यति नत्विच्छा· विनश्यदवस्थसंनिकर्षादिविशेषणप्रत्यक्षानुधावने च प्रयासगौरवमतो विशेषणस्मरणपर्यंतानुधानं· अनुमित्सापूर्वकाले
परामर्शजनकसंनिकर्षादिसत्त्वे सिसाधयिषादशायां· तस्या एवानुपपत्तिरतोऽनुमित्साकालोत्पन्नेंद्रियसंनिकर्षादीति· सहकृततांतं· स
हकृततांतभागोपस्थाप्यसिसाधयिषाविरहवैशिष्ट्यं· तस्याभावविशेषणत्वे तदभावविशिष्टस्य सिध्यभावस्यासंभवात् सिद्धौ समासम
सांवानुमित्यनुपपत्तेरतः साधकमानाविशेषणमिति· सिसाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे प्रत्यक्षत्वादिप्रकारकेच्छावत्वादस

प०ग०
१०
10

सांप्रत्यक्षादिसामग्र्यां सिद्धिदशायामनुमित्यापत्तिः। अनुमितिगोचरेच्छापरत्वेपि यत्किंचिद्गोचरं ज्ञानं जायतामितीच्छावलात्सिद्धिकालेनुमित्या
पत्तिः। न चानुमितित्वस्यापि तादृशेच्छाविषयत्वसिद्धेस्तत्रानुमितित्वविशिष्टेवेति वाच्यं· प्रकृतानुमित्युत्पत्तेरेव यादृशेच्छायाविषयसिद्धिस्तादृशेच्छा
याः सत्वे एव सिद्धिकालेनुमितेरानुभविकत्वात्· उक्तेच्छायाश्चांततउपस्थितपदार्थगोचरमानसज्ञानेनापि विषयसिध्याऽकिंचित्करत्वा
दित्यतः सिसाधयिषापदार्थस्याचष्टे सिषाधयिषयाचेति· घटविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्वे सिद्धिसत्वेप्य
नुमित्यनुत्पादात्तत्साध्यविशिष्टेति· तेन संबंधेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः। तेन कालिकसंबंधेन वह्निविशिष्टपर्व
तविषयकानुमितिर्जायतां द्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्वेपि सिद्धिकाले संयोगादिना
वह्नित्वावच्छिन्नस्यानानुमितिः। वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायता
मितीच्छावलात्पर्वतो वह्निमानित्यनुमित्यनुत्पादात्तत्पक्षकेति· तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः। न च यत्किंचिद्गोचरं ज्ञानं जायतामितीच्छा
वलादिनालोकवान्पर्वत इत्याद्यनुमितिसामग्र्यां सत्यां वह्न्यनुमितिसामग्रीदशायां वह्निमत्पर्वतविषयकानुमितीच्छावलादपि सिद्धिसत्वे
नुमितिर्न जायते· तत्कालीनासिध्यप्रतिबध्यालोकानुमित्युत्पत्तेरेव तादृशेच्छाविषयसिद्धेरित्युक्तरूपेणापीच्छाया उत्तेजकत्वं न संभवती

२०

त्तिवार्यं साध्यविशिष्टपक्षनिरूपितविलक्षणविषयताप्रकारकत्वे नैवेच्छाया उत्तेजकत्वोपगमात् आलोकवान्पर्वत इत्याद्यनुमितेर्वह्निवि
शिष्टनिरूपितविलक्षणविषयताशून्यत्वेन तदुत्पत्त्या तादृशविषयिताप्रकारकेच्छाविषयत्वस्याभावात् साध्यविशिष्टपक्षनिरूपित
त्वं च साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वं अतोऽग्रे वह्निमानित्याद्यौ साध्यविशिष्टपक्षाप्रसिद्धावपि न तादृशविषयितायाः त
त्प्रकारकानुमितसामान्याप्रसिद्धिः ॥ वह्न्यादिनिष्ठतादृशप्रमात्वादिविषयितानिरूपकत्वस्यापि वह्न्यंशेऽप्रकारीभूतवह्नित्वाद्यनवच्छिन्नत्वात्
वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वेच्छनेन तत्साध्यतावच्छेदकावच्छिन्नतत्संबंधावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदका
वच्छिन्नोद्देश्यताकत्वपर्यन्तं विवक्षितं अतो वह्निमान्पर्वतो घटवानित्याद्यनुमितिसामग्र्यां दृश्यमानायां पूर्वोक्तयुक्त्या वह्निमत्पर्वतविषयकानु
मितिर्जायतामित्याकारकेच्छाबलात्पर्वतादिपक्षकवह्निविधेयकानुमित्युत्पादेऽपि न क्षतिः तादृशोद्देश्यतात्वेन च तादृशोद्देश्यताकत्व
प्रकारताकत्वं विवक्षणीयं तेन न केवलपर्वतत्वावच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताप्रकारकानुमित्सादृशायां पर्वते न्यायानुमि
तिसामग्र्यां सत्त्वे वह्निसिद्धिसत्त्वेऽप्यनुमित्सापत्तिः साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशप्रयोजनं दर्शयति यत्किंचिदिति यत्
किंचिद्विषयकत्वप्रकारकत्वनिवेश्यापि यत्किंचित् ज्ञानं जायतामित्याद्यिच्छावारणं संभवतीति यत्किंचिज्ज्ञानत्वप्रकारकेच्छानुधा

प॰ग॰
११
॥

वनं॰ नचेछापूर्वंयत्किंचिज्ज्ञेयचरज्ञानस्यावश्यंसिद्धत्वात्तादृशेछैवनसंभवति॰ ज्ञानगोचरेछायांस्वरूपसत्याःस्वविषयसिद्धेरेवविरोधित्वात्॰ तदुक्तं॰
नहिज्ञानेजातेज्ञानेछाभवतीतिवाच्यं॰ तदुत्तरवर्त्तियत्किंचिज्ज्ञेयचरंज्ञानंजायतामित्याद्याकारकेछायाएवविवक्षितत्वात्॰ नन्वनुमितित्वप्रकारक
त्वंनिवेश्यैवतथाविधेछावारणसंभवेकिंगुरुतरसाध्यविशिष्टपक्षविषयकत्वनिवेशनेनेत्यतआह॰ अनुमितित्वाप्रकारिकायामपीति॰ प्रत्यक्षाद्यात्म
कसिद्धिदशायांपर्वतेवह्निज्ञानंजायतामित्याकारकेछानसंभवति॰ तद्विषयीभूतप्रत्यक्षादेरेवसिद्धत्वादतःप्रत्यक्षाद्यतिरिक्तमिति॰ शाब्दादिरूपायां
सिद्धौप्रत्यक्षातिरिक्तंज्ञानंजायतामित्यादीछायाउत्पादसंभवात्प्रत्यक्षाद्यनंतरमिति॰ प्रत्यक्षादिरूपसिद्ध्यनंतरमित्यर्थः॥ अनुमित्युत्पादाद्येति॰ तथाचानु
मितित्वप्रकारकत्वंनिवेशयितुमशक्यमेव॰ तादृश्येछानामसंग्रहप्रसंगादितिभावः॥ इदमुपलक्षणं॰ अनुमितित्वप्रकारकत्वानिवेशेपिघटानुमितिर्जा
यतामितीछाकालेसिद्धौसत्यांवह्न्याद्यनुमितिवारणायप्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकं॰ नचतत्रप्रकृतसाध्यादिविषयिणीया
नुमितिस्तद्विषयकत्वनिवेशनेनापिदर्शितेछावारणसंभवइतिवाच्यं॰ दर्शितेछायाअपिघटाद्यनुमितित्वेनवह्न्यादिगोचरसमूहालंबनानुमि
तिविषयत्वात्॰ नचानुमितित्वप्रकारकत्वानिवेशेअनुमितिरेवयत्रप्रत्यक्षत्वादिनेछाविषयस्तत्रानुमित्सापत्तिः॥ इष्टत्वात्॰ अनुमितौप्रत्यक्षत्वभ्र
मदशायामेवतादृशेछायाउत्पादसंभवात्तस्याअनुमितित्वप्रकारकेछयासमशीलत्वादितिहृदयं॰ नचानुमित्वप्रकारकत्वस्यानिवेशेपर्वतेवह्निः

११

प्रत्यक्षसिद्धौ शाब्दसामग्र्यां च सत्यां प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छासत्त्वेनुमित्यापत्तिरिति वाच्यं· तत्र पक्षतासत्त्वेपि अनुमितित्वप्रकारकेच्छावि
रहविशिष्टसमानविषयकशाब्दसामग्र्याः प्रतिबंधकत्वादेवानुमितिवारणसंभवात्· अथ सिद्धिदशायां पर्वतो वह्निरन्यत् ज्ञानं जायतामितीच्छासत्त्वे
नुमित्यापत्तिः· तस्या अप्यनुमितिविषयकत्वात्· न चेष्टापत्तिः। तदुत्तरं पर्वतो वह्निमानित्यादिमानसोत्पत्त्यापीच्छाविषयसिद्धेस्तादृशेच्छाया यत्
किंचिज्ज्ञोचरं ज्ञानं जायतामित्येतादृशेच्छानुत्पत्त्यत्वात्· न च प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीत्वेन प्रतिबंधकसत्त्वान्नापत्तिरिति वाच्यं· प्रत्यक्ष
त्वादिप्रकारकेच्छाविशिष्टाया एव मानसादिसामग्र्या अनुमितिप्रतिबंधकत्वात्· अन्यथासिद्धिशून्यकालेपि तादृशेच्छासत्त्वेनुमित्यनु
त्पादप्रसंगात्· न चोक्तयुक्त्या वह्निविधेयकत्वावगाहित्वनिवेशस्यावश्यकतया वह्निप्रकारकत्वावगाहिज्ञानेच्छावत्त्वान्नानुमितिप्र
संगः। अनुमितिनिष्ठतद्विधेयकत्वावगाहीच्छादशायां च जायत एवानुमितिः। विधेयतायाः प्रत्यक्षेऽप्रामाणिकतया तत्प्रकारकेच्छाया अ
नुमित्युत्पत्त्यैवाविषयसिद्धेरिति वाच्यं· विधेयतायाः प्रत्यक्षव्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वप्रकारिकाया अपीच्छायाः प्रत्यक्षसि
द्धिकाले संभवात्· प्रत्यक्षान्यत्वप्रकारिकेच्छापर्यंतानुसरणस्य दीधितिकृतो निर्बीजत्वात्· न च विधेयताप्रत्यक्षव्यावृत्तैवतदवगाहित्व
सूचनायैवोपदर्शितेच्छांशे प्रत्यक्षान्यत्वोल्लेख इति वाच्यं· एवमपि वक्ष्यमाणस्य शाब्दसिद्धिकालेऽशाब्दं ज्ञानं जायतामितीच्छावत्त्वेनानु

प०ग०
१२
12

मितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य संगमयितुमशक्यत्वात्. तादृशेच्छायाः प्रत्यक्षव्याहतविधेयताद्यवगाहित्वे प्रत्यक्षसामग्रीकाले
पि तद्दलादनुमित्योचित्यात्. तदनवगाहित्वे सिद्धावप्यनुत्तेजकत्वात्. अथोच्यते अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमि
तिविषयकेच्छात्वे नैवानुगमः पर्वते वह्निरन्यत ज्ञानं जायतामित्याद्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्यां चानुमितेर्वारणा
य तथाविधेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वं कल्प्यत इति न दोषः। न च तासां तत्तद्व्यक्तित्वेनानंतप्रतिबंधकताकल्पनमपेक्ष्यानुमिति
त्वादिप्रकारविशेषमंतर्भाव्यैवानुमितीच्छानामुत्तेजकत्वमुचितमिति वाच्यं. तथा सति पर्वते वह्निज्ञानं जायतामितीच्छाकाले तथाविधोप
नीतभानविरोधिघटाद्यनुमित्साविशिष्टतत्सामग्रीसत्वे सिद्धौ सत्यां वह्न्याद्यनुमित्युपपत्तये तादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्ध्युत्तेज
कत्वापत्त्या तदभावसहकृतस्य मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण सिद्धिप्रतिबंधकतानंत्यप्रसंगात्. ननु साध्यविधेयकत्वा
वच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छाया उपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छाया असंग्रहः। एवं विषयानुपरक्ता
नुमितिविषयिण्या अनुमितिर्जायतामितीच्छाया अपि निरुक्तरूपेणासंग्रहः। न च सा असंग्राह्यैव. असिद्धसाध्यांतरानुमितिसामग्र्याम् सत्यां त
द्बलादपि सिद्धस्य प्रकृतसाध्यस्यानुमितेस्तदिच्छाविषयासिध्यनुरोधेनावश्यकत्वादित्यत आह यादृशेति. असत्यां सिद्धौ यत्किंचिज्ञेच

१२

रं ज्ञानं जायतामितीच्छासत्वेनुमित्युत्पादात् तासां चाननुगतत्वात् ॥ सिद्धौ सत्यामिति ॥ तत्तदिच्छाभावसमुदायस्येति ॥ साध्यविशेषविशिष्टपक्षविशेष्या
घवगाहित्वप्रकारकेच्छानां तत्तदवगाहित्वेनाननुगमग्य एकैकाभावा निवेश्यंते ॥ अतथाविधानां अनुमितिर्जायतां प्रत्यक्षात्मकज्ञानं जायतामिति साध्या
कारकेच्छानां तु पक्षधर्मताज्ञानसत्वे सिद्धिदशायामनुमितिस्तत्तद्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीयाः ॥ अन्यथातिप्रसंगात् ॥ तत्कालीनसिद्धिभेदाए
ववा ॥ एतेन तत्कालीनसंयोगविभागादिव्यक्तिविशेषाभावनिवेशमादाय विनिगमनाविरहो निरस्तः ॥ सामानाधिकरण्यसंबंधेन तद्व्यक्तित्वाभाव
वैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणताविशेषसंबंधेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसंबंधानिवेशे च लाघवात् ॥ सि
ध्युत्तरं तथाविधेच्छोत्पत्तिकालेनुमित्यापत्तिस्तदिच्छासामग्र्या अनुमितिविरोधित्वादेव न संभवतीति ध्येयं ॥ इदं त्ववधेयं ॥ तादृशेच्छाभावसमुदायस्य
न तत्समुदायत्वेन निवेशः ॥ समुदायत्वस्य दुर्वचत्वात् ॥ न च तावन्मात्रविषयकधीविषयत्वं तत् ॥ तावत्त्वस्य दुर्निर्वचत्वात् ॥ तावदभावविषयकबुद्धेस्तत्तद
भावविषयकत्वेन निवेशे तत्तदभावविशिष्टत्वेनासिद्धेरेव निवेशयितुमुचितत्वात् ॥ तत्तदभावानां मिथो विशेष्यविशेषणभावानापन्नानां निवेशेव
च्छेदकभेदात्प्रतिबंधकताभेद इति चेत् ॥ एकविशिष्टापरत्वेनैवाभावानां निवेशनीयत्वात् ॥ तत्र च विशेष्यविशेषणभावे विनिगमनाविरहेपि न क्षतिः ॥ गत्यं
तराभावात् ॥ तत्तदभावमात्रविषयकधीविषयत्वेन निवेशेपि ज्ञाने तत्तदभावविषयतानामेकविशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावे वि

प०म०
१३
13

निगमनाविरहस्यावश्यकत्वादिति॰ इच्छायाअननुगमेपि॰ एकरूपेणसर्वासामिच्छानामुपादानासंभवेपि नक्षतिः। नसिसाधयिषाविरहविशिष्टसि
ध्यभावस्यानुमितिहेतुतानुपपत्तिः। तावदभावविशिष्टसिध्यभावस्यानुगतत्वादितिभावः। इदमत्रचिंतनीयं॰ वह्निविशिष्टपर्वतमहानसोभयानु
मितिर्जायतामितीच्छाकारकेच्छानामपितत्साध्यविशिष्टतत्पक्षावगाहित्वप्रकारकतयापर्वतेवह्नेः सिद्धिकालेमहानसपक्षकानुमित्यादिप्माम
प्यामसत्वात्तादृशेच्छाबलात्पर्वतेवह्न्यनुमित्यापत्तिः। अनुमित्यंशेतत्साध्यविशिष्टतत्पक्षविषयकत्वान्यत्किंचिद्विशेष्यकत्वाप्रकारकत्व
विशेषणस्येच्छायांनिवेशेवह्निविशिष्टंपर्वतंमहानसंचानुमिनुयामित्यादिसमूहालंबनेच्छायाअसंग्रहप्रसंगः। वह्निविशिष्टपर्वतावगाहि
नीमहानसविषयकानुमितिभिन्नानुमितिर्जायतामितीच्छाकारकेच्छाबलादुपदर्शितस्थलेतिप्रसंगस्याशक्यवारणतांचेति इच्छाविषयतावच्छे
दकतायाःपर्याप्तिनिवेशनमावश्यकमिति॰ तथाचवह्निविशिष्टपर्वतानुमितिर्भवत्वित्यादीच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकानुमिति
त्वपर्याप्तविषयतावच्छेदकेच्छात्वेनैवोत्तेजकत्वंपर्यवसितं॰ अनुमितित्वानंतर्भावितादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्त
विषयतावच्छेदकत्वाभावेनाशक्यसंग्रहत्वात्॰ एवंचानुमितित्वप्रत्यक्षान्यज्ञानत्वाद्यप्रकारकेच्छानामनुमितिविषयकत्वरूपेणसंग्रहाभिधान
मसंगतं॰ नचतत्कल्पस्यपरिसज्येवयादृशयादृशेत्याद्यभिधानं॰ इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वाद्यप्रकारकेच्छानांपृथगुपयोगाभावनिवे

१३

शनमेवाभिप्रेतमितिवाच्यं· पक्षांतरसूचकवाकाराद्यभावात्· अथानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुगमएवसंभवति· तथाहि·
तत्साध्यविशिष्टतत्पक्षकानुमितित्वपर्याप्तत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्वं· तत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वनिष्ठावच्छे
दकताभिन्नावच्छेदकत्वानिरूपकविषयताकत्वमेवपर्यवसितं· एवंचतत्साध्यविशिष्टतत्पक्षविषयकत्वप्रत्यक्षान्यज्ञानत्वनिष्ठावच्छेदकताभि
न्नावच्छेदकत्वानिरूपकविषयताकेच्छात्वादिनाप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानांपृथगुत्तेजकत्वापेक्षयानिरुक्तधर्मघटकानुमितित्वनिष्ठा
वच्छेदकताभिन्नावच्छेदकतायामेवप्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवेशनमुचितंलाघवात्· इत्थंचतादृशरूपेणैवप्रत्यक्षा
न्यज्ञानत्वादिप्रकारकेच्छानामपिसंग्रहः संभवति· नचवह्निविशिष्टपर्वतविषयकंजायतामितिसाकारकेच्छायाःसिध्यधीनसंस्कारोपस्थेवचारि
तार्थ्यावारणायविषयतायामनुमितित्वावच्छिन्नत्वनिवेशनस्यावश्यकतयातत्संग्रहइतिवाच्यं· समवायेनकिंचिदवच्छिन्नत्वानिवेशेपिता
दृशेच्छावारणसंभवात्· एवंसतिपक्षांशेसाध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूपसमशीलरूपांतरेणोत्तेजकत्वापेक्षयातादृशावच्छे
दकतायामेवपक्षांशेतादृशसाध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपिनिवेश्यतां· तावतैवतत्संग्रहस्यापिसंभवादितिच्छायाअननुग
माभिधानासंगतिः। नचविषयतायांसाध्यविशिष्टपक्षावगाहित्वाद्यवच्छिन्नत्वनिवेशनमावश्यकं· अन्यथान्यानुमितिसामग्रीसम

वहितानामनुमितिर्जायतामित्याद्याकारकविषयविशेषानुपरक्तानुमितीच्छानां वारणासंभवादिति। अन्यानुमितिसामग्र्यसमवहिततादृशे
च्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वस्योपगंतव्यतयोत्तेजकानामननुगमाऽभिधानसंगतिरिति वाच्यं। तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकतयैवा
तिप्रसंगवारणसंभवेन तासां वारणाऽनौचित्यात्। तथा सति साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायां नि
वेश्य दर्शितसामग्र्यसमवहिततथाविधेच्छानां तत्तद्व्यक्तित्वेनोत्तेजकत्वकल्पने गौरवप्रसंगात्। अनुमितिसामग्रीकालीनतादृशेच्छानां
प्रतिबंधकत्वेन तत्कालीनतत्तदात्मवायुसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबंधकताप्रसंगवत्तादृशसामग्र्यभावकालीनतथेच्छानामु
त्तेजकतामते विनिगमनाविरहेण तत्तदिच्छाकालीनसंयोगविशेषाणामुत्तेजकताप्रसंगस्य दुर्वारत्वात्। अथवोक्तानुगतरूपेणोत्तेजकीभूता
यामिच्छायामनुमितिर्जायतामित्याकारकान्यानुमितिसामग्रीसमवहितेच्छाव्यक्तीनां भेदा एव निवेश्याः। ननु तासामनुमितिप्रतिबंधकत्वं इ
ति न तत्तदिच्छाभेदस्थले तत्कालीनवायुसंयोगभेदनिवेशापत्तिः। इच्छायां तद्भेदस्याव्यावर्तकत्वात्। तत्तत्संयोगाभावानां वैशिष्ट्यस्य च निवे
शे वैशिष्ट्यस्य सामानाधिकरण्यरूपतया साक्षात्संबंधेनेच्छाभेदनिवेशे लाघवस्यैव विनिगमकत्वात्। अत्राहुः। उक्तसकलेच्छानां निरुक्ते
रूपेणानुगमेऽपि तल्लक्षणोत्तरक्षणेऽनुमितिर्भवत्वित्याद्याकारकेच्छानामेव निरुक्तेन रूपेणासंग्रहात् तत्तद्व्यक्तित्वेन पृथगभावा निवेशनीयाः। ता

१४

दृशाक्षणवृत्तित्वाद्यवच्छेदकताभेदं उभयावच्छेदकतायां निवेशयतस्तत्संग्रहे कालांतरेपि तादृशेच्छावलादनुमित्सापत्तेः। कालांतरेनुमित्सुत्मत्सा
चत्तादृशानुमित्साया विषयासिद्धेरिपापसयोगादित्यननुगमाभिधानसंगतिः न च कालांतरीणतादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकतया
तादृशेच्छावलादनुमितिवारणसंभव इति वाच्यं उपदर्शितैकैकधर्मप्रकारकैकैकानुमित्साव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वापेक्षया तत्तत्स
मानप्रकारककालांतरीणबहुतरेच्छानां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् न चैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयित्वप्रकारक
विशेषणाभिधानस्यासंगतिर्दुर्वारैवेति वाच्यं अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्षविषयकत्वाद्यन्यप्रकारानवच्छिन्नत्वनिवेश एव
तात्पर्यात् उक्तस्तस्य साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमप्यावश्यकं। अन्यथा किंचित्ज्ञानं जायतामित्यादीच्छावारणासंभवा
त् तत्संग्रहे तादृशानां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् अनुमितिर्जायतामित्यादीच्छानां च यथानुमितित्वादिधर्मविषयतावच्छेदकताकत्वेने
वोत्तेजकता अन्यानुमितिसामग्रीसमवहिततादृशेच्छानां च तत्तद्व्यक्तित्वेनैव प्रतिबंधकत्वमेवेति सर्वं समंजसं ननु धूमेन पर्वतं वह्निमनुमिनुयामितीच्छा
कारकेच्छावलात् धूमादिलिंगकानुमित्युत्पत्त्यालत्साधारणरूपेणैव सिसाधयिषाणां सिद्ध्युत्तेजकतायाः आवश्यकत्वात् तत्सत्त्वे सिद्धिकाले सत्स
पि धूमपरामर्शे आलोकादिपरामर्शादनुमित्यापत्तिः पक्षतायाः अक्षतत्वादित्यत आह धूमेनेति भिन्नलिंगकेच्छासत्त्वे सिद्धिदशामात्र एवे

प०ग०
१५

15

यदि नानुमितिः तदा तादृशेच्छायाः प्रतिबंधकत्वं न संभवतीत्यतो ऽस्यामपि सिद्धाविति · तत्रानुमितेः संदिग्धत्वतथायदीति तद्देति · तल्लिंगकानुमि
ताविति शेषः । अन्यथा त्रेति · तदन्यमात्रलिंगकत्वप्रकारकसिद्धीच्छेत्यर्थः । धूमलिंगकानुमितिरालोकलिंगकानुमितिश्च जायतामित्या
द्याकारकसमूहालंबनेच्छाकाले आलोकादिपरामर्शादनुमित्यापत्तिरपि मात्रेति · तदन्यमात्रलिंगकत्वप्रकारकत्वे च तल्लिंगकत्वाप्र
कारकत्वे सति किंचित् लिंगकत्वप्रकारकत्वं · अतः प्रमेयसामान्यलिंगकस्थले तदन्याप्रसिद्धावपि न दोषः । तल्लिंगकत्वाप्रकारकत्वं
च तल्लिंगकत्वप्रकारतानिरूपित तत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकत्वन्यत्वं · अत आलोकेन धनं धूमेन वह्
निमनुमिनुयामित्याद्याकारेच्छायामालोकादिलिंगकवह्न्याद्यनुमितेर्नापत्तिः । आलोकलिंगकत्वप्रकारतायाः शरीरे च वास्तवालोकादिप्रकारता
न निवेशनीया · किंत्वालोकत्वाद्यवच्छिन्नाप्रकारतैव · अन्यथालोकत्वादिना धूमत्वादिना च धूमालोकादिकमवगाहमानयोरिच्छयोरा
लोकलिंगकानुमित्यादौ प्रतिबंधकत्वतदभावयोरापत्तेः । इच्छेणानुमिनुयामित्याद्यिच्छाया आलोकलिंगकानुमित्यविरोधित्वोपपत्तये आलो
कत्वाद्यवच्छिन्नत्वस्थले आलोकाद्यवृत्तित्वेनाज्ञायमानधर्मावच्छिन्नत्वमेवानिवेश्यं · इत्युक्त्यादेरालोकत्वादिविरुद्धत्वभ्रमदशायां तादृशे
च्छायाविरोधित्वोपपादनायालोकत्वादेरालोकादिवृत्तित्वज्ञानरहन्यकालीनाया आलोकेनानुमिनुयामित्याद्यिच्छाया अविरोधित्वोपप

१५

नयेच वास्तवालोकादिवृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्य चोपेक्षणं॰ धूमत्वादेरालोकाधिकवृत्तित्वाद्यथ हृद्दशायां धूमे नानुमितीच्छाया आलोकलिं
गकानुमित्साविरोधित्वमिहामेव॰ विरोधित्वं च तादृशेच्छाया धूमत्वादेरालोकत्वादिविरुद्धत्वेथ हृद्दशायामेव॰ वस्तुतस्तु॰ इष्यं नालोकइत्यादिज्ञा
नशून्यकालीनानामालोकोऽइष्यमित्यादिज्ञानकालीनानां वा इच्छानां तत्तद्व्यक्तित्वेन भेदकूट एव स्यात् तत्र्येण प्रतिबंधकतावच्छेदके नुप्रवेश
नीयः॰ तेनोक्तकल्पे कालांतरीण पुरुषांतरीयज्ञानवारणाय स्वसमानकालीनत्वस्वसामानाधिकरण्ययोर्न विशेषणताध्रौव्यात् स्वपदेन
फलीभूतानुमित्सापादानेथा हृद्दशाया हृद्दशानुमितिदशायां कचिदपि धर्मेनालोकाधिकवृत्तित्वज्ञानं च सिध्यति तत्र स्वसमानाधिकरणत्वसमान
कालीनालोकत्वादिविरुद्धत्वज्ञानाविषयधर्मवल्लिंगकत्वप्रकारकानुमित्साभिन्नानुमित्साभावरूपकारणाप्रसिद्धेः॰ स्वत्वाननुगमेन का
र्यकारणभावस्य तत्तदनुमितिव्यक्तिविश्रामश्चेति परास्तं आलोकोऽइष्यमित्यादिज्ञानविशिष्टत्वेनालोकोनइष्यमित्यादिज्ञानविरहविशि
ष्टत्वेनैव वा इष्यत्वादिमल्लिंगकत्वप्रकारकेच्छाअनुगमय्य तद्भेदस्तादृशप्रतिबंधकतावच्छेदककोटौ निवेशनीयाः॰ वैशिष्ट्यं चैककालावच्छि
न्नैकात्मवृत्तित्वं॰ भेदस्य व्याप्तिकव्याप्यवृत्तित्वोपगमात्॰ तादृशज्ञानशून्यकालीनानां इष्यणानुमिनुयामित्यादीच्छानां विशिष्टाभिन्नतया प्र
तिबंधकत्वोपपत्तिः॰ सामानाधिकरण्यसंबंधेन वैशिष्ट्यानिवेशान्न पुरुषांतरीयज्ञानमादाय दोषः॰ इष्यत्वावच्छिन्ने नानुमिनुयामित्याका

प०गु०
२६
16

रिकाणां द्रव्यत्वांशे लिंगतावच्छेदकत्वावगाहीच्छानां तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिंगकत्वप्रकारकत्वं विषयतायामे
व तत्र द्रव्यत्वावच्छिन्नत्वभानात् लिंगांशे द्रव्यत्वानवगाहनात् अतस्तथाविधेच्छानामालोकत्वावच्छिन्नलिंगकानुमितिविरोधित्वमक्षतमेव आ
लोकत्वाद्यवच्छिन्नेनानुमिनुयामित्यादीच्छानां तादृशानुमित्यविरोधित्वोपपत्तये चालोकत्वविशिष्टलिंगकत्वाद्यप्रकारकत्ववदालोकत्वावच्छिन्नलिंगक
त्वाद्यप्रकारकमप्यालोकत्वाद्यवच्छिन्नानुमितिप्रतिबंधकतायां निवेशनीयं एवं तेन वह्निमनुमिनुयामित्याद्याकारकालिंगविशेषजन्यत्वानवगा
हीच्छानामविरोधित्वोपपत्तये किंचिल्लिंगकत्वप्रकारकत्वनिवेशनं तदर्थं च किंचिल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविष
यकत्वावच्छिन्नविशेष्यताकत्वं अतो धूमेनेंधनमनुमिनुयामित्याद्याकारकेच्छानामालोकादिलिंगकवह्न्याद्यनुमितिविरोधित्वं इदमत्राव
धेयं आलोकलिंगकधूमलिंगकानुमितिर्जायतामित्याद्याकारकेच्छाकाले केवलालोकलिंगकपरामर्शादनुमितिर्न जायते तथाविधानुमि
तेस्तादृशेच्छाया अविषयत्वात् उभयादिलिंगकानुमितेरेव तद्विषयत्वात् एवं धूमलिंगकवह्न्यनुमितिरालोकलिंगकवह्निघटोभयानुमितिश्च जाय   २६
तामित्याद्याकारकेच्छाकाले घटाद्यनुमितिसामग्र्यामसत्त्वां आलोकपरामर्शसत्त्वे वह्न्यनुमितिर्न जायते घटाद्यविषयकानुमित्युभयस्यातादृशे
च्छाविषयासिद्धेः अतस्तथाविधेच्छानां तत्र तत्र प्रतिबंधकतानिर्वाहाय तत्तल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रका

रताभिन्नप्रकारत्वानिरूपितविशेष्यताशून्यत्वमेव तल्लिंगकत्वाप्रकारकेऽस्यनेन न विवक्षणीयं· उक्तस्थले चालोकलिंगकवह्न्यनुमितित्वादिप्रकार
तानिरूपितविशेष्यता· तादृशप्रकारतातिरिक्तधूमलिंगकत्वादिप्रकारतानिरूपितैव· समूहालंबने एव प्रकारताभेदेन विशेष्यताभेदात्· अन्यथा
समूहालंबनत्वस्तादृशेच्छावैलक्षण्यानुपपत्तेः। तथा च तादृशेच्छानां तथाविधप्रकारत्वानिरूपितविशेष्यताशून्यत्वेन प्रतिबंधकत्वनिर्वाहः· आ
लोकेनानुमितिर्जायतां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छानां तादृशविशेष्यताशून्यत्वविरहेऽपि आलोकलिंगकान्या
नुमितिसामग्रीकालीनतथाविधेच्छानां तत्तद्व्यक्तित्वेन पृथक्प्रतिबंधकत्वोपगमान्न तादृशानुमितिसामग्रीदशायां तादृशेच्छावलादालोकलिंग
कानुमित्यापत्तिः। पर्वते वह्निमनुमिनुयां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छायाः प्रामाणिकत्वे तत्रालोकपरामर्शादनु
मितिर्भवत्येव· एवं च लिंगविशेषजन्यत्वानवगाहीच्छानां विशेषणदले नैव वारणे धूमेन घटमनुमिनुयामित्यादीच्छावारणमेव विशेष्यदलप्र
योजनं· तद्र्थश्च· न किंचिल्लिंगकत्वप्रकारतानिरूपितत्तत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वं· तथा सति धूमेनानुमि
नुयामित्याद्याकारकैर्विशेषणाविषयकानुपरक्तानुमितीच्छानामसंग्रहापत्तेः। किंतु किंचिल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमिति
त्वादिप्रकारताभिन्नप्रकारकत्वानिरूपितविशेष्यताकत्वमेव विशेष्यदले न विवक्षणीयं· धूमेन घटमनुमिनुयामितीच्छावद्धूमेन वह्निघटोभ

प०मा०
१७
17

यमनुमिनुयामित्याद्यिच्छाया अपि आलोकलिंगकवह्न्याद्यनुमित्यविरोधित्वमिष्टमेव। सिद्धौ च तादृशेच्छायाअनुमेजकतयासिद्धिकाले तादृशे
च्छावत्त्वादसत्त्वादालोकलिंगकानुमितीच्छायां न तादृशानुमितिरिति दिक्। एकलिंगकेच्छाकाले नोभयलिंगकपरामर्शजन्यानुमितेर्व्यभिचार
वारणप्रकारः पुनरग्रे दर्शयिष्यते। ननु स्वविषयसजातीयज्ञानेच्छायाविरोधित्वमदृष्टचरमित्यत आह कामिनीजिज्ञासावदिति। यथा कामिनी
प्रत्यक्षादिगोचरेच्छा घटादिविषयकप्रत्यक्षादिप्रतिबंधिका तथेत्यर्थः। पृथक्प्रतिबंधिकेति। पक्षतासमवधानदशायामनुमित्युत्पादप्रयोजिकेत्य
र्थः। तथा चोक्तस्थले पक्षतासत्त्वेपि क्षतिविरहात्तदिष्टमेवेति भावः। ननु कामिनीजिज्ञासास्थले कामिनीभिन्नघटादिविषयकज्ञानानुत्पादस्य
सर्वानुभवसिद्धतया तत्र तस्याः प्रतिबंधकत्वमस्तु। सिद्धत्वसत्त्वे धूमादिलिंगकानुमितीच्छादशायामालोकलिंगकवह्न्यनुमित्यनुत्पादस्य
नानुभविकः। तथा सति तुल्ययुक्त्या घटानुमित्साप्रत्यक्षादिगोचरेच्छादशायामपि तदनुत्पादस्य तथात्वप्रसक्तेः। न ह्युत्तकमपि विशेष
मीक्षामहे इत्यभिसंधायोक्तापत्तिवारणाय कल्पांतरमनुसरति यद्वेति। तथा चान्यलिंगकानुमितीच्छायाः प्रतिबंधकत्वमसंभावि
तमेवेति भावः। तत्रेति। अन्यलिंगकानुमितीच्छास्थल इत्यर्थः। तल्लिंगकानुमितीच्छा। तल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्ष
विषयकत्वाद्यवच्छिन्नानुमितिविशेष्यताकेच्छा। वाच्या। सिसाधयिषापदेन विवक्षणीयेत्यन्वयः। नन्वेवं लिंगविशेषानुपरक्तानुमिती

१७

छाकाले सिद्धेः समसामग्र्यनुमित्सनुपपत्तिरत आह तदन्यमात्रलिंगकेति· धूमेनालोकेन चानुमिनुयामित्यादिसमूहालंबनेच्छाकाले आलोका
दिलिंगकानुमित्युपपत्तये मात्रेति· तथा च तल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाप्रकारिकासती यत्किंचिल्लिंगकत
त्साध्यविशिष्टतत्पक्षविषयकानुमितित्वप्रकारिकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारिकेऽर्थः। लिंगवि
शेषोपरक्तानुमितीच्छासंग्रहाय सत्यंतं· आलोकेनेंधनमनुमिनुयामित्याद्याकारकेच्छावत आलोकलिंगकवह्न्याद्यनुमित्यापत्तिवारणा
य तत्र साध्यादिनिवेशः। लिंगविशेषानुपरक्तानुमितीच्छाकाले पर्वते वह्निमनुमिनुयां धूमेनेंधनमनुमिनुयामित्याद्याकारकसमूहालंबनेच्छाका
ले चालोकादिलिंगकानुमित्युपपत्तये विशेष्यदलं। यत्किंचिज्ज्ञानं जायतामित्यादीच्छावारणाय चरमदलं। यद्यप्यालोकधूमोभयलिंगकवह्नि
विशिष्टपर्वतविषयकानुमितिर्जायतां आलोकेन वह्निविशिष्टघटोभयपक्षविषयकानुमितिर्धूमेन वह्निविशिष्टपर्वतविषयकानुमितिश्च जा
यतामित्यादीच्छावारणाय तल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यताकान्यत्व
मेव सत्यंतदले निवेशनीयं· तथा च लिंगविशेषानुपरक्तानुमितीच्छायां तादृशविशेष्यताकान्यत्वविरहात् किंचिल्लिंगकत्वादिप्रकारकत्वनि
वेशनमफलमेवेति· तथाविधविशेष्यताशालित्वेनैवेच्छाया उत्तेजकत्वमुचितं· तथापि तादृशविशेष्यताशालीच्छायामेव तदन्यमात्रेसा

प० ग०
१८
18

दिग्रंथतात्पर्यान्नासंगतिः। शेषं पूर्वोक्तदिशावसेयं· नन्वेवं धूमालोकादिलिंगकानुमितिसाधारण्यैकपक्षताया असंभव इत्यत्रेष्टापत्तिमाह लिं
गविशेषेणापीति· लिंगभेदेनापि पक्षत्वं भिन्नमेवेत्यर्थः। अपिः साध्यादिभेदसमुच्चायकः। तत्प्रदर्शनं च दृष्टांतार्थं· तथा च साध्यादिभेदेने
व लिंगभेदेनापि पक्षताभेदो न क्षतिकर इति भावः। नन्वेवं लिंगभेदेन पक्षताया अननुगमात्तस्याव्यभिचारेणानुमितिरूपानुगतका
र्ये हेतुत्वासंभवः। न च तत्तत्साध्यकत्वादिवत्तत्तल्लिंगकत्वस्यापि कार्यतावच्छेदकेनिवेशान्न व्यभिचार इति वाच्यं· तावताप्यालोकादिलिं
गकानुमितीच्छाधीनधूमालोकोभयादिविषयकसमूहालंबनपरामर्शजन्यानुमितौ धूमादिलिंगकानुमितीच्छाविरहविशिष्टसिध्यभावस्य
व्यभिचारस्य दुर्वारत्वात्· तादृशानुमितावपि धूमादिलिंगकपरामर्शजन्यत्वरूपधूमलिंगकत्वस्याक्षततत्वात्· न च यत्र धूमलिंगकेच्छाया उ
त्तेजकता तत्रालोकलिंगकानुमितीच्छानामपि तत्तल्लिंगकपरामर्शविशिष्टानां उत्तेजकत्वोपगमान्नोक्तस्थले व्यभिचार इति वाच्यं· त
थासति धूमलिंगकेच्छाया अपि धूमलिंगकपरामर्शविशिष्टाया एवोत्तेजकत्वौचित्यात्· सर्वसाधारण्यैकपक्षताया एव सुवचत्वाल्लिंगवि
शेषेणापीति ग्रंथासंगतेरिति चेन्न· धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमितित्वमेव तादृशासिध्यभावजन्यतावच्छेदकं· ता
दृशासिद्धिविशिष्टत्वं च स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरोत्पत्तिकत्वसंबंधेन· उक्तसमूहालंबनस्थलीयानुमितिस्तु त

१८

ध्याविधसिद्धिविशिष्टत्वेतिनतत्रव्यभिचारइतिभावः।सिद्धिकालेऽसत्त्वात्तल्लिंगकसिसाधयिषायांउक्तस्थलेऽरवनधूमपरामर्शादनुमित्सा
पत्तिः धूमादिलिंगकेच्छाविरहविशिष्टसिध्यभावादिघटितधूमादिपरामर्शघटितकारणस्तोमस्यकार्योत्पत्तिप्रयोजकत्वोपगमात् समूहा
लंबनस्थले आलोकपरामर्शादिघटितसामग्रीतएवकार्योत्पत्तिनिर्वाहात् धूमलिंगकत्वस्यार्थसमाजग्रस्तत्वमेवेतिध्येयं· अथात्राप्यव
हितोत्तरत्वमवश्यंततीयक्षणसाधारणंस्वध्वंसाधिकरणकालध्वंसानधिकरणत्वेसतिस्वाधिकरणकालध्वंसाधिकरणत्वं तु एवं वाच्यं·
अन्यथायत्रक्रमेणसिध्यात्मकधूमालोकोभयलिंगकपरामर्शधूमलिंगकेच्छानुमितयस्तत्रानुमित्सोत्पत्त्यधिकरणक्षणस्यालोकलिं
गकेच्छाविरहविशिष्टसिध्यधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेनतदुत्पत्तिकानुमितेरुक्तसंबंधेनतादृशसिद्धिविशिष्टा
स्त्वात्· तादृशसिध्यभावस्यव्यभिचारस्यदुर्वारत्वात्· एवंचयत्रक्रमेणसिध्यात्मकधूमपरामर्शधूमलिंगकेच्छानुमितयस्तत्रैतस्यानुमिते
धूमादिलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टत्वेनपक्षताकार्यतानुपपत्तिरितिचेन्न· तादृशसिद्धिविशिष्टत्वं· स्वाधिकरणक्षणध्वंसा
त्यधिकरक्षणोत्पत्तिकत्वसंबंधेनवाच्यं· उक्तसमूहालंबनस्थलेचधूमलिंगकेच्छाक्षणस्यालोकलिंगकेच्छाविरहविशिष्टसिध्यधिक
रणत्वात्तादृशक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वमनुमितेरितिनव्यभिचारः।एवंसिध्यात्मकधूमपरामर्शजन्यानुमितेर्धूम

प० ग०
२९
19

लिंगकेछाविरहविशिष्टसिध्युधिकरणप्रथमक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वाभावात्पक्षताकार्यत्वनिर्वाहः। अथवास्वाव्यव
हितपूर्वकालावच्छिन्नतल्लिंगकेछाविरहविशिष्टसिध्यभावाधिकरणताविशिष्टसमवायएवताद्दशसिध्यभावकार्यतावच्छेदकसंबंधइ
तिनकोपिदोषः। अथवास्ववृत्तिकृतिमत्वस्ववृत्तिप्रागभावप्रतियोगित्वस्वसामानाधिकरण्यैतत्त्रितयसंबंधेनताद्दशसिद्धिविशिष्टान्यत्वं
ताद्दशसिध्यभावजन्यतावच्छेदकमितिनकोपिदोषः। अथवाताद्दशसिद्धिविशिष्टत्वं· ताद्दशस्वाधिकरणक्षणत्वावच्छिन्नध्वंसाधिकर
णक्षणध्वंसानधिकरणंयत्ताद्दशस्वाधिकरणध्वंसाधिकरणंतदुत्पत्तिकत्वसंबंधेनवाच्यं· उक्तसमूहालंबनेचताद्दशसिध्यधिकरणक्ष
णत्वावच्छिन्नध्वंसाधिकरणमनुमित्युत्पत्तिक्षणएवेतितद्ध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरितिनव्यभिचारः। सिध्या
त्मकधूमेपरा×मात्र×मर्शजन्यानुमितधूमलिंगकेछाविरहविशिष्टसिध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणद्वितीयक्षणध्वंसा
नधिकरणक्षणोत्पत्तिकत्वविरहात्· तद्विशिष्टसिद्धिविशिष्टान्यत्वमव्याहतमिति· एवंयत्रधूमेपरामर्शविशिष्टत्वरूपाप्रामा×प
रामर्शानंतरंतदप्रामाण्यावगाहिआलोकपरामर्शस्तदनंतरमनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभावविशिष्टधूम×ण्यज्ञाना
भावविशिष्टधूमपरामर्शजन्यतावच्छेदकाक्रांतत्वादव्यवहितपूर्वक्षणेचाप्रामाण्यज्ञानाभावविशिष्टपरामर्शासत्वेनप्रसक्तस्य

१९

व्यभिचारस्यैतादृशैर्विशेषिभिरेव वारणमवसेयं॰ लिंगोपधानमते च न कदाचिदनुपपत्तिः। तन्मते धूमविशिष्टपर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्यनु
मितित्वादेरेव धूमलिंगकेच्छाविरहविशिष्टसिध्यभावादिजन्यतावच्छेदकत्वात्॰ उक्तसमूहालंबनस्थले चालोकवान्पर्वतो वह्निमानित्याका
रकानुमितेरेवोपगमेन व्यभिचारानवकाशादिति॰ धूमेनानुमिनुयामालोकेनानुमिनुयामित्यादिसकलेच्छासाधारणरूपं योगेन सिसा
धयिषाणां सिद्ध्यनुत्तेजकत्वं॰ तथा च धूमालोकादिलिंगकनिखिलानुमितिसाधारणी एकैव पक्षता। उक्तस्थलेतिप्रसंगभंगाय च प्र
तिबंधकांतरमेव कल्प्यत इत्याशयेनाह तल्लिंगकेति॰ असत्यां सिद्धावन्यलिंगकानुमितीच्छासत्त्वेनुमित्युपपत्तये सिद्धिकालीनेति॰ सा
मानाधिकरण्यसंबंधेन सिद्धिविशिष्टेत्यर्थः। समूहालंबनेच्छाकाले सिद्धिसत्त्वेनुमित्युपपत्तये तल्लिंगकानुमितीच्छाविरहविशिष्टे
ति॰ धूमलिंगकत्वादिप्रकारत्वातिरिक्तप्रकारत्वानिरूपितविशेष्यताकेच्छाविरहविशिष्टसत्त्वर्थकं॰ तेन धूमालोकोभयलिंगकवह्न्य
नुमितिर्जायतामित्याद्याकारकेच्छाबलात्सिद्धिकालेन केवलालोकलिंगकानुमितिप्रसंगः। न वालोकेन वह्निघटोभयानुमितिर्धूमेन व
ह्न्यनुमितिर्जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वे केवलालोकादिलिंगकपरामर्शात्केवलवह्न्याद्यनुमित्यापत्तिः। एवमपि तादृशप्रकार
त्वानिरूपितविशेष्यताकान्यत्वस्येच्छाविशेषणत्वोपगम एव समूहालंबनेच्छास्थलेनुमितिरुपपादयितुं शक्यते तथापि ज्ञानेच्छयो

प०ग०
२०
20

युगपदुत्पादमंगीकुर्वतां नवीनानां मते यत्र सिध्युत्पत्तिकाले धूमलिंगकानुमितीच्छायास्तद्वितीयक्षणे चालोकलिंगकानुमितीच्छाया उत्पादस्त
त्रालोकलिंगकानुमित्युपपत्तये तादृशविशेष्यताशालीच्छाविरहवैशिष्ट्यपर्यंतानुधावनं। लिंगविशेषानुपरक्तानुमितीच्छानामपि निरुक्तो
त्तेजकतावच्छेदकाक्रांतत्वात्तादृशेच्छायाः प्रतिबंधकत्वाप्रसक्तेरन्यलिंगकेति। संपाततायातं। सिद्धिविशिष्टेच्छामात्रस्य प्रतिबंधकत्वे सिद्धि
विशिष्टघटतदनुमित्यादिगोचरेच्छाकालीनाननुगतेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेनाभाववानां निवेशनीयतया महागौरवमिति तत्साध्यविशिष्टतत्पक्षवि
षयकत्वप्रकारकानुमितीच्छात्वेनैव विशेष्यीभूतेच्छानिवेशो वाच्यः। वस्तुतस्तु। तत्साध्यविशिष्टतत्पक्षविषयकत्वादिप्रकारकत्वमप्यन्यलिं
गकानुमितीच्छासामान्ये निवेशनीयं। घटादीच्छाकालीनाननुगतेच्छानां भवन्मतेपि सिद्ध्युत्तेजकतावच्छेदकत्वतया साम्यात्। मन्मते तत्र घटा
दीच्छासाधारणरूपेणैवानुमित्साया उत्तेजकत्वोपगमादुक्तस्थले पक्षतानिर्वाहे न गौरवं। तादृशाननुगतेच्छानामन्यलिंगकेच्छायामिवोत्ते
जकत्वात्। अत्र च एतादृशगुरुधर्मावच्छिन्नाभावस्य लिंगभेदेनानंतकारणतानां पक्षताकारणत्वांतरस्य च कल्पनामपेक्ष्य लिंगभेदेन त
त्तल्लिंगकानुमितीच्छाविरहविशिष्टसिद्धित्वरूपलघुधर्मावच्छिन्नाभावस्यैव हेतुताकल्पनस्य साधुत्वेन पूर्वमतस्यैव सम्यक्तयाथाकारो
निर्भरसूचनायेति वदंति। परे तु। अन्यलिंगकत्वप्रकारकानुगतानुमित्सासमवहितसिद्धिदशायामननुगतानुमितीच्छावत्तात्तल्लिंग

२०

प

कानुमित्सुपपत्तये सिद्धौ तादृशेच्छाभावकूटवैशिष्ट्यनिवेशेन पूर्वमते गौरवं॰ एतन्मते चान्यलिंगकानुगतानुमित्सात्वरूपोत्तेजकधर्मादेव तत्
त्रानुमित्स्यरूपतेः सिद्धौ तासामभावानिवेशात्॰ न चैतन्मतेप्यन्यलिंगकानुमित्साप्रतिबंधकताया मेव तासामुत्तेजकत्वस्यावश्यकतया साम्यमि
ति वाच्यं॰ यत्रैव यत्रानुगतानुमित्सात्मकसमूहालंबनरूपा एवान्यलिंगकानुमितीच्छास्तत्रान्यलिंगकानुमितीच्छायां तादृशेच्छाव्यक्तिभेदा एव निवेश
नीयाः। सिद्धौ तु सामानाधिकरण्यसंबंधेन तद्व्यत्ताभावाः॰ तत्र च तत्तत्कालीनसंयोगादिव्यक्त्यभावानां निवेशमादाय विनिगमनाविरहेण गौरवं॰
न च पूर्वमतेपि तत्तत्सिद्धिव्यक्तिभेदा एव सिद्धौ निवेशनीयाः॰ न तु तत्तदिच्छाभावा इति न विनिगमनाविरहावकाश इति वाच्यं॰ सिद्धेरनंतरं यत्र तादृ
शसमूहालंबनेच्छाव्यक्तीनामुत्पत्तिस्तत्र तादृशासिद्धिभेदानां सिद्धेर्निवेशे इच्छोत्पत्तिकालेनुमित्स्यापत्तेः। ज्ञानेच्छयोर्युगपदुत्पादमते इच्छासामग्र्या
ज्ञानाविरोधित्वात्॰ यादृशस्थले च सिद्धिजननकाले प्रतिबंधकोत्तेजकयोरेकस्याप्यपरव्यक्तेश्च तत्पूर्वमुत्पत्तिस्तत्राद्वितीयक्षणे नुमित्सुपपत्तये एतत्
मतेपि तत्तत्सिद्धिभेदा अन्यलिंगकेच्छाविशेषणीभूतासिद्ध्यंशे निवेश्यंते॰ न त्वन्यलिंगकेच्छायां तन्निवेशनं सिद्धौ वा तदिच्छासत्ताभावाः अतो न तत्कालीन
संयोगादिव्यक्त्यभावनिवेशमादाय विनिगमनाविरहप्रसंग इत्याहुः। साधकमानपदस्य सिद्धिकारणपरत्वे पूर्वोक्तदोषप्रसंगात् तद्व्याचष्टे साधकेति॰ सा
ध्यवत्त्वनिश्चयः। प्रकृतसाध्यवैशिष्ट्यावगाहिनिश्चयः। पाषाणमयो वह्निमान् पर्वतस्तेजस्वी इत्याद्याकारकासमानप्रकारकनिश्चयदशायां पर्वतो वह्नि

प०ग० २१ 21

मानित्याद्याकारकानुमितेरनुभवसिद्धतयायथाश्रुते च तदनुपपत्तेः प्रकारविशेषसंनिवेशाय तत्पिपाषाणमयत्वादिनेति। तत्र पर्वते। तस्य। वह्नेः धर्मित्वसाध्य
त्वयोः। उद्देश्यत्वविधेयत्वयोः। अनुप्रवेशनीयावित्यस्य पक्षताशरीरे इत्यादिः। तथा च पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवह्नित्वा
द्यवच्छिन्नविधेयताकानुमितिं प्रति तद्रूपावच्छिन्नविशेष्यतानिरूपिततत्तत्संसर्गावच्छिन्नतत्तद्धर्मावच्छिन्नप्रकारताशालिनिश्चयस्त्वावच्छिन्नस्य सिसाधयिषा
विरहविशिष्टस्याभावो हेतुरिति पर्यवसितं। पर्वतो वह्निमानित्यादिसिद्धिदशायां वह्निमान्पर्वतो घटवानित्याद्यनुमित्युदयात्तत्प्रतिबध्यतावच्छेदकप्रकार
तामुपेक्ष्य विधेयतानिवेशनं। विधेयता च वह्निमनुमिनोमीत्याद्यनुव्यवसायनियामकः पक्षतावच्छेदकत्वातिरिक्तो विषयताविशेषः। स्वरूपतः पर्वतत्ववह्नि
त्वादिप्रकारकसिद्धिदशायां जातिमान्वह्निमान्पर्वतो जातिमत्वानित्याद्यनुमित्युत्पत्तेः शुद्धपर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां अधिकवि
षयिण्याः सुंदरपर्वतो वह्निमान्पर्वतः सुंदरवह्निमानित्याद्यनुमितेरुत्पत्त्याश्च प्रतिबध्यदशि पर्वतत्वाद्यवच्छिन्नेत्यादिना किंचिदविशेषितपर्वतत्वादि
पर्याप्तावच्छेदकताकत्वमेव विवक्षणीयं। तदर्थः। पर्वतत्वादिनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपकत्वं। पर्वतो वह्निमानित्यनुमि २१
तौ जातिमान्वह्निमान्पर्वतो जातिमत्वानित्यादिसिद्धेरप्रतिबंधकतया प्रतिबंधकादृश्यपि पर्वतत्वाद्यवच्छिन्नेत्यादिना किंचिदविशेषिततदवच्छिन्न
त्वमेव विवक्षणीयं। तदर्थश्च। निरवच्छिन्नतद्धर्मावच्छेदकताकत्वमिति ध्येयं। ननु पर्वतत्वावच्छिन्नविशेष्यताकानुमितौ पर्वतत्वावच्छिन्नविशेष्य

ताकसिद्धेः प्रतिबंधकत्वेपर्वतत्वेनैकपर्वतविशेष्यकसिद्धिदशायांतेनरूपेणान्यपर्वतेपिसाध्यानुमित्यनुदयापत्तिरतआहयद्वेति· पर्वतत्वांशेव
च्छेदकत्वावगाहियत्किंचिद्व्यक्तिविशेष्यकसिद्धिदशायांतेनरूपेणधर्म्यंतरेनुमित्यनुत्पादस्य निर्विवादत्वात्सामानाधिकरण्येनेति· एकत्र· एकधर्मि
णि· अनुमित्सासत्त्वेविशेषणाभावादेवविशिष्टाभावनिर्वाहात्धर्मिविशेषनिवेशनमफलमतोविनाप्यनुमित्सामिति· अन्यधर्मिणिधर्मिविशेषानंतर्भावे अन्यत्रेति·
पिवक्ष्यमाणरीत्यासामानाधिकरण्येनसिद्धिदशायामवच्छेदकावच्छेदेनानुमितौबाधकाभावात्ताद्दशेति· सामानाधिकरण्यमात्रावगाहीत्यर्थः। धर्मिवि
शेषेपीति· तथाचपर्वतत्वाद्यवच्छिन्नतत्पर्वतोद्देश्यकानुमितौपर्वतत्वाद्यवच्छिन्नतत्पर्वतादिविशेष्यकसाध्यवत्तानिश्चयत्वेनप्रतिबंधकत्वंकल्प्यतइति
भावः। अन्यथातदानींताद्दशानुमितेरानुभविकत्वविरहेणधर्मिविशेषानिवेश्यतइत्यनुषज्यते· अनुमितिर्द्विविधा· पक्षतावच्छेदकसाध्ययोः सामानाधि
करण्यमात्रावगाहिनी· तयोरवच्छेद्यावच्छेदकभावावगाहिनीच· अवच्छेद्यावच्छेदकभावोपिकिंचित्स्वरूपसंबंधविशेषः· यथामूलावच्छिन्नोवृक्षःसं
योगीत्यादौमूलादिसंयोगाद्योः तत्राद्यादृशस्यतस्यदुर्वचत्वात्· तदवगाहिन्यामेवचानुमितौपक्षतावच्छेदकदेशकालावच्छेदेनबाधग्रहस्यविरोधितया
बाधस्यव्यभिचारासिद्ध्यसंकरंमणिकृद्व्यवस्थापयिष्यति· किंचिद्व्याप्यव्यापकभावः यथापृथिवीरूपवतीत्यादौपृथिवीत्वाद्यरूपाद्योः पक्षतावच्छे
दकस्यसाध्यांशेधर्मिपारतंत्र्येणप्रकारस्यावच्छिन्नत्वंसंबंधविधयाभासते· तोवच्छेदकावच्छेदेनानुमितेर्नपर्वतत्वावच्छिन्नवह्निमान्पर्वतइ

१ व्यापकत्वं। २ अनतिरिक्तवृत्तित्वं॥

३ व्यापकत्वेन

२/[illegible]साध्यांशेपक्षविशेषणतापन्नस्य
[illegible]तावच्छेदकस्यावच्छेद्यतासंबंधेन
[illegible]कारत्वंपक्षतावच्छेदकावच्छिन्नत्वेनतं
[illegible]दिशिष्टसाध्य[illegible]नवाविशेषितस्यसंयो
गादेः पक्षांशेसाध्यसंसर्गत्वंवेत्यन्यद्
तत्॥[illegible]

२ प[illegible]

प०ग०
२२
22

व्यापकत्व

त्वाकारकता॰ अथवा पक्षांशे संबंधविधया भासमानसाध्यसंबंधे संबंधितावच्छेदकतया पक्षतावच्छेदकावच्छिन्नत्वभानं॰ पक्षतावच्छेदकावच्छि
न्नत्वविशिष्टसाध्यीयत्वेनैव वा पक्षे तत्संबंधभानमित्यन्यत्र विवेचितं॰ अवच्छेदकावच्छेदेनानुमितिः सा च पक्षतावच्छेदकसामानाधिकर
ण्यमात्रावगाहि सिद्धिदशायामपि जायते॰ न्यूनविषयकसिद्धिदशायामधिकविषयकानुमितेः सर्वानुभवसिद्धत्वात्॰ अत एव यत्रा
वच्छेदकावच्छेदेनानुमितिरुद्देश्या तत्र नांशतः सिद्धसाधनं दोषः मणिकृतैव पृथिव्यामितरभेदानुमानेऽंशे घटे सिद्धसाधनमाशंक्य सर्वपृ
थिवीतरभिन्नत्वकदेशप्रतीतेरभावात् पक्षतावच्छेदकनानात्वे हि तदिति समाधास्यमानत्वात् इत्यतस्तदेवोपपादयति पक्षतावच्छेदक
स्येति॰ सामानाधिकरण्येन॰ सामानाऽधिकरण्यमात्रेण॰ तदवच्छेदेन॰ पक्षतावच्छेदकावच्छेदेन॰ सिद्धेः। सिद्धेरेव॰ सामानाधिकरण्यमात्रावगा
हि सिद्धेः प्रतिबंधकत्वमेवकारव्यवच्छेद्यं॰ अयं भावः। पर्वतो वह्निमानित्यादिसिद्धिदशायां पर्वतः सुंदरवह्निमानित्याद्यनुमितेरुत्पत्त्या विधेयता
वच्छेदकतायाः पर्याप्तिः प्रतिबध्यतावच्छेदककोटौ निवेशनीया॰ एवं संयोगादिना वह्नेः सिद्धावपि संयुक्तसंयोगादिना वह्न्यनुमित्युत्पत्त्या संसर्गताया
मपि पर्याप्तिर्निवेशनीया॰ एवं संयोगादिना साध्यस्य दंडोपलक्षितपुरुषादेः सिद्धावपि विशिष्टनिरूपितसंयोगादिना दंडिपुरुषाद्यनुमित्युत्पत्त्या सं
सर्गतावच्छेदकताया अपि पर्याप्तिर्निवेशनीया॰ एवं चावच्छेदकावच्छेदेनानुमितौ शुद्धवह्नित्वादौ शुद्धसंयोगादौ वा विधेयतावच्छेदकतायाः संसर्गता

२२

वच्छेदकतायावाऽपर्याप्तत्वात्तादृशानुमितेर्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिबध्यत्वमिति॰ प्रांचस्तु व्यापकतायाः संसर्गतया
भानेमानाभावात्पक्षतावच्छेदकाक्रांततयावच्छिन्नव्यक्तिविषयकानुमितिरेव पक्षतावच्छेदकावच्छेदेनानुमितिरिति वदंति॰ तन्मते मणिकारीकान्याय
नाशतः सिद्धसाधनस्यानुगतरूपावच्छिन्ननानाव्यक्तिपक्षकानुमितावदोषत्वे पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेवासिद्धिसामान्यप्रति
बध्यतावच्छेदककोटौ निवेशनीयं॰ न च विषयभेदेन विषयताभेदात्पक्षतावच्छेदकावच्छेदेनानुमितेर्विधेयतानामपि नानाव्यक्तिपक्षकस्थलेऽप्र
सिद्धिरिति वाच्यं॰ उद्देश्यतासंबंधेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमेन निर्वाहात्॰ दीधितिकारस्य त्ववच्छेदकाव
च्छेदेनानुमितौ अवच्छेद्यावच्छेदकभावस्य स्वरूपसंबंधरूपस्य व्याप्यव्यापकभावस्वरूपस्यापि भानमनुमतं॰ भागासिद्धेर्दोषत्वनिर्वाहार्थं
पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदेन हेतुमत्ताज्ञानं कारणतायाऽऽवश्यकत्वात्॰ शिखराविशिष्टः पर्वतो वह्निमान्निलादौ शिखर
स्वरूपसंबंधरूपा
रेहेतोस्तत्संबंधस्य चावच्छेदकताविरहेण हेत्वसिद्धेरावश्यकत्वेऽसाशक्य पक्षतावच्छेदकेनातिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्या
मनुमितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुतायाः भागासिद्धेर्दोषतार्थमुपगमेऽपि स्वरूपसंबंधरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षता
वच्छेदकावच्छेदेन हेतुमत्ताज्ञानापेक्षानापेयत इति समाधानस्य स्वयमवच्छेदकत्वयोर्वस्तुतो भेदादित्यग्रे वक्ष्यमाणत्वात्॰ एवं व्याप

दीधितिकृदनुमतत्वे

प०ग०

२२

23

कताभानस्य तदननुमितत्वे पर्वतत्वसामानाधिकरण्येन एकत्रसाध्यादिसिद्धावपि तत्रैकत्रेऽप्यनेनैवावच्छेदकावच्छेदेनयासिद्धिस्तत्वा
भावत्वाभेतल्लाभप्रयोजनकस्य सामानाधिकरण्येनेत्युपादानस्यानर्थक्यात्· युज्यते चैतद् देवमतं· प्राचीनमतेप्युक्तयुक्त्या विधेयताव संयुक्तसंयोगादिना·
च्छेदकत्वादिपर्याप्तिनिवेशस्यावश्यकत्वात् तादृशोद्देश्यताकान्यत्वस्याधिकस्य निवेशनीयतया गौरवात्· एवं सिद्धिसामान्यशू
न्यं दशायामवच्छेदकावच्छेदेनानुमितावनुत्पद्यमानायां सिद्ध्यभावघटितत्कार्यतावच्छेदकीभूतपक्षतावच्छेदकव्यापकान्यानुमितित्वा
वच्छिन्नस्यापत्तेश्च· अस्मन्मते च सिद्धिसामान्याभावकालीनायामवच्छेदकावच्छेदेनानुमितौ विशिष्टवैशिष्ट्यबुद्धित्वे विशिष्टसंयोगेनापर्याप्तौ
विषयताविशेषस्य शुद्धवह्नित्वे शुद्धसमवायेन वापर्याप्तोपि विषयताविशेषः स्वीक्रियते· एकत्रास्य न एकविषयो विषयताद्वयोपग
मे क्षतिविरहादिति सिद्धिसामान्याभावकार्यतावच्छेदकानवच्छिन्नोत्पत्तिरित्येव· न चावच्छेदकावच्छेदेनानुमितौ व्यापकतायाः संसर्गत
याभानोपगमे तादृशानुमितावच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणताकल्पने गौरवं· एतन्मते तत्तत्पर्वतोद्देश्यकानुमि २२
तौ तत्तत्पर्वतविशेष्यकपरामर्शस्य हेतुतयार्थवशाद् यावत्पर्वतविषयकपरामर्शात्तथाविधानुमितेरुत्पादात्तादृशानुमितौ पराम
र्शस्य स्वतंत्रहेतुताकल्पनात्· व्यापकतायाः संसर्गविधयाभानस्य क्वचिदप्यनभ्युपगमादिति वाच्यं· यत्रैकः परामर्शः कतिपयप

अन्यतरपरामर्शस्य

वर्तविषयकः। अन्यश्च तदितरयावत्पर्वतविषयकस्तत्राप्यवच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः। न चेष्टापत्तिः। अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानं विनाव
च्छेदकावच्छेदेनानुमित्यनुत्पादस्य सर्वसिद्धत्वात्। तत्र च कस्यापि परामर्शस्य भवन्मते सिद्ध्या अवच्छेदकावच्छेदेन हेतुमत्तावगाहिताया असंभवात्।
एवं यत्र पक्षतावच्छेदकताघटकसंबंधेन पक्षतावच्छेदकमवृत्ति तत्र तेन संबंधेन पक्षतावच्छेदकाक्रांतताप्रसिध्यानुमितिद्वैविध्यानुपपत्तिश्चैतन्मते। अ
पि चावच्छेदकावच्छेदेनानुमितावच्छेद्यावच्छेदकभावरूपाधिकविषयानवगाहने सामानाधिकरण्यमात्रेण सिद्धिदशायां तादृशानुमित्युत्पत्तौ वीजा

अवच्छेद्यावच्छेदेन

सामानाधिकरण्येन सिद्धिदशायां॥

भावः। सिध्यविषयीभूतधर्मिविषयकत्वस्य तद्बीजत्वे तथाविधसिद्धिदशायां कतिपयपर्वतादिविषयकानुमितेरप्युत्पादौचित्यात्। तस्मादवच्छे
द्यावच्छेदकभावावगाहिज्ञानमेवावच्छेदकावच्छेदेन ज्ञानमित्युच्यत इति। अथ मणिकृता पक्षतावच्छेदकेकयंशतः सिद्धसाधनस्यादोषत्वोपगमेपि तदि
तरप्राचीनैरनुमितिमात्र एयांशतः सिद्धसाधनस्यापि दोषत्वमुपेयते। अत एव तेषां मतमालंब्य मणिकृतापि शब्दानित्यत्वाद्यनुमाने ध्वन्यादावंशतः सि
द्धसाधनवारणाय वर्णात्मकत्वादिविशेषणं पक्षे निवेशितं। अत एव गंधादिरूपपक्षतावच्छेदकस्य पृथिव्यामितरभेदादौ साध्ये हेतुतानाचार्यै
रनुमन्यते। व्याप्तिग्रह एव हेतुरूपपक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यभानेन सिद्धसाधनात्मकत्वपृथिवीविषयकानुमितेरप्ययोगात्।
न चांशे सिद्धावपि अधिकधर्मिविषयतया यावत्सर्वतादिविषयकानुमित्युत्पाद उचितः। अधिकधर्मिविषयकानुमितेः सिद्धिदशायामुत्पाद

प०प०
२४
25

वागनिसेसादिसिद्धिदशायामनिसेधाञ्जनसीदित्यादिसमूहालंबनानुमित्युत्पादस्योचितस्यात्· नहितत्र कस्याप्यनुमितिः। नवीनैरपिपक्षतावच्छेदके केयेएवां
शतःसिद्धसाधनस्यादोषत्वोपगमात्· एवंच नवीनमतएवावच्छेदकावच्छिन्नत्वावगाहितदनवगाहिअनुमितिभेदेनपक्षताभेदस्यस्वीकरणीयतयागो
रवं· नच विशिष्टबुद्धौधर्मितावच्छेदकव्यापकत्वभानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिबाधदशायांतादृशबाधविषयधर्मिवि
षयिण्याःकतिपयधर्मिविशेष्यकानुमितेरविसकलधर्मिविषयकानुमितेरप्युत्पादोचितस्यात्· अवच्छेदकावच्छेदेनानुमितावुद्देश्यायामप्यंशतो
बाधस्यादोषतापत्तिरितिवाच्यं· सामानाधिकरण्यावगाहिन्याःविशिष्टबुद्धेःसमानविषयकतयाविपरीतनिश्चयप्रतिबंधकतायाःप्राचामनुम
ततयांशतोबाधस्यदोषत्वोपपत्तेः। एवंचयावत्पक्षविषयकानुमितौयावत्पक्षविशेष्यकहेतुमत्ताज्ञानापेक्षयाभागासिद्धेरपिदोषतानिर्वाहः
एवंयत्रसकलपर्वतानांनैकपरामर्शविषयता· अपितुपरामर्शद्वयविषयता· तत्रयावत्पर्वतविषयकानुमितिरूपावच्छेदकावच्छेदेनानु
मितिःप्राचीनमतेऽइष्टैव· नवीनमतेपितत्रतादृशानुमितेरावश्यकत्वात्· इतिअवच्छेदकावच्छेदेनानुमितौतादृशपरामर्शस्यहेतुत्वाकल्पनेनापि
तन्मतेलाघवं· मैवं· अवच्छेदकावच्छेदेनविशिष्टबुद्धौव्यापकत्वभानानुपगमेव्यापकत्वभानस्यसामानाधिकरण्यपनेविपरीतज्ञानप्रतिबंधकत्वा
संभवेनतत्प्रयोजकत्वस्यदुर्वचत्वापत्तेः। नचैकरूपेणसमानधर्मिविषयकत्वमेवविपरीतज्ञानप्रतिबंधकत्वेबीजं· तथासतिपार्थिवगंध

तत्पर्वतत्वे परित्यागपूर्वक
पर्वतत्वावच्छिन्नतत्प
र्वत[illegible]विशेष्यकव्याहित्र
कारकबुद्धे[illegible]पर्वतत्वा
वच्छिन्नतत्पर्वतधर्मि
कव २४। हिमत्तानि
श्चयो विरोधी

प्रतिबंधकता

अवच्छेदकावच्छेदेन

त्वाद्यवच्छेदेन जलमाहत्तित्वादिनिश्चयस्य विशुद्धगंधत्वाद्यवच्छेदेन तन्निश्चयस्यैव विगंधो जलवृत्तिर्नवेत्यादि गंधत्वादिसामानाधिकरण्यमात्रेण जलवृत्ति

त्वादिसंशये विरोधिताप्रसंगात् उभयोरेव निश्चययोर्गंधत्वादिनातदाश्रययावद्धर्मिणि यावद्यभावावगाहितायाअविशेषात्· विरोधिविषयत्वाविशेषे

अधिकभानस्या

णधर्मितावच्छेदककोटौ अविरोधितावीजत्वाभावात्· नव्यनये उभयनिश्चयविषययव्यापकतयोर्भेदेन विशेषसंभवात् एतेनावच्छेदकावच्छेदेनानुमितौ व्यापक

त्वभानापेक्षया लाघवात्तयावद्धर्मिवृत्त्यननुगतैकविषयताभ्युपगम एवोचितः। तदन्यविषयतैव सिद्धिसामान्यप्रतिबध्यतावच्छेदिका· सिद्धिसामान्याभा

वकालीनानुमितौ च तादृशी एकैकधर्मिमात्रवृत्तिविषयतापीष्यतइति न कोपि दोष इति परास्तः· पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सि

द्धिदशायां सामानाधिकरण्यमात्रावगाहिन्यनुमितिर्न जायते· उभयोरेवासिध्योः पक्षतावच्छेदकवृत्तिसाध्यसंबंधरूपत उभयसामानाधिकरण्याव

गाहितया तादृश्यनुमितेस्तदतिरिक्तानवगाहित्वात् तस्तथाविधानुमितौ उभयविधसिध्योरेव प्रतिबंधकत्वं दर्शयति· तत्सामानाधिकरण्येनेति·

तत्सामानाधिकरण्यमात्रेण· पक्षतावच्छेदकसामानाधिकरण्यमात्रेण· अवच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहितया तद्व्यावर्त

नाय यावच्छेद्यावच्छेदकभावावगाहित्वम्यवच्छेदार्थं मात्रपदं· अवच्छेद्यावच्छेदकभावानवगाहित्वं च न सिध्यभावजन्यतावच्छेदककोटौ निवेशनीयं उक्त

दिशा आपत्तिसंभवात्· पर्याप्तिनिवेशाद्दोषोपपत्तेर्वैयर्थ्यमित्यवधेयं· सिद्धिमात्रस्येति मात्रपदं कृत्स्नार्थकं· तथा च पक्षतावच्छेदकसामानाधिक

प०ग०
२५
25

रण्येन तदवच्छेदेन च सिद्धेरित्यर्थः। प्रतिबंधकताया उभयविधसिद्ध्योः संसर्गतादीनां पर्याप्तिमनिवेश्यैकरूपेणैव। यद्युभयसाधारण्यं निश्चयत्वं शक्य
ते निर्वक्तुं अन्यथा पुनः पृथगिति ध्येयं। यत्तु सामानाधिकरण्येनानुमितौ तथाविधसिद्धेः अवच्छेदकावच्छेदेन सिद्धिव्यावृत्तरूपेण प्रतिबंधकत्वेऽपि त
त्रावच्छेदकावच्छेदेन सिद्धेर्न प्रतिबंधकताधिक्यं। अवच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबंधकत्वे कल्प्ये ऽवच्छिन्नसंयोगादिपर्याप्तिसंसर्गता
कत्वस्य प्रतिबध्यतावच्छेदके ऽवश्यं निवेशनीयतया ऽवच्छिन्नत्वातिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठसंसर्गताकत्वस्यैव च तदर्थतया त
स्य शुद्धसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबंधकतयैवोपपत्तेरिति। नूत्नमतं। सामानाधिकरण्येनानुमिनुयामवच्छेदकावच्छे
देनानुमिनुयामिति साध्याकारकेच्छानां पृथक्पृथगुत्तेजकतायाः वक्ष्यमाणतया पृथक्प्रतिबंधकताकल्पनस्यावश्यकत्वात्। ननु तादृशसि
द्धिदशायां पक्षतावच्छेदकावच्छेदेनानुमितिर्जायतामित्याकारकसिसाधयिषासत्त्वे ऽसति चावच्छेदकावच्छेदेन हेतुपरामर्शे सामानाधिकरण्य
मात्रावगाहिपरामर्शात्तादृशानुमितेरापत्तिः। तथाविधसिसाधयिषासत्त्वेन पक्षतायाः अक्षतत्वादित्यत आह हेत्वंचेति। इत्थं च। उक्तयुक्त्या पक्ष
तावच्छेदकावच्छिन्नत्वतत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धेः पृथक्पृथक्प्रतिबंधकत्वे चेत्यर्थः। लिंगभेदन्यायः इति। यथा तत्तल्लिंगका
नुमितौ तत्सिद्धेः प्रतिबंधकतायां तत्तल्लिंगकानुमितीच्छेवोत्तेजिका न त्वन्यलिंगकानुमितीच्छापि। तथा पक्षतावच्छेदकसामानाधिकरण्यमात्रा

२५

वगाहिनीमनुमितिं प्रतिसिद्धेः प्रतिबंधकतायां तादृशानुमितीच्छैवोत्तेजिका नत्वन्यविधानुमितीच्छेति स्वीकरणीयमिति नातिप्रसंग इत्यर्थः। यदि प
र्वते वह्निरित्याद्याकारकनिश्चयानंतरं पर्वतो वह्निमानित्याद्याकारकानुमितिर्जायते तदा साध्यविशेष्यकानुमितौ साध्यविशेष्यकसिद्धेः प्रति
बंधकत्वेपि सामान्यतः साध्यपक्षवैशिष्ट्यावगाह्यनुमितौ तादृशसिद्धित्वेन नैकं प्रतिबंधकत्वं कल्पनीयमपि विशिष्यैव प्रतिबंधकताद् उ
यमगत्या गौरवस्याहेयत्वादित्याशयवानाह साध्यविशेष्यकेति। द्वयोः समानविषयकत्वे विशेष्यविशेषणभाववैपरीत्यमकिंचित्करमि
त्यभिप्रायेणानिर्भरसूचनाय प्रामाणिकत्वे इत्युक्तं। मणिकारस्य तु समानप्रकारकसिद्धेरेव प्रतिबंधकत्वमनुमतं। पृथिव्यामितरभेद इति साध्यवि
शेष्यकानुमित्यनंतरं तदात्मकविशेषणज्ञानसहकृतात् व्यतिरेकिपरामर्शादेव पृथिवीतरभिन्नेति पक्षविशेष्यकानुमितेरुत्पादस्य तेन व्यतिरेकि मथा
ग्रंथे वक्ष्यमाणत्वात्। पक्षविशेष्यकेवेति। तथा च विशिष्यप्रकारताविशेषं निवेश्यैव प्रतिबध्यप्रतिबंधकभावः कल्पनीय इति भावः। तत्र
तादृशानुमित्यभावस्य प्रामाणिकत्वे तूभयविधज्ञानसाधारणपक्षसाध्यवैशिष्ट्यावगाहिनिश्चयत्वस्यातिप्रसक्तस्य सुवचत्वे उभयवि
धसिद्ध्योरनुगतरूपेणैव प्रतिबंधकता। प्रतिबध्यतावच्छेदकं तु पक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिकमेव न त्वनुगतं। पक्षविशे
ष्यकसाध्यप्रकारकानुमितिर्जायतां साध्यविशेष्यकपक्षप्रकारकानुमितिर्जायतामित्याकारिकयोरिच्छयोः पृथक् पृथगुत्तेजकत्वानुरो

प०ग०
२६
26

धात्· एवंचसाध्यविशेष्यकसिध्यनंतरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वेचतुल्यन्यायादिति पर्यवसानादित्थंतस्यहेतुः समानाकारक
सिद्धेरिति· अन्यूनाकारकसिद्धेरित्यर्थः। पर्वतःसुंदरवह्निमानित्यादिसिद्धिदशायामपिन्यूनविषयिण्याः पर्वतोवह्निमानित्याद्यनुमितेरुत्पादाद
धिकविषयकसिद्धेरविरोधित्वेवच्छेदकावच्छेदेनसिद्धेः सामानाधिकरण्येनानुमितौप्रतिबंधकताविरहस्यासंगतेः। एवंजातिशक्तिवादे
गोत्वत्वेनगोव्यक्तित्वानुमानंसिद्धसाधनान्नसंभवतीति अविशिष्टहेतुनाविशिष्टसाध्यसाधनएवनसिद्धसाधनानवकाशोनतुविशिष्टे
नाविशिष्टसाधनेपीतिजासाध्यत्वयनुमानपक्षमाक्षिप्यमिश्रा अर्थापत्यावातत्सिद्धिरितिमूलमवतारयामासुः। ननुसाध्यविशेष्यकानुमि
तिस्तावन्नसर्वानुभवसिद्धा पर्वतोवह्निमानित्याकारकानुमितेरेवानुभवात्· व्याप्यविशेष्यकपरामर्शादपिपक्षविशेष्यकानुमित्युत्पादस्यप
रामर्शद्वयस्यानुगतरूपेणहेतुतावादिनोपिसंमतत्वात्· किंत्वत्रसिद्धसाध्यकस्थलेविशेषणज्ञानादिविरहेणसाध्यविशेषणकानुमितेर
नुपपत्यासाध्यविशेष्यकानुमितिरुपेयते· एवंचपक्षविशेष्यकसिद्धिदशायामपितादृश्यानुमितेरप्रामाणिकतयातदनभ्युपगमेक्षतिविर
हात्तांत्वेतिसाध्यपक्षवैशिष्ट्यावगाहिज्ञानत्वेनोभयविधसिद्धिसाधारण्येनापिप्रतिबंधकत्वंसंभवतीत्यभिप्रेत्यमतांतरमाहतादृशेति· साध्य
विशेष्यकानुमितिमित्यर्थः। सिद्धिमात्रं· पक्षविशेष्यिकासाध्यविशेष्यिकाचसिद्धिरित्यर्थः। ननूक्तंखलुसाध्यज्ञानदशायामपिसाध्यविशे

२६

षिकानुमितिरप्रामाणिकी तत्र साध्यविशेषणकानुमितेरेव संभवादिति तादृशानुमितिप्रतिबंधकतायां पक्षादिविषयितायाः सिसाधयिषा
विरहस्य निश्चयत्वस्य च निवेशनं गौरवायेत्यभिसंधायाह साध्यप्रसिद्धिरिति· साध्यतावच्छेदकप्रकारकज्ञानमित्यर्थः। तेनेतरव्यापकीभूताभा
वप्रतियोगिपृथिवीत्ववती पृथिवीत्याद्युपरामर्शाद्द्रव्यत्वादिना साध्यज्ञानसत्वेपि पृथिव्यामितरभेद इत्याकारकानुमितेर्नानुपपत्तिः। नचतत्र
त्पृथिवीतरभिन्नेसेतादृशानुमितेः संभवः। विशेषणतावच्छेदकीभूतेतरभेदत्वादिप्रकारकज्ञानविरहात्· अथेतरभेदत्वादिप्रकारकज्ञानस्य यदी
तरभेदत्वावच्छिन्नमुख्यविशेष्यकज्ञानत्वं प्रतिबध्यतावच्छेदकं तदा तथाविधज्ञानदशायामितरभेदत्वाद्यवच्छिन्नपक्षकप्रमेयत्वाद्यनुमितेरप्य
नुपपत्तिः। तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवेशेपि इतरभेदः प्रमेयः पृथिवी इतरभिन्नेत्यादिसमूहालंबनानुमितेर्गोत्वाभावो गोत्वाभा
ववानित्याद्यनुमितेश्चानुपपत्तिः॥ अत्र केचित्। पृथिवीतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणी विशेष्यता
वच्छेदकताभिन्ना प्रकारतैव विधेयता· साध्यविशेष्यकानुमितौ च ततोन्या· तथाच प्रकारताभिन्नविधेयतैव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदि
केति नानुपपत्तिरित्याहुः। तन्न· प्रकारताविशेषस्य विधेयतात्वोपगमे तेजोभेद इत्याकारकतेजोभेदादिसाध्यकानुमितेर्जलभेदादिविधेय
कत्वापातात्· नचाधेयतासंबंधावच्छिन्नप्रकारताव्यावृत्तं तदिति वाच्यं· तथासति आधेयतासंबंधेन जलभेदादिसाध्यकतादृशानुमितेरपि

प०ग०
२७
27

तद्विधेयकत्वानुपपत्तेः। यदि च यत्राधेयत्वं साध्यतावच्छेदकसंबंधः तत्र विधेयत्वमतिरिक्तमित्युच्यते तदा तत्संबंधेन जलभेदादिसाध्यकानु
मितौ प्रकारताभिन्नविधेयताशालिन्यां साध्यप्रसिध्यभावव्यभिचारो दुरुद्धरः। वस्तुतस्तु तद्धर्मावच्छिन्नाप्रकारकत्वे सति तद्धर्मावच्छि
न्नविधेयकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकं साध्यप्रसिद्धिस्थले च साध्यप्रकारिकैवानुमितिर्जायते न तु
तदप्रकारिकेति न तत्र व्यभिचारः। अत एव साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबंधकत्वादेव प्रसिद्धसाध्यकस्थले
अभावरूपसाध्यप्रसिद्धिस्थले नन्वभावसाध्यकस्थलेऽप्यर्थः। तत्र परामर्शस्य नियमतः साध्यघटितव्याप्तिविषयकतया साध्यविशे
ष्यकानुमितेरप्रसिध्या साध्यप्रसिद्धिप्रतिबंधकतायाः कल्पयितुमशक्यत्वादुपष्टंभकत्वासंगतेः। स्वनिरूपितप्रकारतानवच्छेदकत्ववि
शिष्टविधेयतावच्छेदकतापर्याप्त्यधिकरणत्वरूपविषयतानिष्ठप्रसाससानुमितिप्रतिविषयतावच्छेदकतासंबंधेन सर्वसाधारण्येन
प्रतिबंधकताया आपाततस्तदुक्तिसंभवेपि साध्याघटितव्यतिरेकव्याप्तिविषयकपरामर्शघटितसामग्र्या एव साध्यविशेष्यकानुमित्यु
त्पादप्रयोजकतायास्तत्सत्वात् भावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसिध्या साध्यविशेषणकानुमितेः साध्यविशेष्यकत्वे
तादृशप्रतिबंधकताया अप्रयोजकत्वादुपष्टंभासंगतितादवस्थ्यात्। यत्तु य[illegible]च महानसीयवह्निमात्रविषयकः परामर्शस्तत्र पक्षधर्मता

२७

वलात्पर्वतीयवह्निर्भासमानोविशेषणज्ञानविरहेणाविशेष्यतयैवभासतेइतिभावसाध्यकस्थलेपिसाध्यविशेष्यकानुमितिसंभवइतिन
नुएवं सामान्यलक्षणायाःप्रत्यासत्तित्वमतेमहानसीयवह्निविषयकपरामर्शेपर्वतीयवह्निभानप्रयोजकस्यदुर्लभत्वात्·नचस्मरणात्मकपराम
र्शेकदाचिदुद्बोधकविरहात्तद्भानसंभवः।उद्बोधकस्यफलबलकल्प्यत्वात्·विशिष्टविशेषणकबुद्धौविशेषणज्ञानंहेतुनायानिर्युक्तिकत्वात्
विशेषणतावच्छेदकप्रकारकज्ञानस्यचावश्यकत्वात्·पर्वतीयवह्निविषयकपरामर्शादपिवह्नित्वेनतद्वह्निविशेषणकानुमितिसंभवाच्च·इदमत्रा
वधेयं·साध्यप्रसिद्धिप्रतिबंधकतायामपिसाध्यविशेष्यकानुमितित्वप्रकारकेच्छायाउत्तेजकत्वमावश्यकं·अन्यथापक्षविशेष्यकसिद्धिद
शायांतादृशेच्छासत्वेसाध्यविशेष्यकानुमितेरपलापापत्तेः।सिध्यसमवहितसाध्यप्रसिद्धिदशायांसाध्यविशेषणकानुमितेःसंभवेनतत
एवोद्देश्यसंशयनिवृत्त्यादिसंभवेसाध्यविशेष्यकानुमित्यनुपगमोपिनक्षतिकरइत्यभिसंधायैवसाध्यप्रसिद्धेस्तद्विरोधित्वमुररीकृतंग्रं
थकृता·प्रकृतेचसाध्यविशेषणकानुमितेस्तादृशसंभवेनतादृशानुमित्यपलापानौचित्यात्·तथाचयत्रासिध्यसमवहितासाध्यप्रसि
द्धिस्तत्रचानुमित्सातत्रव्यतिरेकिपरामर्शात्साध्यविशेष्यिकासाध्यविशेषणिकानुमितिरापद्येत·नह्येकविधादेवपरामर्शात्द्विविधानु
मितिरानुभविकी·तस्माद्व्यतिरेकिपरामर्शात्साध्यप्रसिद्धिदशायामपिसाध्यविशेष्यिकायाएवानुमितेःस्वीकारःसमुचितः।सिद्धिप्रतिबंध

प॰ग॰
२८
28

कत्वापेक्षयासाध्यप्रसिद्धिप्रतिवंधकतायामवच्छेदकलाघवमप्यकिंचित्करमेव॰ व्यतिरेकिपरामर्शात् क्वचित्साध्यविशेषणिकानुमितिस्वीकारे
तादृशानुमितिंप्रतिव्यतिरेकिलिंगकत्वान्व यिलिंगकत्वादिप्रकारकानुमित्सां एवंगुरुतेजकीकृत्य सिद्धेःप्रतिवंधकताद्वयेनैवगौरवात्॰ परेतुअप्र
सिद्धसाध्यकस्थले साध्यविशेषणिकैवानुमितिर्जायते॰ इतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेपि विशेष्येविशेषणांतरंचवि
शेषणांतरमितिन्यायेनैव पृथिवीतरभिन्नाइत्याद्यनुमितिसंभवात्॰ नचलाघवानवकाशः तादृशानुमितिंप्रत्येवसाध्यप्रसिद्धिप्रतिवंधक
तायाअवश्यकल्पनीयत्वादितिवाच्यं॰ तथाविधानुमितौयादृशीविषयितातस्याः साध्यप्रसिद्धिकालीनविशिष्टवैशिष्ट्यावगाह्यनुमितिसा
धारण्योपगमात्॰ साध्यविशेष्यकानुमित्यनुपगमेसाध्यप्रसिद्धिप्रतिवंधकतायाएवाकल्पनात्॰ नचसिद्धिकालेतथाविधानुमितेर्वारणायतत्र
सिद्धेःसाध्यप्रसिद्धेर्वाप्रतिवंधकत्वकल्पनाधिक्यमितिवाच्यं॰ विशिष्टवैशिष्ट्यानुमितिस्थलीयसिद्धिप्रतिवंधकतयैवोपपत्तेः इतरभेदत्वादि
नेतरभेदादिविधेयकानुमितित्वस्यतत्स्थलीयप्रतिवध्यतावच्छेदकस्योभयसाधारणत्वादिति॰ यत्तुविशिष्टवैशिष्ट्यावगाह्यनुमितौविशिष्ट
वैशिष्ट्यावगाहिनीसिद्धिरेवाविरोधिनीनतुकेवलंविशेष्येविशेषणमित्यादिरीत्याजायमानापिसातथा॰ तस्याःसंसर्गांशेविशिष्टानिरूपितत्वानव
गाहितयान्यूनविषयकत्वात्॰ एवंचकेवलंविशेष्येविशेषणमितिन्यायेनानुमितेरुपगमेतादृशप्रसिद्धिदशायांतस्यावारणायतत्रतादृशसि

२८

द्धेर्विरोधित्वमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारेण। न तत्स्वीकारेपि विशिष्टवैशिष्ट्यानवगाहिसाध्यविशेष्यकानुमितेरनभ्यु
पगमेन प्रतिवध्यप्रतिबंधकभावसाम्यादिति। तदपि तुच्छं। विशिष्टनिरूपितवैशिष्ट्यभानमात्रविरोधिबाधादिकाले केवलं विशेष्ये विशेषणमितिमा
येनानुमितेः सर्वसंमतत्वया तत्र तादृशासिद्धेः प्रतिबंधकतायाआवश्यकत्वे तत्साध्यविशेष्यकानुमितिस्वीकर्तुरधिकप्रतिबंधकताकल्पनस्य दुर्वा
रत्वादिति। यदि च विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिन्यपि विशिष्टविशेषणज्ञानमपेक्षितं तदा तुल्ययुक्त्या विशिष्टविशेष्यकज्ञा
नेपि विशिष्टविशेष्यकज्ञानहेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरप्यप्रसिद्धसाध्यकस्थले न संभवति। न च विशेष्यज्ञानस्य
विशिष्टबुद्धावहेतुतया तद्विशेषस्यापि न तद्विशेषहेतुतेति वाच्यं। सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानव्यभिचारेण सामान्यहेतुत्वा
संभवेपि तुल्यरूपोभयविशेषणावगाहिज्ञानस्याप्येकविशिष्टेऽपरविशेषणकत्ववारणाय विशेषणे हेतुताया आवश्यकत्वात्। अन्य
था विशेषणज्ञानस्यापि विशिष्टधीहेतुतायाउच्छेदात्। अत एव विशिष्टवाक्यार्थविशेष्यकशाब्दबोधेऽवांतरवाक्यार्थज्ञानापेक्षा। न च
साध्यविशेष्यकानुमितौ तुल्यरूपयोरेव पक्षविधेयतावच्छेदकयोः साध्यांशे प्रकारतानत्वेकविशिष्टांशेऽपरस्येति न विशिष्टसाध्यज्ञा
नापेक्षेति वाच्यं। निर्विशेष्यतावच्छेदकानुमितेरनुभवविरुद्धत्वात्। प्रसक्तस्य च निर्धर्मितावच्छेदकस्याप्यभ्युपगमात्। प्राथमिकाभा

प०गा०
२९
49

वपक्षे प्रतियोग्यधिकरणयोरभावविशेषणतयाभानोपपत्तिः। तथा च साध्यविशेष्यकानुमितिर्निर्युक्तिकैवेति वदंति· अथ जलव्याप
कीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शाद्धित्वादिरूपविशेषणज्ञानं विनास्वरूपतस्तत्प्रकारिकापृथिव्यां जलभे
दइत्याकारानुमितिरेव कथमुत्पद्यत इति चेन्न· कथंचित्तत्र जलभेदत्वमात्रपुरस्कारेणैवाभावानुमित्युपगमादित्यादिति कृतं पल्लवितेन· ननु सिसा
धयिषाविरहविशिष्टसिध्यभावस्य पक्षतात्वेपि संदेहवत्परामर्शपूर्वमित्याद्यग्रंथेन सिसाधयिषापक्षतापक्षोक्तस्य व्यभिचारस्यासि
द्धिकालीनानुमितिस्थले तादवस्थ्यं· सिसाधयिषानाशे विशिष्टप्रतिबंधकस्यानुमित्यव्यवहितप्राक्क्षणेऽसत्त्वादित्याक्षेपे य उप
तिसमाधानमाह अत्र चेति· व्याप्तिस्मरणादीत्यादिनानुमित्या द्वितीयक्षणे यत्र पक्षधर्मताज्ञानं तत्स्थलीयतादृशज्ञानपरिग्रहः। पूर्वेति·
व्याप्तिस्मरणादिपूर्वकालीनेत्यर्थः। परामर्शदशायामसत्त्वात् सिद्धौ विशेष्याभावादेव विशिष्टाभावनिर्वाहे नानुमित्यनुपपत्तिरतः पराम
र्शकाले च सिद्धिसत्त्व इति· अनुमित्यंतरेति· परामर्शाद्वितीयक्षणे तदव्यवहितप्राक्क्षणे वेत्यादिः। तदुत्पत्तिप्रकारश्चास्ताधःप्रदर्शि
तः। एवं च सिसाधयिषापक्षतापक्षे सिसाधयिषाविरहपीत्यादिदोषाद्वेहेय इति भावः। ननु सर्वत्र पुनरनुमित्योत्पत्तौ मानाभाव इत्य
त आह तथैवेति· अनुमित्यंतरोत्पत्त्यैवेत्यर्थः। कारणीभूतस्येति· तथा च तादृशविशिष्टाभावात्मककारणं विनानुपपत्तिरेवास

गा
२९

द्धिस्थलीयविशिष्टाभावनिर्वाहकानुमित्सांतरोत्पत्तौमानमितिभावः। एतन्मतमेव दीधितिकृतोपि निर्भरः। मिश्रादिमतस्य गौरवकवलितत्वादि
तिध्येयं। मिश्रमतमाह अन्येत्विति। त्रिक्षणांतरितायामपीति। द्विक्षणव्यवहितायां क्षणत्रयव्यवहितायां चेत्यर्थः। अनुमित्सायां। अनुमित्सो
त्पत्तौ। तेनैकक्षणांतरितायामप्यनुमित्सायां यत्रानुमितिस्तत्राप्यनुपपत्तिसत्वेन तदनभिधानेन्यूनता। एवं प्रथमकल्पे सिसाधयिषोत्पत्ति
क्षणारारभ्यक्षणचतुष्टयात्मककालस्यैव विवक्षणीयत्वात्त्रिक्षणानंतरानुमित्सास्थलेनुमित्यनिर्वाहश्चेति दूषणद्वयानवकाशः। एवं
चानुमित्सोत्पत्तेः चतुर्थक्षणे पंचमक्षणे वानुमितिदर्शनादित्यर्थः। वाच्या। सिसाधयिषापदेन विवक्षणीया। सा च। योग्यता च। स्वोत्पत्त्यनंतर
मिसस्य स्वप्रागभावोत्तरमित्यर्थः। स्वस्य उत्पत्तिर्यस्मादिति व्युत्पत्त्या स्वोत्पत्तिपदस्य सिसाधयिषाप्रागभावपरत्वात्। अन्यथा सिसाधयि
षोत्पत्तिकाले योग्यतानुपपत्त्या तद्वितीयक्षणेनुमितेरनिर्वाहात्। सिद्ध्यनुत्पादश्च असिद्धिप्रागभावः। तथा च स्वप्रागभावध्वंसविशिष्टस्व
विषयसिद्धिप्रागभाव एवानुमित्सायोग्यतेति पर्यवसितं। अनुमित्सापूर्वं तद्विषयीभूतसिध्यनंतरं चानुमितिवारणाय दलद्वयोपादानं।
न च नियामकाभावेनानागतानां यावदनुमितीनामेवानुमित्साविषयत्वसंभवात्स्वविषयीभूतैकानुमितावुत्पन्नायामपि भाविव्य
क्त्यंतरप्रागभावमादाय योग्यताप्रसंग इति वाच्यं। स्वविषयसिद्धित्वावच्छिन्नप्रागभावस्य विवक्षितत्वात्। अत एव स्वविषयेत्युक्तंय

अनुमितिदर्शना त्ताअ

किंतु अनुमित्सानंतर मितिकल्पे।

प०गा० ३०

30

त्किंचिद्विशेषध्वंसवतिकाले सामान्यधर्मावच्छिन्नप्रागभावासंभवेन सिद्धित्वावच्छिन्नप्रागभावस्य कदाप्यसत्त्वात्॥ सामान्यधर्मस्य प्रागभावप्र
तियोगितावच्छेदकत्वानंगीकारे पुनः स्वविषयसिध्यसमानकालीनत्वमेव प्रागभावविशेषणं देयं॥ व्यनुमितिघटानुमितिश्च जायतामित्या
दीच्छानंतरं घटानुमित्यादिरूपविषयासिद्धत्वपि बह्व्याद्यनुमितिस्तस्यासिद्धीति॥ प्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयमात्रकं॥ अनुमितेरो
त्तरं दिवसादिविलंबेनाप्यनुमितिप्रसंगादित्यन्वयः॥ अंतरानुत्पादेः मितु॥ स्वविषयसिद्धित्वावच्छिन्नप्रागभावासत्वेन योग्यताक्षतेनापि
त्तिसंभवदुत्पत्तोंतरानुमित्यनुत्पाद इति॥ द्वित्रिक्षणादिविलंबेनानुमितेरिष्टत्वात् दिवसादिविलंबेनेति॥ सिद्ध्यसत्वेनुमितेरिष्टत्वात् इंद्रिया
दिनानिर्णीत इति॥ लिंगेनानिर्णीते साध्येंतरानुमित्यनुत्पाद एव न संभवतीत्यतः इंद्रियादिनेति आदिनाशब्दादिपरिग्रहः॥ अनुमित्सेति॥ अनुमि
त्साधिकरणक्षणाव्यवहितोत्तरक्षणमारभ्य क्रमेण पक्षविषयकलिंगज्ञानव्याप्तिस्मरणयोरुत्पत्तौ सत्यामुत्सर्गतो यावता कालेन परामर्शो
त्पत्तिः अनुमित्सोत्पत्तिक्षणमारभ्य तत्क्षणपर्यंतं यावंतः क्षणाः यो वा तावन्मात्रक्षणावस्थायी स्थूलकालस्तत्समुदाय एव वेत्यर्थः॥ एवं च क्षण
चतुष्टयं तदधिककालानवस्थायिनः स्थूलकालाश्च योग्यतेति पर्यवसितं॥ तदनुगमश्च॥ स्वप्रागभावानधिकरणत्वस्वनाशाधिकरणसमय
ध्वंसाधिकरणसमयध्वंसानधिकरणत्वोभयसंबंधेन सिसाधयिषावत्कालत्वेन॥ न त्वननुगतेन तत्तत्कालत्वेन॥ गौरवात्॥ तत्तत्कालानेजक

३०

त्वापेक्षयानन्तरक्षिद्धिभेदानामेवनिवेशनौचित्यात्· योग्यतायाउत्तेजकत्वकल्पेपिवक्ष्यमाणायाःपूर्वानुमित्यावलादनुमित्युत्तरमनुमित्यापत्तेरसंगत्यापाताच्च·
तत्रानुमितिक्षणस्योत्तेजकताकल्पकाभावादितिध्येयं· अनुमित्सोत्तरंयत्रविलंवेनलिंगदर्शनादिकंततश्चपरामर्शः तत्रानुमित्सोत्पत्तिक्षणमारभ्यपरामर्शो
त्पत्तिपर्यंतस्थायीच्छादिरयौतितद्वारणायलिंगदर्शनादेरनुमित्साक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वमनुसृतं· यत्रानुमित्सोत्पत्तिद्वितीयक्षणेपक्षलिं
गव्याप्तिविषयकमेकंस्मरणंतदनंतरक्षणेपरामर्शोत्पत्तिस्तत्रक्षणत्रयमध्यएवपरामर्शोत्पत्त्या तदनतिरिक्तकालमात्रस्यतथात्वभ्रमवारणायक्रमे
णेति· अनुमित्सोत्पत्तिद्वितीयततीयक्षणयोर्लिंगदर्शनव्याप्तिस्मरणयोःक्रमेणोत्पत्तावपिकुतश्चित्प्रतिबंधकाद्यत्रविलंवेनपरामर्शोत्पत्तिस्तत्राधि
कक्षणानामपि · तथाविधत्वयातद्वारणाययोग्यतेति इति· तादृशव्याप्तिस्मरणानंतरक्षणेपरामर्शोत्पत्तावसतिविरोधिनीत्यर्थः। अनुमित्सनानुगुणक्ष
णव्यवधानविरहेपंचमक्षणेनुमितिरुत्पद्यतेननुतद्वयेपितथाविधक्षणव्यवधानादित्यतस्तत्सूचनायभंग्यातादृशकालविशेषोपादानंइत्यवधेयं·
ननुतथाविधकालस्योत्तेजकत्वेगौरवमित्यतआह फलवलेनेति· अनुमित्सानाशेनुमित्यात्मकार्योत्पत्त्यनुरोधेनेत्यर्थः। तथाकल्पनात्· तादृशकाल
स्योत्तेजकत्वकल्पनात्· यत्रतथाविधपरामर्शोत्पत्तिक्षणेनुमितिप्रतिबंधकबाधनिश्चयसमवधानमासीत्तदपगमश्चतद्वितीयक्षणेतत्रासिद्धो
सत्यांतदनंतरंचेदनुमितिःप्रामाणिकी· एवंयत्रानुमित्साद्वितीयक्षणेलिंगदर्शनसामग्रीसमवधानंतदनंतरंलिंगदर्शनादिक्रमेणपरामर्शोत्प

त्तिस्तत्र सिद्धौ सत्यामनंतरक्षणे नुमितिर्वा· तद्दोक्तापेक्षयाधिकस्य कालस्योत्तेजकत्वमावश्यकमित्यत आह अनुमित्सोत्पत्त्यनंतरमिति· अनु
मित्सोत्पत्तिक्षणमारभ्य तदुत्तर[illegible]रमित्यर्थः यावत्कालपर्यंतमनुमितिर्जायते इत्यर्थे तनेनान्वयः। अनुमित्सोत्तरमनुमित्सांतरोत्पत्त्यादिविलं
बेनापि सिध्यनंतरमनुमित्सुत्पत्त्या तावत्कालस्यानुत्तेजकत्वात् अनुमित्सानाशेपीति प्रागनुमित्साया मससामग्रीत्यर्थः। असत्यां सिद्धौ
अनुमित्सोत्तरं द्विक्षणादिविलंबेनाप्यनुमित्युदयात्· सिद्धौ सत्यामिति· प्रागित्यादिः। यावत्कालमध्ये· यावत्क्षणानंतरक्षणे· तावानेव कालः
तावत्क्षणाधि ○ कक्षणानवस्थायी· अनुमित्सया· अनुमित्सार्थकमिसाधयिसापदेन उपलक्षितः· विवक्षितः। अनुमित्साया योग्यताया उत्ते
जकत्ववत्सिद्धियोग्यताया अपि तुल्ययुक्त्या प्रतिबंधकत्वमुचितमित्याशयेनाह· यद्दिचेति· । सिध्यनंतरमिवेति शेषः तेनेनास्य वैयर्थ्य· द्वित्रि
क्षणमध्ये इति· द्विक्षणमध्ये त्रिक्षणमध्ये चेत्यर्थः। सिद्धेश्चतुर्थक्षणे पंचमक्षणे वेति फ· लितं· सिध्या· सिद्धिपदेन· तावान्· तन्नाशानं
तरमपि द्विक्षणस्थायी त्रिक्षणस्थायी वा· उपलक्षणीयः। विवक्षणीयः। ननु सिध्यनंतरं कियत्क्षणमध्ये नुमितिर्न जायते किं यत्क्ष
णानंतरं वा जायते इत्यस्य विशिष्य निर्णेतुमशक्यत्वात्कालस्य प्रतिबंधकत्वकल्पनमसंभवि· एवमुत्तेजककालस्यापि विशिष्य निर्णे
तुमशक्यतया तदुत्तेजकत्वमपि नेत्यत आह विशिष्येति· अवहितैः। सावधानैः। नियमः। निर्णयः। तथा च येषां विशिष्य तावत्का

लनिर्णयोभवतितेषामेव तत्र विशिष्यप्रतिबंधकत्वोपगमो भविष्यति· अन्येषांतु सामान्यत एवेतिभावः। केचित्तु ननु कालविशेषणांसिद्धि
सिसाधयिषाधिकरणकालत्वेन चेत्प्रतिबंधकोत्तेजकभावः। तदाधिकाधिककालस्यापितथात्वप्रसंगः। अनतिप्रसक्तानुगतधर्मांतरंउव
चमेवेत्यतआह। विशिष्येति· अनतिप्रसक्तानुगतविशेषणाविशेषणंनिवेशयेत्यर्थः। क्षणनियमः। कतिपयक्षणानामेवतथात्वं· नत्वधि
काधिकक्षणानामितिनियमनिर्वाहः। अवहितेः। निरुक्तिकुशलैः। सिध्युत्पत्तिक्षणमारभ्यक्षणचतुष्टयादेः। स्वप्रागभावानधिकर
णत्वस्वनाशाधिकरणसमयनाशाधिकरणसमयनाशानधिकरणत्वोभयसंबंधेन सिध्यादिमत्त्वमेवानुगमकमनतिप्रसक्तंचेति
भावइत्यपिव्याचक्षते· वदंतीत्यस्वरसस्सूचनाय· सचोक्तपरंपरायाः संबंधत्वेमानाभावात्तत्तद्व्यक्तित्वेनोत्तेजकत्वाभ्युपगमेउक्तदोषा
पातादिति· इच्छायाविषयसिद्धौसत्यांचरितार्थतयानोत्तरकालमनुमितिर्जन्यतइतितत्कारणायस्वविषयसिध्यनुपहितत्वेनेच्छाविशेषणी
या· तत्रतद्विषयसिद्धिदशायांपरामर्शेनुमित्सासमवधानसंभवेपतद्विशेषणमर्थवद्भवति· तच्चनघटते· इच्छापरामर्शयोर्युगपदुत्पादासंभवे
नानुमितिकालेएकतरविनाशावश्यकत्वादित्यतस्तद्दूषयति· अत्रचेति· सिद्धिप्रतिबंधकतावच्छेदककोटौचेत्यर्थः। तादृशेच्छाविषयेसिध्यनुपहि
तत्वंतद्विशेषणमित्यग्रिमेणान्वयः। निर्णयेच्छा· निर्णयत्वप्रकारकेच्छा· अनुमितित्वप्रकारकेच्छायाः प्रत्यक्षात्मकसिध्याऽचरितार्थतया

प. ग.
३२
32

तद्धत्ताताद्दशासिद्ध्यनंतरमप्यनुमित्युत्पत्तेः प्रकृततानुपयोगात्‌ · अनुमित्सोत्पत्तिकाले विशेषणज्ञानोत्पत्त्यसंभवेन तत्पूर्वमेव तद्धटितवि
शिष्टप्रत्यक्षसामग्रीसमवधानस्य वाच्यतया प्रत्यक्षसामग्र्या बलवत्त्वेनेच्छोत्पत्तिरेव न संभवतीत्यर्थः । पूर्वोक्तन्यायेनेति · अनुमित्सापूर्वकाली
त्पन्नेसाद्दृक्प्रकारेणेत्यर्थः । स्मरणे विशेषणज्ञानापेक्षाविरहादुक्तप्रयासं विनैवेच्छाद्वितीयक्षणे विशिष्टपक्षस्य स्मरणं निर्वहतीत्यभिसंधायाह स्मरणे
वेति · अनुमितित्वप्रकारकेच्छायामपि तद्विशेषणदानस्य प्रयोजनमाह यत्रचेति · साध्यव्याप्यविशिष्टपक्षस्मरणाऽनंतरमनुमितिरेव भविष्यतीति तद्वि
सतोनुमितिसामग्रीविघटनाय तथाविधस्मरणस्य साध्यविशिष्टपक्षविषयकत्वानुसरणं · तृतीयक्षणे साध्यस्य तद्व्याप्यस्य चानुमितेर्द्वितीयक्षणे सा
ध्यतद्व्याप्ययोरनुमित्सयोश्च निर्वाहाय साध्यव्याप्यतद्व्याप्यतदुभयानुमितिनिष्ठसाधनताविषयकत्वानुधावनं · साध्यानुमितेस्तदनंतरं पुनस्त
दनुमित्यापत्तेश्च संपादनाय साध्यानुमित्सायाः साध्यव्याप्यस्यापि निश्चिततया तदनुमितेः संपादनाय च साध्यव्याप्यानुमित्सायाः तत्तत्तयो
रित्यादिनानुसरणं अनुमित्साद्वितीयक्षणे साध्यस्यानुमितौ तदनंतरं तदनुमितिरिष्टैव · साध्यव्याप्यस्यानुमितौ च परामर्शस्याभावान्नाप
त्तिसंभव इत्यतस्तदनंतरमुभयानुमित्यनुसरणं · अनुमित्सोत्पत्तिक्षणावधिकक्षणचतुष्टयादिरूपयोग्यतायाउत्तेजकत्वमते · यत्र पर्वतो वह्निम
नुमिनुयामितीच्छानंतरं वह्निव्याप्यवान्पर्वत इति परामर्शस्तदनंतरं च पर्वतो वह्निमानित्यनुमितिः तदुत्तरमपि ताद्दशानुमित्यापत्तिः संभवतीत्यत आह्यो

३२

ग्यतेति॰ तदिच्छाविषयसिध्यनुपहितत्वं तदिच्छायां विशेषणं देयमिति शेषः। प्रत्यक्षात्मकसिद्धिसमवहितानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छा
बलादनुमित्युत्पत्तौ तदिच्छाविषयेति सिद्धेर्विशेषणं॰ विशेष्यतया अभिमतायामिच्छायां तद्विषयेत्यर्थः। अथ तादृशेच्छाया उत्तेजकीभूतसकलेच्छासाधार
ण्येनानुमितिगोचरेच्छात्वेन निवेशे प्रत्यक्षाद्यात्मकसिद्धेरपि निर्णयत्वादिप्रकारकानुमित्साविषयतया विषयान्तस्या व्यावर्तकताप्रसंगः।
तत्तद्व्यक्तित्वेन निवेशे च उत्तेजकीभूतेच्छाव्यक्तिसमसंख्याभावानां सिद्धौ विशेषणतया महागौरवं॰ तत्तदिच्छाविषयसिध्यनुपहिततत्तदिच्छा
या उत्तेजकतामपेक्ष्य लाघवात् तत्तत्क्षणावच्छिन्नेच्छात्वेन तथात्वकल्पनाप्रसंगश्चेति चेन्न॰ प्रागुक्तयुक्त्या इच्छाविषयतावच्छेदकतायाः प्रकृ
तसाध्यविशिष्टप्रकृतपक्षविषयकानुमितित्वादिपर्याप्तिनिवेशस्यावश्यकतया इच्छाविषयतावच्छेदकतापर्याप्त्यधिकरणरूपभेदेने
च्छायाः पृथक्पृथगुत्तेजकताया आवश्यकत्वात्॰ तत्तद्धर्मप्रकारकेच्छायां तत्तद्धर्मावच्छिन्नानुपहितत्वं निवेशनीयमित्यत्र तात्पर्यात्॰ अत
एवानुमितिद्वयं जायतामित्येतादृशेच्छाबलात्क्रमिकानुमितिद्वयमप्युपपद्यते॰ एकानुमित्युत्पादनदशायामपि द्वित्वावच्छिन्नानुपहितत्वस्याक्ष
तत्वात्॰ अथवा स्वविषयकत्वस्वसामानाधिकरण्योभयसंबंधेन प्रकृतपक्षधर्मिकप्रकृतसाध्यनिश्चयविशिष्टान्यत्वमेवानुपहितत्वं तात्पर्यार्थः।
भेदस्याव्याप्यवृत्तितयानुमितिदशायामिच्छायाः सिद्धिविशिष्टत्वेपि तत्पूर्वं विशिष्टान्यत्वमव्याहतं॰ प्रकृतपक्षकप्रकृतसाध्यकानुमितिविष

प०गा०
३३
33

यकसमूहालंबनेच्छायां यत्रान्यपक्षकानुमितेरन्यसाध्यकानुमितेर्वा विषयता तत्र तदुत्तरमन्यानुमित्यनंतरं प्रकृतानुमितिनिर्वाहाय प्रकृतपक्षप्र
कृतसाध्यावगाहित्वं निश्चयविशेषणं। एतद्विशेषणमनंतभाव्यद्वित्वादिप्रकारकेच्छायाः पृथगुत्तेजकतांगीकारात् एतादृशेच्छावलादनुमित्य
नंतरमनुमित्युपपत्तिः।। द्वित्वप्रकारकेच्छावलाच्च नानुमितिद्वयानंतरमनुमित्यंतरं तावत्पर्यंतमनुमितिधारायाएवानवस्थानात् योग्यताउत्तेजक
तामतेच द्वित्वादिप्रकारकेच्छायोग्यतायाद्वित्वाद्यवच्छिन्नानुपहितत्वेनैव पृथक्पृथगुत्तेजकताबाच्येतिकृतमतिविस्तरेण। ननु इच्छाया
इच्छाघटितनिरुक्तयोग्यतायावाअभावेन विशिष्टायाः सिद्धेरभावस्य पक्षतात्वे यत्साध्यकयत्पक्षकस्थले कदाचिदपि कस्यचिदिच्छा न जा
तातत्र पक्षत्वाप्रसिद्धिरित्याशंकायां विश्वविषयि[illegible]णीं भगवदिच्छामादाय केषांचित्समाधानमाक्षेप्तुं तादृशस्थले इच्छाविरहाविशेषि
तसिध्यभावएव पक्षतेति समाधत्ते पक्षसाध्येति। पक्षतावच्छेदकसाध्यतावच्छेदकभेदेनेत्यर्थः। पक्षताभेदादिति। सिद्धिपदार्थस्य प्रकृतपक्षता
वच्छेदकादिघटितत्वादिति भावः।। यत्रेति। यादृशपक्षकयादृशसाध्यकस्थले इत्यर्थः।। सिद्ध्यनंतरं कदाप्यनुमितिर्न जातेति। सिद्धिकाले परा
मर्शसत्वेनुमित्सायाअसमवधानादिति भावः।। सिध्यभावमात्रमिति। इच्छाभावाविशेषितायाएव सिद्ध्यभाव इत्यर्थः।। सिद्धिकालीना
नुमित्यनुरोधेनैव विशिष्टसिद्ध्यभावस्य पक्षतात्वोपगमादिति भावः। एतेनेति। यत्रानुमित्सोत्पत्तिरप्रसिद्धाप्रसिद्धापि वानानुमि

३३

स्युत्पाद्येपयोगिनीतत्रविशिष्टाभावस्यपक्षतात्वस्वीकारेप्रयोजनविरहेणेत्यर्थः॥उक्तिसाधारण्येति॰सर्वत्रैवपक्षतायाःसिसाधयिषाविरह
विशिष्टसिद्ध्यभावपदार्थत्वसंपादनायेत्यर्थः॥नोपादेयइति॰शब्देवस्यानुपादेयत्वात्॰कारणतावच्छेदकगौरवसहिष्णुतायाअन्याय्यत्वादितिभावः॥प
रामर्शपूर्वकालोत्पन्नानुमित्सानाशेनुमित्सांतरमकल्पयित्वायोग्यतयाश्चोत्तेजकत्वमनादृत्यानुमितिमुपपादयतःसार्वभौमस्यमतमाहत्य
चिंतिः॰सिसाधयिषानाशेसतियादृशासिध्यनंतरमनुमितिस्तस्याः॰सिसाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत
याभिन्नांतानिवेशात्तदुत्पत्तिबंधकत्वोपपत्तिरिति॰सिसाधयिषाविरहविशिष्टत्वं स्वक्षणस्यस्वाधिकरणावच्छेदेनबोध्यं॰तेनसिषाधयिषावतोपिका
लस्यसिसाधयिषानधिकरणदेशावच्छेदेनसिसाधयिषाविरहविशिष्टतयायत्रक्रमेणासिसाधयिषासिद्धिपरामर्शानुमितयस्तत्रासिसाधयिषाविर
हविशिष्टत्वेनोपपाद्यस्यानुमित्युत्पत्तिक्षणनिष्ठाव्यवधानस्यैवानुपपत्तितादवस्थ्यमितियराक्तं॰स्वपदेनभेदप्रतियोगिनोसिद्धेरेवोपादेयान्प्रति
योगिवैय्यधिकरण्यस्याभावविशेषणतामादृत्यसिसाधयिषाधिकरणाक्षणवारणं पुनरनुपादेयं॰प्रतियोगिपदेनासिसाधयिषाविरहप्रति
योगिनएवविशिष्याावश्यं विवक्षणीयतयासिसाधयिषायाःसिसाधयिषात्वेननिवेशनमुपेक्ष्यसिसाधयिषाविरहप्रतियोगित्वेननिवेशन
स्याशिरोवेष्टनेननासिकास्पर्शतुल्यत्वात्॰सिसाधयिषानधिकरणत्वनिवेशनेचासिसाधयिषाविरहांशवैयर्थ्यात्॰वक्ष्यमाणक्षणत्वनिवेशनव्या

प०ग०
३४
35

हससंगतेश्च· सर्वेषामेव क्षणानां सिसाधयिषाविरहपूर्वं पूर्वक्षणध्वंसाधिकरणतया तादृशध्वंसानधिकरणत्वरूपाव्यवहितत्वाश्रयक्षणाप्र
सिद्धिरतः सिसाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वनिवेशः। स्वपदं भेदप्रतियोगितत्वव्यक्तिपरं· सिद्धिसामान्यपरत्वे सर्वेषामेव क्षणानां पू
र्वपूर्वसिद्ध्यधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणतया पूर्ववदप्रसिध्यापत्तिः। इच्छाविरहविशिष्टस्वक्षणाऽव्यवहितोत्तरत्वनिवेशे
ज्ञानेच्छयोर्युगपदुत्पादमते यत्रानुमित्सात्तृतीयक्षणे घटेच्छासिध्यात्मकपरामर्शौ तदुत्तरं चानुमितिस्तत्रासिद्धेरिच्छाविरहविशिष्टस्वाधिकरणा
प्रसिध्यानिरुक्तस्वभिन्नतयानुमितिप्रतिबंधकत्वापत्तिरतः सिसाधयिषानिवेशः। अथवा इच्छासामान्यनिवेशे यत्र घटेच्छानंतरक्षणे सिध्या
त्मकः परामर्शस्तदनंतरक्षणे सिद्धावप्रामाण्यग्रहस्तदनंतरमनुमितिः· सिद्धेरप्रामाण्यज्ञानानास्कंदिततया एवानुमितिप्रतिबंधकत्वात्· त
त्र तादृशानुमित्युत्पत्तिक्षणस्येच्छाविरहविशिष्टसिद्धिद्वितीयक्षणाव्यवहितोत्तरतयाऽसिद्धेः स्वपदेनोपादानसंभवेनाविरोधितयाऽप्रामाण्य
ग्रहोत्पादसमयेनुमितिवारणाय सिसाधयिषापदं· तथा सत्यनुमित्युत्पत्तिक्षणस्यापि सिसाधयिषाविरहविशिष्टसिद्ध्युत्पादक्षणाव्यवहिततया
नापत्तिः। ज्ञानेच्छयोर्युगपदनभ्युपगमेपि यत्रानुमित्साद्वितीयक्षणे सिध्यात्मकपरामर्शस्तदनंतरं घटेच्छा तत्र तादृशासिद्ध्यधिकरणस्य
कस्यापीच्छाविरहविशिष्टत्वाभावात्स्वपदेनोपादातुमशक्यत्वात्· सिसाधयिषाविरहविशिष्टतदभावो नानुमित्यव्यवहितपूर्वक्षण इति

३४

तत्रानुमितिनिर्वाहायेच्छासामान्योपेक्षणमिति तु न साधीयः। घटेच्छोत्पत्तिक्षणे पूर्वमनुमितिसामग्रीसत्त्वे नानुमित्यनुत्पादबीजस्य दुर्घटत्वा
त्। न चानुमित्सायाः पूर्वकालोत्पन्नापेक्षाबुद्ध्यात्मकबाधादिविशेषात्तदानीमनुमित्सानुत्पादसंभवः। अपेक्षाबुद्ध्यनंतरक्षणे विशेषगुणांतरानु
त्पत्तावेव तस्याः क्षणत्रयावस्थानसंभवात्। यत्तु। यत्रानुमित्सानंतरं घटेच्छा तदनंतरं सिषाधयिषात्मकपरामर्शस्तदनंतरं चानुमितिस्तत्रानुमित्सु
त्पादक्षणोत्तरेच्छाविरहविशिष्टत्वसिद्ध्यधिकरणक्षणाव्यवहितोत्तरक्षण इति सिद्धेस्तद्वैप्रतिबंधकत्वाय अनुमित्सा सिसाधयिषापर्यंता
नुधावनमिति। तदसत्। इच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वशरीरे अव्यवधानप्रतियोगिस्वक्षण एवेच्छाविरहविशिष्टत्वनिवेशा
नस्य प्रयोजनवत्तयोत्तरत्वप्रतियोगिस्वक्षणे तद्विशिष्टत्वस्यानिवेशनीयतया उक्तानुमित्सुत्पत्तिक्षणस्येच्छाविरहविशिष्टतासि
द्ध्यधिकरणस्वाव्यवहिततया ताद्दशासिद्ध्युत्पादक्षणोत्तरत्वं सा च ताद्दशासिद्धेरिच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्प
त्तिकानुमितिकतयानुमित्यनिर्वाहविरहात्। प्रथमविशिष्टांतव्यावृत्तिस्थले सिसाधयिषापूर्वस्यापि नः कस्यचित्स्थूलकालस्य परामर्शो
त्पत्तिकाले विनाशे पूर्वकालावच्छेदेन सिसाधयिषाविरहविशिष्टसिद्ध्यधिकरणताद्दशकालध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसा
धिकरणस्यानुमित्युत्पत्तिक्षणस्य सिसाधयिषाविरहविशिष्टसिद्ध्यधिकरणकालाव्यवहितोत्तरत्वानुपपत्तिरतः कालपद

मुपेक्ष्य क्षणपदोपादानं॰ न च सिसाधयिषाविरहविशिष्टस्य निरूपिताधिकरणत्वनिवेशे उक्तस्थूलकालस्यापि विभिन्नक्षणावच्छेदेन
सिसाधयिषाविरहसिद्ध्युभयाधिकरणत्वेपि सर्वदैव विशेष्याभावविशेषणाभावान्यतरप्रयुक्तविशिष्टाभाववत्तया विशिष्टाधिकरणत्वासंभवा
त् क्षणत्वनिवेशमंतरेणैव व्याप्तिः संभवतीति वाच्यं॰ सिसाधयिषापूर्वक्षणादेः सिद्धिक्षणादेश्च प्रत्येकं विशिष्टाभावावच्छेदकत्वेपि तदुभयानु
गमकान्यतरत्वाद्यवच्छिन्नस्यैकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसंबंधेन सिसाधयिषाविरहविशिष्टायाः सिद्धेरधिकरणता
वच्छेदकत्वे बाधकाभावात्॰ एकरूपावच्छिन्नस्यैव विरुद्धद्वयावच्छेदकत्वविरोधात्॰ अन्यथा तत्काले एकतराभावप्रयुक्तस्य सिसाधयिषाविरह
सिद्ध्युभयाभावस्य सर्वक्षणावच्छेदेनैव सत्त्वे विरोधेन तदुभयत्वावच्छिन्नाधिकरणताया अनिर्वाहात्॰ तत्र तदुभयवत्ताप्रतीतेरप्युपपत्तेः॥ ए
वं चैकक्षणावच्छिन्नसामानाधिकरण्यसंबंधेनैकविशिष्टापराधिकरणत्वमेवोक्तस्थूलकाले न संभवतीति तस्यैकक्षणावच्छिन्नोभयाधिकर
णत्वनियतत्वात्॰ क्षणघटिततादृशसंबंधनिवेशापेक्षया च स्वाधिकरणक्षणत्वनिवेश एवोचितः॥ वस्तुतस्तु॰ केवलसामानाधिकर
ण्यसंबंधेनैकविशिष्टापराभावो यदा कदाचित् विशेषणवति विशेष्याभावादेव न तु विशेषणाभावात्॰ तथा च सिसाधयिषाविरहव
त्यपि स्थूलकाले सिसाधयिषासिद्ध्युभयसत्त्वक्षणे सिसाधयिषाविरहरूपविशेषणाभावात्तद्विशिष्टसिद्ध्यभाव इति तादृशकालेस्य च विशि

ध्याधिकरणत्वं निराबाधमेव· एतेन सिसाधयिषाधूर्वक्षणस्य सिद्ध्यनधिकरणत्वे तस्यानधिकरणकालस्य वदेशे व्यापककाले च स्ववृत्तितावच्छेदकत्वे
न स्थूलकाले सिसाधयिषाविरहविशिष्टसिद्धित्वेनानवच्छेदकत्वमिति तत्साधारण्यरूपावच्छिन्नस्य विशिष्टसिद्ध्यधिकरणतावच्छेदकत्वासंभवे
पि न क्षतिः यद्यपि सिसाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वनिवेशे पि तादृशकाले कालान्तरीण्यसिसाधयिषाविरहवैशिष्ट्यस्य त
न्निष्ठसिद्ध्यधिकरणतानवच्छेदकत्वात् तादृशकालमादायोक्तदूषणस्यानवकाशस्तथापि सिसाधयिषाविरहवैशिष्ट्योपलक्षिते सिद्ध्यधिक
रणत्वनिवेशाभिप्रायेण क्षणपदोपादानं· यद्यपि क्रियादिरूपतादृशस्थूलकालस्याप्युक्तक्षणावच्छिन्नस्य क्षणतया क्षणत्वनिवेशेनापि
न दोषतादवस्थ्यं· तथापि स्ववृत्तियावद्ध्वंसविशिष्टत्वरूपक्षणत्वावच्छेदेन सिसाधयिषाविरहविशिष्टत्वनिवेशनान्न दोषः। सिसाधयि
षाविरहविशिष्टक्षणे स्वाधिकरणत्वमवश्यं सिसाधयिषाविरहवैशिष्ट्यावच्छिन्नं· तादृशस्थूलकाले स्वाधिकरणत्वस्य च न तदवच्छिन्नत्व
नियम इति सिसाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वलाभायैव क्षणपदोपादानं· न तु क्षणत्वमपि निविष्टं इति तु तत्त्वं· अव्यवहि
तोत्तरक्षणोत्पत्तिः स्वाधिकरणावच्छेदेन बोध्या· अनुमितिपदं चास्य समानाधिकरणानुमितिपरं· तेन महाप्रलयानभ्युपगमे सकलसिद्धेना
मुत्तरमेवासंख्यानामात्मनां कस्मिंश्चिदवश्यमनुमित्युत्पत्ता सिसाधयिषाविरहविशिष्टतादृशास्य क्षणानन्तरक्षणोत्पन्नानुमितिकभिन्ना

सिसाधयिषाद्व्योत्पत्तिमध्यक्षणोत्पन्नाईश्वरीयाचासिद्धिरेव॰सिसाधयिषाविरहविशिष्टतदधिकरणक्षणाप्रसिध्यास्वपदेनतस्याएवोपादातुम
शक्यत्वात्॰तस्याश्चसिद्धिरिच्छाविरहविशिष्टत्वाभावात्॰सिसाधयिषाविरहविशिष्टनिरुक्तसिद्धिभिन्नसिद्धेरप्रसिद्धिः।महानसलयस्यप्रामा
णिकत्वेपियदुत्तरमनुमितिःकश्चिदपिनोत्पत्स्यतेतादृश्याश्चरमसिद्धेरेवप्रतिबंधकत्वंस्यात्तान्यस्याद्व्याप्त्यनुपपत्तेर्नविकाशः।अव्यवधानांश
निवेशात्प्रतिबंधकसिद्धिनाशानंतरंतदधिकरणेनुमित्युत्पत्तावपिनतस्याःप्रतिबंधकत्वानुपपत्तिश्च॰स्वपूर्वसकलक्षणानामेवस्वा
धिकरणक्षणध्वंसाधिकरणक्षणध्वंसानाधिकरणत्वरूपस्वक्षणाव्यवहितत्वाक्रांततयानादौसंसारेसर्वासामेवसिद्धीनांपूर्वंकदाचित्स्वाधि
करणेनुमित्युत्पत्त्यासिसाधयिषयोरंतरोत्पन्नासिद्धिरेवासिसाधयिषाविरहविशिष्टस्वक्षणाव्यवहितक्षणोत्पन्नानुमितिकभिन्ना॰
तस्याःसिसाधयिषाविरहविशिष्टत्वाभावादप्रसिद्धिरतउत्तरेति॰स्वाधिकरणक्षणध्वंसाधिकरणार्थकं॰सकलसिद्धीनामेवस्वक्षणाव्य
वहितोत्तरत्वाक्रांततया तृतीयक्षणविनष्टानुमित्युत्पत्तिपर्यंतस्थायि×स्वपूर्व×स्थूलकालोत्पन्नानुमितिकतयापूर्ववदप्रसिद्धिरितिद्वितीय
क्षणपदं॰अनुमित्यात्मकसिद्धीनांस्वाव्यवहितोत्तरवृत्तिस्वात्मकानुमितिकतयाऽप्रतिबंधकत्वापत्तिरतः उत्पत्तिनिवेशः।यद्यपिस्वा
न्यत्वस्यानुमितिविशेषणत्वेपि एतद्दोषवारणसंभवस्तथाप्यपेक्षाबुद्धेः क्षणत्रयावस्थायित्वस्य तदुत्तरसमानाधिकरणविशेषगुणात्

रोत्पादस्याचोपगमे यत्रापेक्षाबुध्यात्मकानुमितिर्द्वितीयक्षणे तादृशी प्रत्यक्षरूपा सिद्धिः तस्याश्चतुर्थक्षणेनुमित्युत्पादवारकं तत्प्रतिबंधकत्वं नोपपद्य
तद्द्वितिगुरुशरीरतया अप्युत्पत्तेर्निवेशनं· अथानुमित्युत्पत्त्यव्यवहितपूर्वक्षणत्वमिति सिद्धिभिन्नत्वं निरुक्तक्षणोत्पत्तिकानुमितिकभिन्नत्वापेक्षया लघी
यः कथमुपेक्षितमिति चेत्· तथापि तथामति यत्र क्रमेण सिद्धिसिसाधयिषानुमितयस्तत्रेच्छाजनकसामग्र्या अनुमितिप्रतिबंधकत्वेनैवेच्छोत्पत्तिक्षणे
नुमितिवारणसंभवादव्यवहितपूर्वत्वघटकानुमित्युत्पत्तिक्षणे तदव्यवहितप्राक्क्षणे वा सिसाधयिषाविरहविशिष्टत्वस्य तद्धारणानुरोधे
न निवेशवैयर्थ्यमिति· तादृशस्थलीयसिद्धेस्तृतीयक्षणानुमित्युत्पत्त्यविरोधितायाः सिद्धौ सिसाधयिषाविरहवैशिष्ट्यानिवेशमंतरेणैवोपपत्तेः मू
लोपात्तं सिद्धिविशेषणं सहकृतांतं निष्प्रयोजनं स्यादिति मूलविरोधः। तथा चेच्छाजनकसामग्र्याः प्रतिबंधकत्वमते पि मूलाविरोधोपपादनाय
उक्तगुरुतरनिरादरः अत्र कल्पे वक्ष्यमाणानुपपत्तिस्तृतीयक्षणसाधारण्यादव्यवहितोत्तरत्वं निवेश्योद्धुंका मा गमादिच्छासामग्र्या अनुमितिप्रतिबं
धकत्वमाश्रित्यैव मूलोक्तसहकृतांतं सार्थकयिष्यतीत्यवधेयं· अनुमितेर्व्यवहितपूर्वोत्पन्नस्याव्यवहितपूर्वस्थायिनो घटज्ञानादेरविरोधित्वोप
पत्तये सिद्धिपदं· अवगतद्वितीयसिसाधयिषाविरहविशेषणप्रयोजनं तत्र संप्रति प्रदर्शयितुं प्रथमासिसाधयिषाविरहविशेषणप्रयोजनं पृ
च्छति· अथेति· तृतीयक्षणेत्स्याधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावरूपव्यवधानाभावस्फुटीकरणाय तत्ती

पृ० ग०
३७
37

यक्षणव्यवधायकत्वं हि द्वितीयक्षणस्याभिहितं·तृतीयक्षणव्यवधायकत्वं तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वे सति स्वाधिकरणक्षणध्वंसाधि
करणत्वं·सिद्धिनाशक्षणोसिसाधयिषोत्पत्तौ सिद्ध्यनन्तरसिसाधयिषानाशक्षणेनुमित्युत्पत्तौ वा विशेष्याभावादेवानुमितिपूर्वं पक्षता निर्वहत्य
तोऽविरलेति·पक्षतासंपत्तय इति·सिद्धौ सिसाधयिषाविरहस्याविशेषणत्वे उक्तस्थले·सिद्धिद्वितीयक्षणेनुमित्युत्पत्त्यापातस्याः स्वक्षणाव्यव
हितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नतया सिसाधयिषासत्त्वक्षणेपि च तादृशसिद्धिसत्त्वेन तदभावरूपपक्षताया अनिर्वाहादिति भावः।
प्राथमिक इति·सिसाधयिषाविरह इत्यनुषज्यते·स्वक्षणस्येति·विशेषणमित्यनुषज्यते उत्तरस्येति·यत्रेति·ज्ञानेच्छयोर्युगपदुत्पादमते सिसाधयिषो
त्पत्तिकाले सिद्ध्युत्पादे सिद्धेर्वा परामर्शरूपत्वे परामर्शोत्पत्तिकाले सिसाधयिषासत्त्वादेव विशिष्टाभावो निर्वहतीति क्रमेणेति·अविरलक्रमेणेत्यर्थः।
सिसाधयिषासिद्ध्योरन्तराक्षणैकविलंबे सिसाधयिषाविरहेण क्षणांविशेष्यापि पक्षत्वानिर्वाहस्य वक्ष्यमाणत्वात्·सिद्धिपरामर्शयोः परामर्शा
नुमित्योर्वा कालव्यवधानेनोत्पत्तौ विशेष्याभावादेव विशिष्टाभावसंपत्तेश्च।सिसाधयिषा अनुमितित्वप्रकारकेच्छा·अनुमित्सात्मकसिद्धविच्छायाः
स्वविषयसिद्ध्यप्रतिहितत्वात्·तदुत्तरमनुमित्सानन्तरोत्पत्तिरेव न संभवतीति प्रासङ्गिकेति·पक्षतासंपत्त्यर्थमिति·सिसाधयिषाविरहस्य क्षणविशेषण
स्यानुपादाने तत्रानुमित्युत्पादक्षणस्य सिद्धिक्षणध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धिक्षणाव्यवहितत्वविरहात्तादृशसिद्धे

३७

रपिप्रतिबंधकत्वापत्त्यापक्षतानुपपत्तिः। तद्विशेषणोपादाने च सिध्युत्पत्तिक्षणस्य सिसाधयिषाविशिष्टतया सिसाधयिषाविरहविशिष्टः स्व
क्षणः परामर्शोत्पत्तिक्षण एव। तत्तद्ध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानमनुमित्युत्पादक्षणस्याक्षतमेवेति पक्षत्वोपपत्तिरिति भा
वः। पक्षताविरहेति। सिध्युत्पादक्षणस्यापि सिसाधयिषाविरहविशिष्टतयानुमित्युत्पादक्षणस्य तादृशक्षणध्वंसाधिकरणकालध्वंसाधिकर
णतया तत्सामान्याभावात्मकतादृशक्षणाव्यवधानविरहादिति भावः। यद्यपि सिसाधयिषाविरहविशिष्टानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभि
न्नत्वविशिष्टसिध्यभावस्य पक्षतात्वमंगीकृत्याप्युक्तानुपपत्तिः शक्यते वारयितुं। तथाप्यव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षतापक्षस्याक्षिप्तत्वात्तत्रैव
दर्शितदोषोद्धारे तृतीयक्षणसाधारणमव्यवधानं निवेश्य शंकते अथेति। तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वमिति। क्षणद्वयानुगमकस्व
क्षणत्वेन स्वक्षणमंतर्भाव्यप्राप्तिस्विकरूपेणास्वक्षणस्याव्यवधानशरीरे निवेशनीयत्वात्। तृतीयक्षणे च स्वोत्पत्तिक्षणध्वंसाधिकरणद्वि
तीयक्षणध्वंसाधिकरणत्वेपि स्वाधिकरणद्वितीयक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानस्याक्षतत्वादिति भा
वः। द्वितीयतृतीयक्षणसाधारणं स्वक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानस्याक्षतत्वादिति भावः। द्वितीयतृ
तीयक्षणसाधारणं स्वक्षणध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपानुगताव्यवधाननिवेशनं न संभवतीति अपेक्षा

बुध्यात्मकसिद्धिचतुर्थसिसाधयिषावच्छक्षणोत्पन्नानुमितौ व्यभिचारतादवस्थ्यात् चतुर्थक्षणसाधारणानुगताव्यवहितोत्तरत्वस्य कथं चिन्नि
वेशे चतुर्थक्षणोत्पन्नानुमितिकापेक्षाबुद्ध्यात्मकसिद्धेरप्रतिबंधकत्वापत्तेरिति ध्येयं अपेक्षाबुद्धिद्वितीयक्षणावधिकक्षणत्रयस्थायितरबुद्धि
द्वितीयतृतीयक्षणसाधारणमनुगताव्यवहितोत्तरत्वं प्रकारांतरेण निर्वक्ति स्वध्वंसेति उभयत्र कालपदं कालिकसंबंधेन स्वध्वंसवत्त्वलाभाय तेन
न सर्वस्यैव क्षणस्य स्वनाशादिविषयकपूर्वपूर्वज्ञाननाशवत्त्वेपि न समस्यता प्रसिद्धिः न वास्य पूर्वकालस्यापि तत्पूर्वकालीनस्वविषयकज्ञाननाशवत्त्वेपि
तदुत्तरत्वस्य तत्साधारण्यप्रसंगः एवं सति यत्र सिसाधयिषा सिद्धिपरामर्शानुमितीनां यत्र क्रमेणोत्पादस्तत्रस सिद्धेः क्षणे सिसाधयिषाविरह
विशेषणमंतरेणापि अव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वनिर्वाहात् उक्तप्रथमविशिष्टांतव्यावृत्त्यसंगतेः स्यअंतरेत्याद्याकृतिमाह तथा
चेति प्रथमक्षेपपक्षतावारणायेति तादृशसिद्धेस्तृतीयक्षणोत्पन्नानुमितिकतयानिरुक्तसिद्धिभिन्नत्वविरहेण पक्षताप्रसक्तेरिति भावः प्रथम
क्षणे पूर्ववर्त्तिसिसाधयिषाविरहविशेषणसत्त्वेपि स्वनाशाधिकरणकालध्वंसानधिकरणत्वघटिताव्यवहितोत्तरत्वस्य निवेशाकल्प्येनोक्तातिप्र
संगवारणसंभवः अनुमित्युत्पत्तिक्षणे तत्सिद्धिनाशाधिकरणकालध्वंसानधिकरणत्वस्य सिसाधयिषाविरहविशिष्टतत्सिद्ध्यधिकरणप्रथमक्ष
णध्वंसाधिकरणत्वस्य च सत्त्वाददतो व्यवहितोत्तरक्षणे तस्य विशेषणतामाह उत्तरेति तथा चोक्तस्थले सिद्ध्यव्यवहितोत्तरतृतीयक्षणेपि सिसाधयि

३८

षासत्त्वात्सिसाधयिषाविरहविशिष्टतादृशक्षणोत्पत्तिकत्वं नानुमितेरिति तादृशसिद्धेरनुमितिप्रतिबंधकतानिर्वाहः।द्वितीयविशिष्टांतस्य
यद्विशेषणत्वं यत्प्रयोजनकत्वं वा प्रागभिहितं।इदानीमपि तस्य तद्विशेषणत्वं तत्प्रयोजनत्वं न तु प्रथमविशिष्टांतवदस्मादृशामिति प्रदर्शयि
तुं पूर्वोक्तिमप्यनुवदति द्वितीयं त्विति।सिद्धेर्विशेषणमित्यनुषज्यते।तत्रैवेति।यत्क्रमेण सिद्धिः सिसाधयिषानुमितयस्तत्रैवेत्यर्थः।द्विती
यक्षण इति।तृतीयक्षणेनुमितिनिर्वाहार्थमित्यादिः।पक्षतासंपत्त्यर्थ इति।विशेषणाभावेन विशिष्टाभावरूपपक्षतानिर्वाहायेत्यर्थः।अ
न्यथा उक्तक्रमेण तादृशसिद्धेर्निरुक्तसिद्धिभिन्नतया विशेष्यसत्वेन पक्षतानुपपत्तेरिति भावः।ननु दर्शितस्थले प्रथमक्षणे पक्षतासत्वेपि नक्ष
तिः।सिसाधयिषाकालेनुमित्युत्पादकस्येच्छासामग्र्याः प्रतिबंधेनाप्यसंभवात्।इत्थं च निष्प्रयोजनकतया प्रथमविशिष्टांतानुपादाने द्वितीयमपि निः
प्रयोजनं तादृशसिद्धेः स्वाव्यवहितोत्तरतृतीयक्षणोत्पन्नानुमितिकतयैवाप्रतिबंधकत्वेन तृतीयक्षणोत्पन्नानुमितिनिर्वाहादित्याशयेन
इच्छासामग्र्या अनुमितिप्रतिबंधकतामतेन उभयं परित्यजति यद्वेति।इच्छासामग्र्यपेक्षयानुमितिसामग्र्या हीनबलत्वेपि अनुमित्सा
विशिष्टाया अनुमितिसामग्र्या इच्छाप्रतिप्रतिबंधकताकल्पनस्यावश्यकतया तस्या एव बलवत्वकल्पनमुचितं।अन्यथा इच्छासामग्र्य
पेक्षया बाधादिरूपानेकप्रतिबंधकाभावघटनतया गुरुशरीराया अनुमितिसामग्र्याः प्रतिबंधकतायामिच्छानिवेशेन गौरवात्।इति

युक्तया तेन कयोर्योगिपथस्तीकारसंभवेन चेच्छासामग्र्याः अनुमितिविरोधितानैसंभवः व्यवस्थापनं वतीसाश्रयेन यद्विधेयमुक्तं· सि
साधयिषाविरहविशेषणसार्थक्यस्याशक्यत्वेनुमित्यव्यवहितपूर्ववृत्तित्वं परित्यज्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वरूप
गुरुविशेषणोपादानमनुचितमित्याशयेनाहानुमित्यव्यवहितेति· अनुमितिपदं स्वसमानाधिकरणानुमितिपरं· अतो व्यधिकरणा
नुमित्यव्यवहितपूर्ववृत्तिसिद्धेः स्वाश्रयेनुमित्यनुत्पादेपि पक्षतानिर्वाहः। यन्नाशानंतरमनुमितिरुत्पत्स्यते तादृशासिद्धेः प्रतिबंधकता
नारण्यायाव्यवहितत्वोपादानं· तत्रानुमितिपूर्वकालीनध्वंसप्रतियोगित्वरूपं· पूर्वक्षणोत्पत्तिमत्त्वं वा विशेषणं· पूर्वकालीनत्वं च का
लिकसंबंधेन तत्प्रागभाववत्त्वमेव· ध्वंसस्य कालोपाधित्वयोरुपपत्तिः। सर्वासामेवासिद्धीनां पूर्वजातीयत्किंचिदनुमितिनिरूपितत्वनिरुक्ताव्यव
धानवत्तयानुमित्यव्यवहितसिद्धिभिन्नसिद्ध्यप्रसिद्धिरतः पूर्वक्षणवृत्तित्वं विशेषणं· पूर्वत्वं· प्रागभाववत्त्वं· अनुमित्यादिपर्यंतस्थायिस्थू
लमहाकालसाधारणमित्युक्तदोषतादवस्थ्यं· अतः क्षणपर्यंतनिवेशनं· प्रागभावावच्छिन्नवृत्तित्वनिवेशने चाप्रतियोगित्वात्तस्यासिद्धि
विशेषणत्वे क्षणत्वमनुपादेयमेव· जन्यमात्रस्य कालोपाधित्वेनु कालिकसंबंधेन प्रागभाववत्त्वमित्येव वा विशेषणं देयं· प्रागभा
वानभ्युपगमे वक्ष्यमाणतदुत्पत्तिक्षणोत्पादकध्वंसप्रतियोगित्वरूपमव्यवहितपूर्ववर्तित्वमेव क्षणविशेषणं· तदघटकदलानां वा

३६

वृत्तिरन्वेव्यक्तीभविष्यति· अनुमित्सव्यवहितपूर्ववर्त्तिन आत्ममनोयोगादेस्तादृशसिद्धिभिन्नतयाप्रसक्तप्रतिबंधकतावारकद्वितीयसि
द्धिपदसार्थक्याय प्रथमसिद्धिपदं· न च प्रक्षालनाद्धीतिन्यायेनोभयपरित्यागएवोचित इति वाच्यं· तथासति बाधबुध्यादेरपि निरुक्तरू
पेणैव प्रतिबंधकतया स्वतंत्र तत्प्रतिबंधकताव्याघातः· न च व्याहन्यतां तत्प्रतिबंधकत्वांतरं न हि तत्र क्षतिर्भावहानिः किंतु तावतालाघ
वमेवेति वैयर्थ्यदोषोदुर्वार एवेति वाच्यं· एतद्दोषस्य वैयर्थ्याच्चेसिद्धेरित्यनेन स्वयं दर्शनीयत्वात्· यद्यप्येवं प्रथमसिध्यनुपादाने बाधादेरप्र
तिबंधकताविलोपभीरूणां द्वितीयसिद्धिपदोपादानं न विरुध्यते· अखंडाभावसंपादकत्वेन लक्षणदोषासंस्पर्शादिति प्रथमतदुपा
दानमनुचितं· तथाप्यनुमित्सव्यवहितपूर्ववर्त्तिनां स्वत्वघटितेन निरुक्तरूपेणानुगमासंभवेन तत्तद्व्यक्तित्वेन तेषां भेदकूटस्यैव निवेशानी
यततयासिद्धेः सिध्यतिरिक्ततादृशपदार्थभेदानामव्यावर्त्तकानां निवेशगौरवैः सिद्धिव्यक्तीनामेव भेदा निवेशनीया इत्येतत्सूचनाय प्र ना
थमसिद्धिपदोपादानं· अत एवाग्रे तत्तद्व्यक्तित्वेन सिद्धिव्यक्तीनां भेदनिवेशे भेदानां विशेष्यविशेषणभावे विनिगमनाविरहेण महा
गौरवात्· फलानुत्पादनियतसिद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबंधकतापक्ष एव साधीयान्· सिसाधयिषाविरहविशेषणपरित्याग
श्चानुचितः। सिसाधयिषाकालीनसिद्धिव्यक्तीनामनंतानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशापेक्षया तद्विशेषणदानस्यैव यु

प०ग०
४०
40

क्तत्वादिति कथंचिदनुगमप्रकारः परिचिंतनीय इति सिद्धे वैयर्थ्यमित्याशयेन वैयर्थ्यमिति वक्ष्यति। ताद्दशसिद्धीनां भिन्नानां तत्परिचेयसि
द्धिव्यक्तीनां। निरुक्तरूपतेति। निरुक्तसिद्धिभिन्नत्वविशिष्टसिद्धित्वेनेत्यर्थः। अगत्याकार्यकारणभावानंतसमदोषायेत्यत आह ताद्दशेति। तत्तद्व्य
क्तित्वेन कल्प्यमानप्रतिबंधकताकेत्यर्थः। यादृशसिध्युत्तरं सिसाधयिषोत्पत्तावनुमितिः सिसाधयिषोत्पत्तिक्षणेनुमितिवारणाय क
ल्पनीयप्रतिबंधकताकतादृशव्यक्तौ सिसाधयिषाविरहवैशिष्ट्यनिवेशनस्यावश्यकतया सकलेति। ननु क्वचित्सिसाधयिषाविर
हविशेषणस्यावश्यकतया तदभिप्रायेणैव मूले तदुपादानसंगतिरतो दूषणांतरमाह तत्तत्समयेति। तत्तदात्मानिष्ठायाः सिसाधयि
षाविरहविशिष्टसिध्यभावातिरिक्तसकलकारणसमवधानाधिकरणीभूतक्षणसंबंधस्य क्रयस्तासां विनिगमनाविरहेण्यान्क मि
कसिद्धिसिसाधयिषानुमित्सुत्पत्तिस्थले सिसाधयिषोत्पत्तिक्षणेनुमितिवारणाय सिद्धेः सिसाधयिषाविरहविशिष्टतत्तद्व्यक्तित्वेन
प्रतिबंधकत्वापेक्षयालाघवेन च प्रतिबंधकतापत्तेरित्यर्थः। तथा च मूलोक्तस्य सिसाधयिषाविरहविशिष्टसिध्यभावस्य पक्षतात्वव्या
घात इति भावः। ननु तत्तत्समये समं तत्तदात्मनां संबंधाः स्वरूपानतिरिक्ताः। तथा च तत्तदात्मस्वरूपस्य तत्तत्समयस्वरूपस्य वा संबंधस्य प्रतिबं
धकत्वे तत्तदात्मन्यन्यदा तत्तत्समये वान्यत्रानुमित्यनुपपत्तिरतोऽन्यस्य प्रतिबंधकतां प्रसंजयति। तत्तत्समयेति। सिध्यनंतरं सिसाधयिषादि

४०

तीयक्षणोत्पन्नानुमितिस्थले इत्यादिः। सिसाधयिषाविरहविशिष्टसिध्यभावेतरसकलकारणाधिकरणतत्तत्क्षणावच्छिन्नानां तत्तदात्मनि
ष्ठतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः। सामानाधिकरण्यसंबंधेन सिसाधयिषाविरहावच्छिन्नायास्तत्तात्सिद्धेः प्रतिबंधकत्वापेक्षया ला
घवादितिभावः। नियमकाभावात् नियामकाभावप्रसंगात् सिसाधयिषाविरहविशिष्टसिद्धिसत्त्वे द्वितीयक्षणेनुमित्युत्पत्ते निर्वाह्याया
निरुक्तसिद्धिभिन्नसिध्यभावरूपपक्षतायाअनुमित्यनुत्पादस्य निर्वाहत्व तदभावस्य चान्योन्याश्रयभियानुमित्युत्पादानुत्पादप्रयोजकत्वा
संभवादितिभावः। तादृशान्योन्याश्रयस्यादोषतावादिनं प्रतिबंधानिरस्यति नवेतिन्यवकारार्थेवाकारः। उत्पत्तेः कारणतावच्छेदका
वच्छिन्नसमवधानाधीनत्वकथनेन तस्याः कारणतावच्छेदककुक्षिनिवेशेन्योन्याश्रयः सूचितः। तथासति प्रायशः कारणतावच्छेद
कावच्छिन्नसमवधानस्याप्ययेन न कार्योत्पत्त्यधीनत्वापातात् निवेशाने निवेशनमहदूषणावहं अथवोक्तपक्षतायाः कार्योत्पत्तिनियामक
त्वमेव न वेत्यादिना निराकृतं कारणतावच्छेदककोटौ वित्यादेः कार्योत्पत्तिनियामकत्वावच्छेदकघटकं [illegible] इत्यर्थः। अत्रान्योन्याश्रयदोषं प्रतिबंधास्वी
कारयति तथा सतीति एवं व्याख्येयं यद्यपि स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वं स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रांतं इति भेदप्रतियोगितावच्छेदक
गर्भे तन्निवेशानर्थक्यं तथापि यद्व्यक्तीनां तत्तद्व्यक्तित्वेन भेदः सिद्धौ निवेशनीयः। तथा च कारणतावच्छेदकस्य नोत्पत्तिघटितत्वं तथापि निद

प॰ ग॰
४२
41

कूटनिवेशो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतानंत्यं दुष्परिहरमेवेति भावः। कार्योत्पादादिकमित्यादिपदेन तादृशगौरवप्र
योजकभेदकूटस्यापि परिग्रहः। तस्य कारणतावच्छेदकत्वेन तृतीयप्रतिबंदेरेव संगतेः। अनुमित्यव्यवहितपूर्वोत्पन्नपरामर्शादितोनुमित्युत्तर
मनुमितेर्वारणायेत्यस्य तत्कालावच्छिन्नत्वविशेषितेनेति· स्वाधिकरणसमयध्वंसवदन्यकालसंबंधविशेषितेनेत्यर्थः। तादृशध्वंसवत्वं·
कालिकसंबंधेन· तेनोत्पत्तिक्षणस्यापि प्रतियोगित्वादिसंबंधेन स्वाधिकरणकालध्वंसावच्छिन्नत्वेपि न क्षतिः। एवं च कालिकसंबंधे
न तादृशध्वंसवदन्यात्मसंबंधविशिष्टस्य ज्ञानादेः द्वितीयक्षणे सत्वादुक्तातिप्रसंगतादवस्थ्यमतः कालपदं· तादृशकालसंबंधस्यो
पलक्षणविधयावच्छेदकत्वे स एव दोष इत्यतो विशेषणविधया तथात्वलाभाय योतरत्रानुषंगाय चावच्छिन्नांतस्य कर्मधारयमध्ये प्रक्षे
पमुपेक्ष्यावच्छिन्नत्वविशेषितेनेत्युक्तं· विशेषणत्वं चास्य सामानाधिकरण्यसंबंधेन बोध्यं· धर्मिणो विशेष्यत्वात्। कालांतरीणानु
मितिसमानाधिकरणघटज्ञानादितोनुमितिवारणाय। आपत्तिः। स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वमनुमितिविशेषणं तदर्थश्च· स्वाधि
करणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणो यः क्षणस्तदुत्पन्नत्वं· सः संतानिवेशात्तथोत्तर
तृतीयक्षणोत्पन्नानुमितिकज्ञानादितस्तद्वितीयक्षणे नानुमितिप्रसंगः। तादृशानुमितिकसंस्काराद्द्वितीयक्षणेनुमितिवारणाय स्वाधिकर

४२

णत्वे सती स्वापेक्षितं· तृतीयादिक्षणस्य ज्ञानाद्यनधिकरणत्वेपि संस्काराद्यनधिकरणत्वात्क्षतेस्तादृशापेक्षाबुद्धिद्वितीयक्षणेनुमितिवारणानु
रोधस्तु न तदुपेक्षाबीजं· तदानीं समानाधिकरणविशेषगुणांतरस्याप्यनुत्पत्त्या तत्प्रयोजकादेवानुमित्यनुत्पादोपपत्तेः। अपेक्षाबुद्धिद्वितीय
क्षणे समानाधिकरणविशेषगुणोत्पादोपगमे तु अपेक्षाबुद्धेस्तृतीयक्षणावस्थायित्वायाप्यत्वानुपपत्तेः। वस्तुतस्त्वपेक्षाबुद्धेर्द्विक्षणावस्था
यितामत एवैतन्मते त्रित्वं द्वित्वदर्शनं· अन्यथासिद्धमादिद्वितीयक्षणोत्पन्नापेक्षाबुद्ध्यात्मकपरामर्शात्तृतीयक्षणेनुमित्यनुपपत्तेः। तस्यास्तृती
यक्षणपर्यंतावस्थानमतो द्वितीयक्षणे विशेषगुणानुत्पत्तौ तदानीमुत्पत्तिकालावच्छिन्नसविषयकसत्त्वस्य दुर्घटत्वादित्यवधेयं· अनुमि
तेः स्वसमानाधिकरणानुमित्युत्तरोत्पन्नज्ञानान्तराद्यनुमितिप्रसंगवारणायाधिकरणांतं क्षणविशेषणं· स्वपूर्वकालावच्छेदेनोत्पन्नानुमितेरपि स्वा
व्यवहितोत्तरत्वाक्रान्तस्य द्वितीयक्षणपर्यंतस्थायिस्थूलकालोत्पन्नतया तद्दोषतादवस्थ्यमिति क्षणत्वनिवेशः। अनुमितेः स्वाव्यवहितोत्तर
वर्त्तिस्वसमानाधिकरणस्वात्मकानुमितिकतया तद्वारणायोत्पत्तिनिवेशः। वस्तुतस्तत्क्षणस्यानुत्पत्त्यनिवेशादपि उत्पत्तिनिवेशप्रयोजननिर्वाहः
तथा सत्यपेक्षाबुद्ध्यात्मकानुमित्यनंतरोत्पन्नज्ञानादनुमित्यापत्तेरसंभवात्· पुरुषांतरीयानुमित्यव्यवहितपूर्वोत्पन्नज्ञानात्तद्वतः पुंसोनुमि
तेर्वारणाय स्वसामानाधिकरण्यमनुमितिविशेषणं· एकपुरुषीयानुमित्यव्यवहितपूर्वोत्पन्नाद्वित्वादितः तद्वतः पुरुषांतरस्यानुमितेर्वार

प०ग०
५२

णाय सविषयकत्वनिवेशनं। अनुमित्यव्यवहितपूर्वक्षणे ज्ञानोत्पत्तिनियमाशंकया ज्ञानत्वमुपेक्षितं। व्यक्तीभविष्यति चेदमुपरिष्टात्। बहु
व्रीहिप्रतिपाद्यसंबंधांशस्याधिकस्यात्र निवेशात् बहुव्रीहिं परित्यज्य लघुरूपांतरमाह स्वसमानाधिकरणेति। अत्राप्युत्पत्तिकालाव
च्छिन्नत्वविशेषितेनेत्यनुषज्यते। अन्यथानुमित्यव्यवहितपूर्वोत्पन्नज्ञानादेरनुमित्युत्पत्तिक्षणेपि सत्वात् तदनंतरमप्यनुमित्यंतरापत्तेः।
मते नचानुमित्यव्यवहितपूर्वक्षणौ विशेषणतयैव सामंजस्ये उत्पत्तिकालावच्छिन्नत्वस्य पृथग्विशेषणत्वमयुक्तमिति वाच्यं अनुमित्यव्यवहि
तपूर्वक्षणो वृत्तेर्विशेषणत्वे लघुरूपकस्य त्वंशाविशेषणतयैव सामंजस्ये क्षणे स्वाधिकरणकालध्वंसानधिकरणत्वरूपस्योत्पत्तिघटका
शस्य वैयर्थ्यापातात्। प्रक्षालनाद्धीति न्यायेन तदंशमपि परित्यज्य स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टज्ञा
नत्वेन कारणतासंभवोऽग्रे स्फुटीभविष्यत एव। अनुमितेः सामानाधिकरण्यविशेषणप्रयोजनं पूर्ववत्। अनुमित्यव्यवहितपूर्वत्वं प्राग
भावसत्वे तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति तत्प्रागभाववत्वं। अनुमितिपूर्वविनष्टस्य तदुत्तरोत्पन्नस्य च घटज्ञाना
देर्वारणाय दलद्वयं। अव्यवहितोत्तरत्वघटकांशस्वाधिकरणकालध्वंसानधिकरणत्वरूपसत्ताहेतदीयसत्तस्य
लघुत्वादप्येतत्कल्पे लाघवं बोध्यं। प्रागभावानंगीकारे तद्घटितं वक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यं। अनुमित्यव्यवहितपूर्वोत्पन्नतदु

५२

42

तरस्यापि स्थूलकाले अनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनं· अनुप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे
क्षणपदं कालपरमेव· अनुमित्यव्यवहितपूर्वक्षणस्थायिनस्तत्पूर्वजातघटादितोनुमितिपूर्वमनुमितेर्वारणायोत्पन्नत्वनिवेशनं· पू
ज्ञाना
र्ववत् द्वित्वादिवारणाय सविषयकत्वनिवेशनं· ज्ञानत्वोपेक्षायां बीजमपि पूर्ववद्बोध्यं· अत्रोभयत्रस्य च त्वघटितत्वेन तत्तद्व्यक्तिविश्रामाद
ननुगम इति प्रतियोगिनि स्वत्वमनंतर्भाव्यानुगतभेदकूटघटितधर्मेण कारणतां प्रसंजयति स्वक्षणेति· स्वक्षणाव्यवहितोत्तरक्षणा
नुत्पत्तिकस्वसमानाधिकरणानुमितिकं स्वमनुमितिसामग्र्यसमवधानक्षणोत्पन्नं घटज्ञानादिकमेव· तदन्यसविषयकोनुमित्यव्यव
हितपूर्वक्षणोत्पन्नतत्समानाधिकरणपरामर्शादिस्ततोनुमित्युपपत्तिः। तादृशादेव परामर्शादनुमित्यनंतरानुमित्यंतरवारणाय यात्रा
प्युत्पत्तिकालावछिन्नत्वविशेषितेनेत्यनुषज्यते· न चैवं स्वोत्पत्तिक्षणावछिन्नत्वस्यानुयोगिनि प्रवेशेनाननुगमस्यावश्यकतया प्र
यासो यमफल इति वाच्यं· तत्तद्व्यक्तिनिष्ठतत्तदधिकरणसमयध्वंसाधिकरणसंबंधानामभावकूटविशिष्टत्वस्यैवात्रोत्पत्तिका
लावछिन्नार्थत्वात्· तादृशस्य चानुगतत्वात्· स्वसमानाधिकरणानुमितित्वावछेदेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वं
विवक्षणीयं· अतोनुमित्युत्पादकपरामर्शाद्यधिकरणक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वस्य तत्परामर्शसमानाधिकरणकालां

प०ग०
४३
43

तरीणानुमितौ सत्येपि नजन्यसविषयके भेदकूटाप्रसिद्धिः। स्वक्षणाव्यवहितोत्तरत्वं पूर्वनिरुक्तं ग्राह्यं· तस्युत्पत्तीय यादृशघटज्ञानाद्युत्तरं तदीया
नुमितौ अनुत्पन्नायामेव तस्य पुंसो मुक्तिस्तादृशमेव घटज्ञानादिकं स्वाधिकरणसमयोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसा
मान्यकमिति· परामर्शाद्यसमवहितात्तदन्यघटज्ञानादितोनुमित्यापत्तिः। तस्याः स्वपदेनोपादानासंभवादतोऽव्यवधाननिवेशः। निरु
क्ताव्यवधानस्य चानुमित्यनुत्पादकघटज्ञानादेः पूर्वं कदाचिदुत्पन्नायामप्यनुमितेरुत्पत्त्यधिकरणक्षणे· अव्यवहितोत्तरत्वस्य तादृशा
नुमित्युत्पत्तिमति तादृशघटज्ञानादिद्वितीयक्षणपर्यन्तस्थायिस्थूलकालेऽसत्त्वात्तादृशांशस्य मप्रसिद्धमेव स्यात्· अतउत्तरत्वक्षणत्वयो
निवेशनं· अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकत्वयास्त्वपदेनोपादानासंभवान्ततोनुमित्यन्तरापत्तिरतउत्पत्तिनिवेशः।
व्यधिकरणानुमित्यव्यवहितपूर्वोत्पन्नघटज्ञानादिवारणाय सामानाधिकरण्यमनुमितिविशेषणं· द्वितीयकल्पेनुमित्यव्यवहित
पूर्वक्षणोत्पत्तिमुपलक्षणीकृत्य पृथगुत्पत्तिकालस्य विशेषणतयानिवेशापेक्षया तादृशक्षणोत्पत्तिघटकतादृशक्षणवृत्तित्वस्य वि
शेषणतयानिवेशनमेवोचितं· तावतैवातिप्रसंगभंगादित्याशयेनाह किंचेति· पद्व्यावृत्तिः स्फुटैव· यादृशपरामर्शाद्वितीयक्षणे किमपि
ज्ञानं नोत्पन्नं तृतीयक्षणे चानुमितिर्जाता· तत्र परामर्शरूपज्ञानस्यैवानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टस्यानुमित्यव्यवहितप्राक्क्ष

४३

पोसत्वात् ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनमफलमित्यतो ज्ञानत्वमेवात्र निवेशितं अन्यथानुयोगिनिस्वत्वांतर्भाविनाननुगमस्य नाशं
कनीयः। पूर्वकल्पद्वयेपि तत्सत्वात् गौरवस्य चाधिक्यात्। अननुगमासहिष्णुतायां तु तत्तद्व्यक्तिनिष्ठतत्तद्व्यक्तिसमानाधिकरणानुमित्यव्य
वहित पूर्वत्वानधिकरणक्षणसंबंधानामभावकूटविशिष्टज्ञानत्वेन कारणत्वमसक्तिर्बोध्याः न चोपदर्शितसकलरूपापेक्षया लिंगप
रामर्शत्वस्य लघुतया तेनैव रूपेण परामर्शहेतुत्वमुचितं इति न प्रतिबंधकाभाव इति वाच्यं। उक्तरूपेण हेतुत्वे कारणांतरविरहदशायामुक्त
रूपावच्छिन्नविरहेणैवानुमितिवारणसंभवात्कारणांतरस्याकल्पनीयतया लिंगपरामर्शत्वापेक्षया तच्छरीरगौरवस्याकिंचित्करत्वा
त्। ननु यत्र घटज्ञानादिद्वितीयक्षणे लिंगपरामर्शस्तदुत्तरमनुमितिस्तत्र परामर्शोत्पत्तिक्षणेप्यनुमितिप्रसंगः। प्रथमक्षणमपेक्ष्य द्वितीयस्ये
व द्वितीयक्षणमपेक्ष्य तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वेन तादृशघटज्ञानादेः स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वादित्यत
आह अव्यवहितोत्तरस्थेति। द्वितीयक्षण एवेति। अव्यवहितोत्तरत्वमध्ये स्वक्षणस्य न प्रातिस्विकरूपेण निवेशः किंतु स्वाधिकरणकालत्वेन। त
था च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्य तृतीयक्षणेऽसत्वात्। न तस्याव्यवहितोत्तरत्वमिति भा
वः। पूर्वकल्पत्रये ज्ञानत्वमुपेक्ष्य सविषयकत्वविशेषणप्रयोजनं स्फुटयितुमाशंकते न चादिमेति। द्वितीयकल्पेपि नश्यदवस्थपरामर्शजन्या

प० ग०
४४
५५

नुमितिस्थलेप्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टस्य परामर्शस्यैवानुमित्यव्यवहितपूर्वक्षणे सत्त्वान्नानुपपत्तिरित्यत आदिमे द्वि
त्युक्तं· अतथात्वादिति· द्वितीयक्षणेनुमित्यनुत्पत्त्या तत्कारणतावच्छेदकानाक्रान्तत्वादुत्पत्तिकालावच्छिन्नस्यानुमित्यव्यवहितप्राक्क्ष
णेसत्त्वाच्चेत्यर्थः। अनुमित्युत्पत्तिक्षण इत्यदर्शितस्थलेनुमितिपूर्वमपि परामर्शेन प्रतिबंधादनुमित्यनुव्यवसायादिर्नोत्पत्तुमर्हतीति
शंकानिरासायानुमितिसामग्र्या विरोधिन्या विरहेणेति· परामर्शमात्रं न प्रतिबंधकमपि त्वनुमितिसामग्र्येव· तदा च न तत्सामग्री
तस्याः फलाव्यवहितप्राक्काल एव सत्त्वादिति तदानीं नादृशपरामर्शाद्द्वितीयक्षणे· अनुव्यवसायादेरित्यादिना· सन्निकृष्टवस्त्वं
तरज्ञानपरिग्रहः। ननु यत्र परामर्शोत्पत्तिकाले समानविषयलौकिकचाक्षुषादिप्रत्यक्षस्य भिन्नविषये च शाब्दबोधस्य सामग्र्या
सीत् तद्द्वितीयक्षणे विनिगमनाविरहेण किमपि ज्ञानं न जायते सकलज्ञानसामग्रीषु प्रतिबंधकसमवधानस्य तुल्यत्वादतस्त
त्र द्वितीयक्षणे प्रत्यक्षादिसामग्रीविगमेपि तृतीयक्षणे नानुमितिः स्यात् उक्तकारणतावच्छेदकाक्रान्तज्ञानाभावादित्यत आह तत
इति· कथंचित्तज्ज्ञानानुत्पादेपीत्यर्थः। संस्कारादिति· तस्यापि सविषयकत्वघटिततत्कारणतावच्छेदकाक्रान्तत्वादिति भावः। न च यत्र परा ४४
मर्शादिरूपेक्षात्मकस्तत्र का गतिरिति वाच्यं· फलानुरोधेन तत्र संस्कारकल्पनाया आवश्यकत्वे न परामर्शादिरूपेक्षात्वस्यैवासिद्धेः।

नन्वनुमितेः संस्कारजन्यत्वोपगमे तस्याः स्मृतित्वापत्तिः। संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयोजकत्वादत आह संस्कारजन्यत्वेनेति। नि
रासादिति। संस्कारलिंगकानुमितौ संस्कारस्य हेतुत्वेनातिप्रसंगादिति भावः। प्रकृतसामग्र्याय कार्यानुत्पत्तिनिर्वाहितावच्छेदकरूपेण प्रतिबं
धकत्वमेव प्रसंजयति। स्वसमानाधिकरणेति। यद्व्याहतिरनुमित्यव्यवहितपूर्ववर्तिसिद्धिभिन्नसिद्ध्यभावपक्षतावच्छेद्या। सिध्याल
कपरामर्शानंतरं सिसाधयिषोत्पत्तिकाले सर्वत्र तदात्मसमवेतधर्मेन तस्याः प्रामाणिकत्वे यत्र न तन्नाशस्तत्र प्रथमं प्रतिबंधकतावच्छे
×संस्कारत्वेन संस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्। अन्यथा कालोपाधिविधया ज्ञानांतरेपि ज्ञायमानलिंगकरणतामते× द
कावच्छिन्नस्यासत्वेनातिप्रसंगसंभवात्केत्यांतरमाह स्वसमानाधिकरणेति। उक्तस्थले परामर्शादेरनुमित्यव्यवहितपूर्वक्षणवृत्ति
त्वेपि तदुत्पादक्षणस्यानुमित्यव्यवहितपूर्वत्वानधिकरणतया तद्वृत्तित्वविशिष्टत्वेन तत्परामर्शादेरेव प्रतिबंधकत्वान्नात्र कल्प्यता
दशा[illegible]स्थले सिषाधयिषोत्पत्तिकालेनुमितिप्रसंग इति भावः। अत्रानुमितेरव्यवहितपूर्वत्वं तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं। वक्ष्यमाण
अत्र क्षणत्वानिवेशेनुमित्युत्पत्त्यधिकरणमहाकालोत्पत्तिकध्वंसमादाय क्षणमात्रस्यैवाव्यवहितपूर्वत्वं स्यादिति क्षणत्वनिवेशः

पु०ग०
४५

45

ममावश्यकं· एवं चैतदपेक्षया ताद्दशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वविशिष्टत्वेन प्रतिबंधक
त्वमेवोचितं· अनुमित्युत्पत्त्यनधिकरणसमयस्य क्षणत्वेनानिवेशेऽपि क्षतिविरहात्· अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पन्न
ध्वंसप्रतियोगित्वस्यानुमित्यव्यवहितपूर्वक्षणभिन्नक्षणएव सत्वाच्चरमक्षणे क्षणत्वनिवेशनं चोभयत्रैवावश्यकं· अनुमित्य
व्यवहितप्राक्क्षणेपि तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वानधिकरणमहाकालादिवृत्तित्वविशिष्टसत्वेनानुमित्युत्पत्त्यनधि
करणसमयोत्पन्नध्वंसप्रतियोगिस्थूलकालविशेषवृत्तित्वविशिष्टसत्वेन चानुमितिमात्रानुपपत्तिरित्याशयेनाह स्वसमानाधि
करणेति· यदि च पूर्वकल्पे क्षणत्वानिवेशोनुमित्युत्पत्त्युपलक्षितकालोत्पत्तिकत्वनिवेशएवाल्पकालावच्छेदेनानुमित्युत्पत्त्यधिकरण
महाकालाद्युत्पत्तिकध्वंसमादायातिप्रसंगः न तु तदुत्पत्तिविशिष्टसमयोत्पत्तिकत्वनिवेशः· तथा च क्षणत्वमुत्पत्त्यधिकरणकाले
नानिवेश्यमेवेत्युच्यते· तथाप्युपलक्षितोत्पत्तिकत्वापेक्षया विशिष्टोत्पत्तिकत्वस्य गुरुशरीरतयैव कल्पांतरानुसरणसंगतिः न चैतत्क
ल्पेपि अनुमित्युत्पत्तिविरहविशिष्टसमयोत्पत्तिकत्वमेव ध्वंसे निवेश्यं· अनुमितेरुत्पत्त्यधिकरणभिन्नोत्पत्तिकत्वानिवेशोमत्रानुमित्या

४५

त्यात्मकपरामर्शानंतरजातानुमित्यंतरेछावशात्पुनरनुमितिः तत्रानुमित्सोत्पाद्कालस्यतत्पूर्वपरलोवाधिकरणमवस्थानावश्यकतयानुमित्युत्पत्त्य
धिकरणत्वानियमेनप्रथमानुमित्युत्पत्त्यधिकरणक्षणस्यानुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगितायादुर्घटतयानुमित्सोत्पा
द्कालेनुमित्यापत्तेः।अनुमित्युत्पत्त्यभावोपलक्षितसमयोत्पत्तिकत्वानिवेशेनुमित्यव्यवहितप्राक्क्षणस्यापितदुत्पत्त्यभावाधिकरणस्थूलका
लोत्पत्तिकध्वंसप्रतियोगितयातद्व्यक्तिपरामर्शादिरनुमितिविरोधितापत्तेः तथाचसाम्यमितिवाच्यं क्षणिकक्षणाभ्युपगमेनुमित्युत्पत्त्यनधिकर
णत्वोपलक्षितसमयोत्पत्तिकत्वनिवेशेपिदर्शितस्थलेनुमित्योत्पत्तिक्षणस्यानुमित्युत्पादानधिकरणतयोक्तदोषानवकाशादेतत्कल्पेलाघवसंभ
वात् अनुमित्यनधिकरणत्वस्यसमयविशेषणत्वेनुमित्युत्पत्तिक्षणस्याप्यनुमित्यधिकरणसमयाविशेषंप्रसेवाव्यवहितपूर्ववर्तितयातदुत्तरमनु
त्पापत्तिरतस्तदुत्पत्त्यनधिकरणत्वपर्यंतनिवेशः।समयाव्यवहितपूर्वत्वंसमयोत्पत्तिकध्वंसप्रतियोगित्वमेव नतुवक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिक
ध्वंसप्रतियोगित्वं तदुत्पत्तिक्षणनिवेशप्रयोजनाभावात् प्रागभावानभ्युपगंतृनयेतदुत्पत्तिकालीनध्वंसप्रतियोगित्वंतत्पूर्वत्वं तथाचतदुत्पत्तिकाली
नध्वंसप्रतियोगिकालवृत्तिध्वंसाप्रतियोगित्वरूपाव्यवहितत्वस्यस्वातंत्र्येणनिवेशानमफलं तदुत्पत्तिकालीनत्वस्थलेतदुत्पत्तिकालोत्पत्तिकत्वनि
वेशेनएवव्यवहितपूर्वकालवारणसंभवादित्याशयेनानुमित्यव्यवहितपूर्वत्वमनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेववाच्यमित्याह

प०गा०
४६
46

तदव्यवहितेति· अनुमितिस्थितिक्षणोत्पन्नध्वंसप्रतियोगित्वं अनुमित्युत्पत्तिक्षणसाधारणं अतस्तद्व्यवहितत्वविशिष्टस्याविरोधित्वोपपत्तये प्रथ
मोत्पत्तिनिवेशः। उत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशो तल्लाभायैव क्षणपदं· द्वितीयकल्पानुसरणवीजभूतप्रथमकल्पदोषं कथंचिदुद्धर्तुमाशंकते नचा
त्रेति· सिसाधयिषोत्पत्तिकाले कस्यचित्कालवृत्तिधर्मस्य नाशे तस्यैवानुमितिपूर्ववर्त्तिभिन्नत्वेन विरोधितया न सिसाधयिषोत्पत्तिकालेनुमित्यापत्ति
संभव इति तद्विनाशस्थलानुसरणं· अन्यदीयधर्मनाशेपि तेन धर्मेणाश्रयासत्त्वतयान्यदीयानुमितिप्रतिबंधासंभवात्तदुक्तं मीयस्येत्युक्तं· यद्यपिप
रामर्शानंतरं सिसाधयिषोत्पादस्थले परामर्शाव्यवहितपरक्षणे फलेच्छावश्यमेव स्वीकार्या· तथा च तस्या एव सिसाधयिषोत्पत्तिकाले व [illegible] विनाशस्त
थाप्यपेक्षाबुद्ध्यात्मकफलज्ञानाद्यदि परामर्शोत्पत्तिकाले फलेच्छा स्वीक्रियते तदा परामर्शोत्पत्तिद्वितीयक्षणे आत्मधर्मविनाशो न संभवतीत्यभिप्रा
येणेदं· अनुमितौ सुखत्वभ्रमदशायां फलांतरेच्छामंतरेणैव सुखत्वप्रकारेणानुमितीच्छासंभवतीत्यभिप्रायेण वा· सिसाधयिषानंतरमनुमित्युत्पा
दे तत्पूर्वोत्पन्नपरामर्शादेरेवानुमित्यव्यवहितपूर्ववर्त्तिभिन्नतया विरोधित्वेन नापत्तिः संभवतीत्यतस्तदनंतरमनुमितिरित्युक्तं· अनवरतेति· अ
नवरतपरिस्पंदमानानामनेकेषां परमाणूनां चेतनेन आत्मना समंथः संयोगसंतानः· संयोगधारा· तदुत्पन्नानां प्रतिक्षणमेव नाशादित्यर्थः।
अपरिमितानामपि घटादीनामिवास्थिरत्वे सदागतिस्वभावानामपि एकघ्राणादिरूपत्वे प्रतिक्षणं न संयोगोत्पादविनाशसंभव इत्यपास्तं

पवनादि

४६

तां तं· प्रतिक्षणमात्मसमवेतसंयोगादिनाशस्य संभवेपि न प्रामाणिकत्वेत्याशंक्याह फलानुमानेति· कल्पनासंभवादिति· अनुमित्युत्पत्तेरेककार
णासत्वावश्यकतया तदनुत्पादस्य तादृशसंयोगादिनाशमंतरेणानुपपद्यमानत्वादितिभावः। ननु तत्रानुमित्यनुत्पादनिर्वाहाय सिध्यभावादि
रूपकारणांतरमेव कल्प्यतां तद्विरहेणापि तत्र तदुपपत्तेरित्यत आह कारणांतरेति· नन्वनुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्यका
रणता सिद्धौ उक्तस्थले अनुमित्यनुत्पादनिर्वाहाय तादृशकारणाभावोपपादकः संयोगादिविनाशः कल्पनीयः। प्रथमं च तादृशकारणताग्रहए
व न संभवति उक्तस्थले तदानीं तादृशाभावकार×रूप×णासत्वस्य संदिग्धतयान्वयव्यभिचारसंदेहादित्यत आहान्वयव्यभिचारेति· अविरोधित्वा
दिति· कारणतायाः कार्यव्यापकतागर्भाया ग्रहे बाधाभावावगाहितया व्यतिरेकव्यभिचारग्रहस्यैव विरोधित्वात्· सामग्रीनिष्ठकार्यव्याप्तेः
कार्यकारणभावाघटकतया तादृशव्याप्तिविरोध्यन्वयव्यभिचारग्रहस्य कार्यकारणभावग्रहविरोधित्वे मानाभावादितिभावः। ननु प्रति
क्षणमात्मनि संयोगादिविनाशेपि यत्र दर्शितस्थले सिद्धिरनुमितिरूपा तत्र द्वितीयक्षणाविनष्टसंयोगादेरनुमितिपूर्वमपि सत्वेनाविरो
धितया कापत्तिस्तदवस्थैवेति अत आहोपादीयतां वेति· प्रतिबंधकतया स्वीक्रियतामित्यर्थः। समयविशेषः। यद्वा यत्रात्मनि अनुमितिर्नो
त्पद्यते तत्पूर्वक्षणरूपतत्संबंधस्यानुमित्यव्यवहितपूर्वमभावात्· एवं च सति प्रतिबंधकतास्वरूपसंबंधेनैव वाच्या· सर्वत्र क्षणाविशेष

प०म०
४१

47

संबंधस्यैवप्रतिबंधकतासंभवेनसिध्यादिसाधारण्याभावेपिनक्षतिः।क्षणसंबंधस्यस्वरूपातिरिक्तत्वमभ्युपेत्येदं·अनतिरिक्तत्वाभिप्रा
येणानुगतेनभेदकूटाघटितलघुरूपांतरेणकारणतांप्रसंजयतिभवेद्धेति·एकपुरुषीयानुमित्युत्पाददक्षणेसर्वात्मनामनुमित्यापत्तेर्वार
णायतत्तत्पुरुषीयत्वनिवेशः।क्षणस्यकारणताचयदातादृशक्षणस्तदुत्तरंकार्यमितिकालिकव्याप्त्यासत्याबोध्याः·तत्तदात्मसमवेतत्वा
वच्छिन्नंप्रतितत्तदात्मत्वेनकारणतयादैशिकातिप्रसंगभंगोबोध्यः।परामर्शसाधारण्यानुरोधेनाह तादृशेति तदीयानुमित्यव्यवहितपू
र्वसमयः।यद्यप्यत्रपूर्वोपदर्शितस्वसामानाधिकरण्यस्यानुमितिविशेषणतयाव्याप्तिप्रसंगःशक्यवारणस्तथापितत्रस्वांतर्भावेनाऽन
नुगममाशंक्यतत्पुरुषीयत्वघटिततत्कल्पानुसरणंबोध्यं·नचैवंपुरुषभेदेनकारणताभेदात्सामानाधिकरण्यप्रसंगसत्तालिंगप
रामर्शत्वसिध्यभावत्वादिनाकारणताकल्पनमेवोचितमितिवाच्यं·लिंगपरामर्शादेरपिलिंगादिभेदेनकारणताभेदस्यावश्यकत्वा
त्पुरुषापेक्षयालिंगादीनामेवभूयस्त्वात्·उक्तरूपेणकारणतास्वीकारेनिर्बीजंप्रदर्शयितुं·तथाचेति·उपमानादेरित्यादिनाशब्दपरिग्रहः।
प्रमाणांतरत्वं·अनुमानबहिर्भूतप्रमाणत्वं·सर्वत्रैवेति·उपमानादिस्थलेलिंगपरामर्शादिघटितानुमितिसामग्र्यनियमात्तत्रप्रमित्यंत
रमुपेयतेअतः·उपमानादेःप्रमाणांतरता·अनुमित्युत्पत्तिमात्रेनिर्वाह्यस्योक्तकारणस्यानुमितिसामग्रीत्वेतुतस्याःसर्वत्रैवसंभवेनोप

मित्यादिरूपविलक्षणप्रमितेरेवासिद्ध्यापत्तेरितिभावः॥ ननु सर्वत्रैकजातीयप्रमितिसामग्रीसंभवेप्युपमितेर्मिश्रणोमितानुमितेरनुभवसा
क्षिकं प्रमितित्वैलक्षण्यं दुरूपह्नवमेवेति नोपमानादेः प्रमाणांतरताभंग इत्यतोन्यदूषणमाह विलीयेतेति॥ उक्तरूपेण परामर्शादेरपि का
रणत्वात्॥ परामर्शत्वादिनेति॥ अनुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वादिना बाधादेरपि प्रतिबंधकत्वात् बाधत्वादिनेति॥ कार्यांतरेषु॥ प्रत्यक्षादिषु॥ कारणा
नां॥ सर्ववादिसिद्धेंद्रियसन्निकर्षत्वाद्यवच्छिन्नानां॥ प्रतिबंधकानां॥ सर्वसंमतप्रतिबंधकतावच्छेदकदोषविशेषत्वाद्यवच्छिन्नानां॥ अतथात्वं॥ अ
कारणत्वं अप्रतिबंधकत्वं च॥ अक्लृप्तानां॥ अकारणत्वादिना सर्वानुमतानां॥ कार्याव्यवहितपूर्ववर्त्तितद्भिन्नानामुदासीनवस्तूनां॥ तथात्वं॥ कारणत्वा
दिकं॥ प्रसज्येत॥ तेषामप्युक्तकारणतावच्छेदकरूपाक्रांतत्वादितिभावः॥ अत एवेति॥ अनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्धीनां नानाव्य
क्तित्वावच्छिन्नाभावस्य हेतुत्वेनंतकारणताप्रसंगात्॥ तादृशसिद्धिभिन्नप्रसिद्धित्वावच्छिन्नाभावहेतुत्वे तस्यानुमितित्वस्याधीनतयान्यो
न्याश्रयात्॥ तत्तत्सिद्धिभेदकूटवत्सिद्धित्वावच्छिन्नाभावहेतुत्वे सिद्धिभेदानां विशेष्यविशेषणभावे विनिगमनाविरहादेवेत्यर्थः॥ एत
तेधिकदूषणमाह नैयत्याच्चेति॥ अनुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्यैव कारणत्वसंभवात्॥ बाधबुध्यादेरभाव
स्य परामर्शादेः कारणत्वांतरविलयप्रसंगस्येष्टत्वादितिभावः॥ एतन्मतद्वदर्शितत्तृतीयक्षणसाधारण्याव्यवहितोत्तरत्वघटि

तस्यक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिध्यभावरूपपक्षतायाः पक्षेपि पूर्वोक्तसिद्धिर्यद्व्यावृत्त्यसंगतेस्तद्वैयर्थ्यं बोध्यं· न च
ज्ञानेछयोर्योगपद्ये सिसाधयिषाकालोत्पन्नानुमितिपूर्ववर्त्तिपरामर्शादेः सिसाधयिषाविरहविशिष्टाव्यवहितोत्तरक्षणोत्पन्नानुमि
तिकभिन्नतया पूर्वं सिसाधयिषाविरहविशिष्टतया चानुमितिविरोधितास्यादिति तत्सार्थकतेति वाच्यं· ज्ञानेछयोर्यौगपद्ये सिध्युपादानेपि
यत्र पूर्वोत्पन्नासिसाधयिषा चतुर्थक्षणे सिध्यनंतरं पुनः सिसाधयिषानुमितिश्च युगपत्तत्रासिद्धेर्विरोधित्वापत्तेर्दुर्वारत्वात्· न च तत्र सिध्यनु
पादाने सिसाधयिषाविरहविशेषणस्यापि वैयर्थ्यमापतितं· यत्र क्रमेण सिद्धिसिसाधयिषानुमितयस्तत्र सिद्धेरनुमित्यविरोधित्वेपि सिसा
धयिषोत्पत्तिकाले विनष्टफलेछादीनां विरोधितयैव सिसाधयिषोत्पत्तिक्षणे नुमितिवारणसंभवादिति वाच्यं· सिद्धेरनुमितिरूपत्वे इछाका
ले विनष्टस्य फलेछादेरनुमित्यव्यवहितपूर्ववर्तितया विरोधित्वासंभवादिति· समानविषयकप्रत्यक्षादिसामग्रीकाले पक्षताविरहेणानुमितिवा
रयतो मूलस्थसाधकमानं सिद्धिसाधकमानविशेषान्यतरपरतया वर्णयतउपाध्यायस्य मतमाह सिसाधयिषेति· सिद्धाविव साधकमाने
प्यनुमित्साया उत्तेजकत्वात्प्रत्येकं तदभावविशेषणत्वे गौरवमित्यन्यतरत्वावछिन्ने सकृत्तद्विशेषणतालाभाय समासउपेक्षितः· अनु
मितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्वात्सिसाधयिषां विना कदाप्यनुमितिर्न स्यादित्यनुमानातिरिक्तत्वं साधकमा

नविरोधवर्णं· साधकपदार्थघटकासिद्ध्याद्यनुमित्यन्यत्वविशेषणपर्यवसितं· इदं च लाघवमाशंक्यायेनिराकार्यं· साधकमानपदार्थं हि स्वय
तिसाधकमानं हीति· तदुपहितं स्वजन्यसिद्धिविशिष्टं· तत्सामग्री· सिद्धिकारणसमुदायः· अनुमितिसामान्ये तदभावविशिष्टसाधकमानाभा
वस्यावश्यकत्वात्· विनानुमित्सामिति· अनुमित्यभावप्रसंगादिति· कालिकप्रत्यासत्त्याप्रतिबंधकत्वाभिप्रायेण· समवायेन प्रतिबंधकत्वे आत्मनि
सर्वदैव चक्षुरादिप्रमाणाभावादिति प्रसंगो बोध्यः। प्रत्यक्षसामग्रीसत्त्वे· अनुत्पन्ने प्रत्यक्ष इति शेषः। ननु तत्रानुमितिवारणायान्यदेव प्रतिबं
धकमास्थेयं· सिध्यभावपक्षतामते पितदावश्यकत्वादित्यत आह अनुमानातिरिक्तेति· तथा सति पक्षताशरीरे अनुमानातिरिक्तसाधकमानां
तर्भावस्य निष्फलत्वादित्यर्थः। सिध्यसमवहितसामग्रीदशायामनुमितिवारणस्यैव तत्फलत्वात्· साधकमानपदेन सिध्युपहितविव
क्षणे च तदनिर्वाहादिति भावः। केचित्तु यथाश्रुतानुरोधेनानुमानातिरिक्तेति· तन्मात्रपरमेव· न च सामग्र्याः पृथक् प्रतिबंधकत्वे साध
कमानपदार्थस्य सिध्युपहितस्यापि निवेशनमफलमेवेति वाच्यं। यत्र विषये प्रत्यक्षाद्युपहितसन्निकर्षादिघटितप्रत्यक्षादिसामग्री
दशायामेव परामर्शादिसमवधानं तत्रानुमितिवारणाय साधकमानस्यैव पक्षतायां निवेशयितुमुचितत्वात्· न च तत्रापि सिद्धिप्रति
बंधकत्वैवोपपत्तौ सिध्युपहितनिवेशनमफलमिति वाच्यं· शाब्दसिद्धिकाले शाब्दं ज्ञानं जायतामितीच्छाबलादनुमित्युपपत्तये सिद्धे

तादृशेच्छाया अवश्यमुत्तेजकत्वोपगमात् । तथाविधेच्छाबलादुपदर्शितप्रत्यक्षसामग्र्यनंतरमनुमितेर्वारणाय साधकमानांतर्भाव्य सार्थक्यात् ।
न च सिद्ध्युपहितचक्षुःसंयोगादिसत्त्वे आलोकसमवधानाद्यसत्त्वे तादृशेच्छाबलादनुमित्युत्पत्त्या साधकमानेपि तादृशेच्छाया उत्तेजकतायाः
आवश्यकत्वात् । पक्षतामात्रदलं तर्भावेप्युक्तापत्तिवारणासंभव इति वाच्यं । यत्र विषयविशेषे प्रत्यक्षोपहितचक्षुःसंयोगादिसत्त्वेऽइतर
कारणसमुदायसत्त्व एव भावे ज्ञानं जायतामितीच्छा न तु इतरकारणाभावविशिष्टतादृशचक्षुःसंयोगादिसत्त्वे । तत्र तादृशेच्छाभावस्य प्र
त्यक्षोपहितचक्षुःसंयोगादिरूपसाधकमानविशेषणत्वानुपगमात् । तादृशविषयविशेषविषयपक्षतायामेव तथाविधसाधकमानांत
र्भावस्य सार्थक्यादिति भाव इत्याहुः । अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वमिति । अन्यथानुमित्साधीनानुमित्स्यकालादिकालेप्र
त्यक्षापत्तिरिति भावः प्रत्यक्षसामग्र्यभावत्वेन । सिद्धिप्रत्यक्षसामग्र्यन्यतराभावत्वेन । अन्योन्याश्रयादिति । अनुमितिसामग्र्यभावं प्रत्यक्ष
कारणकलापांतर्गतमज्ञात्वा प्रत्यक्षसामग्र्या अज्ञानात् । तद्ज्ञाने च तदभावघटितानुमितिसामग्र्या अज्ञानेन तदभावाज्ञानादिति भावः ।
अथवा कारणसमुदायत्वेन सामग्र्या निवेशो समुदायपदस्य प्रत्येकं सकलकारणेष्वेव सत्त्वाद्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिता
काभावानुपगमे सामग्र्याः सामग्रीभिन्नभिन्नत्वं दुर्घटमिति कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेनैव सामग्री निवेश्या । अव्याप्य

वृत्तिधर्मावच्छिन्नभेदस्याव्याप्यवृत्तितामभ्युपेत्यान्यदा कार्याव्यवहितप्राक्क्षणावच्छिन्नभेदवत्त्वं कार्याव्यवहितप्राक्क्षणे च तादृ
शभेदावच्छिन्नभेदवत्त्वं फलोपधायकस्योपपादनीयं तथा च परामर्शादिसत्त्वे प्रत्यक्षोत्पत्तिकाले अनुमित्यनुत्पादः प्रत्यक्षोत्पादनि
र्वाह्यः उक्तानुमितिप्रतिबंधकत्वस्य प्रत्यक्षोत्पत्तिमंतरेणानिर्वाहात् प्रत्यक्षोत्पत्तिरप्यनुमित्यनुत्पादमपेक्षते तदुत्पादे अनुमित्य
व्यवहितप्राक्क्षणावच्छिन्नस्य प्रत्यक्षप्रतिबंधकस्यैवावश्यं सत्त्वादित्यन्योन्याश्रय इति भावः अत्रैव कल्पे न्यायां दूषणमुपन्यस्य
ति स्थाणुत्वाभावेति स्वोक्तदोषस्याप्येतदनुमततया चकारसंगतिः यत्र विशेषदर्शनानंतरं क्षणजातप्रतियोग्यारोपात्स्थाणु
त्वाद्यभावप्रत्यक्षं तत्रेत्यादिः तदभावानुमित्यापत्तेः स्थाणुत्वाभावानुमित्यापत्तेः तथा चानुमित्यन्यसिद्धिसामग्र्यभावस्य कार्य
कालवृत्तितया पृथगेव कारणत्वमावश्यकमिति भावः प्रतियोग्यारोपकारणतायाः स्वासंमततया केचिदिति ननु पक्षताघटकप्र
त्यक्षसामग्री नानुमितिसामग्र्यभावघटितकारणसमुदायरूपापि तु तदतिरिक्ता प्रत्यक्षासाधारणकारणरूपैव वाच्या अनुमि
त्साविशिष्टसमानविषयकानुमितिसामग्रीदशायां सिसाधयिषाद्युपात्ते जनकत्वादेवानुमित्युपधायकत्वे एवं प्रत्यक्षं प्रति अनुमि
तिसामग्र्याः प्रतिबंधकतायामपि निरुक्तपक्षतानिवेश्यते पि तु लाघवादनुमित्साविशिष्टमेव असमानमनुमित्सायां समानवि

प०ग०
५०
50

षये प्रत्यक्षोत्पत्तेरावश्यकत्वात्· तत्सत्वे च पक्षताया अप्यावश्यकत्वात्· तथा च न प्रथमो ऽन्योन्याश्रयावकाशः ॥ एवं सामग्र्याः कार्या
व्यवहितप्राक्क्षणावच्छिन्नत्वेन प्रतिबंधकत्वेपि समानविषयप्रत्यक्षप्रतिबंधकतायां अनुमित्सावैशिष्ट्यं निवेश्यते· तथा चोक्तस्य
ले प्रत्यक्षोत्पत्तिर्नानुमित्सानुत्पादमुपजीवति· अनुमित्सोत्पादेप्यनुमित्साविरहेण प्रत्यक्षप्रतिबंधकासत्वादपि त्वनुमित्साविरहमेवेति
न परोप्यन्योन्याश्रयः ॥ अन्यथा सामग्र्याः पक्षताया मनंतभावेपि पृथक् प्रतिबंधकताया आवश्यकत्वेनानिस्ताराद् इत्यत आह वस्तु
तस्त्विति· स्वतंत्रान्वयव्यतिरेकशालित्वं सिद्धत्वादिरूपप्रत्येकवृत्तिधर्मावच्छेदेन कार्यानुत्पादं प्रत्यन्वयव्यतिरेकानुविधायित्वं· न च न्यत
रत्वेन प्रतिबंधकत्वेपि तन्नियतासिद्धिर्लाघवावच्छिन्नस्य कार्यानुत्पादान्वयनियतत्वं· तदवच्छिन्नव्यतिरेकस्य च कारणांतरपरामर्शा
दिसहितस्य कार्योत्पादनियतत्वं संभवतीति न तावता प्रतिबंधकतासिद्धिरित्यतो हेत्वंतरमाह नियमेनेति· प्रथमोपस्थितत्वात्प्रत्येक
रूपावच्छिन्नस्य तदवच्छिन्नान्यतरत्वापेक्षया प्रथममुपस्थितत्वात्· उपस्थितिलाघवमुक्त्वा शरीरलाघवमाह लाघवादिति उक्तरूपद्व
यमप्यपेक्ष्य तद्द्वयघटितस्याधिकभेदादिघटिततया गुरुत्वादिति भावः ॥ प्रत्येकं· सिद्धित्वादिना· तथात्वं· प्रतिबंधकत्वं· अन्यथा· प्रतिबं
धकत्वैक्यानुरोधेन नानाधर्मावच्छिन्नानां तत्तदवच्छिन्नभिन्नाभिन्नत्वेन प्रतिबंधकत्वे· बाधादेरित्यादिना सत्प्रतिपक्षपरिग्रहः ॥ अत्रैव·

पक्षतायामेव·अंतर्भावप्रसंगात्·घटकताप्रसंगात्·सिद्धिबाधसामग्रीविरहो बाधान्यतमत्वावच्छिन्नाभावस्य पक्षतात्वप्रसंगादिति समुदायार्थः॥ अन्य
थाबाधबुध्याद्यभावस्य कारणत्वांतरकल्पनापत्तेरिति भावः॥ न च वह्न्यादिनिश्चयाप्रतिबध्यायामपि वह्निमान्पर्वतो घटवानित्याद्यनुमितौ वह्न्य
भावादिनिश्चयस्य प्रतिबंधकतया वह्न्यादिप्रकारताघटिततद्रूपावच्छिन्नं प्रति वह्न्यभावादिनिश्चयस्य पृथक् प्रतिबंधकत्वांतरमावश्यकमिति क
थं साध्यतदभावनिश्चययोर्नामैकरूपेण प्रतिबंधकताप्रसक्तिरिति वाच्यं· वह्न्यादिप्रकारकानुमितौ वह्न्यभावादिनिश्चयस्य पृथक् प्रतिबंध
कत्वविरहेपि वह्निमान्पर्वतो घटवानित्याद्यनुमितिहेतुपक्षतायां आश्रयासिध्यादिनिश्चयांतर्भावेनैव तादृशनिश्चयदशायां तथाविधानु
मितिवारणसंभवात्·अवच्छेदकगौरवस्य भवतैवाप्रयोजकीकृतत्वात्·न च तथापि बाधकाले प्रत्यक्षादेरप्युत्पत्त्या विशिष्टसामान्यप्रति बुद्धि
बाधबुद्धेः प्रतिबंधकत्वांतरकल्पनमावश्यकमेवेति पक्षतायां तदंतर्भावो निरर्थक इति वाच्यं· तत्रापि भिन्नविषयकानुमितिसामग्र्या
दीनामवश्यकल्पनीयप्रतिबंधकतायां बाधबुध्यादिसाधारणान्यतरत्वादेरवच्छेदकतयैवोपपत्तेर्बाधबुद्धेः सामान्यप्रतिबंधकत्वासिद्धेः।
प्रत्यक्षस्थले इच्छानामुत्तेजकतयापि तदसिद्धेः॥ केचित्तु· अत्रैव ईदृशप्रतिबंधकतायामेव·प्रतिबंधकांतरसाधारण्यान्यतरत्वावच्छि
न्नप्रतिबंधकतायामेवेति यावत्·अंतर्भावप्रसंगात्·अवच्छेदकघटकताप्रसंगात्·तदभावव्याप्यवत्ताज्ञानादिसाधारणान्यतरत्वेनैव

प०गा०
५१
51

बाधादेः प्रतिबंधकताप्रसंगादिति समुदायार्थः। तथा च पक्षतायां बाधाद्यंतर्भावपरत्वाभावान्नोक्तातिप्रसंग इति व्याचक्रुः। केचित्तु तदभावनि
श्चयदशायां यादृशांकुरवह्निविशेषधर्मितावच्छेदकाद्यनुमितेः कारणांतरविरहादेव नियमतोनुत्पादस्तत्साधकस्य लाभिप्रायक एवायं ग्रंथ इत्या
हुः। ननु सिद्धिसामग्रीविशेषयोरुभयोरेवानुमित्साया उत्तेजकतया तयोरनुगतरूपेण प्रतिबंधकत्वेनुमित्साविरहस्यान्यतरत्वावच्छिन्ने
सकृद्विशेषणतया लाघवं। अनुमित्साविरहविशिष्टसिद्धिसामग्र्यन्यतरत्वापेक्षया तद्विशिष्टसिद्धित्वतद्विशिष्टसिद्धिसामग्रीत्वयो
र्द्वयोरेकस्यापि विशेषणस्य द्विधा निवेशेन गौरवात्। अन्यतरत्वघटकाधिकांशापेक्षया सिसाधयिषाविरहांशस्य गुरुतायाः स्फुटत्वात्। अ
तएव बाधाद्यंतर्भावेन प्रतिबंधेरपि नावसरः। बाधसिद्धितद्विशेषसामग्र्यन्यतमत्वेन प्रतिबंधकत्वेनुगतरूपावच्छिन्नांशे सिसाधयिषाविर
हविशेषणतायां सिध्यादिकाल इव बाधकालेप्यनुमित्साबलादनुमित्सापत्तेः। सिद्धित्वावच्छिन्न एव पृथक् तद्विशेषणतयोक्तलाघवानव
काशात्। विशिष्टबुद्धिसामान्ये बाधतदभावव्याप्यवत्ताज्ञानादीनामेकरूपेण प्रतिबंधकत्वे उक्तदिशा लाघवासंभवेनावच्छेदकगौरवस्य
दुष्परिहारत्वात्। न च प्रत्यक्षस्थले बाधबुद्धौ तदभावव्याप्यवत्ताबुद्धौ चेच्छाया उत्तेजकतया तत्रानुगतरूपेण तयोः प्रतिबंधकत्वे इच्छाविरहस्य
सकृद्विशेषणतया लाघवमक्षुण्णमेवेति वाच्यं। बाधादौ प्रत्यक्षेच्छाया उत्तेजकत्वेनानाप्रतिबंधकताप्रसंगेन तदनभ्युपगमात्। अनाहार्यत्वस्य

५१

प्रतिवध्यतावध्यतावच्छेदकत्वमंगीकृत्यैव बाधादिसमये आहार्यप्रत्यक्षस्योपपादनीयत्वादित्याशंकां निरस्यति न चेत्यादिना गौरवमित्यंत
माशंका· अनुमितेरुत्पादादिति· प्रत्यक्षादिसामग्र्यसत्वेनुमित्युत्पत्त्यैव तादृशेच्छाविषयसिद्धेरितिभावः अनुमितिविषयकेच्छाविरहस्यानुमि
तित्वाद्यप्रकारकतादृशेच्छासाधारण्यानुगतरूपावच्छिन्नविरहस्य· तादृशांच रूपं प्रागेवावोचितं· अनुमित्यनुत्पादादिति· प्रत्यक्षोत्पत्त्यापि तादृ
शेच्छाविषयासिद्धेरितिभावः अनुमितित्वादिप्रकारकेच्छाविरहस्य अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छात्वावच्छिन्नाभा
वस्य पृथगेव यथायोगं सिद्धित्वप्रत्यक्षसामग्रीत्वाद्यवच्छिन्नत्व एवं· नन्वनुमितित्वादिप्रकारकतदप्रकारकेच्छानामनुगतरूपावच्छिन्ना
भावस्य वान्यतरत्वावच्छिन्ने विशेषणं वाच्यं· प्रत्यक्षसामग्रीदशायामुत्तेच्छावलादनुमितेर्वारणाय चानुमित्यालौकिकप्रत्यक्षान्यत्ववि
षयतावच्छेदकावच्छिन्नसामग्रीसमवहितान्यत्वेनेच्छाविशेषणीया· अनुमितिसामग्र्या उपनीतभानसामग्र्याश्च समवहितायामिच्छायाः संग्र
हाय भेदद्वयमवच्छिन्नांतविशेषणं· अनुमितित्वादिप्रकारिकायाः प्रत्यक्षादिसामग्रीसमवहितेच्छायाः संग्रहायावच्छिन्नांतं· एवं चोक्त
लाघवमक्षुण्णमेवेत्यत आह स्वनिवर्तकेति· निवर्तकत्वं विषयतयावाध्यं· अतीव गौरवमिति· अतिगुरुशरीरे तादृशेच्छाविशेषणस्याधिक
स्य निवेशादितिभावः नन्वेवमपि प्रतिबंधकतैक्यनिबंधनलाघवं दुर्वारमेव· प्रतिबंधकांतराकल्पने एकत्रावच्छेदकगौरवस्याकिंचित्करत्वात्·

अनेकपक्षताहेतुतायामेकैकविधवह्न्यभावादिनिश्चयाभावानामंतर्भाविनंतस्यावच्छेदकगौरवात्‌· स्वातंत्र्येणैवतत्प्रतिबंधकताकल्पनस्यो
चिततयाबाधादेःपक्षतांतर्भावप्रतिबंधनवकाशात्‌· प्रतिबंधेरनुसरत्वाच्चेत्याशयेनान्यतरत्वेनप्रतिबंधकतामतेपिविनिगमनाविरहेणप्र
तिबंधकताद्वयमापादयति· अन्यतरत्वेति· अन्योन्याभावयोरसिद्धिभेदसामग्रीभेदयोः· तथाचसिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभे
दः· सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदः· विनिगमनाविरहात्प्रतिबंधकतावच्छेदकइति अवच्छेदकभेदात्प्रतिबंधकताभेदआव
श्यकइति· नचतादृशाभेदयोःसमनियततयाअभेदान्नावच्छेदकइतिभेदइतिवाच्यं· तादृशाभेदाभेदेपितस्यसिद्धिभेदविशिष्टसा
मग्रीभेदावच्छिन्नभेदत्वेनसामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदत्वेनचाविनिगमनाविरहेणावच्छेदकतायाःस्वीकरणीयतया
विशिष्टस्यावच्छेदकत्वस्यावश्यंभेदात्‌· नचाखंडस्यतस्यस्वरूपतएवावच्छेदकतासंभवादुक्तविशेषणपुरस्कारेणनावच्छेदकत्वमिति
कथंविनिगमनाविरहइतिवाच्यं· अभावस्याखंडत्वेपिस्वरूपतोवच्छेदकतायाःसिद्धांतविरुद्धत्वात्‌· यस्यस्वरूपतोभानंतस्यैवतथाव
च्छेदकतायाःसिद्धांतसिद्धत्वात्‌· विशेषणपुरस्कारेणोपस्थितेरवच्छेदकत्वग्रहस्यविशेषणावच्छिन्नावच्छेदकत्वावगाहित्वनियमात्‌·
किंचिद्रूपेणभासमानेस्वरूपतोवच्छेदकत्वस्यप्रमाणेनासंस्पर्शाच्च· नचतत्तद्व्यक्तित्वेनैवभेदस्यावच्छेदकत्वंनतुस्वरूपतः। त

थाचनोपदर्शितविनिगमनाविरह इति वाच्यं। भेदनिष्ठतत्तद्व्यक्तित्वस्य भेदस्वरूपातिरिक्तस्य दुर्वचत्वात्। भेदस्वरूपस्य च तस्य स्वरूपतो निवेशानासंभ-
वात्। एतेनाखंडस्यान्यतरत्वावच्छिन्नाभावस्य तत्तद्व्यक्तित्वेनैव हेतुत्वमित्यपि परास्तं। यत्तु सिद्धिभेदसामग्रीभेदयोः सामानाधिकरण्येन मिथो विशे-
ष्यविशेषणभावापन्नयोर्न भेदप्रतियोगितावच्छेदकत्वं येन विनिगमनाविरहः स्यात् अपि तु धर्मिविशेषणतापन्नयोरेव व्यासज्यवृत्त्यवच्छे-
दकत्वं तथाविधयोरप्यवच्छेदकतापर्याप्तिर्महानसीयवह्निर्नास्तीति प्रतीत्यावगाहनादिति। तदपि न। महानसीयवह्निर्नास्तीत्यादिबुद्धौ वह्नित्वाद्येक-
धर्मितावच्छेदकावच्छिन्न एव महानसीयत्वाद्यपरविशेषणभानमिति नियमः इत्थं चैकस्यानेकेषामवच्छेदकत्वे यादृशे धर्मितावच्छेदकावच्छिन्नविशे-
षणतापन्नस्यैव धर्मितावच्छेदकतानापन्नस्यावच्छेदकताग्रह इति नियमेन प्रकृते एकस्य धर्मितावच्छेदकतानापन्नस्य कस्यचित् तदवच्छिन्नविशेषण-
तापन्नस्यावच्छेदकत्वेऽपि च विनिगमनाविरहेणावच्छेदकताया भेदस्यावश्यकत्वात्। अवच्छेदकविषयतावैलक्षण्यस्यावच्छेदकतावैलक्षण्यनिय-
तत्वादित्यन्यत्र विस्तरः। अन्यतरत्वेनोभयोरनुगमेऽपि प्रतियोगितावच्छेदकसंबंधाननुगमान्न तयोरेकाभावस्य कारणतासंभव इत्याह आत्मनि-
ष्ठेति। समवायसंबंधावच्छिन्नप्रतियोगिताकसिध्यभाव आत्मप्रत्यासन्नतया कारणं। प्रत्यक्षासाधारणकारणचक्षुःसंयोगादिरूपसामग्र्या-
स्तु स्वाश्रयसंयुक्तमनःसंयोगादिरूपपरंपरासंबंधात्मकभिन्नभिन्नसंबंधावच्छिन्नाभाव एवात्मप्रत्यासन्नतया कारणं वाच्यमित्यर्थः। विषय

प०ग० ५३ 53

५३

चक्षुःसंयोगादेः समवायेन भावस्य सर्वदैवात्मनि सत्त्वात्तादृशाभावकारणताया अतिप्रसंगावारकत्वादिति भावः। ननु विषयचक्षुः
संयोगादेर्न प्रतिबंधकत्वं स्वीक्रियते येन संबंधाननुगमः स्यात् किंतु चक्षुःसंयोगादिविशिष्टस्य मनोयोगस्यैव समवायेन प्रतिबंध
कत्वं वाच्यं अत आह मणीति। चक्षुरित्यनंतरं दाहप्रतीति। मनोयोगादेरित्यनंतरं प्रकृत इति च पूरणीयं। प्रतिबंधकत्वायोगादिति। मनोयोगस्य
अनुमितावपि हेतुत्वात्कारणस्य प्रतिबंधकत्वायोगादिति भावः। यद्यपि कारणस्यापि रूपांतरेण प्रतिबंधकत्वे क्षतिविरहः। दाहप्रति
बंधकत्वेन हि प्रयोजनविरहादेवानिवेशः। प्रकृते तु संबंधैक्यानुरोधादेव मनोयोगादेरनुप्रवेश इत्यकिंचित्करमेतत्। तथापि मनोयो
गस्याधिकस्य निवेशनीयतया गौरवमेव बाधकं बोध्यं। न च सामग्र्याः स्वतंत्रप्रतिबंधकतामतेपि आत्मनिष्ठतासंपत्तये चक्षुःसंयोगादेः संबंध
तया मनोयोगादिप्रवेशस्यावश्यकत्वान्नाधिक्यमेतन्मतेपि। कालनिष्ठतया सामग्र्यभावहेतुत्वे तन्मते तु रूपी यत्र निवेशस्यावश्यकतया गौरवमि
ति वाच्यं। तथापि मनोयोगादिसंबंधस्याधिकस्य निवेशनीयतया गौरवस्य दुर्वारत्वात्। विषयभेदेन प्रतिबंधकताभेदविरहानुरोधेन
विषयप्रत्यासत्त्या चक्षुःसंयोगादिप्रतिबंधकतापक्षस्यैव स्वतंत्रसामग्रीप्रतिबंधकतावादिभिराश्रयणीयतया तत्र मनोयोगादेर्निवेशा
भावाच्च। तथा चेति। एवंरीत्या प्रतिबंधकतावच्छेदकसंबंधमध्ये दस्यावश्यकत्वे चेत्यर्थः। पूर्वं प्रतियोगितावच्छेदकभेदेन सिद्धिसामग्री विशेष

णयोः सिसाधयिषाविरहपदार्थयोर्भेदात्तन्निवेशानर्थक्यं व्यवस्थापितं इदानीं संबंधभेदेन तद्विशेषणताभेदं व्यवस्थापयति एककाले
ति एकक्षणावच्छिन्नमेकात्मसमवेतत्वमित्यर्थः यद्यपि संबंधमध्ये एकक्षणावच्छिन्नत्वानंतर्भावेपि सिसाधयिषाकाले तद्विरहरूपविशे
षणाभावात्ततो विशिष्टाभावोक्षत एव न च कालानंतर्भावे सिसाधयिषाकाले सिद्धेः कालांतरावच्छिन्नतद्विरहवदात्मनिवृत्तिरूपवैशिष्ट्यं
वर्त्तते अन्यात्मनिष्ठतद्दोषे च तादृशविशेषणं चेति विशिष्टसिद्धिसत्वमव्याहतमिति कथं विशिष्टाभावेन वर्जितव्यं कालांतर्भावे तु तादृश
कालाभावान्न तदानीं तद्वैशिष्ट्यमिति विशिष्टासत्वाद्विशिष्टाभावोक्षत इति वाच्यं सिसाधयिषाकालस्य तदधिकरणनिष्ठतदभा
वाधिकरणतानवच्छेदकस्यापि तन्नवच्छेदकतया तादृशाधिकरणताघटितसामानाधिकरण्यरूपतदिच्छाविरहसमानाधिकरणासि
द्धिनिष्ठवैशिष्ट्यस्यानवच्छेदकत्वात्तत्कालावच्छेदेन सिद्धिमत्यपि तदिच्छाधिकरणे इच्छाविरहविशिष्टसिद्धिसत्वानुपपत्तेः अन्यथा स्वा
धिकरणकालावच्छिन्नत्वस्य स्वाधिकरणताविशेषणत्वेपि तत्कालस्याप्यन्याधिकरणावच्छिन्नस्वाधिकरणतया कालविरह
प्रयुक्तवैशिष्ट्यविरहस्यानिर्वाहात् विशेष्यीभूततत्तत्सिद्ध्यधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य संबंधघटकत्वे चाननु
गमादिति तथापि विभिन्नकाले विशेषणविशेष्ययोः सामानाधिकरण्यसत्वेपि एकक्षणावच्छेदेन सामानाधिकरण्यस्यैव विशिष्ट

सत्वनिर्वाहकत्वमित्येतत्सूचनायैवैककालावच्छिन्नत्वकथनं । केचित्तु । कालस्यविशिष्टाभावप्रतियोगितावच्छेदकतावच्छेदकसंबंधाघट
कत्वेनउपलक्षितताभावात्तद्विशिष्टाभावत्वेनलक्षणस्यानिर्वाहः । प्रतियोगितावच्छेदकावैलक्षण्यात् । सर्वदादंडरहितपुरुषाधिकरणे
दंडोपलक्षितपुरुषाभावस्यैवसत्वेनपुरुषत्वादिमात्रस्यतत्प्रतियोगितावच्छेदकत्वासंभवात् । तादृशपुरुषांतरव्यावर्त्तकानुगतधर्मांति
रविरहेणसत्वेवाप्रतियोगिकोटौतस्याभानेनप्रतियोगितावच्छेदकेतदंतर्भावासंभवादित्याहुः । तच्चिंत्यं । अन्यादृशामिति । स्वाश्रयीभू
तात्मन्युक्तपरंपरासंबंधेनसंबद्धत्वरूपमित्यर्थः । ननुपक्षताशरीरेप्रत्यक्षादिसामग्र्यनंतर्भावेतदभावस्यानुमितौहेतुतातंत्रहेतुताकल्पनमावश्य
कं । तथाचतस्यैवपक्षपदप्रवृत्तिनिमित्ततास्वीक्रियतां । नतुसिध्यभावस्य । तथाचपक्षपदप्रवृत्तिनिमित्तमिदमितिमूलविरोधइत्यतआह ।
सामग्रीति । हेतुत्वेपि । अनुमित्यसाधारणकारणत्वेपि । लाघवात् । लघुशरीरत्वात् । ननुलाघवस्यपक्षपदप्रवृत्तिनिमित्तत्वोपष्टंभकत्वे
बाधाभावस्यैवतथात्वमुचितं । तत्रसिसाधयिषायाअप्रवेशात् । यदिचसिद्धसाधनस्थलेपक्षव्यवहारोनास्तीतिसिध्यभावस्यतथात्व
मित्युच्यतेतदाबाधदशायामपितद्विरहात्सोपिनिवेशतामित्यतआह । फलानुपहितेति । स्वविषयसिध्यनुपहितेत्यर्थः । एतच्चातिगौर
वसूचनाय । सिद्धसाधनस्थलेसाध्यनिश्चयदशायांपक्षव्यवहारविरहेणापक्षव्यवहारविरहस्यसर्वत्रादिसिद्धत्वेन । गौरवादिति ।

बाधस्थले व्यवहारस्य सविवादत्वया गौरवसाहिष्णुताया अन्याय्यत्वादिति भावः। ननु समवायसंबंधावच्छिन्नसिध्यभावस्यात्मप्रत्यासत्त्या सन्नत
स्यैवानुमितिहेतुतया तस्य पक्षपदप्रवृत्तिनिमित्तत्वे आत्मन्येव पक्षव्यवहारप्रसंग इत्यत आह विशिष्टेति· सिसाधयिषाविरहविशिष्टेस
र्थः। एतदभिधानं च सिद्धेः पक्षनिष्ठाया उद्देश्यतासंबंधेनानुमितिप्रतिबंधकत्वासंभवप्रदर्शनाय पर्वते वह्निमनुमिनुयां महानसे वह्नि
मनुमिनुयामिति साध्याकारकानुमितीनामेकत्रोत्तेजकत्वे तिप्रसंगेन पृथगेवोत्तेजकतया पक्षभेदेन कारणताभेदस्यावश्यकतया मनि
ष्ठप्रत्यासत्तेरेवोचितत्वात्· अन्यथा पुरुषविशेषाणामंतर्भाव[illegible]नीयतया गौरवात्· समानप्रकारिकायाः समानविशेष्यकसिद्धेरनुमि
तिप्रतिबंधकतयापि पक्षनिष्ठप्रत्यासत्त्यसंभवो बोध्यः। परंपरासंबंधादिति· स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकव
त्त्वरूपाया इत्यादिः। न च सिद्धिकालेप्येतादृशसंबंधेन पक्षे सिध्यभावो वर्तते ऽत्यंताभावस्य नित्यत्वादित्यतिप्रसंग इति वाच्यं· तत्तदात्मवृत्ति
त्वविशिष्टस्यैव सिध्यभावस्य तादृशसंबंधेन तत्तत्पुरुषं प्रति पक्षव्यवहारनियामकत्वात्· ननु विषयचक्षुःसंयोगादिरूपायाः प्रत्यक्षसा
मग्र्या आत्मनिष्ठप्रत्यासत्त्या न प्रतिबंधकत्वसंभवः। उक्तपरंपराया अतिप्रसक्तत्वात्· संबंधत्वे मानाभावाच्च· तथा च यदा तादृशसामग्री
तदुत्तरक्षणे नानुमितिरिति कालिकप्रत्यासत्त्यैव प्रतिबंधकत्वं कल्पनीयं· तथा च पुरुषांतरीयप्रत्यक्षसामग्र्यापि पुरुषांतरीयानु

प॰ग॰
५५
55

मितिप्रतिबंधः स्यात्. एवं कालिकसंबंधावच्छिन्नानुमित्साविरहस्यैव दैशिकसंबंधघटितसामानाधिकरण्यसंबंधेन सामग्र्यां विशेषण
त्वं स्वीकार्यं. तथा च पुरुषांतरीयानुमित्साकालीनपुरुषांतरीयप्रत्यक्षसामग्र्यास्तदीयानुमितिप्रतिबंधकत्वापत्तिरिति साशंकां चक्षुःसंयो
गादौ तत्पुरुषीयत्वमंतर्भाव्य निराकरोति. एकस्येति. अनुमित्सनुत्पादहेत्यंतमुपलक्षणं. अन्यस्य प्रत्यक्षसामग्रीसत्त्वेन्यस्य तादृशरहि
णोनुमित्सुत्पादाद्देसाध्यपि द्रष्टव्यं. तत्पुरुषीयानुमित्सायाः कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसंबंधेनाधिकरणं
यः क्षणस्तत्र कालिकसंबंधेन वर्त्तमानत्वं कालीनतार्थः सामग्र्या विशेषणं. अथवा समवायावच्छिन्नप्रतियोगिताकतदात्मवृत्तित्वविशिष्टाभा

मल

वावच्छेदकक्षणे कालिकसंबंधेन वृत्तिमेव तदर्थः। तेन तत्पुरुषीयानुमित्साक्षणस्याप्यन्यदेशावच्छेदेन दैशिकसंबंधेन कालिकसंबंधा
वच्छिन्नतदिच्छाभाववत्त्वेपि न क्षतिः। तत्पुरुषीयसिद्धिसामग्रीविरह इति. कालिकसंबंधावच्छिन्नप्रतियोगिताकः पक्षनिष्ठतदीयें
द्रियसंनिकर्षविशिष्टसाध्यनिष्ठलौकिकविषयतादिसन्निकर्षादिविरह इत्यर्थः। वैशिष्ट्यमेककालीनत्वमेव. विशेष्यविशेषणभावे विनिग
मनाविरहान्नानाकारणताकल्पनमगत्यानहेयाय. यावत्त्वेन तदसाधारणकारणसमुदायप्रतिबंधकत्वं पुनरनुपादेयमेव. याव

५५

त्त्वस्य दुर्निर्वचत्वात्. पर्वतो वह्निमानित्याद्यनुमितिसमानविषयकचाक्षुषादिसामग्र्याः प्रतिबंधकतायां रूपादिकं नांतर्भावनीयम्

तत्र साध्यपक्षयोरूपादिमत्वनियमे न तन्निवेशे प्रयोजनाभावात्· किंतु पर्वतो इध्यवान् इध्यं वह्निमत् इध्यं इध्यवत्· इत्याद्यनुमितौ चाक्षुषादी
न्द्रियसंनिकर्षस्याविरोधित्वापत्तेः यथायोगं साध्यपक्षादौ रूपादिमत्वं निवेशनीयं· अथ प्रतिबंधकसामग्रीमत्यपि काले तदनधिकरणदेशा
वच्छेदेन तदभावस्य सुलभत्वादनुमित्यापत्तिः न च प्रतिबंधकसत्तायाः कार्यानुत्पादप्रयोजकत्वात्तत्सत्वे कथं कार्योत्पत्तिरिति वाच्यं· सामग्र्याः कार्यो
त्पत्तिप्रयोजिकायाः प्रतिबंधकसत्वेपि तदभावस्याक्षतत्वेन कार्योत्पत्तेर्दुर्वारत्वादिति चेन्न· यादृशाकारणताघटकनियमे देशांतरावच्छेदेन का
र्यसमानाधिकरणकारणाभावस्य व्यावर्तकदेशाभेदानवच्छिन्नत्वविशेषणमभावे निवेश्यते· यथा समवायादिसंबंधावच्छिन्नसंयोगत्वाना
दिनिष्ठकारणताघटकनियमे· तदन्यकारणतावच्छेदकावच्छिन्नस्य देशाभेदानवच्छिन्नवृत्तिरेवाधिकरणे कार्योत्पत्तिप्रयोजिका· उक्तप्रतिबं
धकाभावस्य च कारणतानतादृशा· किंचिदवच्छेदेन तत्र प्रतिबंधकसत्व एव कार्यानुत्पादात्तादृशाभावविशेषणप्रवेशने प्रयोजनाभावात्· तथा
च देशाभेदावच्छिन्नप्रतिबंधकाभावबलान्नानुमित्यापत्तिः एतेनात्मनि शरीरविशेषावच्छेदेन सिद्धिरूपप्रतिबंधकसत्वे× आह्निक× घटाद्यव
च्छिन्नतदभावबलादनुमित्यापत्तिरपि निरस्ता· न चासिध्यादिमत्यात्मनि तत्काले बाधघटाद्यवच्छिन्नतदभावस्य यावद्वृत्तित्वस्य तदन्यदेशाभेदानवच्छिन्न
तद्भेदे प्रामाणिकत्वया सिध्याद्यसत्वेप्यनुमित्याद्यनुपपत्तिरिति वाच्यं· तादृशवृत्त्यनभ्युपगमे सिध्यादिसत्वदशायां तदभावस्या तानि दे

प० ग०
५६
56

शिक्षया पक्षवृत्तितायाः सर्वानुभवसिद्धाया अनुपपत्तेः। यदि च कायव्यूहस्थले एकत्रात्मनि शरीरांतरावच्छेदेन सिद्ध्यभावाभावस्य सिध्यादेः सत्वेप्य
न्यशरीरावच्छेदेनानुमित्साद्युत्पत्तिः प्रामाणिकी तदा सिध्यभावनिष्ठकारणताघटकनियमशरीरे ऽभावांशे उक्तविशेषणप्रवेशस्यावश्यकत्वात्
घटाद्यवच्छिन्नसिद्ध्यभाववत्वात् सिध्यादिदशायामनुमित्सापत्तेर्वारणायागत्यंतरमेवानुसरणीयमित्यादिकं उत्तेजकाभिमतसिसाधयिषा
कारणतांस्वीकृत्य सिध्यभावस्य कारणतामाक्षिपति अथैवमादिनाचेदित्यंतेन एतावतैव विना सिसाधयिषां सिध्यनंतरमनुमितेर्वारणसंभ
वादिति भावः। प्रतिबंदीमाशंकते न चैवमिति उत्तेजकस्य मंत्रौषधिविशेषादेः प्रतिबंदीमुद्धरति उत्तेजकानामिति मण्यादिस्थलीयोत्तेजकमं
त्रौषधादीनामित्यर्थः। अननुगतत्वादिति तथा चानुगतकार्यं प्रति व्यभिचारेण कारणत्वासंभवादिति भावः। इहापि सिद्धिस्थलेपि दर्शित
इति यादृशयादृशेच्छासत्वे इत्यादिनेत्यादिः। सिसाधयिषा उत्तेजकीभूतायेत्यादिः। तथा च तुल्ययुक्त्योत्तेजकाभावकूटविशिष्टायाः सिद्धेर
भाव एव दाहादौ मण्याद्यभाववत् हेतुर्भविष्यतीति भावः। ननु तावदभावकूटविशिष्टसाध्यनिश्चयाभावत्वापेक्षया लघीयसां तत्तत्तावद
न्यान्यत्वेनैवानुगमसंभवः सिसाधयिषाणामित्यत आह सिध्यकत्तरानुमितित्वं चेति अननुगतस्य सिद्धिसमानकालीनप्रागभावप्रतियो
गित्वरूपस्यानतिप्रसक्तस्य च तत्तत्सिद्धिनाशकालीनप्रागभावाप्रतियोगित्वेसति तत्तत्सिद्धिसमानकालीनप्रागभावप्रतियोगित्वा

५६

त्मकस्यैवसंभवादननुगतानतिप्रसक्तेत्युभयमुपात्तं· तथा च प्रथमधर्मस्य कार्यतावच्छेदकत्वे सिसाधयिषामंतरेणासिद्धिनाशोत्तरकाले जायमा
नायामनुमितेरसिसाधयिषायाव्यभिचारात्· उत्तरस्य तत्त्वे तथात्वे चानंतकार्यकारणभावप्रसंग इति भावः। सिद्धिस्थितिकालीनामिति· स्वक्षणवृ
त्तिप्रागभावप्रतियोगित्वस्वक्षणवृत्तित्वोभयसंबंधेन सिध्यवच्छिन्नामित्यर्थः। लाघवायाह स्वेतरेति· स्वभिन्नत्वस्वक्षणवृत्तित्वोभयसंबंधेन सिध्य
वच्छिन्नामित्यर्थः। पक्षद्वयेप्याद्यवृत्तिः स्फुटैव· संबंधविधया स्वक्षणवृत्तित्वादीनां निवेशान्न स्वत्वाननुगमनिबंधनो दोषः। संबंधमध्ये स्वपदार्था
निवेशेऽपि अन्याधिकरणावृत्तित्वादेरन्यसंबंधत्वाभावेनातिप्रसंगविरहात्· नाशकाले· नाशोत्पत्तिक्षणे· अनुमित्युत्पादोऽवारि इति· सिद्धिना
शसमयोत्पन्नानुमितेरुक्तसिसाधयिषाकार्यतावच्छेदकानाक्रांतत्वादिति भावः। ननु स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वनाशक्षणवृत्ति
प्रागभावाप्रतियोगित्वोभयसंबंधेन सिध्यवच्छिन्नानुमितित्वमेव सिसाधयिषाजन्यतायाअवच्छेदकं वाच्यं· एतच्चासिद्धिनाशकालोत्पन्ना
नुमितिसाधारणमेवेति नातिप्रसंगः। न च सामान्यतो नाशक्षणवृत्तिप्रागभावाप्रतियोगित्वं जन्यमात्रस्यैव न संभवतीति यदधिकरणक्ष
णावृत्तिप्रागभावप्रतियोगित्वं तद्व्यक्तिनाश एव विशिष्य निवेश्य इत्यननुगमतादवस्थ्यमिति वाच्यं· संबंधाननुगमस्यादोषत्वात्· कथंचि
दनुगमस्याऽपि संभवाच्चेत्यतो दोषांतरमाह केस्येति· सिद्धिसत्त्व इति· अव्यवहितपूर्वकाल इत्यादिः। अनुमित्युत्पाद प्रसंग इति· पुरुषांतरीयसि

प॰ ग॰
५७

57

अव्यवहितोत्तरोत्पन्नपुरुषांतरीयानुमितेरप्युक्तसिसाधयिषाजन्यतावच्छेदकधर्माक्रांतत्वादितिभावः॥सामानाधिकरण्यस्यौपाधिकस्यदर्शि
तकार्यतावच्छेदकताघटकसंबंधमध्येनिवेशेनपुरुषांतरीयसिद्ध्यनंतरोत्पन्नानुमितौसिसाधयिषायाव्यभिचारवारणसंभवाद्दोषांतरमा
हापिचेति॰सामान्यसामग्रीतः॥अनुमितिसामान्यहेतुभूतपरामर्शादितः॥ननुविशेषसामग्रीसमवहितायाएवसामान्यसामग्र्याःकार्योत्पा
दकत्वान्नापत्तिरित्याशंकायामाहनहीति॰इष्टापत्तेति॰सिसाधयिषानूपेत्यर्थः॥जनकत्वंउपधायकत्वं॰नास्तीति॰नहीत्यन्वयः॥सिद्धसत्वेसिसा
धयिषांविनापिपरामर्शादेरनुमित्युत्पादकत्वादितिभावः॥तथाचतत्रैवसिद्धिदशायामपिपरामर्शादिसत्वेसिसाधयिषाविरहेनानुमित्युत्पा
दप्रयोजकत्वमितिपर्यवसितं॰ननुविशेषसामग्रीविरहकूटएवसामान्यसामग्रीदशायांसामान्यकार्यानुत्पादप्रयोजकः॥सिद्धसत्वस्थ
लीयविशेषसामग्रीविरहघटितस्यकूटस्यचसिसाधयिषासहकृतसिद्धिस्थलएवसत्वंनतुसिद्धिमात्रस्थलइतिनदोषइत्यतआहनचे
ति॰अन्यत्रापि॰सिध्यसत्वस्थलेपि॰विशेषसामग्र्यंतरमिति॰सिध्यभावस्यैतन्मतेहेतुत्वादितिभावः॥तत्तदनुमितिव्यक्त्युत्पादकतत्तत्परा
मर्शव्यक्तीनांविशेषसामग्रीत्वेपिअनुमित्युत्पत्तिकालेपितत्रतत्सत्वेनतदनंतरमनुमित्युत्पादप्रयोजकविरहः॥तत्तद्व्यक्तिविरहाणामनंता
नांसामान्यकार्यानुत्पादकार्यानुत्पादप्रयोजकत्वेगौरवंच॰अन्यथावक्ष्यतरसामान्यकारणतायाउच्छेदप्रसंगइत्याशयः॥अत्राहुः॥सि

अनुत्तरमनुमितौसिध्यभावस्यहेतुत्वांतरकल्पनेयैवेदृशातिप्रसंगवारणसंभवाद्विशिष्टसिध्यभावहेतुत्वमयुक्तं·सिद्धिसिसाधयिषाविरह
योर्विशेषणविशेष्यभावेविनिगमनाविरहेणप्रतिबंधकताद्वयस्यत्वन्मतेप्यावश्यकत्वात्·प्रतिबंधकतावच्छेदकगौरवस्याधिक्यात्·
नचसिसाधयिषाहेतुतापक्षेपिकार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिनिवेशाधिक्येनगौरवमित्याशंक्यंतल्लिंगकेच्छाविरहविशि
ष्टसिध्यभावस्यपूर्वोपदर्शितसमूहालंबनजन्यानुमितौव्यभिचारवारणायाव्यवहितोत्तरत्वसंबंधेनतादृशासिध्यनवच्छिन्नानुमितित्वस्यैव
हेतुतायाभवतापिवाच्यत्वादिति·सिद्धिस्थलेविनापिसिसाधयिषांसामान्यकार्यत्वेनावृत्तेपितादृशकार्यस्योक्तविशेषसामग्रीकार्यता
वच्छेदकाक्रांततास्यात्·तथाचविशेषसामग्र्याविनातदुत्पत्तौ तत्रतस्याव्यभिचारात्कारणत्वेवव्याहन्यतेतिनतत्रतदुत्पत्यापत्तिरितिशं
कतेदूषितं·कार्योत्पादप्रयोजकसामग्रीसत्वेप्रयोजनक्षतिर्नकार्योत्पत्तिंविरुणद्धि·तथाचप्रकृतेसिसाधयिषाऽघटितयाःसामान्यका
र्यप्रयोजकसामग्र्याःसिद्धिकालेपिसत्वे·विशेषसामग्रीविरहेणतत्कार्यतावच्छेदकावच्छिन्नापत्यसंभवेपिसामान्यधर्मावच्छिन्नापत्तिर्दुर्वा
रैवेत्याह·सामान्यजनिष्टेति·सा·सिध्यनंतरानुमितिः·कार्यत्वंतुल्यास्य·तद्धर्मावच्छिन्नानुत्पादस्य·विनाकारणाविरहं·तद्धर्मावच्छिन्नोत्पादप्रयोजक
सामग्रीविरहंविना·अनुमितिंप्रतिपक्षतासहितपरामर्शत्वेनैवहेतुता·ननुपक्षतापरामर्शयोः पृथक्कारणताद्वयं·गौरवात्·नचविशेष

प० गु०
५८

58

णविशेष्यभावे विनिगमनाविरहः। परामर्शस्याहेतुत्वे तस्य व्याप्तिज्ञानरूपकरणव्यापारत्वासंभवात्। व्यापारतायाः फलजनकत्वगर्भत्वादित्यस्यैव विनि
गमकस्य संभवादिति केषांचिन्मतं दूषयति। करणेत्यादि। परामर्शस्येति। षष्ठ्यर्थो वृत्तिः। तस्याः कारणतायामन्वयः। निमित्तकारणस्य दंडादेः। सम
वायिकारणत्वेति। कपालादिनिष्ठघटत्वावच्छिन्नकारणतेत्यर्थः। समवायनियमाय तत्कारणताया आवश्यकत्वादिति भावः। जन्यसत्त्वावच्छिन्न
निरूपितायां समवायिकारणतायां दंडादेर्व्यभिचारेण प्रवेशासंभवात्। यथासंभवमित्युक्ते कारणत्वतदवच्छेदकत्वयोरुक्तविनिगमकेन नियतत्वे
ऽपि सिध्यभाववत्साहित्यपरामर्शत्वयोरेकविशिष्टस्यैवैकविशेष्यतावच्छेदकतापन्नस्यैव वा परस्यावच्छेदकत्वं वाच्यं। तत्रापि विनिगमनाविरहो दुर्वार ए
वेति तत्त्वं। सिध्यभावस्यानुमितिहेतुत्वेऽनुमित्सां विना कदाप्यनुमितिर्नोत्पद्येत मणिसमवधानोत्पत्तिकाले दाहानुत्पत्त्या प्रतिबंधकाभावस्य
कार्यकालसत्तायाः कार्योपधानप्रयोजकत्वात्। अनुमितिकाले सिध्यभावासत्त्वादित्यरुचेस्तस्य कारणतावच्छेदकत्वमेव न तु कारणत्वमि
त्याशंकते अथेति। कार्योत्पत्तिक्षणावच्छेदेनापि कार्याधिकरणे नियतसत्त्वं यत्कारणताघटकं तत्कारणताश्रयस्यैव कार्योत्पत्तिक्षणे सत्त्वं ५८
स कार्योत्पत्तिप्रयोजकं यथा मण्यभावादेः। सिध्यभावे प्रतिबंधकाभावरूपत्वेऽपि नियतप्राक्सत्त्वमेव कारणताघटकं न तदुक्तमपीति तस्य
प्राक्सत्त्वमात्रं फलोत्पत्तौ तंत्रमिति नानुपपत्तिरिति समाधत्ते यस्येति। अन्यथेति। सहचारदर्शनमात्रेणैव प्रतिबंधकाभावे कार्यसहभा

वेन हेतुतासिद्धावित्यर्थः प्राभाकरा इति सहभावनिरूपकस्यैव कारणतावादिन इत्यादिः। यद्यनुमितौ प्रत्यक्षादिसामग्र्याः प्रतिबंधकत्वां त
रकल्पने गौरवात् तत्सामग्रीदशायामनुमित्यापत्तिवारणायानुमित्यन्यमिथ्यभावे कार्यकालवृत्तितया हेतुत्वमेव युक्तं अनुमित्यभावस्य च प्रा
क्सत्वमात्रेण हेतुत्वांतरकल्पनामिति तदसत् सिसाधयिषानंतरजातसिद्धिद्वितीयक्षणेऽनुमित्यनुत्पादप्रसंगात् कार्यकालेऽनुमित्सा
नाशेन तदभावविशिष्टसिद्धिसत्वात् प्रत्यक्षादिसिद्धिसत्वेऽसत्यां च तत्सामग्र्यावाहज्ञानानंतरं जायतामिति छावलादनुमित्युत्पत्त्यानुमित्यन्यासि
द्धेतादृशेच्छाया उत्तेजकत्वात् तादृशेच्छावत्वात्प्रत्यक्षसामग्र्यनंतरं प्रत्यक्षाद्यकत्पादसमये प्यनुमित्यापत्तिः। सिद्धावप्रामाण्यग्रहसत्वे प्रत्य
क्षाद्युत्पादसमयेप्यनुमित्यापत्तिश्चेति पक्षतायाः अनुमितिहेतुत्वमनंगीकुर्वतां गुरूणां मतमाह प्राभाकरास्त्विति अनुमित्सायोग्यता
या उत्तेजकत्वे द्वित्वत्रित्वादिप्रकारकेच्छावलादनुमितिद्वितीयक्षणोत्पन्नपरामर्शात्तृतीयक्षणेऽनुमित्यंतरोत्पादस्य पक्षताहेतुताम
तेप्युपपत्तेः विनाप्यनुमित्सामिति क्वचित् प्रतिबंधकांतराभावस्थले परामर्शानुमितिप्रवाहस्य क्रमोत्पन्नपरामर्शानुमितिसमूह
स्य अपलापनिराकरणाय समूहपर्यंतानुसरणं पूर्वपूर्वानुमितिनाशोद्भुतीयादिपरामर्शादनुमित्यंतरोत्पत्तौ बाधकाभावात् तहाविलंबस्येति
ननु तत्रागत्या एकैकक्षणाविलंबेनैव अनुमितिः स्वीकार्यस्य तत आह कालभेदेति मानाभावात् युक्त्यभावात् पक्षताहेतुत्वस्या

स्य

सिध्यागसंतरविरहस्यैवासिद्धेरितिभावः॥ नन्वेवंसिद्धसाधनस्यादोषतयापरार्थस्थलेतदुद्भावनानुपपत्तिरित्यतआहपरार्थेति॥ आ
कांक्षाविरहादितिभावः॥ नचपक्षतायाअनुमित्सहेतुत्वेअनुमित्सनंतरंज्ञातव्याप्तिरेवकथंनोत्पद्यतेतद्वारणायैवतद्व्यक्तौतत्तत्प्रागभावव्यक्ती
नांविशिष्यानंतहेतुताकल्पनेगौरवमितिवाच्यं॥ तत्तदनुमितिव्यक्तीनांपूर्वंतन्नाशात्परतोवाकदाचित्समानविषयकानुमित्संरोत्पादसम
येतत्तद्व्यक्त्यापत्तिवारणायतत्तत्परामर्शव्यक्तीनांविशिष्यहेतुतायाआवश्यकत्वात्॥ ततएवतद्व्यक्तीनांपुनरुत्पादवारणसंभवात्॥ न
चपरामर्शानांतत्तद्व्यक्तित्वेनतत्तदनुमितिव्यक्तिहेतुत्वेपिविनश्यदवस्थात्ततदव्यवहितपूर्वोत्पन्नपरामर्शात्पुनस्तदनुमितिप्रसंग
इतिवाच्यं॥ एतन्मतेकार्यासहवर्तिनःफलाजनकत्वात्॥ अनुमितित्वावछिन्नाभावहेतुतयापितद्दोषापत्तिवारणसंभवात्॥ तदनुरोधेन
गुरूणांप्रत्यक्षादिसाधारणनिश्चयत्वेनप्रतिबंधकत्वासिद्धेः॥ अत्रकेचित्॥ पक्षतायाअनुमित्सहेतुत्वमतेविनापिवह्न्यादिलिंगकवह्न्या
द्यनुमितीच्छांतादृशानुमित्सुत्पत्त्यातादृशानुमितौतादृशानुमितीच्छाविरहविशिष्टप्रत्यक्षादिसामग्र्यभावस्यकारणताधिकाज्ञेरेवंपक्ष
ताहेतुत्वमतेतादृशानुमितेरिच्छानियततयातत्रेच्छायाजघीयस्याहेतुतलयैवोपपत्तेः॥ पक्षतापितत्रइच्छेवेत्याहुः॥ ॥इतिपक्षता॥
ग्रंथरहस्यं॥

॥श्रीः॥ पक्षतां निरूप्य विशिष्टपरामर्शत्वेनानुमितिहेतुताज्ञानद्वयकारणतावादिमीमांसकविप्रतिपत्तिं निरस्यमाणकारणत्वव्यवस्थापितां तत्र संगतिं दर्श
यति· लक्षणोपोद्घातेनेति· विशिष्टपरामर्शत्वावच्छिन्नकारणताघटितानुमितिलक्षणोपपादकतयेत्यर्थः। विशिष्टज्ञानस्य· विशिष्टपरामर्शत्वा
वच्छिन्नस्य· कारणत्वं व्यवस्थापयति· अनुमितिकारणत्वे युक्तिमभिधातुं शक्तिं जानीते· तादृशयुक्तेश्चानुमितिलक्षणघटककारणतायां विशिष्टपरा
मर्शत्वावच्छिन्नत्वसाधकतया लक्षणोपपादकत्वं बोध्यं· इदानीमपि विशिष्टपरामर्शत्वस्यानुमितिकारणतावच्छेदकत्वे मीमांसकविप्रतिपत्तिवारणे
नाप्रामाणिकत्वशंकया तदुपपादकप्रमाणाकांक्षासंभवेन तदुपपादकत्वस्य पक्षतानिरूपितसंगतित्वं· मूले पक्षधर्मस्येति· हेतुतावच्छेदकसंबंधेन प
क्षविशेषणतापन्नस्येत्यर्थः। व्याप्यविशेष्यकपरामर्शस्यसंग्राह्यत्वे विशेषणतेत्यत्र विशेष्यताप्यंतर्भाव्या· व्याप्तिविशिष्टज्ञानं· व्याप्तिप्रकारकज्ञानं·
तथा च पक्षविशेषणतापन्नहेतुविशेष्यकत्वावच्छेदेन व्याप्तिप्रकारकत्वं ज्ञानत्वस्य पक्षतावच्छेदकत्वलाभः। उद्देश्यतावच्छेदकविधेयभावमहि क
म्ना तादृशहेतुविषयकत्वव्याप्तिप्रकारकत्वयोरवच्छेद्यावच्छेदकभावलाभात् पक्षतावच्छेदकतादृशज्ञानत्वांशे कारणत्वरूपसाध्यस्य च रूपसं
बंधरूपावच्छेदकतासिद्धिरप्युद्देश्या· अतो व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन विशिष्टपरामर्शस्यानुमितिहेतुतायां मीमांसकसंमत
त्वेपि न सिद्धसाधनावकाशः। व्याप्तिस्मरणमित्यत्र स्मृतित्वस्य हेतुतावच्छेदकत्वाभिमानं निराकरोति· दीधितौ· स्मरणत्वमिति· अविवक्षितमिति·

परा॰ग॰
६०

60

हेतुतावच्छेदकत्वेनेत्यादिः।अविवक्षावीजमाह अव्यापकत्वादिति॰ हेतुताव्यापकत्वादित्यर्थः।व्याप्त्यनुभवस्यापि हेतुत्वादिति भावः।अवच्छेदकला
घवस्य नैयायिकमत एव सत्वात्कल्पनालाघवस्याप्यग्रे वक्ष्यमाणत्वात् लाघवादिति ग्रन्थस्य तत्पदत्वायोगात् अन्यथा व्याचष्टे लाघवादिति॰ प्रथमोप
स्थितत्वेति॰ ज्ञानद्वयस्य विशिष्टपरामर्शापेक्षया प्रथममुत्पन्नतया स्वप्रकाशतावादिनां गुरूणां ज्ञानद्वयोपस्थितिरूपतया तस्य प्रथमोपस्थि
तत्वमिति भावः।ननु परामर्शहेतुतया ज्ञानद्वयस्यावश्यकत्वमनुमितिहेतुताकल्पनेनुपयुक्तमित्याशङ्कां निराचिकीर्षुराह कल्पनालाघवमि
ति॰ परामर्शहेतुत्वेनावश्यकत्वान्नेति मूले परामर्शहेतुत्वेनेत्यनन्तरं तद्वाप्तीति पूरणीयमित्याशयेन तदर्थमाह परामर्शहेतुत्वेति॰ तादृशज्ञानं॰
व्याप्यतावच्छेदकप्रकारकव्याप्त्यादिज्ञानं॰ मन्तव्यमिति॰ अन्यथा कारणाविरहेण परामर्शस्यैवानुपपत्तिरिति शेषः।यद्यपि धूमवान्पर्वत इत्या
दिज्ञानं विनापि वह्निव्याप्यधूमवान्पर्वत इति विशिष्टवैशिष्ट्यबोधसम्भवात्परामर्शहेतुतया पक्षधर्मताज्ञानस्य नावश्यकता॰ तथापि पर्व
ते धूमदर्शनात्मको बोधकात् धूमो वह्निव्याप्य इति स्मरणं ततः परामर्श इति क्रमस्यैवौत्सर्गिकतया तदानीं तादृशरीत्यैव परामर्शोत्पत्तिः सर्वत्रैस
भिमानेन ज्ञानद्वयस्य परामर्शहेतुतायामावश्यकत्वमिति मूलकृताभिहितं॰ एतदभिमानेनैवानुमितिपूर्वं विशिष्टपरामर्शस्यासिद्धिः।पराम
शार्थं ज्ञानद्वयोपगमेनानुमितिसामग्रीमत्त्वेन परामर्शोत्पत्त्यसम्भवादित्यभिधायाग्रे परामर्शहेतुतायामवच्छेदकलाघवमप्रयोजकं करिष्यते॰ ए

६०

ताद्दृश्याभिमानं च नैयायिकमतमालंब्याथ वह्निव्याप्यो धूम इत्यादिद्वयं येन निराकृत्यानुमितिपूर्वं विशिष्टपरामर्शसिद्धिरूपयाद्दिनीया· तावता च परामर्श
हेतुतया ज्ञानद्वयस्यावश्यकत्वनिराकरणेऽपि वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्यैव व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वतत्प्रकारकपक्षधर्मताज्ञा
नत्वाक्रांततया तद्रूपावच्छिन्ननिरूपितपूर्ववर्तितायाउभयवादिसिद्धत्वेन कल्पनालाघवमक्षुण्णमेव· अत एव तदनंतरं व्याप्यतावच्छेदकानवगाहि
शाब्दपरामर्शादनुमित्युत्पादाभिधानमेव दीधितिकृता ये एतादृशकल्पनालाघवनिराकरणपरतया व्याख्यास्यते· परामर्शहेतुतयेति मूलस्य प
रामर्शस्यानुमितिहेतुतया व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वाद्यवच्छिन्नस्य न्यायमतसिद्धनियतपूर्वभावादित्यर्थः। परामर्शेनेत्यस्यार्थं व्याप्य
तावच्छेदकप्रकारकव्याप्त्यादिविषयज्ञानांतरमपेक्ष्य तां मा वा परामर्श एव तादृशज्ञानात्मक इत्यतोऽपि परामर्शस्य नियतपूर्ववर्तितावादिनामपि
तद्रूपावच्छिन्नस्य नियतपूर्ववर्तित्वमनुमतमित्यपाकुः। कल्पनालाघवमाह तथा चेति· अतिरिक्तधर्मिणः। ज्ञानद्वयानंतरमुभयवादिसिद्धविशिष्टपरामर्शस्य·क
ल्पनामित्यनेनान्वयः। तत्र· विशिष्टपरामर्शत्वावच्छिन्ने· व्याप्यतावच्छेदकप्रकारकज्ञानस्य सामान्यतो हेतुत्वे विभिन्नव्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानप
क्षधर्मताज्ञानाभ्यामनुमितिप्रसंग इत्याशंकानुद्धारे मूलस्य न्यूनतेदेति तन्निराकरणपरतया एवमित्यादिमूलमुत्थापयति नत्विति· अनुमितिः स्यादित्यंत
स्मिन्नपि ज्ञानद्वयघटितसामग्रीसत्वादिति भावः। एवं चैवमित्यादिमूलस्य धूमत्वावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्मताज्ञानं च मिलितमनुमित्युत्पाद

प॰रा॰ग॰
६१
61

प्रयोजकसामग्री। न चोक्तं ज्ञानद्वयं तथेत्यर्थः। सामान्यरूपेण हेतुत्वे विशेषरूपेण सामग्रीप्रवेशो न संभवति। कारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वा
दित्याशंक्य विशेषरूपेण हेतुतामाह दीधितौ यद्धर्मावच्छेदेनेति। व्याप्तिज्ञानं यत्रानुमितौ हेतुस्तत्रैतिविधतइति वा पूरणीयं। द्रव्यत्वादिसामानाधिकर
ण्यमात्रेण व्याप्ति×वह्न्यादि× ज्ञानात् द्रव्यत्वादिना च जलादेरुद्देशादिहानितिताज्ञानादन्यथाख्यात्यात्मकानुमितिसापत्तेर्वारणाय यद्धर्मप्रकारेणेत्युपेक्ष्य
यद्धर्मावच्छेदेनेत्यभिहितं। एवं चान्यथाख्यातिमनंगीकुर्वतां द्रव्यत्वाद्यवच्छेदेन व्याप्तिज्ञानाप्रसिद्ध्या नोक्तापत्तिसंभवः। द्वित्वस्य फलीयधार्यकताव
च्छेदकत्वेनुभयविषयकैकज्ञानादनुमित्सानिर्वाहः। सर्वत्राभेदाभेदसाधारणकारणमिलनमेव कार्यस्य× पर्यायोत्पत्तिप्रयोजकं न तु मेदनियतं तद्द्वित्व
मपि क्वचित्तथेति द्वित्वस्य तथात्वमसंभवउक्तिकं चेत्यभिसंधाय ज्ञानद्वयादित्यत्र द्वयपदं व्याप्तिपक्षधर्मताज्ञानयोरभेदानपेक्षामात्रसूचकत
या व्याचष्टे ज्ञानद्वयादितीति। कल्पनालाघवस्यावश्यकत्वादित्यनेन वाच्यतया पौनरुक्त्यं निराचिकीर्षुर्व्याचष्टे लाघवादिति। व्याप्यतावच्छेदकप्रका
रकव्याप्तिज्ञानत्वापेक्षया व्याप्तिप्रकारकज्ञानत्वरूपावच्छेदकस्य लघुशरीरत्वादित्यर्थः। व्याप्तिज्ञानस्येति धर्मपरं। हेतुत्वे। कारणतावच्छेदकत्वे। व्याप्ति
ज्ञानहेतुतायाः व्याप्तिज्ञानत्वस्य कारणतावच्छेदकतायाः आवश्यकत्वादिति। उभयसिद्धत्वादित्यर्थः। तस्य तदंतर्गतत्वादिति भावः। व्याप्यताव
च्छेदकप्रकारकव्याप्तिज्ञानादेर्व्याप्तिप्रकारकज्ञानानुपजीवकत्वात् क्वचिदुपजीव्यत्वादिति पाठेपि संगतिरिति। उपजीव्यपदं विशिष्टसत्तानिर्वा

६१

हृपरामिस्याशयेन विशिष्टसत्वानिर्वाहकत्वमुपदर्शयितिउपजीव्यत्वंचेति॰ असंभवात्॰ विशिष्टसत्वानुपपत्तेः। विशिष्टसत्ताया विशेषणव्याप्ति
ज्ञानसत्ताऽनियतत्वादितिभावः। एतावतापि कल्पनालाघवमित्यवधेयं॰ ननु व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे सिद्धेपि व्याप्तिप्रकारकपक्षधर्मताज्ञा
नत्वेन रूपपरामर्शत्वस्य हेतुतावच्छेदकत्वासिद्ध्या नैयायिकानां नाभिमतसिद्धिरित्यत आशयं पूरयति॰ एवं चेति॰ व्याप्तिज्ञाने॰ व्याप्तिज्ञानत्वावच्छि
न्ने॰ अतिप्रसंगभंगाय॰ पक्षधर्मताधीशून्यकालेनुमितिवारणाय॰ क्लृप्तकारणतायामेव पक्षधर्मताविषयकत्वमवच्छेदकमन्यथानुपपत्त्याक
ल्प्यते॰ यद्यपि व्याप्तिप्रकारकज्ञानत्वावच्छिन्नहेतुतायां पक्षधर्मताविषयकत्वस्यावच्छेदकत्वोपगमे प्रास्थितमुक्तावच्छेदकलाघवादिनाऽन्त
थाप्यतिप्रसंगानवतारदशायां व्याप्तिज्ञानत्वस्य लाघवात्प्रथमतोवच्छेदकत्वसिद्धे स्मरकालमवच्छेदकाभिप्रायसिद्धिर्निष्प्रत्यूहैवेतिभावः॰ ननु प
क्षधर्मताधीत्वेन कारणांतरकल्पनयाप्यतिप्रसंगभंगेनान्यथानुपपत्त्यावच्छेदकाभिप्रायसिद्धिः कल्पनं कथमित्यत आह लाघवादिति॰ कारणत्वांतर
कल्पनापेक्षयालाघवादित्यर्थः। अनतिप्रसंगोपपादकत्वाविशेषेपि गौरवाद्धेनकारणत्वांतरासिद्धिरित्याहुन लिति॰ व्याप्तिज्ञानत्वावच्छिन्नमनु
मितेः पूर्वमुभयसिद्धमेवेतितस्यानुमितित्वेनासिद्धिरित्याग्रिममूलासंगतिरतस्तत्राशयं व्याचष्टे सिद्धस्येति॰ न पक्षधर्मताविषयकत्वमिति॰ तथा
च क्लृप्तहेतुतायां तद्धेतोः पक्षधर्मताविषयकत्वस्यनावच्छेदकत्वमग्रेपि कल्पयितुं शक्यमिति भावः। आशयम पूरयित्वापि व्याप्यत्वज्ञान

परा०ग०
६२

62

मिसादिमूलं व्याकरोति । यद्वेति । एतन्मतेपि लाघवादित्यस्यावच्छेदकत्वलाघवादित्येवार्थः । धूमत्वादौ व्याप्तेरनतिरिक्तवृत्तित्वन्न्यूनरूपावच्छेदकत्वावगा
हितायां मीमांसकैः कारणतावच्छेदके निवेशनीयतया तन्मतेवच्छेदकगौरवादिति भावः । अवच्छेदकगौरवेपि मीमांसकमते दर्शितकल्पनालाघवम
क्षुण्णमिति शंकायामुपजीव्यत्वादिति मूलमवतारयति नन्विति । विशिष्टज्ञानान्यथानुपपत्तेरिति । तथा च ज्ञानद्वयकल्पकतया विशिष्टज्ञानमप्यनु
मितेः पूर्वं मीमांसकसिद्धमिति न नैयायिकमते कल्पनागौरवमिति भावः । ननु मूलकृतानुमितेः पूर्वं विशिष्टज्ञानासिद्धिमुद्भाव्य यद्वावच्छेदकलाघ
वं प्रयोजकीकृतं तन्न संगच्छते । विशिष्टपरामर्शासिद्धौ कल्पकाविरहेण ज्ञानद्वयस्याप्यसिद्धिप्रसंगादित्यत आशयं प्रकाशयति स्वेति । स्वात्मकं
यत्संवेदनं प्रत्यक्षं तत्सिद्धमित्यर्थः । तथा च न तत्कल्पकतया विशिष्टपरामर्शस्य तदभ्युपगन्तव्यमिति भावः । नन्वेवं तेषां ज्ञानद्वयस्यावश्यकत्वा
भिधानविरोधः । विशिष्टज्ञानान्यथानुपपत्त्यावश्यककल्पनीयत्वस्यैवावश्यकत्वपदार्थत्वादित आह ज्ञानस्यैकत्वं चेति । उभयवादिसिद्धत्वमिति । तथा च नो
क्तरूपस्यावश्यकत्वमिति न तदभिधानविरोध इति भावः । अथ यथेत्यादिना मूलकृतो विशिष्टपरामर्शसामग्रीप्रदर्शनस्य प्रकृतोपयोगितां प्रद
र्शयति । असिद्धिमिति । मीमांसकोद्भावितां विशिष्टपरामर्शस्यासिद्धिमित्यर्थः । व्याप्योयमित्यभेदप्रत्ययस्य विशिष्टपरामर्शत्वं स्फुटीचिकीर्षु
रयमित्यस्यार्थं व्याचक्षाणः पक्षवृत्तितां स्पष्टयति । अयमिति । स एवानुमितिहेतुरित्यत्र न्यूनताभंगाय हेतुं पूरयति लाघवादिति । संस्कार

६२

साधारण्येन सविषयकत्वेनोपनायकतामते व्याप्त्युपनये तत्स्मरणपर्यंतस्यानपेक्षिततया न विशिष्टपरामर्शापूर्वं अनुमितिसामग्या नैयत्यं संस्का
रस्यानुमितावहेतुत्वादिति ज्ञानत्वेनोपनायकतावादिमते नुमितिसामग्रीनिर्वंधेन विशिष्टपरामर्शासंभवन्नूपहूषणं संगमयति स्मृतीति स्मृ
तिहेतुतावादिनां संस्कारस्यानुपनायकतयोपनयानुरोधेन स्मृतिं कल्पयतां यत्र पक्षीयधूमदर्शनात्प्रागेवोद्बोधकांतराद्व्याप्तिस्मरणं तत्र त
दुत्तरं पक्षधर्मताग्रहस्यैव विशिष्टपरामर्शरूपता मूलकृतोक्ता तत्र न्यूनताभंगाय पक्षधर्मतादिविषयकपक्षीयहेतुदर्शनोद्बोधितव्याप्तिस्मृति
स्मृतोपि विशिष्टपरामर्शमुपपादयति अत्रेति अत्र इत्यपि द्रष्टव्यमित्यन्वयः । प्रथमं पक्षग्रहे पक्षधर्मताग्रहोत्पत्त्या विशिष्टपरामर्शापूर्वमनु
मितिसामग्रीसंभवतीति पृष्टायह इत्युक्तं सामान्यलक्षणानभ्युपगमे व्याप्तिस्मरणस्य पक्षीयधूमादिविषयकतया विशेषणतावच्छेदकविशि
न ष्टधूमवैशिष्ट्यज्ञानं पक्षे संभवतीति अंतरास्मृतव्याप्तेः पक्षीयधूमविशिष्टज्ञानस्वीकारः । पक्षविशेष्यकेपि परामर्शे पक्षग्रहस्य पक्षतावच्छे
दकरूपावशेषणविषयकतया विशिष्टविशेष्यकज्ञाने विशेष्यतावच्छेदकप्रकारकधीहेतुत्वेनैवोपयोगादाहेति पक्षस्येत्युक्तं तादृशविशि
ष्टधीरिति तादृशस्य व्याप्तिविशिष्टस्य हेतोर्विशिष्टधीरित्यर्थः । मूले प्रथमत इत्यनंतरं पक्षधर्मतया भासमान इति पूरणीयं ननु एकं रीत्या ज्ञा
यमानस्य विशिष्टपरामर्शस्य व्याप्तिस्मरणपक्षधर्मताज्ञानापेक्षया प्राथम्याभावात् प्रथमत एव तस्य संगतं मत आह प्रथमत इतीति वि

शिष्टज्ञानात्पूर्वमिति· तथाचप्रथमतएवेयस्यांनुमितिसामग्र्यामसंपन्नायामेवेत्यर्थइतिभावः।नन्वेवंकथंचिद्विशिष्टपरामर्शासिद्धावपिवि
शिष्टपरामर्शत्वरूपावच्छेदकत्वस्यलघुत्वेपिचतेनरूपेणहेतुत्वमतेतद्रूपावच्छिन्नस्यानियमकल्पनायाआधिक्येनगौरवंदुर्वारमेवेत्यतआह
एवंचेति· गुरुधर्मद्वयावच्छेदेनेति· यद्यपिव्याप्तिविशिष्टवैशिष्ट्यनिश्चयत्वापेक्षयाधूमत्वाद्यंशावच्छेदकत्वावगाहिव्याप्तिनिश्चयत्वस्यगु
रुत्वेपिधूमत्वादिप्रकारकपक्षधर्मताज्ञानत्वस्यातथात्वात्धर्मद्वयस्यगौरवाभिधानमसंगतं· तथापिगुरुधर्मद्वयेत्यस्यगुरुधर्मघटि
तद्वयेत्यर्थकत्वान्नदोषः।न्याय्यत्वादिति· न्यायमतेकल्पनीयस्यद्वित्वंपरमतेकल्प्यधर्मिणोर्द्वित्वंइतिकल्पनासाम्येपिन्यायमतेअवच्छे
दकलाघवादितिभावः।परमतेएकमेवज्ञानंकारणंअन्यदवच्छेदकमितितन्नधर्मद्वयावच्छेदेनकारणताकल्पनमितिशंकांनिराकरोति·
गृह्यमाणेति· गृह्यमाणंव्याप्यवच्छेदकताकत्वंच· वर्तमानव्याप्यवच्छेदकत्वग्रहविषयत्वं· पक्षधर्मताग्रहप्रकारीभवदिति· विद्यमान
पक्षधर्मताग्रहप्रकारार्थकं· अतिगौरवादिति· तत्तत्कालविद्यमानत्वप्रवेशेनकालभेदेनानंतकार्यकारणभावप्रसंगादितिभावः।ननु
कारणतावच्छेदकविशिष्टकारणस्यप्राक्सत्तायाःप्रकृतेफलोपधानप्रयोजकत्वोपगमेविद्यमानत्वनिवेशंविनाप्यतिप्रसंगःशक्यवा
रणः।नचैवमपिसमानप्रकारकपुरुषांतरीयव्याप्तिज्ञानकालीनपक्षधर्मताज्ञानादितोनुमित्यापत्तिवारणायतत्तत्पुरुषीयानुमिति

जनकतायां तत्तत्पुरुषीयज्ञानत्वमेवावच्छेदकं वाच्यमिति पुरुषभेदेन कारणताभेदोऽवश्यं एवेति वाच्यं· स्वसामानाधिकरण्यस्वविषयधर्मप्रका
रकत्वोभयसंबंधेन व्याप्यवच्छेदकताग्रहविशिष्टपक्षधर्मताज्ञानत्वेन स्वसामानाधिकरण्यस्वप्रकारकधर्मविषयकत्वोभयसंबंधेन पक्षध
र्मताग्रहविशिष्टव्याप्यवच्छेदकत्वग्रहत्वेन वा हेतुत्वोपगमे व्यधिकरणज्ञानद्वयादनुमितिवारणस्य तत्तत्पुरुषीयत्वनिवेशनमंतरेणैव संभवा
दित्यत आह विनिगमनाविरहाच्चेति· दर्शितरूपयोरेकतरस्य हेतुतावच्छेदकत्व इत्यादिः। तथा च विनिगमनाविरहान्महद्यावच्छेदेनानन्यथा
सिद्धत्वकल्पनमावश्यकमेवेति भावः। वह्निव्याप्यवानयमिति शाब्दपरामर्शस्थले व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताग्रहविरहेणाप
रमते नुमित्यनुत्पादस्तन्मते नानुमितिरेवं विशिष्टपरामर्शस्योभयवादिसिद्धतास्थलमिति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताग्रहस्यानुमितिनि
यतपूर्ववर्तितायाः कथितोभयसिद्धत्वासंभवप्रदर्शनपरतया यत्र चेत्यादिमूलं संगमयन्ति तदापि चेति· तत्र· मीमांसकस्य· मूले तेन विनेति·
विशिष्टपरामर्शाभावेनेत्यर्थः। विशिष्टपरामर्शशून्यकालेनुमित्यनुत्पादापत्तिर्विशिष्टपरामर्शहेतुतायां किं विधया बाधिकेत्याकांक्षायामा
हदीधितौ तथा चेति· अनुमित्यनुत्पादापत्तावित्यर्थः। व्यभिचारादिति· अनुमित्यनुत्पादापत्तिकथनादर्थतोनुमित्यनुत्पादलाभेन मूलग्रंथाद्व्यति
रेकव्यभिचारलाभः। अत्र स्वमतसिद्धानुमितिसामग्रीसत्वकथनप्रयोजनं स्फुटयति स्वतइति· स्वतः· स्वमते· यदा चातीन्द्रियादिहेतुके शाब्दादि

जन्यज्ञानघटितसामग्र्यापि नास्तितदानुमितिर्न केनाप्यनुमन्यत इति न मीमांसकमते व्यभिचारावकाश इति ध्येयं॰ मूले नवस्यानादिति॰ अनुमित्यात्म
कपरामर्शार्थमपि प्रत्यक्षसामग्रीविरहेणानुमानादेव परामर्शं तिरस्याभ्युपगन्तव्यत्वादिति भावः। पक्षतद्वृत्तिहेतोरसन्निकर्षेपि तद्वृत्तिधूमोव
द्व्याप्य इति व्याप्तिसाध्यकानुमित्यात्मकविशिष्टपरामर्शं प्रत्यक्षात्मकपरामर्शाऽनुपपाद्यानवस्थापरीहारशंकां निरस्यति दीधितौ नचेति॰ वि
शेष्यसन्निकर्षविरहेण पक्षीयधूमत्वरूपपक्षविशेष्यकव्याप्यवत्तापरामर्शासंभवात् व्याप्यविशेष्यकपरामर्शानुधावनं॰ धूममात्रासंनिक
र्षेपीति॰ तथा च तदानीं धूमत्वासंनिकर्षेण तद्विशेष्यकोक्तपरामर्शस्यासंभव इति भावः। विशेष्यसंनिकर्षवद्विशेषणसंनिकर्षेपि प्रत्यक्षे
हेतुरित्याशयेन धूमांतरसन्निकर्षस्थलेपि पर्वतीयधूमत्वरूपविशेषणसंनिकर्षविरहेण धूमत्वे तद्वृत्तित्वावगाहिदर्शितपरामर्शासंभवमा
ह तदधिकमिति॰ यद्यपि विशेषणसन्निकर्षस्य प्रत्यक्षहेतुत्वे पक्षीयधूमादिसन्निकर्षस्थले साध्याद्यसन्निकर्षे ज्ञानप्रत्यासत्तिं विना विशिष्टपरा
मर्शासंभवाद् सन्निकृष्टहेतुकस्थलानुधावनमफलं॰ ज्ञानप्रत्यासत्तित्वे च तत्राऽपि मानसविशिष्टपरामर्शसंभवस्तथापि चाक्षुषादिज्ञानेउपनी
तस्य भानोपगमे मनोभिन्नप्रमाणासहकारित्वघटितापादककवक्ष्यमाणप्रमाणांतरतापत्तेः। प्रत्यक्षप्रमासामग्रीविरहकालीनप्रमोत्पादक
त्वापादककप्रत्यक्षविजातीयप्रमोपधायकतापत्तेश्चानवकाशाद्यप्रमानसान्योपनीतभानासंभवस्तादृशस्थलानुधावनमित्यवधेयं॰ मूलेय

दसाधारणमिति। मनसा बहिर्गोचरभ्रमाजनने यदसाधारण्यं सहकारी भवतीत्यर्थः। तेन बहिर्गोचरभ्रमायामसाधारणकारणत्वमापादकमि
ति फलितं। सुखादिगोचरभ्रमाजनके सुखादिनिष्ठमनःसंनिकर्षे व्यभिचारवारणाय बहिर्गोचरेति। बहिष्ट्वं च लौकिकमानसाविषयत्वं। स्मृ
तिजनकसंस्कारादौ व्यभिचारवारणायानुभवार्थकं प्रमापदं। असाधारणपदस्य योजनमाह दीधितौ असाधारणमिति। शरीरादीत्यादिप
दाच्छरीरमनोयोगादिपरिग्रहः। शरीरादेर्बहिर्गोचरभ्रमाजनकत्वेपि जन्यज्ञानसामान्यं प्रत्येव तेषां हेतुतया तादृशभ्रमां प्रत्यसाधारणकार
णत्वविरहादिति भावः। अत्र तादृशभ्रमायां असाधारणकारणत्वं यदि स्मरणाव्यावृत्तितादृशभ्रमावृत्तिकार्यतानिरूपकत्वं तदा स्मृतिजनक
संस्कारादिवारकप्रमात्वनिवेशवैफल्यं। विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नहेतुभूतविशेषणतावच्छेदकप्रकारकज्ञानादौ व्यभिचारश्चात
एव जन्यज्ञानत्वावच्छिन्नतादृशभ्रमावृत्तिकार्यतानिरूपकत्वं तदित्यपि निरस्तं। यद्यपि चानुभवत्वव्यापकघटितधर्मावच्छिन्नकार्यतानिरूपकत्वे
सति तादृशभ्रमाजनकत्वं तत्। तदानुभवत्वस्याप्यनुभवत्वव्यापकतया तदवच्छिन्नजनके विशेषणतावच्छेदकप्रकारकज्ञाने व्यभिचारवारणसंभवेपि
जन्यसत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतौ चक्षुरादावापादकासत्वेनेंद्रियवदिति दृष्टांतासंगतिः। रूपाद्यवृत्तित्वेन सत्ताव्याप्यत्वेन वा तादृशजातिविशिष्टस्य तद्धोपाद्
रेपि व्याप्तिवैशिष्ट्यानुभवत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकज्ञानमुद्द्याव्याप्तिस्मरणादेर्हेतुतायाः सर्वमतसिद्धतया तत्रापादका

परा०ग०
६५

65

सिद्धिर्द्वयोरिवेति· अनुभवत्वव्याप्यजातिघटितधर्मावच्छिन्नायास्तादृशाग्रभावप्रतियोगिकार्यतायास्तन्निरूपकत्वमेव तादृशाग्रभावाभावसाधारण्याकार
णत्वं वाच्यं· अनुभवव्याप्यत्वं चानुभववृत्तिभेदप्रतियोगितावच्छेदकत्वं· तच्च ज्ञानत्वादेरिवानुभवत्वादेरपि व्याप्यत्वमतो न विशेषणतावच्छेदकप्र
कारकज्ञाने व्यभिचारः। एवं च तादृशधर्मत्वस्य स्मृतित्वेप्यक्षततया तदवच्छिन्नहेतुभूतसंस्कारादौ व्यभिचारवारणाय प्रभात्वनिवेशस्यावश्या
वश्यकता· व्याप्तिस्मरणादेर्व्याप्तिविशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नजनकत्वेपि नैयायिकैः सन्निकर्षविधयालौकिकप्रत्यक्षत्वावच्छिन्न
प्रतीतस्य कारणत्वान्तरोपगमात्तन्न तत्रापादकाप्रसिद्धिः। तन्निरूपितायाः अलौकिकप्रत्यक्षत्वावच्छिन्नकार्यताया एवानुभवत्वव्याप्यजा
तिघटितधर्मावच्छिन्नत्वाभावमादायैवापादकसत्तायास्तत्रोपपादनीयत्वात्· अलौकिकप्रत्यक्षत्वस्योपाधितया तदवच्छिन्नजन्यताया जा
त्यवच्छिन्नत्वविरहाद्वापादकाप्रसिद्धिः स्यादतो जातिघटितेत्युक्तं· तादृशजातावच्छेदकतापर्याप्तिनिवेशस्फोरकमेवात्र घटितपदं न तु विव
क्षितार्थकमित्यवधेयं· आलोकादेरप्यनुभवत्वव्याप्यचाक्षुषत्वादिजातिघटितधर्मावच्छिन्नजनकतया निर्वाच्यप्रमाणान्तरतापत्त्याबाध
विरहेण व्यभिचार इति तद्वारणायापादककोटौ विशेषणान्तरं सहकारित्वमिति· आलोकादीति· आदिना सन्निकर्षादिपरिग्रहः। प्रमाणान्तरासहकारित्व
मिति· मनोभिन्नप्रमाणासहकारित्वमित्यर्थः। स्वभिन्नतज्जन्यजनकत्वमेव तत्सहकारित्वपदार्थ इति चक्षुरादेः स्वात्मकप्रमाणजन्यजनक

६५

त्वसत्वेपि न दृष्टांतासिद्धिः। न च चक्षुरादेः स्वभिन्नचक्षुरादिव्यक्त्यंतरजन्यतावच्छेदकचाक्षुषत्वाद्यवच्छिन्नजनकत्वसत्वात्स्वभिन्नत्वविशेषणदा
नेप्यनिस्तार इति वाच्यं। स्वभिन्नत्वरूपप्रमाणविशेषणोपादित्सया प्रमाणजन्यतायां स्वानिरूपितत्वस्य निवेशनीयतयैतद्दोषानवकाशा
त्। उपनायकज्ञानस्य मनोरूपप्रमाणसहकारितया पादकासिद्धिरतो मनोभिन्नेति। अथ सहकारित्वमत्र तज्जन्यजनकत्वं तथा स
ति चक्षुरादेरपि त्वगादिजन्यचक्षुस्त्वगादिकर्मयुक्तसिद्धित्वादिजनकतया दृष्टांतासिद्धेः। नापि तज्जन्यज्ञानजनकत्वं चक्षुरादेरपींद्रि
यत्वेन त्वगादिजन्यप्रत्यक्षस्वरूपयोग्यतया तद्दोषतादवस्थ्यात्। फलोपहितजनकत्वादीनामदंतानिवेशनेनैतद्दोषोद्धारेपि शरीरादेरपि
निरुक्तप्रमाणांतरसहकारित्वसत्वेन तद्धारकमूलोक्तासाधारणपदवैयर्थ्यमतस्तज्जन्यतावच्छेदकजातिघटितधर्मावच्छिन्नजन्यता
निरूपकत्वमेव तत्सहकारित्वं वाच्यं। तथा च मनोभिन्नत्वरूपप्रमाणविशेषणवैयर्थ्यं। उपनायकज्ञानजन्यताया मनोजन्यतावच्छेदक
मानसत्वघटितधर्मानवच्छिन्नत्वात्। नैयायिकैर्बहिरिंद्रियजन्योपनीतभानसाधारणालौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येवोपनायकज्ञा
नहेतुत्वोपगमात्। न च प्रत्यक्षत्वजातिरपि मनोजन्यतावच्छेदिका। प्रत्यक्षत्वावच्छिन्नं प्रति इंद्रियत्वेन सामान्यकारणत्वादिति वाच्यं। ता
दृशसामान्यकार्यकारणभावस्याप्रामाणिकत्वे मनोभिन्नत्वविशेषणोपादानेपि तथाविधचक्षुरादिप्रमाणजन्यतावच्छेदकप्रत्यक्षत्वमा

प्रा०गा०
६६
66

दायतद्दोषप्रसंग इति निरुक्तसहकारिताघटकजातौ प्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेदकत्वविशेषणस्यावश्यकतया मनोभिन्नत्वा
निवेशोऽप्युक्तदोषाभावात् नच नदेयमेव मनोभिन्नत्वेन रूपं प्रमाणविशेषणं दीधितिस्थांतरपदस्य स्वभिन्नपरतयैव सार्थकत्वादिति वाच्यं
मनोभिन्नत्वानुपादाने मनःसहकारिसुखादिमनःसंनिकर्षे व्यभिचारप्रसक्तेर्मूलस्य बहिःपदवैयर्थ्यापत्तेरिति मैवं उपनायकज्ञान
स्य जन्यतावच्छेदकं मानसत्वमेव बहिरिंद्रियज्ञाने अन्यथा उपनीतस्य विशेषणतया तद्विशेषणज्ञानविधयैवोपनायकज्ञानहेतुत्वा
त् तत्साधारणधर्मस्य तज्जन्यतानवच्छेदकत्वेऽपि क्षतिविरहात् तथा च निरुक्तमनःसहकारित्वमुपनायकज्ञानस्याक्षतमेवेति म॰स्यै॰नो
भिन्नत्वेन रूपं प्रमाणविशेषणमावश्यकं। अथवा मनोभिन्नत्वेन न प्रमाणविशेषणीयं अपि तु इंद्रियत्वावच्छिन्ननिरूपितजन्यतामादायो
क्तदोषस्य वारणाय निरुक्तजातिविशेषणं परित्यज्य प्रमाणजन्यतायां मनोऽनिरूपितत्वमेव निवेश्यं तावतैव बहिःपदसार्थक्यादित्यालो
कादिसहकारितया चक्षुरादावुसिद्धिरतः प्रमाणेति प्रमाणत्वं चात्रानुभवहेतुजातिपर्याप्तकार्यतावच्छेदकताकत्वं चक्षुरादेश्चाक्षुषादि
नाशुद्धचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव सामान्यहेतुतासत्वात्तदेवमक्षतमेवेति आलोकस्याभावचाक्षुषत्वं द्रव्यचाक्षुषत्वादिकं च जन्यतावच्छे
दकं चक्षुःसंयोगादिकं रूपविषयेंद्रियसंनिकर्षस्यापि द्रव्यचाक्षुषत्वादिकमेव तथा च शुद्धचाक्षुषत्वादिकमिति न तत्सहकारितामादाय च

६६

क्षुरादावसिद्धेः। न चैवमपि चक्षुर्मनोयोगादिजन्यतावच्छेदककोटौ विषयादिनिवेशे प्रयोजनविरहेण शुद्धचाक्षुषत्वादिकमेव तज्जन्यतावच्छेदक
मुपेयतां। एवं च तेषामपि निरुक्तप्रमाणमात्रशालित्वेन तत्सहकारितामादाय इन्द्रियेऽसिद्धिरिति वाच्यं। संयोगादन्यत्वस्यापि प्रमाणत्वशरीरे तन्निर्वचनीय
त्वात्। न चोक्तप्रमाणान्तरासहकारित्वनिवेशेऽपि उद्भूतरूपे व्यभिचारस्तस्य मूर्त्तप्रत्यक्षत्वावच्छिन्नं प्रत्येव जनकतया चक्षुरादिजन्यतावच्छेदकावच्छि
न्नजन्यताकत्वे रूपत्वसहकारित्वाभावादिति वाच्यं। मीमांसकैर्वायुस्पार्शनप्रत्यक्षाभ्युपगमेन मूर्त्तचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वोपगमेन त
स्य चक्षुःसहकारिताया अक्षतत्वात्। एवं महत्त्वस्यापि द्रव्यचाक्षुषत्वमेव जन्यतावच्छेदकं ननु द्रव्यप्रत्यक्षत्वमतो न व्यभिचारः। त्रुटेरस्पार्शनत्वोप
गमे द्रव्यस्पार्शनं प्रति त्रुटिमहत्त्वव्यावृत्तविजातीयमहत्त्वत्वेन हेतुत्वात्। तस्यावश्यकतया चाक्षुषत्वस्य महत्त्वजन्यतावच्छेदकत्वेऽपि न परमा
णुद्व्यणुकस्पार्शनापत्तिः। विषयस्य हेतुत्वमप्रामाणिकमेवेति न तत्र व्यभिचारः। न च व्याप्तिस्मरणस्यापि योग्यताज्ञानविधया शाब्दप्रमाणे स
हकारितया तत्रापादकासिद्धिरिति वाच्यं। सहकारिताशरीरे चरमजन्यतायाः फलोपधानरूपाया एव विवक्षणीयत्वात्। शाब्दफलानुपधाय
कव्याप्तिज्ञानस्यैव पक्षत्वेनापादकासिद्ध्यनवकाशात्। इदं त्ववधेयं। निरुक्तस्य प्रमाणान्तरासहकारित्वस्य सत्त्वेनापादककोटिनिवेशो गौर
वात्। अपि त्वनुभवत्वव्याप्यजातिविशेषावच्छिन्नवहिर्गोचरप्रमानिष्ठकार्यतानिरूपकत्वात्मकतादृशप्रमासाधारणकारणताघटकजाता

परा०ग०
६७
67

वेद्यप्रमाणांतरजन्यतानवच्छेदकत्वं निवेशनीयं। तच्च स्वानिरूपितामनोऽनिरूपिता च या जन्यता तदवच्छेदकत्वपर्याप्त्यनधिकरणत्वं। पर्याप्तिनि
वेशात् चाक्षुषत्वादेरालोकादिजन्यतावच्छेदकघटकत्वेपि न दृष्टांतासिद्धिः। मनोऽनिरूपितेत्यस्य मनस्त्वघटितधर्मावच्छिन्नानिरूपितार्थकत
या मनस्त्वघटितचक्षुर्मनोयोगत्वाद्यवच्छिन्नजन्यतामादाय चाक्षुषस्यानवकाशः। एवं च स्वानिरूपितामनस्त्वघटितधर्मावच्छिन्नानिरूपितत्व
याजन्यता तदवच्छेदकत्वपर्याप्त्यनधिकरणं यदनुभवनिष्ठभेदप्रतियोगितावच्छेदकजातिसद्घटितधर्मावच्छिन्नाया बहिर्विषयकानुभवनि
ष्ठकार्यतायास्तन्निरूपकत्वमापादकत्वसमुदायार्थः। आपाद्यं प्रमाणत्वं। प्रमायाः करणत्वं। करणत्वं च। व्यापारवदसाधारणफलोपहि
तकारणत्वं। व्यापारनिवेशादतीतकांतरवृत्तिपतनायकज्ञाने आपाद्यविरहनिर्वाहः। असाधारण्यप्रवेशाददृष्टादेः शरीरादिद्वारकासा
धारण्यनिवेशासार्थक्यं। फलोपधाननिवेशाद्व्याप्तिज्ञानस्यानुमित्यात्मकप्रमास्वरूपयोग्यतामादाय नेष्टापत्तिः। अनुमित्युपधायक
स्य तस्य पक्षत्वात्। यस्य तस्य। प्रमाणव्यवहारविषयत्वमेवापाद्यं हेतुर्धीरिति कृतोभिप्रेतं। अन्यथा आलोकेपि उक्तापाद्यसत्वे नालोका
दिवारणायेत्यादितग्रंथासंगतेः। प्रमाणव्यवहारविषयतावच्छेदकत्वं प्रमाणांतरासहकारित्वगर्भं। आलोकादौ व्यापारवत्त्वेपि प्रमा
णाव्यवहारविरहात्। अतो व्यवहारापादनपक्षे आलोकस्य वारणीयत्वाभिधानसंगतिः। वह्निव्याप्यधूमवान् पर्वत इत्यादिविशिष्टय

६७

रामर्शलिंगकवाद्दिविषयकप्रमाज्ञानस्य×ध्या×कारणत्वेनतत्पंचममेवप्रमाणं स्यात्· तादृशप्रमायां साक्षात्कारत्वाग्रहेणतद्विसिध्यात्करण
स्यप्रमाणान्तर्भावात्· अतइष्टापत्तिर्नसंभवतीतिसूचनायांतरपदं· नतु तद्वैयर्थ्यस्योपाधिकोऽपिप्रवेशः। एतेन प्रमाणांतरत्वं यदिस्कृप्रमाण
भिन्नप्रमाणत्वं· तदापाधाप्रसिद्धिः। यदिप्रत्यक्षप्रमाणाभिन्नप्रमाणत्वं· तदापिचक्षुरादेर्दृष्टांततयोपन्यासविरोधः। यदि च मानसान्यप्रमाक
रणत्वं तदा मानसान्यत्ववैयर्थ्यं· प्रमाणव्यवहारविषयत्वस्यैवानिष्टतयाऽनन्यायापादनेनैतोद्देश्यप्रसिद्धेः। न च मानसप्रमाजनकेऽउपनायकेज्ञा
ने मानसप्रमाकारणत्वं तत्रप्रमाणव्यवहारश्चेष्टइतीष्टापत्तिवारकतयातत्सार्थक्यं· करणत्वस्यव्यापारगर्भतयेष्टापत्तेरनवकाशात्· अथा
लुकरणत्वंव्यापारगर्भंतथापिप्रकृतेतद्दर्शनंतदर्थंचमानसान्यप्रमासाधारणफलोपहितकारणत्वस्यापादनसंभवेनतद्वैवमूलाभिप्रेतमसं
दृतिचेन्न। तथासतिसिद्धांतेव्यापारप्रभावेनाकरणत्वसंभवाभिधानस्यमूलकृतोऽलग्नकतापत्तेरितिनिरस्तं· आलोकादौव्यवहारमभ्युपगम्य
प्रमाणांतरासहकारित्वविशेषणमंतरेणैवतत्रव्यभिचारवारणतःकस्यचिन्मतमाहतद्वयीति· नन्वेवंप्रमाणव्यवहारविषयस्यालोकादेः
प्रत्यक्षानुमानेत्यादिसूत्रेऽपरिगणनात्तद्विरोधइत्यतआहप्रत्यक्षेति· विभागात्· आलोकादीनामपिविभक्तत्वात्· तद्व्याघातः। विभाज
कसूत्रविरोधः। अत्रेदमरुचिबीजं। आलोकस्यसव्यापारस्यप्रमाकरणत्वोपगमसंभवेऽपिनिर्व्यापारस्यतत्संयोगादेस्तदुपगमासंभवेन

प्रा०ग्रा०
६८
68

उक्तविशेषणमावश्यकं। अन्यथा शरीरादेरपि प्रमाणत्वोपगमसंभवेनासाधारण्यविशेषणस्यापि परित्यागापत्तेः। तांत्रिकाणां प्रमा
णाव्यवहारविरहश्च तुल्य एवेति· प्रमाणांतरासहकारित्वविशेषणपूरणं विनैव निर्वाहाय प्रकारांतरेण व्याप्तिं व्याचष्टे यद्वेत्यादि·
यज्जातीयेति· यज्जात्यवच्छिन्नेत्यर्थः। तद्धि जातीयेति· तज्जातिमद्वृत्तिजातिमदित्यर्थः। ईदृशव्याप्तिवज्ञानानुमित्याद्यनुपधाय
कव्याप्तिज्ञानादेः प्रत्यक्षविरुद्धजातिमत्प्रमाकरणत्वमापादनीयं· यत्प्रमायां मनोन्यकरणेनासमवहितं यच्छाहिविषयकप्रमोत्पाद
कं तत्तद्वृत्तिजातिमत्प्रमाहेतुरित्युक्तौ मानसप्रमायां मनोन्यकरणाप्रसिध्या यत्पदेन चाक्षुषादिप्रमायाः परोपादाने तया मानसप्रमाहेतावुपन
येत तद्वृत्तिजातिमत्प्रमाहेतुत्वमेवापाद्यं· मानसप्रमायाश्च तद्वृत्तिजातिमत्वात्तत्रेष्टापत्तिरिति यत्त्वतत्त्वेनजातेरुपादानं· तथा सति यत्पदेन प्रत्य
क्षत्वजातिमादाय तद्विरुद्धजातिमत्प्रमाहेतुत्वापादनेनेष्टापत्त्यवसरः। प्रकृते प्रमानिष्ठजातिमादायैवापादानमित्येतत्सूचनाय प्रमाया
इति· तज्जातिमत्प्रमावृत्तिजातीयप्रमाहेतुत्वमेवापाद्यं· एवं च यज्जातीयेत्यनेन स्फुरति त्वाधिकपादानेन तद्वृत्तिप्रमायाअप्रसिध्या सामान्यव्याप्तिभंग
इत्यतः प्रमाया इतीति केचित्· प्रत्यक्षकारणमनःसहकारेणैवोपनायकज्ञानस्य प्रमोत्पादकत्वोपगमात्। आपादकासिद्धिवारणाय मनो
न्येति· मनोभिन्नप्रत्यक्षकारणमनोयोगादिसमवधानस्यावश्यकत्वादसिद्धिरिति करणेनेति· तदसमवहितं सत्प्रमोत्पादकं· तदनन्यप्रमोत्पा

६८

दकं॰ बाह्यविषयकत्वनिवेशव्यावृत्तिस्तु पूर्ववत्॰ मनोऽन्यकरणेनासमवहितस्योपनयस्य मनःसहकारेण बाह्यविषयकप्रत्यक्षजनकत्वे बाधकाभावादप्र
योजकत्वशंकास्पदत्वाशंकायां कल्पांतरमाह यज्ज्ञातीयेति॰ तज्ज्ञातीयसामग्रीविरहे तज्ज्ञातीयप्रमोत्पत्तेरप्रसक्त्या प्रमायां जन्यमानायां विजातीये
वसाजनयितुं शक्येति नात्राप्रयोजकत्वशंका॰ न च नैयायिकैरुपनीतभानस्थले उपनयघटितायाः प्रत्यक्षसामग्र्या उपगमादापादकासिद्धिरिति
वाच्यं॰ उपनीतविषयोपधानेन साक्षात्कारत्वस्याग्रहात् तदभावस्य च ग्रहात् तादृशविषये इत्यादिप्रत्यक्षसामान्यहेतुभूतेन्द्रियसंयोगादिविरहाच्चोप
नयजन्यज्ञाने प्रत्यक्षत्वासंभवेनापादकस्य प्रसाध्यत्वात्॰ अत्र च बाह्याभ्यंतरप्रत्यभिज्ञादौ लौकिकसंनिकर्षवद्विषयोपरागेण साक्षात्त्वस्योपनी
तविषयोपरागेण च तदभावस्य ग्रहात् साक्षात्त्वं विषयिताविशेष एव न तु प्रत्यक्षत्वजातिः स एव लौकिकसंनिकर्षजन्यतावच्छेदकः। एवं चोपनीतभा
नस्य प्रत्यक्षत्वे न किंचिद्बाधकं बाधकविरहेऽपि साधकविरहान्न सर्वांशोपनीतभाने प्रत्यक्षत्वजातिरिति नाशंकनीयं॰ लौकिकान्यप्रत्यक्षत्वस्ये
वोपनायकज्ञानजन्यतावच्छेदकतया तत्र तत्सिद्धेः। लौकिकान्यज्ञानत्वस्य तथात्वेऽप्रसिद्धसाध्यकानुमितौ [illegible]तो च व्यभिचारप्रसंगात्॰ न च
प्रत्यक्षत्वाविरुद्धं जात्यंतरमेव तथास्तु इति वाच्यं॰ आंशिकोपनीतभानासंग्रहात्॰ तत्र तादृशजातिस्वीकारे तस्याः प्रत्यक्षत्वसामानाधिकरण्येन व्याप्य
व्यापकभावस्यावश्यकत्वात्॰ आंशिकोपनीतभाने च मानसत्वचाक्षुषत्वादीनां प्रत्यक्षत्वसाधकत्वादिसाहाय्येन नैयायिकसिद्धांतोऽग्रेऽग्रे

प०रा०ग०
६९
69

थकारेणैव स्फुटीकरणीयाः। नन्वायातं तर्हि व्याप्तिवल्लोहिजातीयप्रमा· तत्करणमन्यदेवास्तां· कुतो व्याप्तिस्मरणादेः प्रमाणांतरत्वे यत आह ततइति·
ततः ऽनक्तव्याप्त्यनुरोधतः सिद्धायां· स्वीकृतायां आवश्यकत्वात्· अवश्यापेयकारणताकत्वात्· बाधकाभावादित्यस्य करणत्वइत्यादिः। तस्यैव· व्याप्ति
स्मरणादेरेव· तथात्वं· तादृशप्रमाकारणत्वं· ननु संशयस्वप्नो न तु प्रमेति मूलमसंगतं तयोरप्यबाधितविषये प्रमात्वात्· अथ सर्वांशे प्रमात्वमत्रवि
वक्षितं· संशयस्य स्वप्नस्य च किंचिदंशे भ्रमत्वं नियमतः स्वीक्रियत इति चेत्· मा भूत् सर्वांशे तयोः प्रमात्वं· तथापि तत्र संयोगादिरूपप्रत्यासत्तिशू
न्यविषयभानार्थं ज्ञानस्य प्रत्यासत्तित्वमावश्यकमिति तस्य प्रमाणत्वं दुर्वारमिवेत्यतो मूलस्याशयं व्याचष्टे संशयेति· नाविशिष्टानुभवरू
पौ· न योग्यतासहितेंद्रियसंयोगादिशून्यवस्तुसंसर्गविषयकप्रत्यक्षरूपौ· तथात्वे किमनिष्टमित्याकांक्षायामाह येनेति· येनेत्याशंकेत
त्यन्वयः। तदभावादेरित्यादिपदाद्विषयाबाधपरिग्रहः। प्रमापि जनयितव्येति अप्रमाया अपि अबाधितविषये प्रमात्वस्यावर्जनीयत्वं· तत्र ज्ञानका
रणवशादन्यत्र दोषाभावाद्वि[illegible]बाधकाभावादितिभावः। तथा च तस्य प्रमाणत्वापत्तिर्दुर्वारैवेति शेषः। धर्मिज्ञानकोटिस्मरणादिरूपाविशेति धर्मि
णि लौकिकसंनिकर्षादिसत्वेनुभवात्मकेनान्यदास्मरणात्मरूपेयात्ज्ञानेन सहितं यत्तद्गृहीतासंसर्गकधर्मस्य पूर्वं कदाचित्स्मरणरूपं कदाचिद्या
नुभवात्मकज्ञानं तद्रूपाविशेत्यर्थः। धर्मिज्ञानमित्यत्र धर्मिपदं धर्मस्याप्युपलक्षणं· अक्षादेः लौकिकप्रत्यासत्तिसहकृतेंद्रियादेः आदिना अनुमाना

६९

द्विपरिग्रहः।संस्कारादीति॰अतोनोपनयोपयोगइतिशेषः।असन्निकृष्टेधूमेधूमत्वेनहेतुनाव्याप्यनुमानंधूमत्वत्वेनव्याप्तिव्याप्यत्वपक्षधर्मताज्ञा
नंविनानसंभवतीति॰अनुमानाद्विशिष्टव्यवहारोपपादनंमूलकृतस्तादृशज्ञानदशाभिप्रायकतयोपपादयितव्यंन्यूनताभंगायान्यथाव्यवहारमन्यथो
पपादयतिधूमत्वादावित्यादिना॰असंसर्गाग्रहादेवेत्येवकारेणविशिष्टज्ञानव्यवच्छेदः।यद्यपितन्मतेविशिष्टज्ञानस्थलेप्यसंसर्गाग्रहःएवंवि
शिष्टव्यवहारेहेतुःनतुविशिष्टज्ञानं॰तथापिविशिष्टज्ञानस्यापिविशिष्टविषयकत्वमपुरस्कृत्यतत्तत्पदार्थविषयत्वेनासंसर्गाग्रहत्वनिष्टका
रणतायामवच्छेदकत्वात्॰विशिष्टविषयकानुमानस्यव्यवहारप्रयोजकत्वोक्तेर्नासंगतिः।अतएवेत्यादिमूलेनव्याप्यतावच्छेदकधूमत्वाद्यनवगा
हिशाब्दादिपरामर्शस्थलेतादृशपरामर्शप्रकारीभवद्व्याप्यतावच्छेदनव्याप्यग्रहदशायामनुमितिर्नभवतीत्यभिहितं॰तत्रचनैयायिकानामपि
अतीन्द्रियादिहेतुकस्थलेनुमितिर्नभवतीत्युक्तिसंभवात्तुल्यत्वशंकांपरिजिहीर्षुराशयंव्याचष्टेअतीन्द्रियेति॰व्याप्यत्वप्रकारकज्ञानस्य॰व्याप्यत्वप्रका
रकपक्षधर्मताज्ञानस्य॰सर्वानुभवसिद्धत्वयेत्यनेनदुरपह्नवत्वंदर्शितं॰बाधितत्वस्याव्यभिचारनिश्चयेनेत्यादिः।व्याप्यतावच्छेदकप्रकारकज्ञानस्य॰
व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताज्ञानत्वावच्छिन्नस्य॰तत्॰व्याप्यवच्छेदेनव्याप्तिप्रकारकंज्ञानं॰कार्यतावीजमाहकारणत्वेनेति॰ननुव
त्तदभावेप्यनुमित्युत्पत्त्यातस्यहेतुत्वेपिकिंनबाध्यतेइत्यतआहतेनाविनेति॰तत्र॰शाब्दव्याप्यवत्तापरामर्शस्थले॰नन्वेवंफलापलापोविशि

ष्ट इत्यत आह तवेति· सर्वथैवापत्त्यापद्य इति· कालविलंबेनापि तत्र विशिष्टपरामर्शासंभवादिति भावः। कालविलंबादीति· व्याप्यवच्छेदेन व्याप्तिज्ञा
नोत्पत्त्या कालविलंबेनानुमितिसंभवादिति भावः। उपनीतभानानंगीकर्तॄणां व्याप्यवच्छेदेन व्याप्तिज्ञानं तत्रानुमितिरूपं स्मृतिरूपं वेति हृद
यं· तुल्यमित्यनेन मूले पक्षधर्मे व्याप्तिसंशयस्य प्रतिबंधकत्वमुक्तं· तच्च न युक्तं· विशेषदर्शनेन ज्ञानद्वयानंतरं संशयानुत्पादेन तत्र प्रतिबंधकता
यां मानाभावादित्यत आह तुल्यमितीत्यभ्युपगमवादः। ज्ञानद्वयानंतरं संशयोत्पादाभ्युपगमेनोक्तिः। तथा च संशयस्यानुमितिप्रतिबंध
कतायां न निर्भरः· किंतु विशेषदर्शनात्संशयानुत्पत्तावेव· अत एवाग्रे संशयोत्पत्त्याशंकापि संगच्छत इति भावः। मूले सामान्यनिश्चयस्ये
ति· सामान्यधर्मपुरस्कारेण विरोधिनिश्चयस्येत्यर्थः। इद्वत्त्वसामानाधिकरण्येन गंधादिनिश्चयेपि पृथिवी द्रव्यत्वादिना गंधादिसं
शयादिति भावः। धूमसामान्ये संशयः· शुद्धधूमत्वपुरस्कारेण व्याप्यत्वसंशयः। मा भूदिति· तत्र कारणं व्याप्तिनिश्चयसत्त्वादिति भावः।
विशेषसंशयः· विशेषधर्मावच्छेदेन तद्वत्तासंशयः। विशेषनिश्चयानिवर्तनीयः। विशेषधर्मपुरस्कारेण विरोधिनिश्चयमात्रानिवर्तनीयः·
धूमविशेषसंशयनिरासार्थं पर्वतीयधूमत्वपुरस्कारेण व्याप्यत्वसंशयस्यत्वे· अनुमितिनिरासार्थं· पृथक् व्याप्तिनिश्चयः। पर्वतीयधूमत्वपु
रस्कारेण व्याप्तिनिश्चयः· वाच्यः· अनुमितिहेतुतयास्वीकार्यः। यद्यपि पूर्वं धूमत्वदर्शनस्यैव व्यावर्तकधर्मदर्शनविधया संशयविरोधित्व

त्वमुक्तं ननु व्याप्तिनिश्चयस्येति धूमसामान्ये व्याप्तिनिश्चयात्तत्सामान्ये संशयानुत्पादेऽपगमेन विशिष्य संशयोपपादनं न युज्यते तथापि पर्वतवृ
त्तित्वसामानाधिकरण्येन धूमत्वदर्शनात्तदवच्छेदेन व्याप्यभावसंशयनिवृत्तावपि पर्वतीयधूमत्वावच्छेदेन व्याप्यभावसंशयो दुर्वारः पर्वतीयत्वावच्छे
देन धूमत्वनिश्चयासंभवादिति शंकायां धूमत्वज्ञानस्य विशेषदर्शनत्वेनेत्यादिसिद्धान्तोपरिसंभवात् धूमत्वपुरस्कारेण व्याप्तिनिश्चयस्य पर्वतीय
धूमत्वावच्छेदेन तदभावसंशयनिवर्तकत्वमपि तादृशग्रंथतात्पर्यविषयः । तत्रैवं यच्छंका अथ पर्वतवृत्तित्वावच्छेदेन व्याप्तिविरहशंका नैयायिक
सिद्धानुमितिहेतुताकवह्निव्याप्तिविशिष्टधूमे पक्षधर्मतावैशिष्ट्यावगाहिनिश्चयस्याप्यनिवर्त्या असमानधर्मितावच्छेदकत्वात् पक्षधर्मताधि
शिष्टे व्याप्तिनिश्चयस्य तच्छंकानिवर्तकोऽपि नानुमितिहेतुः व्याप्तिविशिष्टवैशिष्ट्यबोधस्यैवानुमितिहेतुताया वक्ष्यमाणत्वात् उभयविधप
रामर्शस्य तथात्वेपि व्याप्तिविशिष्टवैशिष्ट्यबोधघटितानुमितिसामग्र्या दशायां तादृशशंकाया उक्तच्छेदनुपयात्तत्र नैयायिकैरनुमितिस्वीका
रे मीमांसकानामपि ज्ञानद्वयसत्त्वे तच्छंकासत्त्वेऽप्यनुमितेरविरोधापत्तिसंभवेन तादृशशंकोच्छेदोपायानुसरणवैयर्थ्यात् यत्तु व्याप्तिविशिष्टे धूमे
पर्वतवृत्तित्वशंकादशायां मीमांसकमते नुमित्सापत्तिपरतया मूलशंकावर्णनेनोक्तापत्तिरनुपस्वारणं पृथक् व्याप्तिनिश्चयो वाच्य इत्युक्त्या
पि व्याप्तिविशिष्टे धूमे पक्षधर्मतानिश्चयस्यानुमितिहेतुतास्वीकारपरतया वर्णनं तदशुद्धं मीमांसकमते धूमत्वावच्छेदेन पक्षधर्मत्वास

परा०प्र०
७१
71

त्वेनान्यथाख्यातिस्वीकारप्रसंगभयेनधूमत्वसामानाधिकरण्येनैव पक्षधर्मतानिश्चयहेतुतायावाच्यतयाव्याप्तिविशिष्टधूमत्वावच्छेदेनापि
क्षवृत्तित्वशंकायाः शुद्धधूमत्वसामानाधिकरण्येन पक्षधर्मतानिश्चयाप्रतिबध्यतयामीमांसकानामनुमितिजनक पक्षधर्मतानिश्चयस्यतादृ
शशंकाछेदकताभिधानेनसमाधानासंगतेरितिचेन्न· पक्षवृत्तिधूमत्वविशिष्टेव्याप्तिज्ञानमात्रस्यानुमितिहेतुत्वेपिनैयायिकानामुद्देश्यसिद्धि
स्तदभ्युपगमेनैव तादृशपरामर्शप्रतिबध्यायाः पक्षवृत्तित्वाद्यवच्छेदेनाव्याप्यत्वशंकायाज्ञानद्वयस्यत्वेसंभवात्तच्छंकासंगतेः।वस्तुतस्तु पक्षवृ
त्तिधूमत्वावच्छेदेनव्याप्तेर्विरहशंकायांव्याप्तिविशिष्टेपक्षधर्मतानिश्चयोपिविरोधी· यत्रज्ञानं यदुभयसामानाधिकरण्यमवगाहतेतत्स्यतद
कतरावच्छेदेनापरैभावशंकानिवर्तकतायाःधर्मा·अनुभवसिद्धत्वात्· पक्षवृत्तिधूमत्वस्यपरामर्शधर्मितानवच्छेदकत्वेपितदवच्छेदेन
व्याप्यत्वशंकायाः पक्षवृत्तिधूमत्वव्याप्यत्वसामानाधिकरण्यावगाहिकथितपरामर्शसत्वेउत्पत्त्यभावादित्यभिप्रायकतयाप्यथाश्रुतमूलसं
गतिः।सामान्यघटितविशेषधर्मपुरस्कारेणसंशयेसामान्यधर्मसामानाधिकरण्यमात्रावगाहिनिश्चयस्याविरोधित्वेपिसामान्यधर्माव
छेदेनविरोधिनिश्चयस्याविरोधित्वमावश्यकं·अवछेदकावछेदेनविपरीतज्ञानस्यप्रतिबध्यतावछेदककोटौतद्धर्मितावछेदककपर्याप्तत्वद्धर्मि
तावछेदकताकत्वपर्यंतानिवेशादित्यभिप्रायेणसमाधत्तेयत्रहीति·व्यावर्तकधर्मदर्शनस्यधर्मितावछेदकावछिन्नत्वावगाहितांस्पष्टयि

७१

तुंव्याचष्टे दीधितौ यत्र यदवच्छिन्न इति· परे तु· धूमसामान्ये संशयो माभूदिति· व्यावर्तकधूमत्वेन निश्चिते पर्वतीयत्वरूपसामान्यधर्मविशिष्टे तदवच्छेदे
न व्याप्यत्वसंशयो माभूदित्यर्थः। विशेषसंशयश्चेत्यादेः पूर्व एवार्थः। समानविषयकत्वमेवाविरोधितायां तंत्रं न तु समानप्रकारकत्वमपीत्याशयेन स
माधत्ते यत्र हीति यथाश्रुतार्थकमेव· तच्च· समानधर्मिकव्यावर्तकधर्मदर्शनं च· सामान्ये· सामान्यधर्मविशिष्टविशेष्यकं। विशेषे वा· विशेषधर्मविशि
ष्टविशेष्यकं· तथा च पर्वतीयत्वमात्रेण धूमत्वानिश्चये पर्वतीयत्वपुरस्कारेण न संशयसंभव इति भावः। यद्यपि भिन्नधर्मिकस्यापि धूमत्वे व्याप्य
वच्छेदकत्वावगाहिनिश्चयस्य धूमत्वघटितधर्मावच्छिन्नाविशेष्यकसंशयप्रतिबंधकत्वाभावादशानिश्चयादपि प्रकृते संशयानिवृत्तिः संभव
ति तथापि शुद्धपर्वतीयत्वावच्छेदेन व्याप्यत्वशंकानिरासार्थं धूमत्वनिश्चयस्यादरणीयतया तत एव पर्वतीयधूमत्वावच्छिन्नाविशेष्यकसं
शयनिवृत्तिरूपपादिता· समानविषयकत्वेन विरोधितावादिनां धर्मितावच्छेदकैवच्छेदकत्वावगाहिनोपि भिन्नधर्मिकज्ञानस्याविरोधित्वा
भिप्रायेणैवेति स्वातंत्र्येण मूलं वर्णयंति· सामान्यप्रत्यासत्तिमनंगीकुर्वतां व्याप्तिनिश्चयस्य पर्वतीयधूमाविषयकतया धूमत्वे व्याप्यवच्छेदक
त्वावगाहित्वेपि धूमत्वघटितधर्मावच्छिन्नपर्वतीयधूमधार्मिकसंशयविरोधित्वे विवादः संभवतीति दृष्टांते दृढयंस्तं निराकरोति यथा ही
ति· तदभावेन विशेष्येन तत्संशय इति योजना· धर्मिविशेषणत्वं च तदभावादीनां धर्मितावच्छेदकताख्यविषयत्वं· स्थाणुत्वाभावव्याप्यके

प रा० ग० वा
७२
72

रादीति॰ स्वतंत्रतादृशज्ञानदशायामपि शुद्धकरत्वाद्यवच्छिन्नधर्मितावच्छेदकीकृतस्थाणुत्वादिसंशयानुदयात् व्याप्तिविशिष्टेनेत्युपेक्ष्य व्याप्य
तयागृहीतेनेत्युक्तं॰ तदव्यवहितप्राक्क्षणे तत्क्षणे तस्य पुंसो व्याप्यतया निश्चयविषयेणेत्यर्थः। तदभावेन तदभावव्याप्तिविशिष्टेन चाविशिष्टे
तद्धर्मज्ञानमाहार्यमेव प्रसिद्धमिति तादृशज्ञाने इच्छाया एव हेतुत्वात् तदभावादेवानाहार्यतादृशसंशयप्रसंगः। करादिमान् स्थाणुर्न वेति संशय
श्च करत्वाद्यवच्छिन्ने स्थाणुत्वाभावव्याप्तिनिश्चयशून्यकाले इच्छां विनापि प्रसिद्ध इत्यनाहार्यतादृशज्ञाने तथाविधव्याप्तिनिश्चयत्वेन प्रति
बंधकत्वमकल्पयित्वा तादृशनिश्चयदशायामसौ निरसनीयः। तथैसादि॰ तद्विशिष्टेन तत्संशय इत्यनुषंगेणान्वयः। यद्रूपावच्छेदेन तदभावादिनि
श्चयस्तस्यापि तदभावादि हेतुव्यत्वादिति भावः। अनुभवबलादित्यग्रिमहेत्वन्वयानुरोधेनेत्यविवादमित्यपिपूरणीयं॰ ननु धूमत्वावच्छेदेन व्या
प्यभावव्यावर्तकधर्मः प्रकृते न गृहीतोपि तु तदभावो व्याप्तिरेवेति व्यावर्तकपदस्य तदभावावच्छेदकमात्रपरत्वाभिप्राये नाभावांशकांनिराकरो
ति व्यावर्तकश्चेति॰ स्थाणुत्वाभावव्याप्यः करः करवांश्चायमिति ज्ञानद्वयस्याप्ययं स्थाणुर्न वेति संशयविरोधितालाभाय व्याप्तिविशिष्ट
इत्युपेक्ष्य व्याप्यतयागृहीत इत्युक्तं॰ अथ यद्रूपावच्छेदेन तदभावोवगतस्तस्य यत्तदभावावच्छेदकत्वेनावगत इत्येवार्थः। अवच्छेदकत्वं चानतिरिक्त
वृत्तित्वमेव॰ ननु स्वरूपसंबंधविशेषः पुरुषत्वादौ स्थाणुत्वाभावादेस्तादृशावच्छेदकताभाअप्रामाणिकत्वात्॰ मीमांसकेनापि धूमत्वादौ व्या

७२

स्यनतिरिक्तवृत्तित्वज्ञानमेवानुमितिहेतुत्वेनोपगतमित्यभिप्रायेणमूलं संगमनीयं· एवं चानतिरिक्तवृत्तित्वस्य व्याप्तिरूपतया व्याप्यतयाग्रहीतृत्व
नेनयोनरूक्तव्यं· नचयदवच्छेदेनयत्सादेर्यत्रयदभावस्यव्याप्तिः संसर्गतयावगतेतिव्याप्यतयेस्यव्याप्तिप्रकारेणेत्यर्थ इतिभेदः· पुरुषोनस्थाणुरि
त्याकारके पुरुषत्वावच्छेदेनस्थाणुत्वाभावग्रहे पुरुषत्वांशेव्याप्तिः संसर्गतयैवभासतेनतुप्रकारतयातद्विशिष्टवाचकपदानुल्लेखात्· संसर्ग
तयाप्रकारतयाच पृथक्कथनं प्रतिबंधकताभेदसूचनाय· तत्प्रकारकज्ञानस्यतदीयसंसर्गविशेषावगाहित्वेनैवप्रतिबंधकतायाअनतिप्रसं
गायकल्पनीयतयातत्संसर्गकज्ञानस्यचतदीयसंसर्गानवगाहितया· तेनरूपेणासंग्रहादितिवाच्यं· संसर्गतासंसर्गविशेषावच्छिन्नप्रकार
तयोःसंसर्गविशेषानवच्छिन्नप्रकारतान्यविषयतात्वेनानुगमेनातिप्रसंगविरहादितिचेन्न· अवच्छेदकावच्छेदेनस्थाणुत्वाभावादिज्ञानेव
च्छेदकांशेव्याप्तिः संसर्गतयायिनभासते पुरुषोनस्थाणुरित्यादिज्ञानस्य पुरुषत्वाद्यंशेनिष्प्रकारतायाअनुभवसिद्धत्वात्· किंतुधर्मिता
वच्छेदकपुरुषत्वादिव्यापकताविशिष्टविशेषणतैवस्थाणुत्वाभावादेः पुरुषादौसंसर्गतयाभासते· एवं च यद्व्यापकताविशिष्टविशेषण
तासंसर्गेणतदभाववद्धर्मिण्यवगतइत्येवयदीयादेरर्थः इतिनयोनरूक्तव्यं· यदि च विशेषणतात्वादिनाव्यापकतायाः संसर्गघटकत्वेप्रमेयत्वा
द्यवच्छेदेनस्थाणुत्वाभावादिज्ञानमपिप्रमास्यादितिस्थाणुत्वाद्यभावीयविशेषणतात्वादिनाव्यापकत्वमेवतथावाच्यं· तथाचस्थाणुत्वाद्यभावस्या

पि संसर्गांशः व्याप्तित्वे तदंश एव व्यापकत्वमुचितं॰ तथा च स्थाणुत्वाभावः पुरुषनिष्ठाभावप्रतियोगी अयं च पुरुष इत्यादिज्ञानस्य स्थाणुत्वाद्यभा
वधर्मिकपुरुषत्वादिव्यापकताग्रहसहितपुरुषत्वादिप्रकारकनिश्चयत्वेन प्रतिबंधकतायाः अयं स्थाणुर्नवेति संशये प्रतिबंधकत्वात् पुरुषो
न स्थाणुरयं च पुरुष इत्यादिज्ञानस्य तद्रूपाक्रांततया न पृथक् प्रतिबंधकत्वं॰ उक्तज्ञानप्रतिबंधकतायां व्यापकत्वीयसंसर्गविशेषावगाहित्वनिवेशो
न क्षतिः व्यापकत्वविशिष्टघटितसंसर्गकज्ञानेऽपि विशिष्टघटकस्य वैशिष्ट्यस्यावश्यभानादिति मन्यते तदा यद्दिग्यादेरपि यद्व्यापकतया तदभावः
वगत इत्येवार्थः न च व्याप्तिघटकसामानाधिकरण्यांशभानस्याप्रयोजकतया यावत्यादेरप्युक्त एवार्थ इति पौनरुक्त्यं दुर्वारमिति वाच्यं॰ व्याप्यतापदेन
तद्धर्मव्याप्तित्वस्यैवाभिहितत्वात्॰ व्यापकसामानाधिकरण्यस्य यदवच्छेदेनेत्याद्यंशभावे विपक्षतिविरहात्॰ वस्तुतस्तु ग्राह्याभावांशे तद्धर्मव्या
पकतायाः संसर्गघटकविशेषणविधया भानमात्रं न विरोधितायां प्रयोजकं॰ तथा सति यत्र पुरुषो न स्थाणुरित्यादिज्ञाने करादिव्यापक
ताविशिष्टस्थाणुत्वाद्यभावीयविशेषणतादेः संसर्गतया भानं तादृशज्ञानसहितस्य करादिमानयमित्यादिज्ञानस्याप्ययं स्थाणुर्नवेत्यादिसंशय
विरोधिताप्रसंगात्॰ अतस्तद्धर्मविशिष्टग्राह्याभावावगाहित्वसहितमेव तद्धर्मव्यापकतायास्तथाभानं विरोधिताप्रयोजकमित्युपेयं॰ तथा च
ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्य तद्धर्मविशिष्टग्राह्याभावप्रकारकव्याप्तिज्ञानस्य तद्धर्मवत्ताज्ञानधर्मितावच्छेदकविशिष्टविशेष्यक

ज्ञानविरोधितया न तदभाववद्व्याप्यतदभावावच्छेदकधर्मदर्शनियोरेकरूपेणप्रतिबंधकतासंभवः। न च ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्यैव संस
र्गघटकतया तद्विषयकस्यापि तद्धर्मविशिष्टे ग्राह्याभावानवगाहिनो ज्ञानस्याविरोधित्वमिष्टमेवं संसर्गघटकविशेषणविषयतायाः प्रकारतानुल्यत्वा
दिति वाच्यं तथा सति पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाद्यभावावगाहिनः पुरुषः स्थाणुर्न वेत्यादिसंशयस्यापि स्थाणुत्वाद्यभावांशे पुरुषत्वादिव्याप
कताविषयकतया तत्सहितपुरुषत्वादिप्रकारकज्ञानस्य स्वसमानधर्मितावच्छेदकस्थाणुत्वादिविशिष्टज्ञानाविरोधितायां निर्वीजत्वापत्ता
तः नहि त्वन्मते तादृशसंशयत्वमेवाविरोधित्वे [illegible] बीजं संभवति पुरुषत्वविशिष्टे स्थाणुत्वाभावावगाहितायाऽविरोधितायामप्रयोजकत्वेन स्था
णुत्वाभावांशे संशयत्वस्य घटादिरूपोदासीनविषयांशे संशयत्वतुल्यत्वात्। तेन पुरुषत्वादिसामानाधिकरण्येन स्थाणुत्वादिविशिष्टबुद्धेः पुरुषत्वाद्य
वच्छेदेन तद्विपरीतनिश्चयस्याविरोधितायां अभावांशे पुरुषत्वादिव्यापकत्वावगाहित्वमेव बीजं न तु पुरुषत्वादिविशिष्टे अभावावगाहित्वमपि तत्र
तदनवगाहिनो स्थाणुत्वाभावव्याप्यं पुरुषत्वं पुरुषत्वं स्थाणुत्वाभावव्यापकं स्थाणुत्वाभाववत्त्वादिव्यापकताप्रकारकज्ञानस्य पुरुषः स्थाणुरित्यादिधीविरोधित्वा
तः तथा च तादृशव्यापकताप्रकारकज्ञानस्य तादृशव्यापकताविषयकत्वेनैव प्रतिबंधकतासंभवात्। अवच्छेदकावच्छेदेन बाधबुद्धेः पृथक् प्रतिबंधक
तायां मानाभावस्तस्या अप्युक्तानुगतरूपाक्रान्तत्वात्। एवं धर्मितावच्छेदकसामानाधिकरण्येनाभाववद्विशिष्टबुद्धेर्धर्मितावच्छेदके प्रतियोगिव्यभिचा

रधीरूपत्वात्· अवच्छेदकावच्छेदेन प्रतियोगिविशिष्टज्ञानस्य तत्प्रतिबध्यत्वे प्रतियोगिन्यवच्छेदकव्यापकत्वावगाहित्वमेव बीजं· तथा च व्यापकताप्र
कारकतत्संसर्गकज्ञानसाधारणानुगतरूपेणैव तत्प्रतिबध्यताकल्पनसंभवात्· अवच्छेदकावच्छेदेन विशिष्टबुद्धौ अवच्छेदकसामानाधिक
रण्यावगाहिबाधबुद्धेरपि पृथक्प्रतिबंधकत्वे मानाभावः। न चैवं तादृशव्यभिचारज्ञानस्य व्यापकताज्ञानविरोधित्वमेव नास्तीति वाच्यं· लाघवेन
व तद्विरोधितास्वीकारौचित्यात्· प्राचीनसिद्धांतसिद्धत्वाच्चेति परास्तं· संसर्गविधया व्यापकतामात्रावगाहित्वस्य विरोधिताबीजत्वेऽवच्छेदका
वच्छेदेन स्थाणुत्वाभावावगाहिनः पुरुषः स्थाणुर्न वेत्यादिसंशयस्य पुरुषः स्थाणुर्न वेत्यादिज्ञानाविरोधिताया निर्बीजतापातात्· तादृशव्यापक
तावगाहित्वस्य व्यापकतानिरूपकधर्मविशिष्टे ग्राह्याभावावगाहिनिश्चयत्वसहितस्यैव विरोधिताबीजतया करादिव्यापकताविशिष्टस्थाणु
त्वाद्यभावसंसर्गघटकतया करादिव्यापकतामवगाहमानस्य पुरुषो न स्थाणुरित्यादिज्ञानस्य करादिमान् स्थाणुरित्यादिज्ञानाप्रतिबंधकत्व
निर्वाहाय तद्धर्मावच्छिन्नविशेष्यकैतद्ग्राह्याभावावगाहिज्ञानत्वेन बाधबुद्धेर्ग्राह्याभावांशे व्यापकताप्रकारकबुद्धेश्च व्याप्यधर्मधर्मितावच्छेद
ककबुद्धौ तादृशव्यापकताप्रकारकज्ञानत्वेन पृथक्प्रतिबंधकताया आवश्यकत्वात्· व्यभिचारधियो व्यापकत्वग्रहविरोधित्ववादिनां प्रा
चां तत्संशयस्यापि तद्विरोधिताया अनुमततया संसर्गविधया व्यापकत्वावगाहित्वस्य तत्प्रतिबध्यताबीजत्वे पुरुषः स्थाणुर्न वेत्यादिसंश

येऽवच्छेदकावच्छेदेन स्थाणुत्वाद्यवगाहितायाएवानुपपत्तेश्चेति। यदि चावच्छेदकसामानाधिकरण्यमात्रेण तदवच्छेदेन विशेषणमवगाहमानयो
र्बुद्ध्योर्वैलक्षण्यनिर्वाहायावच्छेदकावच्छेदेन बुद्धौ व्यापकतायाः संसर्गघटकतयाभानमुपेयते। पुरुषत्वादिधर्मितावच्छेदककबुद्धौ च करादिव्यापकता
याः संसर्गघटकतयाभानमप्रामाणिकं। तदा पुरुषे न स्थाणुरित्यादिज्ञानसहितस्य करादिमत्ताज्ञानस्य स्थाणुत्वादिविशिष्टधीविरोधित्वात्संस्कारे
नुगतरूपेणैव ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकज्ञानस्य तद्धर्मावच्छेदेन ग्राह्याभावज्ञानस्य च तद्धर्मदर्शनप्रतिबंधकतायां निवेशः। पुरुषः
स्थाणुर्नवेत्यादिसंशयकालीनपुरुषत्वादिग्रहस्याविरोधित्वोपपत्तये व्यापकताज्ञाने पुरुषत्वाद्यवच्छिन्नविशेष्यकस्थाणुत्वादिसंशय
भेदो निवेशनीयः। स्थाणुत्वाद्यभावांशे व्यापकताप्रकारकनिश्चयस्तादृशस्थाणुत्वादिसंशयरूपो नास्त्येव। तादृशनिश्चयस्य स्वका
लेपि तादृशसंशयविरोधित्वात्तेन संशयरूपव्यापकताप्रकारनिश्चयासंग्रहसंभवेन तादृशसंशयभेदस्य प्रतिबंधकतावच्छेदक
त्वासंभवस्यावकाशः। एवं तादृशभेदानिवेशे पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाभावनिश्चयसाधारणेन रूपेण स्थाणुत्वाभावः पुरुषत्वव्याप
क इति बुद्धेः पुरुषः स्थाणुरित्यादिधीप्रतिबंधकतासंभव इति ध्येयं। अत्रापि शानजंतमुपेक्ष्यावगतोगृहीत इति निष्ठान्तप्रयोगो
यदा संशयानुत्पादो निर्वाह्यस्तदव्यवहितप्राक्क्षणे तद्ज्ञानसत्त्वमपेक्षितं न तु तदैवेति लाभाय। एतेन चिरविनष्टज्ञानजोद्बुद्धसं

परा०ग्र०
७५

75

स्कारसत्वेपिसंशयानुत्पादलाभाय तथाभिधानमितिहृदयं॥ उद्बुद्धसंस्कारज्ञानयोरनुगमासंभवेन पृथक्पृथक्प्रतिबंधकतायावाच्यतयागौर
वात्॥ उद्बुद्धसंस्कारात्स्मरणस्यावश्यकतयातेनैवकार्यकालवर्त्तिनासंशयप्रतिबंधसंभवात्॥ यदवच्छेदेनव्यावर्त्तकदर्शनं तद्धर्मविशिष्टेनतत्सं
शयइत्युक्तमेव विशिष्य दर्शयति यथेति॥ स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेनग्रहे पुरुषोयं स्थाणुर्नवेतिसंशय इत्येकोन्वयः॥ एवंस्थाणुत्वा
भावस्यपुरुषत्वावच्छेदेनग्रहे पुरुषत्वस्यचेदंत्वावच्छेदेनग्रहे॥ अयंस्थाणुर्नवेतिसंशयइत्यपरः॥ चरमश्चस्फुटएव॥ तद्यदन्योन्याभावादिरित्यस्यव्या
वर्त्तकतयाबोद्धव्य इत्यर्थकेनाग्रिमेणाइत्यव्यइत्यनेनसंबंधः॥ सर्वत्रादिनातदवच्छेदकत्वग्राह्ययोः परिग्रहः॥ तत्पदंसर्वत्रियद्यपरं॥ संशयत्वस्यव्या
वर्त्तकधर्मदर्शनप्रतिबध्यतावच्छेदकत्वभ्रमंनिराकरोति॥ एवमिति॥ न तद्धर्मोपीत्यस्यव्यावर्त्तकधर्मदर्शनदशायामित्यादिः॥ तथाचसंशयनिश्चय
साधारणज्ञानत्वमेवतत्प्रतिबध्यतावच्छेदकमितिभावः॥ विशेषदर्शनस्य॥ तद्व्यावर्त्तकधर्मदर्शनस्य॥ विपरीतज्ञानमात्रेति॥ तत्तज्ज्ञानसामान्ये
त्यर्थः॥ अग्रेधूमत्वपुरस्कारेणेत्यादौ॥ प्रमेयमित्यस्यसमानलिंगपक्षतृप्तविशेष्यवाचकपदं पूरयति इदमिति॥ इदंत्वस्यतेजोभावत्वात्मकत्वेनतद्व
च्छिन्नेभावत्वसंशयायोगात् तद्धिहरणोतिनोक्तत्वेनेति॥ मूलेनुमानमनुमितिः॥ तथाचेदंभावोऽभावोवेतिसंशयस्यतेजोयमानाः इदमुभय
थापिप्रमेयमित्यनुमितिस्तु नमतेनस्यादित्यर्थः॥ उभयथापीदंप्रमेयमितिज्ञानस्यावधारणत्वलाभात्संशयज्ञानस्यानुमित्यावश्यक

तेनेने

७५

त्वं लभ्यते॰ अनुमित्यनुत्पत्तौ हेतुरयमहादित्यंतं॰ अयमहादित्यस्य पक्षधर्मतानिश्चयप्रकारत्वयेत्यादिः। अथ तादात्म्यसंबंधेनान्यतरवत्तो लिंग
त्वमुपेक्ष्यान्यतरत्वस्य धर्मस्य लिंगतायाः सिद्धांतयिष्यमाणतया ऽव्याप्यभावत्वादित्रिधर्मस्या लिंगतावच्छेदकस्याग्रहे मूलतात्पर्यमवगम्य
तदुत्साभिसंधाय भावत्वादिपदं भावत्वत्वादिपरतया व्याचष्टे दीधितौ भावत्वाभावत्वयोरिति॰ अनुयोग्यप्रसिद्धेरभावस्य दुर्निरूपतया लिं
गत्वाभावादित्यसंभवपरतयाहेतुं पूरयन् व्याचष्टे अप्रसिद्धत्वेनेति॰ भावभेदवैशिष्ट्यस्याभावभेदावृत्तितया तद्विशेषणतया लिंग
तावच्छेदकघटकत्वासंभवादिति पर्यवसितोर्थः। ननु परैः केवलान्वय्यनुमानानंगीकारात् भावभिन्नपदार्थानंगीकाराच्च भाव
भिन्नत्वरूपाभावत्वघटितान्यतरत्वावच्छिन्नलिंगे नत्रमेयत्वानुमानोपपादनविरुद्धमित्यत आह भावत्वाभावत्वेसाध्यकमिति॰
अतिरिक्तं चेति॰ यद्यप्यभावस्याधिकरणस्वरूपत्वेपि स्वरूपसंबंधादिरूपाभावत्वघटितान्यतरस्य हेतुतासंभवः तथापि दर्शित
संशये भावभेदस्य कोटितया तद्घटितान्यतरस्य हेतुत्वं मूलाभिप्रेतमित्याशयेनेदं॰ साध्यस्य केवलान्वयित्वज्ञानकाले यत्किंचिद्रूपाव
च्छिन्नस्यैव वृत्तिमतो लिंगतासंभवतीति मूले तदुक्तं कथनात्केन्यूनताभंगायाह केवलान्वइति॰ अयमालोको धूमावेति संदेहदशायां धूमालो धिन
कान्यतरत्वस्यानुमापकत्वं तु पलिंगत्वमुक्तं। वह्नौ साध्ये व्याधिकरणतया न संभवतीति साध्यांतरं पूरयति॰ व्याप्यत्व इति॰ वह्न्यादिव्या

पराःगाः
७६
76

प्यत्वे साध्य इत्यर्थः। लिंगपदस्याग्रइव लिंगतावच्छेदकपरत्वे वह्न्यादिसाध्यपरतया मूलसंगतिरित्याह लिंगतावच्छेदकं चेति। ननु पक्षधर्मि
कव्यतिरेकज्ञानप्रतिबध्यं तत्तद्धर्मिकतन्निश्चयत्वावच्छिन्नजन्यं इत्येतादृश्यां पक्षीयधूमधर्मिकसाध्यव्याप्तिनिश्चयत्वेनानुमि
तिहेतुत्वसाधिकायां मूलोक्तव्याप्तेरेयाह व्यतिरेकनिश्चयप्रतिबध्ये घटज्ञानादौ व्यभिचारज्ञानसामान्यप्रतिबध्येऽव्यभिचारज्ञा
ने च व्यभिचार इत्याशंक्याह यत्संशयेति। व्याख्यातत्वमिति। तच्च तत्वं। संशयसाधारणव्यतिरेकज्ञानत्वेन प्रतिबंधकत्वं व्याप्ति।
घटकं। ग्राह्यसंशयस्य सर्वत्रैवाप्रतिबंधकत्वोपगमात्। अव्यभिचारग्रहेपि व्यभिचारनिश्चयत्वेनैव प्रतिबंधकत्वमिति। अथेत्यादिग्रा
कार्याव्याप्तिपरत्वे स्वचयमनुपपत्तेर्वक्ष्यमाणत्वात्फलानुत्पत्तिनियतत्वरूपप्रतिबंधकत्वनिवेशनेन मूलेवक्ष्यमाणस्य रूपासिद्धेः परि
हारसंभवेन समाधानासंगतेश्च लाघवेन विशिष्टपरामर्शकारणतावस्थापनपरतया व्याचष्टे यद्वेति। व्यतिरेकसंशये कार्यानु
त्पत्त्यनुरोधेन निश्चयहेतुतायाः पूर्वमाशंकिततया पौनरुक्त्यशंकायाः परिहाराय मूलस्थ व्याप्यभेदज्ञानमित्यत्र ज्ञानपदस्य निश्चयपर
तां स्फुटयितुं व्यतिरेकज्ञानसामान्यमुपेक्ष्य तन्निश्चयकथनं। कार्यानुत्पत्तेः। कार्यानुत्पत्तिनियमे। इत्थं च मूले यदुत्पत्तिप्रतिबंधकमित्यत्र
प्रतिबंधकत्वं कार्यानुत्पत्तिनियतस्वरूपमवेति बोध्यं। लाघवात्। अवच्छेदकलाघवात्। संशयसाधारणज्ञानत्वावच्छिन्नाभावहेतु

७६

भेदाग्रहहेतुत्वेपि॰

त्वेपि अप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्य विशेषणत्वाङ्गीकारे एवं बोध्यं॰ अत एव॰ उक्तग्रंथस्य लाघवप्रदर्शनपरत्वादेव॰ अनुमितिहेतुः कल्पनालाघ
वादिति शेषः। वक्ष्यतीति॰ उक्तग्रंथस्य व्याप्तिपरत्वे व्याप्तिविशिष्टपरामर्शस्य कारणतासिद्धेरावश्यकत्वात् आत्मनिराकृतस्य भेदाग्रहका
रणत्वोपगमस्यासंगत्यापत्तेरिति भावः। एवं च समाधानेऽनुमितिप्रतिबंधकमित्यस्य न कारणीभूताभावप्रतियोगित्वमित्यर्थः। फलानु
त्पत्तिनियतत्वान्निर्वाहार्थमयोच्यत इति शेषः। येन॰ यद्व्यपेक्षया लाघवेनेत्यर्थः। विशेषदर्शनाक्रमोत्पत्तस्य भावस्य प्रागुक्तत्वात् न चेत्यादिशं
कानुत्थितेः तदाशयं प्रकाशयति॰ सामान्यत इति॰ धूमत्वस्य विशेषस्य दर्शनेनेति मूलस्योक्तभ्रमे ग्राह्याभावावच्छेदकतया भातस्य धूमत्वस्य॰
धर्मितावच्छेदकतया स्फुरणेनेत्यर्थो दीधित्यनुसारेण बोध्यः। ननु व्याप्यपक्षयोर्भेदाग्रहस्यानुमितिहेतुत्वे तेषां कारणबाधेनानुमित्यात्मका
न्यथाख्यातिनिराकरणं विरुध्यते॰ कृदहमिति वाष्पादौ वह्निव्याप्यधूमादिभेदाग्रहेणाकृदादौ वह्न्याद्यनुमितेर्दुर्वारत्वात्॰ न च फलासिध्याकृदा
दिपक्षं वह्न्यादिरूपसाध्यं चांतर्भाव्य कारणत्वाकल्पनान्नापत्तिरिति वाच्यं॰ पक्षविशेषमनंतर्भाव्य पक्षानिष्ठप्रत्यासत्या कारणत्वकल्पनेना
पत्तिसंभवादित्यभिसंधायास्तु वेत्यादिकल्पेऽनिर्भरमाहास्तु वेतीति॰ इतरसकलकारणसत्त्वे यत्सत्त्वे कार्यानुत्पादस्तस्यैव प्रतिबंधकता
या आवश्यकत्वादिति भावः। ननु जनकज्ञानेत्यादिमूलशंकाया भेदाग्रहे नैयायिकानामनुमित्यप्रतिबंधकत्वसाधनपरत्वेऽसंगतिः।

जनकज्ञानाप्रतिबंधकस्यैवहेतुतायाः स्वीकरणीयत्वात्‌ तस्य च स्वमतेऽसिद्धत्वात्‌ इत्यतस्तस्याप्रयोजकत्वं स्फुटी करोति अभेदज्ञानस्येति मूलेऽ
भेदज्ञानस्याजनकत्वात्‌ अतीन्द्रियादिहेतुकानुमितावुक्तव्यभिचारे प्राजनकत्वासंभवात्‌ तथा च विपर्ययानुमाने बाध इति भावः। नन्वेव
मपिव्याप्तिविरोधात्‌ भेदग्रहस्य प्रतिबंधकत्वानुपपत्तिर्दुर्वारैवेत्यत आह दीधितौ तथा चेति अतथाभूतस्यापि जनकज्ञानाविरोधिनोपि
भेदग्रहस्येति शेषः। अनायत्याव्युक्तव्याप्तिमिति अन्यथा भेदग्रहदशायामनुमित्यापत्तेरिति शेषः। तथा च तादृशव्याप्तिरेव बाधितेति भा
वः। संदिग्धत्व इति नैयायिकैरतीन्द्रियादिहेतुकस्थले मानसविशिष्टज्ञानोपगमेन व्यभिचाराऽनिर्णयादिति भावः। ननु लिंगपरामर्श
भेदग्रहस्य जनकज्ञानाविरोधिनः प्रतिबंधकत्वेपि न व्यभिचारः ग्राह्याभावानवगाहित्वविशिष्टस्य जनकज्ञानाविरोधिनोऽप्रतिबंधकत्व
व्याप्यत्वोपगमादित्यत आह विशेषयांऽतरदाने चेति ननु गोपदवाच्यत्वे साध्ये गोपदशक्यतावच्छेदकत्वस्य लिंगतावच्छेदकत्वसंभवेपि सा
स्नादिसाध्यकस्थले न तथात्वसंभवो गोपदस्य नानार्थतया न्यत्रापि तच्छक्यतावच्छेदकसत्त्वादित्यत आह विशेषितं वेति सास्नावत्त्वेत्या
दि विशेषितं वेत्यर्थः। वाकारो व्यवस्थितविकल्पार्थकः। ननु गुणगतजातिमनंगीकुर्वतां मधुरत्वव्याप्यरसगतजातेरभावात्तल्लिंगतानु
पपत्तेर्नावकाश इत्यत आह मधुरत्वेति फलत इति तादृशधर्मस्य क्षीररसत्वाद्यनुमापकतायाः सर्वसंमतत्वादिति भावः। गोत्वप्रका

रकत्वं विशेषयति· गोत्वमिति· ज्ञानेतदभावादितिभावः मूले॰ न्यथेति· गोत्वमितिज्ञानव्यक्तेरप्रकारत्वे· अनुपयोगात्·उपयोगानुप
पत्तेः।अवच्छेदकप्रकारकज्ञानविधयैवतस्यावच्छेदव्याप्तिग्रहसंबंधितावच्छेदकप्रकारकज्ञानविधयाव्याप्तिस्मारकत्वेनैवचतस्यप
रामर्शेउपयोगादितिभावः।लिंगतावच्छेदकत्वासंभवादित्यस्यगोपदप्रवृत्तिनिमित्तत्वादिसाध्यकेतादात्म्येनगोत्वादिहेतावित्यादिः।
आधेयतयागोविशिष्टस्यगवाधेयत्वविशिष्टस्यचव्यक्त्वादेरपिगोमात्रवृत्तितयासास्नादिसाध्यकस्थलेव्यक्तेर्लिंगतावच्छेदकत्वं
संभवत्येवेत्यवगंतव्यं·नन्वेवंगोत्वत्वशरीरेपिभेदप्रतियोगितावच्छेदकतयागोत्वस्यानतिप्रसक्तगोत्वत्वेनैवनिवेशनीयतयाऽत्मा
श्रयइत्यतआहगोत्वत्वस्येति· अप्रवेशादिति· स्वरूपतएवतत्रप्रवेशसंभवादितिभावः।मूलेनचैवमिति· एवं· स्वतोव्यावृत्ते गोत्वादावपिध
र्मांतिरस्वीकारे·अनवस्था·अविश्रांतधर्मधाराप्रसंगः।प्रामाणिकत्वादनवस्थानदोषायेतिसमाधत्तेतादृतरेति·सास्नादेसाध्येगोत्वत्वघ
टकसकलगोसमवेतत्वांशवैयर्थ्यात्तत्रतंपरित्यजति·दीधितावत्रचेति·अत्र·एतद्घटकं·यथासाध्यमिति·सास्नादेसाध्येगवेतरासमवेतत्वविशेष
णीभूतंजातित्वादेर्वासाध्यतादृश्यनहेतुतायांसकलगोसमवेतत्वंकेवलंव्याप्यतावच्छेदकंनतुविशिष्टं·विशिष्टंचगोपदप्रवृत्तिनिमित्तत्वादिसाध्य
केतादात्म्येनगोत्वेहेतावित्यर्थः।ननुगवेतरासमवेतत्वस्याभावमेयत्वादावपिसत्वात्सास्नादेर्व्यभिचारितयासाध्यकएवकथंतद्व्याप्यताव

छेदकमत आह कालादाविति· संबंधसामान्येन हेतुत्वे सकलगोसमवेतत्वांशनिवेशेऽपि गोत्ववति सास्नादिमत्यन्ये कालादौ व्यभिचारस्याव
श्यकतया समवायेन हेतुत्वस्यावश्यं स्वीकरणीयतया गवेतरासमवेतत्वस्याभावादिसाधारणस्यापि समवायेन व्यभिचारितायाम
नवच्छेदकत्वादित्यर्थः। एतच्च साध्याभाववद्वृत्तित्वमेव व्याप्तिरित्यभिप्रायेण। यद्विच हेतुतावच्छेदकसंबंधेनावृत्तिव्यावृत्तं तेन संबंधे
नवृत्तिमत्त्वमपि तत्र निवेश्यते तदावच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वमात्रस्य समवायसंबंधेन वृत्तिमत्त्वघटितव्याप्तेर
तिप्रसक्ततयानवच्छेदकत्वात्· समवेतत्वांशोऽपि तद्विशेष्यविधया हेतुतावच्छेदककोटौ निवेश्य इति ध्येयं· गोत्वाभावादिहेतुकस्थले समवायसंबंधा
वच्छिन्नगवेतरासमवेतत्वावच्छिन्नप्रतियोगिताकाभावत्वमेव व्याप्यतावच्छेदकं न तु सकलगोसमवेतत्वमपि हेतुभूताभावप्रतियोगिता
वच्छेदकं निवेश्यं वैयर्थ्यात्· नच गवेतरासमवेतत्वस्य प्रतियोगितावच्छेदकतया निवेशेन द्वैयर्थ्येऽपि प्रतियोगित्वसमानाधिकरणतया न तथात्वं· गवेत
रासमवेतत्वद्रूपाद्यभावस्य गोसाधारणत्वेन व्यभिचारादित्याशंक्यं· सकलगोसमवेत गोत्वस्यापि द्वित्वादिनाभावस्य गोसाधारणत्वात्· गोसमवेत
त्वनिवेशेऽपि तादृशरूपावच्छिन्नाभावस्यैव हेतुतायावाच्यतया तदंशवैयर्थ्यस्य दुर्वारत्वात्· विशिष्टस्य गोत्वे याभावप्रतियोगिता ×सकल× याम
प्यनवच्छेदकतया तद्वच्छिन्नाभावाप्रसिद्धिश्चेत्साह व्यतिरेकेपीति· संबंधांतरेण गोत्वाभावस्य व्यभिचारितया समवायेनेति दृष्टांतविध

योक्तायत्तुगवेतरासमवेतस्यमेयत्वादेःकेवलान्वयित्वयासंबंधसामान्येनतत्वावच्छिन्नाभावाप्रसिद्धिरतःसमवेतत्वंनिवेश्यमेवेत्याशंकावारणायत

दितिन्ततुच्छं·संबंधसामान्येनगवेतरासमवेताभावस्याप्रसिध्याव्यभिचारित्वासंभवादुक्तग्रंथस्ययत्किंचित्संबंधावच्छिन्नाभावहेतुतायामेवव्य

भिचारग्रहदर्शनपरतयातद्धेतुतायांचाप्रसिद्धिविरहेणतामादायसमवेतत्वांशसार्थक्यशंकानवतारेणतत्रव्यभिचारत्रदर्शनस्यानौचित्ये

नासंगतेःासंबंधांतरेणसंबंधसामान्येनगोत्वाभावस्यव्यभिचारितयाकालादेरपक्षत्वेस्वरूपासिद्धतयेतिव्याख्यायामुदक्षरत्वात्ःमूलेय

मिति·पर्वतइत्यादिरित्यर्थःाआलोकोधूमोवेति·अत्रस्वरूपतएवधूमत्वालोकत्वयोःकोटितानतुधूमत्वत्वालोकत्वत्वावच्छिन्नयोःातथा

सत्युक्तसंशयस्यस्वरूपतोधूमत्वादिघटकारकपक्षधर्मतानिश्चयाविरोधित्वादसंगतेःानचसंशयस्यभावद्वयमात्रकोटिकस्यात

भ्युपगेनधूमत्वालोकत्वाभावयोरप्यत्रकोटितायाःस्वीकरणीयत्वात्तत्प्रतियोगितावच्छेदकधूमत्वत्वादेरपिभानमावश्यकमितिवाच्यं·

धूमत्वाद्यभावस्येवधूमादिभेदस्यापिकोटितयाधूमत्वादिसंशयानिर्वाहात्·धूमादिभेदज्ञानेचधूमत्वत्वादिनाभानानावश्यकत्वात्·नचधू

मत्वादौधूमादिभेदविरोधभानेतद्धर्मितावच्छेदकतयाधूमत्वत्वादिभानमावश्यकं·धूमादिभेदकोटिकसंशयेपिधूमत्वत्वादिनैवधू

मत्वादेःकोटित्वमावश्यकं·संशयेकोटिविषयतायाविरोधग्रहप्रकारावच्छिन्नत्वनियमात्इतिवाच्यं·संशयस्यैककोट्याःपरस्यराव

परा०गा०
७२
79

रोधभानानियमात्‌· धूमभेदादौ धूमाद्यवृत्तित्वरूपधूमादिविरोधभाने न स्वरूपतो धूमत्वादिकोटिकसंशयनिर्वाहात्‌· स्वरूपतो भासमानधू
मत्वाद्यवच्छेदेन धूमभेदाभावज्ञानस्यापि धूमत्वादौ धूमा[illegible]त्वादिभेदविरोधज्ञानतया तादृशविरोधज्ञानेपि धूमत्वत्वादिभानानियमाच्च· अ
थैवमपि पर्वतवृत्तित्वविशिष्टधूमत्वादिनिश्चयस्यैवाविरोधी संशयः ननु अनुमितिजनकतयाभिमतयाभिमतस्य· धूमत्वादिविशिष्ट
पर्वतवृत्तित्वनिश्चयस्य· असमानधर्मितावच्छेदककत्वात्‌ ग्राह्याभावानवगाहित्वाच्च तेन तादृशसंशयदशायामनुमित्यनुपपत्तेः एवं न्यायमत
सिद्धपरामर्शनिर्वाहाय उभयथापि वह्निव्याप्य इति इदं पदार्थव्याप्तिनिश्चयाभिधानमसंगतं· पक्षवृत्तित्वविशिष्टव्याप्तिनिश्चयस्यानुमितिहेतु
त्वे व्याप्तिविशिष्टपक्षवैशिष्ट्यज्ञानस्य व्याप्तिप्रकारकज्ञानरूपकरणव्यापारस्योपसंहारग्रंथे ऽनुमितिहेतुत्वाभिधानविरोधादिति च
न· पक्षवृत्तित्वावच्छिन्ने धूमत्वादिरूपविशेषणसंदेहे पक्षे धूमत्वादिविशिष्टकोटिकसंशयस्यौचित्यावर्जिततया पक्षे व्याप्यतावच्छे
दकविशिष्टप्रकारकनिश्चयो न संभवति· पक्षविशेष्यकनिश्चय एव पक्षविशेष्यकाय ऽनुमितौ हेतुरित्याशयेन धूमत्वादिसंशया
भिधानस्य पक्षवृत्तित्वावच्छिन्ने व्याप्यत्वाभाववगाहिविशेषणसंदेहे च पक्षे व्याप्तिविशिष्टकोटिकसंशयस्यौचित्यावर्जिततया
पक्षविशेष्यकव्याप्तिविशिष्टप्रकारकानुमितिहेतुनिश्चयासंभवेन तादृशविशेषणसंदेहाविरोधिपक्षवृत्तित्वविशिष्टविशेष्यकव्या

७२

प्तिनिश्चयाभिधानस्यचसंगतेः।वस्तुतःपक्षवृत्तिर्धूमोनवेतिसंशयस्यपक्षवृत्तिर्धूमइतिनिश्चयवद्धूमत्वविशिष्टधर्मिकपक्षवृत्तितानिश्चये
पिविरोधित्वंतुरयुक्तं·धूमत्वावच्छेदेनपक्षावृत्तित्वस्यपक्षवृत्तित्वावच्छेदेनधूमभेदनिर्वाहितयातदवच्छेदेनधूमभेदसंशयाद्धूमत्वावच्छेदेनप
क्षावृत्तित्वसंशयस्योचितत्वावर्जितत्वात्·एवंपक्षवृत्तित्वविशिष्टेव्याप्यत्वनिश्चयोव्याप्तिविशिष्टपक्षवृत्तित्वसंशयकपक्षवृत्तित्वावच्छि
न्नधर्मिकव्याप्याभावसंशयविरोधितयोपयुज्यतइतिपक्षवृत्तिधर्मिकधूमत्वादिसंशयव्याप्तिनिश्चययोरभिधानयोःसंगतिः।केचित्तु
व्याप्तिसंबंधेनवह्निसाधकपुरोवर्तिधूमादिपक्षकस्थलेतादात्म्यसंबंधेनधूमादेर्हेतुत्वेतादात्म्यसंबंधेनधूमादिरूपव्याप्यतावच्छेदका
वच्छिन्नस्ययत्रपक्षेसंशयस्तत्रव्याप्यत्वेनधूमादेःपक्षेतादात्म्यसंबंधेननिश्चयादनुमित्युत्पत्त्याव्याप्यतावच्छेदकप्रकारकपक्षधर्मता
निश्चयस्यव्यभिचारप्रदर्शनपरतयातत्रतन्मूलकमुक्तानुपपत्तिशंकाकुलचेतसोवर्णयंतितत्पुनःप्रसिद्धस्थलेपर्वतेधूमत्वाद्यवच्छिन्नवत्ता
संशयस्थलीयव्याप्तिविशिष्टवत्तानिश्चयजन्यानुमितौव्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयव्यभिचारोपेक्षावीजंसम्भागपश्यंतः
कथंनत्तिवृत्तिभाजोभवंतीतिचिंतनीयंमूले·उभयथापिवह्निव्याप्यइतिनिश्चयकथनंस्वमतेहेतुरक्षणार्थं·अत्रवह्नेःसाध्यस्योपादाना
त्·धूमालोकान्यतरत्वंलिंगमित्यत्रलिंगपदस्ययथाश्रुतार्थकत्वानुपपत्तेस्तद्व्याचष्टेलिंगमिति·व्यभिचारवारणायस्याद्यैकांतत्वेनतथेत्यत्रे

परा०ग०
८०
80

तथा प्रदस्य वक्ष्यमाणतदर्थकत्वानुपपत्तेः पूरयति तथा च न व्यभिचार इति· न तथेत्यस्य न लिंगतावच्छेदकमित्यर्थो नियुज्यते· धूमत्वादे
र्ज्ञाने आलोकत्वाद्यवच्छिन्ने नानुमितावपि तस्य लिंगतावच्छेदकतायाः इव तदन्यान्यत्वस्य लिंगतावच्छेदकत्वसंभवे न हेत्वसंगतिरिति तोष्या
चष्टे तेनेति· तेन तस्य लिंगतावच्छेदकत्वेन प्रकृते धूमत्वस्येव धूमान्यान्यत्वस्यापि संदिग्धतया तस्य व्याप्यतावच्छेदकत्वखंडनमयुक्तमि
त्यत आह धूमान्यान्यत्वमिति· एकधर्मस्य· अन्यतरत्वरूपस्य· धर्मद्वयस्य· धूमत्वालोकत्वरूपस्य· तत्वे· व्याप्यतावच्छेदकत्वे· तथा च गौ
रवस्य व्याप्यतावच्छेदकताबाधकत्वे विपरीतमेव स्यादिति भावः। एकस्यातिगुरुशरीरत्वे लघुशरीरावच्छेदकद्वित्वमबाधकमित्याश
येनाह तादृशेति· धर्मद्वयस्येवावच्छेदकत्वौचित्यादित्यन्वयः। शरीरलाघवमुक्तो पस्थितिलाघवमाह प्रथमत इति· तावदन्यतमत्वस्य गुरु
धूमालोकाद्यन्यतमत्वस्यावच्छेदकत्वं स्यात् न तु धूमालोकाद्यन्यतरत्वस्य तथा च कुतो वैपरीत्यापादनमिति भावः। अन्यतरत्वाश्रये
व्याप्तिरेव नास्ति· अत एव तेन रूपेण हेतुप्रयोगे व्याप्यासिद्ध्यादिना वादिनो निग्रह इत्येवान्यतरत्वस्य व्याप्यतानवच्छेदकत्वे बीजं तदाश्र
यस्य व्याप्यत्वे तस्यावच्छेदकतायाः आवश्यकत्वादित्यभिप्रायो न्यतरत्वव्याप्यतावच्छेदकतां निराकर्त्तुरिति भ्रमेणाशंकते मूले नन्विति·
भ्रमं निराकरोतीति तदन्यान्यदिति· न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तमिति· अन्यतरनिष्ठयोर्विभिन्नव्याप्योधूमत्वालो

८०

कत्वाभ्यामेवावच्छेदात्· प्रसेकानवच्छेद्यान्यतरत्वावच्छेद्योभयसाधारणातिरिक्तस्यास्तेश्चानभ्युपगमादिति भावः। यदर्थविशेषणाघटि
तधर्मस्य व्याप्यतानवच्छेदकत्वे धूमालोकभिन्नभेदत्वमपि न व्याप्यतावच्छेदकत्वं· तथा च व्याप्तेरवच्छिन्नत्वनियमात्· तादृशाभेदे वह्निव्या
प्तिनिरूपिता व्याप्तिरेव न संभवतीति तेन वह्निव्याप्यत्वमपि नानुमातुं शक्यते· व्याप्तिव्याप्यत्वेन पक्षधर्मतानिश्चयस्याप्ययोगादि
ति भवन्मते व्याप्तिप्रकारकपक्षधर्मतानिश्चयोपि तत्र दुर्घट इत्याशंकते नचैवमिति· ननु विशेषदर्शनसहकृतं प्रत्यक्षं तत्र व्याप्ति
निश्चायकमित्युक्तं· तदृश्यान्यत्वस्याव्याप्यतया तज्ज्ञानस्य विशेषदर्शनत्वासंभवादिति पुनः शंकते नचैवमिति· विशेषदर्शनत्वेन
प्रत्यक्षसहकारित्वादिति समाधत्ते विशेषदर्शनत्वेनेत्यस्य व्याप्यदर्शनत्वेनेत्यर्थकतोक्तक्रमेण न संभवतीति व्याप्यदर्शनसाधारण
विपरीतज्ञानविरोधित्वेनेत्यर्थकतां तस्याह दीधितौ विशेषदर्शनामिति· व्यावर्तकधर्मदर्शनत्वेनेति· ग्राह्यविरोधिधर्मदर्शन
त्वेनेत्यर्थः। स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितमेव न व्याप्यतावच्छेदकमित्याशयेनान्यतरत्वस्य व्याप्तिव्याप्यता
वच्छेदकत्वं स्वयं व्यवस्थापयति· अत्र चेति· अन्यतरत्वस्य धूमत्वादिरूपत्वे तत्वस्यानवच्छेदकत्वेपि धूमत्वत्वादिना व्याप्यत्व
या व्याप्तिप्रकारकपक्षधर्मताधीहेतुतावादिनां व्याप्त्यनुमानं निराबाधमित्यपि बोध्यं· अन्यतरत्वस्य व्याप्यतानवच्छेदकत्वे

परा॰ग॰
८१

81

पितदवच्छेदेनतद्धूमादनुमितिर्भविष्यतीतिशंकांनिराकुरुतेएवंचेति॰ननुगौरवमात्रंनव्याप्यतावच्छेदकत्वेबाधकं।तथासतिसास्ना
दिनागवादेर्हेतुतावच्छेदकत्वप्रसंगात्॰किंतुव्यर्थविशेषणघटितत्वमेव॰धूमत्वादेःप्रत्येकमुभयासंग्राहकत्वात्तत्संग्रहप्रयोज
कधर्मस्यनवैयर्थ्यं।वस्तुतस्त्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिज्ञानमेवकारणं॰अतएवानुमितिजनकतयातन्मतासि
द्धज्ञानद्वयकालेधूमत्वदर्शनस्यावच्छेदकधर्मदर्शनतयायद्धूमोवह्निव्याप्यइतिज्ञानवतीतिशंकाविरोधित्वमप्युपपद्यते॰गुरोरपितादृशाऽ एवंच॥
वच्छेदकत्वमक्षतमेवेत्ययमालोकोधूमोवेत्यादिसंदेहदशायांनानुमित्यनुपपत्तिरितिआशंकायाःप्रथमकल्पेसत्वात्तदेवकिंचे
त्यादिदूषणांतरानुसरणबीजमितिसूचयितुंप्रथमदोषाभावाभ्युपगमंप्रकाशयन्किंचेत्यादिव्याप्यतावच्छेदकप्रकारकज्ञानहे
तुत्वासंभवपरतांस्फुटयति॰अस्तुवेत्यादिना॰एवंचमूलेव्याप्यत्वज्ञानमित्यस्यावधारणपरतयाव्याप्तिप्रकारकपक्षधर्मताज्ञानमेवेत्य
र्थः।कारणं॰फलोपधायकं॰तथाचव्याप्यतावच्छेदकप्रकारकज्ञानव्यवच्छेदात्तद्धेतुतायांव्यभिचारइतिलभ्यतइतिलभ्यते॰व्याप्तेर्व्याप्य
तावच्छेदकत्वोपगमेनैवतद्दोषस्यप्राक्समाहितत्वात्॰तस्यास्तथात्वमनिराकृत्यप्रथमतएवतद्दोषदानमयुक्तमित्याशयंस्फुटय
ति॰आप्तेरिति॰आत्माश्रयेणेत्यादिः॰एतच्चस्वरूपसंबंधरूपावच्छेदकत्वाभिप्रायेण॰तदभिप्रायेणैवसामान्यविशेषव्याप्त्योर्भेदव्य

८२

वस्य व्याप्यत्वेत्यादिमूले तयोरवच्छेद्यावच्छेदकभावशंका· मूले सकलधूमादिवृत्तिव्याप्तौ मानाभावादिति· विशेषव्याप्तीनां· धूमव्यापक
वह्निसमानाधिकरणवृत्तिधूमत्वादीनां· अनुगमकस्य व्याप्तित्वस्य दुर्निर्वचतया तासामपि व्याप्यतावच्छेदकत्वासंभवादिति भावः
ननु व्यभिचारधीविरोधित्वमेव सकलविशेषव्याप्तीनामनुगमकं व्याप्तित्वं· वह्निव्याप्यवानयमित्यादिशाब्देनापि तादृशव्याप्तित्वे
न व्याप्तयः पक्षधर्मांशे प्रकारतयाश्रयाप्यंते· एवं साध्याभाववदवृत्तित्वमपि स्वविशिष्टव्यापकताघटितव्याप्तेरवच्छेदकमि
ति तेन रूपेण यत्र शाब्दव्याप्यवगतिस्तत्राप्यनुमितिरुत्पद्यत एव· एवमनतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य स्वसाधारणत
यालद्दनुसरणेन काचिदप्यनुपपत्तिरित्याशंक्य व्याप्तेर्व्याप्यतावच्छेदकत्वमुपेत्यापि शाब्दपरामर्शजानुमितेर्व्यभिचारमुपपाद
यति वस्तुत इति· अतिरिच्यतामित्यस्य स्वसाधारण्यामनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं वा आश्रियतामिति शेषः। अतिप्रसंगात्·
धूमत्वावच्छेदेन व्याप्तिज्ञानरहितस्यापि धूमवानयमित्यादिज्ञानादनुमितिप्रसंगात्· गृह्यते· तत्कालीनग्रहविषयः। न च तदानीमि
ति· पक्षो वह्निव्याप्यवानयमिति भावः। श्रूयते तदित्यर्थः। गृह्यते इत्यस्य पक्षधर्मताग्रहकाले व्याप्तौ व्याप्यतावच्छेदकत्वग्राहकशाब्दाभा
वादिति भावः। अनुमितिरपलपनीयेति· अनुमित्यभावः कल्पनीय इत्यर्थः। मानाभावात्· तत्कल्पकाभावात्· उक्तरूपेण कारणताया अ

सिद्धेः कारणाभावासिद्धेरितिभावः। ननु तत्र स्मरणादिरूपतादृशव्याप्तिज्ञानसंभवान्न व्यभिचारनिश्चय इत्यत आह कल्प्यत्वेति। लघुरूपं व्याप्ति
प्रकारकपक्षधर्मताज्ञानत्वं। अयं चापि चेत्सादि मूलस्यैवार्थ इति तत्कल्प्यत्व एव निर्भरो दर्शितः। एतेन। कारणीभूतसकलपक्षधर्मताज्ञानासं
ग्राहकत्वेनातिप्रसक्तत्वेन चेति। व्याप्तिग्रहेति। एतादृशश्च धर्मो व्याप्यतावच्छेदकधूमत्वादिर्व्याप्तिरपीति नशाब्दपरामर्शासंग्रह इति भावः। दि
धूमो वह्निव्याप्य इति निश्चयस हि तादृग्वान् पर्वत इत्यादिज्ञानादनुमितिवारणाय मात्रेति। प्रमेयसामान्यहेतुकवाच्यत्वाद्यनुमितिस्वी
कारे स्वव्यापकतद्ग्रहविषयताकत्वमेव तद्विषयमात्रवृत्तित्वं। केवलान्वय्यनुमानानुपगमे तु तद्विषयान्यावृत्तित्वमेव। यादृशरूपेण व्याप्तिग्रह
विषयतानियतत्वं तादृशानिष्ठावच्छेदकतान्यावच्छेदकत्वानिरूपकत्वं प्रकारतायां निवेश्यं अतो न धूमो वह्निव्याप्य इति ज्ञानदशायां जातित्वा
दिना धूमत्वादिप्रकारकज्ञानादतिप्रसंगः। स्वरूपतो धूमत्वादिप्रकारकत्वासंग्राहकतादृशरूपावच्छिन्नत्वमुपेक्षितं। तथात्वायोगात् ८२
वह्न्यादिव्याप्तिग्रहमात्रे विषयैतासंभवात्। सामान्यप्रत्यासत्तिं विना सकलधूमादीनां व्याप्तिग्रहे भानासंभवादिति भावः। आदिपदे
न सकलधूमादिवृत्तिव्याप्तेरपि परिग्रहः। एतावता धूमत्वादिप्रकारकस्य व्याप्तिप्रकारकस्य च पक्षधर्मताज्ञानस्यासंग्रहो दर्शितः। अतिप्रसंगं
दर्शयति। वह्निव्याप्यमिति। धूमत्वे व्याप्तिग्रहविषयतानियतत्वनिर्वाहकस्य व्याप्तिग्रसकलवह्निव्याप्यविषयकत्वस्य अभावाय सर्वमिति। ए हे

परा०गा०
८२
82

तज्ज्ञानमनुमितिरूपं सामान्यप्रत्यासत्तिमनंगीकुर्वतां तेषां पक्षे सकलवह्निव्याप्यभानासंभवात् सामान्यप्रत्यासत्त्यभ्युपगमपक्षे वा दू-
षणमिदं अन्यथाख्यातिमनंगीकुर्वतां सर्वस्मिन्वह्निव्याप्तिविधेयकज्ञानासंभवात् अन्यथाख्यातिस्वीकारे तादृशान्यथाख्यातिकाले धू-
मवान्पर्वत इतिज्ञानादनुमितेरिष्टत्वात् वह्निव्याप्यत्वस्य स्वसमनियतसर्वत्वधर्मितावच्छेदकतायन्नस्योद्देश्यतावच्छेदकत्वं सूचयितुं
प्रमेयमितिविधेयवाचकपदांतरनिर्देशः। धूमत्वावच्छेदेन व्याप्तिज्ञानदशायामनुमितेरिष्टत्वात् धूमत्वांशे व्याप्तेः सामानाधिक-
रण्यमात्रावगाहितां सूचयितुं धूम इत्यनभिधाय सा धूमव्यक्तिरिति शाब्दज्ञानासंग्रह इति। वह्निव्याप्यवानयमित्यादिशाब्दस्य व्या-
प्तौ व्याप्तेरवच्छेदकतायां स्वसामानाधिकरण्यस्याप्यवबोधकत्वादिति भावः। अत एव अतिप्रसंगस्य उद्धारत्वादेवं व्याप्तिभानांशे
इत्यादेः व्याप्तिप्रकारतान्तर्गतत्वप्रकारताश्रयो यो व्याप्तिग्रहविषयतानियतो धर्म इत्यर्थः। वह्निव्याप्यं सर्वं प्रमेयं धूमवान्पर्वत इत्या-
द्युक्तज्ञाननिवारणाय निरुक्तप्रकारताश्रयत्वं धर्मविशेषणं। धूमो वह्निव्याप्यः अभाववानयमित्यादिज्ञाननिवारणाय च व्याप्तिग्रहविषयता-
नियतत्वमुपात्तं। तथा तादृशधर्मान्तर्गतत्व× व्याप्तिप्रकारता× स्यभेदाभेदसाधारणत्वादिति भावः। धूमत्वादिकं तथेत्यनुषंगेणान्वयः। धूमस-
मानाधिकरणेत्यादीति। साध्याभाववद्वृत्तित्वादिरूपव्याप्तिग्रहस्थले च ज्ञानद्वयादनुमितिर्मयापि नांगीकार्येति भावः। वह्निव्याप्यं सर्वमि-

त्यत्र तदभाववद्वृत्तित्वरूपव्याप्तिज्ञानमेव विवक्षितं· धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपवह्निव्याप्तिभाने धूमत्वादिप्रका
रकपक्षधर्मताज्ञानादनुमितेरिष्टत्वात्· तथा च वह्नित्वमात्रस्य साध्यतावच्छेदकत्वे धूमत्वादेर्न व्याप्तिप्रकारतांतःपातिप्रकारताश्रय
त्वं· अतो धूमसमानाधिकरणवह्नित्वावच्छिन्नसाध्यकानुसरणं· साध्यतावच्छेदकप्रकारतानंतःपातित्वेन व्याप्तिप्रकारतांतःपातिप्र
कारताविशेषणेऽउक्तस्थले दोषाभावादाह प्रमेयत्वव्याप्यमिति· अत्र चाभिधेयत्वावच्छिन्नव्यापकप्रमेयत्वसमानाधिकरणाभिधेयत्वा
दिरूपव्याप्तिरभिप्रेता· ननु साध्याभाववद्वृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा· साध्याभावस्याप्रसिद्धेर्मीमांसकैरन्यथाख्यात्यन
भ्युपगमात्· भ्रमात्मकतादृशव्याप्तिज्ञानमादाय तन्मतेऽतिप्रसंगाभावात्· न वा समानाधिकरणत्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यरू
पा· तादृशव्यापकताग्रहदशायां समानाधिकरणत्वप्रकारकत्वज्ञानादनुमितेस्तेषामिष्टत्वात्· अतिरिक्तवृत्तित्वग्रहे· व्याप्तिरन्यवृत्तित्व
ग्रहे· अनुमितावितिः· वह्निव्याप्यं सर्वं प्रमेयं धूमवान्पर्वत इत्यादिज्ञानादित्यादिः। एवंविधेष्वापत्तेर्वेति· व्याप्तिग्रहविषयधर्मिविषयकपक्ष
धर्मताज्ञानत्वेनैवानुमितिहेतुता· वह्निव्याप्यो धूमोऽद्रव्यवान्पर्वत इत्यादौ द्रव्यत्वादेरप्यतिरिक्तवृत्तित्वग्रहे स एव प्रतिबंधकस्तद्ग्रहेऽनुमि
ताविष्टापत्तिरित्यस्यापि वक्तुं शक्यतया व्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकत्वादिविशेषणवैयर्थ्यापातादित्यर्थः। अत्रेष्टा

८३

पत्तौ प्रतिबंधं तत्र स्माह व्यभिचाराग्रहेति · एवकारेण व्याप्तिज्ञाने हेतुताव्यवच्छेदः। व्याप्तिज्ञाने शब्दान्यतादशायां व्यभिचाराग्रहे तादृशानुमि
ताविष्टापत्तिसंभवात् · यदि च व्यभिचाराव्यभिचारयोर्द्वयोरेव यत्राग्रहः तत्रानुमितेरनुभवविरुद्धत्वान्न तत्रेष्टापत्तिः संभवतीत्युच्य
ते तदा प्रमेयत्वं व्याप्यं सर्वमित्यादिज्ञानादप्यनुमितेरनुभवविरुद्धत्वान्न प्रकृतेपीष्टापत्तिर्न संभवतीति भावः। ननु व्याप्तिप्रकारता
निरूपितायाः संसर्गतातन्निरूपिताया विशेष्यविषयतातन्निरूपिताया विषयतातन्निरूपकीभूतो यो व्याप्तिग्रहविषयमा
त्रवृत्तिर्धर्मस्तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुता वाच्या · तादृशधर्मश्च व्याप्तिः धूमव्यापकवह्निसमानाधिकरणधूमत्वरूप
व्याप्तौ हेतुतावच्छेदकीभूतधूमत्वादिश्च · न तु तद्घटकीभूतसामानाधिकरण्यादिकं · साध्याभाववदवृत्तित्वरूपव्याप्तिघटकाभा
वमादायातिप्रसंगभंगाय व्याप्तिग्रहविषयमात्रवृत्तित्वोपादानमिति नोक्तापत्तेर्नामवकाश इति दूषणां ×अतोऽन्तरमाह किं चेति ·
कालांतर इति · कारणतावच्छेदककोटिप्रविष्टलिंगादिनामतीतत्वदशायामप्यनुमितेरुत्पत्त्याप्रकृते कारणतावच्छेदकविशिष्टप्रा
क्सत्तायाः कार्यजनने नियामकत्वासंभवादयमतिप्रसंगो बोध्यः। स्वसमानकालीनेति · स्वक्षणवृत्तीत्यर्थः। स्वपदं फलोपधायकत्वे
नाभिमततत्पक्षधर्मताज्ञानव्यक्तिपरं · वाच्यमिति · हेतुतयास्वीकार्यमित्यर्थः। तादृशपक्षधर्मताज्ञानत्वेनेत्यादिः। व्याप्तिज्ञानोत्प

प॰रा॰गा॰
८४
84

त्रिद्वितीयक्षणोत्पन्नपक्षधर्मताज्ञानात्तद्व्याप्तिज्ञाननाशेऽपि क्षणमनुमितिरेतन्मतेऽपि स्वीक्रियत इति बोध्यं· तत्तत्पक्षधर्मताज्ञानत्वेन
हेतुत्वसंभव इति· फलोपधायकीभूतपक्षधर्मताज्ञाननिष्ठानां तत्तद्व्यक्तित्वानां किंचिद्विशेषितानामेव हेतुतावच्छेदकत्वसंभ
व इत्यर्थः। यथाश्रुते तु तत्तद्व्यक्तित्वनिवेशस्यावश्यकत्वे पक्षधर्मताज्ञानत्वनिवेशे प्रयोजनविरहादसंगतेः। अधिकं वैयर्थ्यमि
ति· तादृशधर्मप्रकारकत्वादिविशेषणवैयर्थ्यादित्यर्थः। इदमुपलक्षणं· एतादृशरूपेण हेतुत्वेनं तत्कार्यकारणभावप्रसंगेन
महागौरवमपि बोध्यं· एतेनोक्तरीत्या कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्यवसितत्वापातेन· एवमिति· स्वसमानकालीनत्व
स्वसमानाधिकरणत्वयोरन्यतरप्रवेशस्यावश्यकतयाननुगमेनेत्यर्थः। यद्धर्मावच्छेदेनेति· तद्धर्मावच्छिन्नव्याप्तिज्ञानसहित
तद्धर्मप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नमित्यर्थः। परास्तमिति· साहित्यस्य स्वसमानकालीनत्वात्मकत्वे स्वसमानाधिकरणत्व
स्य सामानाधिकरण्यस्वरूपत्वे स्वसमानकालीनत्वस्य व्याप्तिज्ञाने वश्यं निवेशनीयत्वादिति भावः। एकक्षणावच्छिन्नैकात्मवृत्ति
त्वसंबंधेन तद्वत्त्वं यदि तत्साहित्यं तदा नैतादृशोननुगम इत्यतः प्रकारांतरेणाननुगममाह तत्तद्धर्मेति· विशिष्य तत्तद्धर्मघटितत्वे
नेत्यर्थः। अननुगतत्वादिति· तथा च धूमत्वादिप्रकारकपक्षधर्मताज्ञानस्यालोकत्वाद्यवच्छिन्नलिंगकानुमितौ व्यभिचारः। त

८४

तद्धर्मावच्छिन्नलिंगकानुमितित्वस्य कार्यतावच्छेदकत्वोपगमेपि हेतुतावच्छेदकभेदेन कारणताबाहुल्यमिति भावः। यद्यपि हेतुतावच्छेदकघ
टितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतायाः केवलान्वयिसाधारण्यानुरोधेन वाच्यतया तस्य च हेतुतावच्छेदकमननंतर्भा
व्य कारणताया उक्तत्वतया नैयायिकमतेपि हेतुतावच्छेदकभेदेन कारणताभेद आवश्यकः। व्याप्यतावच्छेदकानवगाहि शाब्दपरामर्शा
दनुमित्यनुत्पाद इष्टस्समानः· तथापि निरुक्तधर्मापेक्षया व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्य लघुतया तेन रूपेण कारणताकल्पनमे
वोचितमित्यत्र तात्पर्यं· ननु यत्त्वतत्वाननुगमस्य दोषत्वे इष्टत्वेन फलसाधनताज्ञानस्योपाये इच्छायां हेतुतया यत्रेच्छा तत्साधनताज्ञानं हेतु
रिति इष्टसाधनताज्ञानहेतुतापरिष्कारो मणिकृतां विरुध्येतेत्याशंकते यत्रेच्छेति· ध्रुतिवक्ष्यत इति· तत्र गत्यंतराविरहेण सुखदुःखाभा
वत्वादिप्रकारकफलगोचरेच्छयोः तद्वच्छिन्नसाधनताज्ञानस्य चाननुगतानामपि तादृशेच्छात्वतादृशज्ञानत्वेन हेतुतास्वीक्रियते का
र्यतावच्छेदककोटौ चाव्यवहितोत्तरत्वसंबंधेन तत्तत्कारणतावच्छेदकावच्छिन्नवैशिष्ट्यं निवेश्य व्यभिचारो वारणीयः। इच्छागताजातिवि
शेषा एव वा तत्तत्फलेच्छाजन्यतावच्छेदकतया स्वीक्रियंते नानाफलगोचरेच्छास्थले च नानेच्छाव्यक्तयः स्वीक्रियंते· ध्रुयत्नयोगपद्य
वादिच्छायोगपद्यस्वीकारेपि क्षतिविरहादिति भावः। ननु पर्वते तृणधूमत्व वह्निव्याप्यत्ववैशिष्ट्यं यत्र युगपदेव पक्षधर्मे भासते· तत्र वि

पृ॰गा॰ ८५

शिष्टपरामर्शत्वावच्छिन्नस्यैव व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नस्याप्युपस्थितिरस्ति॰ तथा च तेन रूपेणोपाधिः किं न
हेतुत्वमुपेयते॰ एतन्मतेऽवच्छेदकलाघववत्तन्मतेऽपि नियमांशाकल्पनेन लाघवसत्वादित्याशंकापरिजिहीर्षुराह पिच्चेत्यादिमूलाभिप्रा
यमाह ऽछित्ति: नियमादेरित्यादिना अन्यथासिद्धत्वपरिग्रहः ॥ एकतररूपेति॰ उक्तशाब्दपरामर्शस्थले यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्म
प्रकारकपक्षधर्मताज्ञानस्य नैयायिकमतासिद्धत्वादिति भावः ॥ हेतुतावच्छेदकभेदेन कारणताभेदं नैयायिकमते प्यासज्य मीमांस
कमते लाघवमाशंकते नन्वित्यादिना॰ विशिष्य॰ धूमत्वादिना॰ ननु धूमादीनां विशिष्य व्याप्तिघटकत्वेपि किंचिद्धर्मावच्छिन्नविषयताया
नैव सामान्यतस्तद्विषयताकारणतावच्छेदककोटौ निवेशनीयेति न कारणतावच्छेदकाननुगम इत्यत आह तत्र चेति॰ धूमादिविष
यतानां विशिष्यकारणतावच्छेदकेऽनिवेशादित्यिति शेषः ॥ धूमादिविषयतानां विशिष्यैवानिवेशोपि व्याप्तिशरीरे सामानाधिकरण्यप्रति
योगितावच्छेदकतया धूमत्वादीनामनिवेशे उक्तसामानाद्यनुमितिप्रसंगो दुर्वार एवेति तत्र धूमत्वादिकं तथा निवेश्य विशिष्य तत्प्र ८५
कारकत्वेन हेतुतां दर्शयति॰ तादृशेति॰ तद्धर्मविशिष्टेत्यादि॰ तद्धर्मविशिष्टलिंगकानुमितौ तद्धर्मविशिष्टव्यापकतावच्छेदकताविशिष्ट
साध्यतावच्छेदकविषयताशालियद्विशिष्टतद्धर्मप्रकारकपक्षधर्मताज्ञानत्वेनैव हेत्वर्थः ॥ सकलविनिव्यापकत्वादिति॰ तथा च तद्

र्मावच्छिन्ननियतपूर्ववर्त्तित्वमुभयमतसिद्धमेवेति एतन्मते कल्पनालाघवमक्षतमेव · व्याप्यतावच्छेदकानवगाहिशाब्दज्ञानादनुमिति
श्च नैयायिकानामप्यसिद्धेव · अनुमितिप्रयोजिकायाउक्तव्याप्तेर्व्याप्यतावच्छेदकघटितत्वादित्यभिप्रायः । अत्र कारणतावच्छेदकावच्छि
न्नाव्यवहितोत्तरत्वघटितधर्मस्यैवजन्यतावच्छेदकत्वोपगमात् · तदवच्छिन्ननियतपूर्ववर्त्तिताविशिष्टपरामर्शत्वावच्छेदेनाप्यु
भयवादिसिद्धेव ज्ञानद्वयस्थले तिरिक्तविशिष्टपरामर्शकल्पनागौरवस्य च फलमुखत्वेनादोषत्वं मूलकृतैव वाच्यं इत्याशंक्य मी
मांसकमते कारणतावच्छेदकलाघवप्रणालीमाह किंचेति · अखण्डव्याप्तेरिति · उक्तविशिष्टपदार्थरूपाया व्याप्तेरित्यर्थः । प्रकारत्वा
संभवादिति · तथा च विशिष्टव्याप्तिप्रकारकत्वेन कारणतापि न संभवतीति भावः । साध्ये · साध्यतावच्छेदके · व्यापकत्वग्राहकं · व्या
पकतावच्छेदकत्वावगाहि · तादृशव्यापकत्वपक्षधर्मत्वावगाहित्वयोरेवेति · हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्व
विशिष्टसाध्यतावच्छेदकरूपव्यापकत्वावगाहित्वहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टपक्षावगाहित्वयोरेवेत्यर्थः । एवं कारणाधि
करणाद्यंशे साध्यावगाहित्वव्यवच्छेदः । कारणतावच्छेदकत्वं · उचितमिति शेषः । यद्यपि वह्न्यादिसाध्यकधूमादिहेतुकस्थले अख
ण्डव्याप्तेः प्रसिध्या व्याप्तिविशिष्टहेतुमत्ताज्ञानत्वेन कारणत्वं सुवचमेव · साध्यसाधनभेदेन कारणताभेदस्यावश्यकत्वात् · न चैवं दे

मपि साध्यसामानाधिकरण्यांशस्य व्याप्तिघटकतया कारणतावच्छेदककोटौ निवेशाधिक्येन गौरवं दुष्परिहरमेवेति वाच्यं ॥ भवन्मते व्यापकत्वलक्षणावच्छिन्नसामानाधिकरण्यसंबंधेनैकज्ञाने वैशिष्ट्यस्यापरज्ञानांशे निवेशाधिक्यात् ॥ अन्यथा खंडव्याप्तिप्रकारकत्वेन हेतुत्वेऽपि गौरवात् तत्रातिप्रसक्तत्वस्यानुचितत्वात् ॥ तथाप्यन्यथाख्यातिवादिनां वह्न्यधिकरणत्वादिना तदनधिकरणादिमात्रविषयकज्ञानादपि अनुमित्युत्पत्त्या खंडव्याप्तिविषयकत्वेन वह्न्यादिसाध्यकानुमितावपि न हेतुतासंभवतीत्यभिप्रायः ॥ व्यापकत्वस्यापीति ॥ व्यापकतावच्छेदकत्वस्यापीत्यर्थः ॥ खंडशोऽतिरिक्तस्येति ॥ अधिकरणांशे साधनीयत्वावगाहि आधेयत्वांशे अधिकरणीयत्वावगाही सादिक्रमेण कारणतावच्छेदकगर्भनिवेशनमित्यर्थः ॥ अखंडव्यापकत्वाप्रसिध्यात् दवगाहित्वस्य निवेशासंभवादिति भावः ॥ तेषांपरमिति ॥ अन्यथाख्यातिवादिनां नैयायिकानामित्यर्थः ॥ मीमांसकानां तत्र व्यापकताज्ञानासंभवेनानुमितेरसिद्धेरिति भावः ॥ न च केवलाभावत्वादिना साधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वादिज्ञानादनुमितिवारणाय अधिकरणांशे धूमादिप्रकारकमाधेयत्वांशे चाधिकरणप्रकारकमित्यादिक्रमेण व्यापकताज्ञाननिवेशनं मीमांसकेनाप्यावश्यकमिति वाच्यं ॥ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकरूपविशिष्टपदार्थस्य विषयितासंबंधेन कारणतावच्छेदकत्वोपगमात् ॥ विशेष्यविशेषणभावापन्नतावत्पदार्थानवगाहिज्ञाने विशिष्टानिरूपितविषयिताविरहेण विषयितासंबंधेन तादृशविशिष्टवत्त्वाभावादुक्तातिप्रसंगासंगतेः ॥ यादृशविशिष्टपदार्थस्य

८६

कारणतावच्छेदकत्वं तादृशविशिष्टाधिकरणस्यैव कार्यतापादकत्वात् ॥ नन्वेतन्मते साध्यसामानाधिकरण्यज्ञानस्यानुमित्यहेतुतया विरोधस्य हेत्वाभासत्वा
नुपपत्तिः । अनुमितिजनकज्ञानाविरोधित्वादित्यत आह यथा चेति । वक्ष्यते इति । व्यापकतापरामर्शहेतुताविचार इति शेषः । गृह्यमाणे इत्यादि । व्यापकताज्ञा
नविशिष्टपक्षधर्मताज्ञानत्वेन पक्षधर्मताज्ञानविशिष्टव्यापकताज्ञानत्वेन वा हेतुत्वमित्यत्रापि विनिगमनाविरहरूपदूषणग्रस्तत्वादित्यर्थः । नन्वनुमि
तिं प्रति तद्धर्मावच्छिन्ननिरूपितव्यापकताज्ञानत्वेन तद्धर्मावच्छिन्नहेतुमत्पक्षज्ञानत्वेन च कारणता स्वीक्रियते । दंडचक्रादिवत्परस्परसहकारेण फल
जननान्नातिप्रसंगः । न च विशिष्टपरामर्शत्वेनैककारणत्वकल्पनापेक्षया कारणताद्वयकल्पने गौरवमिति वाच्यं विशिष्टपरामर्शत्वेन हेतुतामते
कारणतावच्छेदककोटौ प्रविष्टस्याधिकरणत्वाद्यंशे साध्याद्यवगाहित्वतदंशीयाप्रामाण्यज्ञानविशेषानास्कंदितत्वरूपाधिकविशेषणस्य तथावि
धविशेषणांतरे समं मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यस्य दुर्वारत्वादित्यतो दूषणांतरमाह वह्न्यत्वाभाववद्वृत्तीति ।
अनुमित्युदयादिति । तथा च तत्संग्राहकतया नोक्तरूपेण हेतुतासंभव इति भावः । ननु तादृशज्ञानान्न जायत एवानुमितिः । नैयायिकमतेपि केवलान्व
यिसाधारण्यानुरोधेन व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतायाः वक्ष्यमाणत्वात् तत्रानुमित्यनुत्पादस्य तुल्यत्वादित्याशंक्य परिहरति व्यभि
चारेति । मन्मते व्यभिचारज्ञानप्रतिबंधकतावच्छेदकत्वेन नानाविधव्याप्तिप्रकारता अनुगमय्य तासां कारणतावच्छेदके प्रवेशनीयत्वादित्यर्थः । तथा

परा० ग०
८७

87

चास्माकं तत्रानुमितिर्भवत्येवेति भावः ॥ इदं त्वापाततः । तन्मतेपि तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानप्रतिबंधकत्वेन व्यापकताज्ञानस्य हेतुतायाव
च्छेदकतया साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानस्य संग्रहसंभवात् । तादृशव्याप्त्यंशे निर्धर्मितावच्छेदकज्ञानं तु नैयायिकानामपि दुःसंग्रहं । तादृशज्ञा
नीयव्याप्तिप्रकारतायां व्यभिचारज्ञानप्रतिबंधकतावच्छेदकत्वविरहात् । तादृशप्रतिबंधकतावच्छेदकप्रकारितानिरूपकधर्मप्रकारितात्वेन व्याप्तिप्रकारिता
याः कारणतावच्छेदकत्वे प्रमेयत्वादिना व्याप्तिप्रकारकज्ञानादनुमित्यापत्तेः । एवं व्यापकताज्ञानस्य साध्याभाववद्वृत्तित्वरूपव्यभिचारग्रहं प्रति साध्याभा
ववद्वृत्तित्वज्ञानस्य च साधनाव्यापकताग्रहं प्रति विरोधित्वे मानाभावादननुगम एवासंभवी ॥ साध्यसामानाधिकरण्यविषयतायाः व्यापकताग्रह
निष्ठप्रतिबंधकतावच्छेदककोटावनिवेशेन व्यापकसामानाधिकरण्यरूपव्याप्तिप्रकारकतायां व्यभिचारज्ञानप्रतिबंधकतावच्छेदकत्वं च दुर्घटं ।
अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेपि च धूमव्यापकवह्निसमानाधिकरणोधुनकालीनधूमवान्पर्वत इति ज्ञानादनुमित्यापत्तेः । यत्तु व्या
पकत्वज्ञानं व्यापकत्वानिरूपकतावच्छेदकधर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानं प्रत्येव प्रतिबंधकं । तत्प्रतिबंधकतया च धूमादिव्यापकसाध्य
समानाधिकरणधूमत्वादिरूपव्याप्तिज्ञानधर्मितावच्छेदकधर्मान्तरावच्छिन्नविशेष्यताकव्यभिचारज्ञानस्य तादृशव्याप्तिज्ञानदशायां
उपरितया समानधर्मितावच्छेदकत्वप्रयासस्य व्यभिचारधियं प्रति तादृशव्याप्तिप्रकारकज्ञानत्वेन पृथक्प्रतिबंधकत्वं कल्प्यते । एवं च

८७

तादृशप्रकारतायाः साध्याभाववद्वृत्तित्वरूपव्याप्तिप्रकारतायाश्च व्यभिचारधीप्रतिबंधकतावच्छेदकप्रकारतात्वेनानुगमय्यानुमितिकारण
तावच्छेदकत्वं संभवति· एवं च व्याप्त्यंशे निर्द्धर्मितावच्छेदकतानीयव्याप्तिप्रकारताया अपि तादृशरूपेण संग्रहः संभवति· धर्मितावच्छेदकतायाः
प्रत्यासत्तित्वे धर्मितावच्छेदकतायाः प्रत्यासत्तित्वे धर्मितावच्छेदकतानिरूपकत्वस्य व्याप्तिप्रकारतायामनिवेशादिति· तदपि न सम्यक्· धूमादिव्याप
कसाध्यसमानाधिकरणधूमत्वादिज्ञानदशायां तद्विशेष्यतावच्छेदकावच्छिन्ने साध्याभाववद्वृत्तित्वज्ञानोपगमे क्षतिविरहात्· वस्तुतस्तु· यदि ज्ञानद्व
यहेतुतावादिना व्यापकताधीहेतुरुच्यते तदा व्यापकत्वमपेक्ष्य लघुशरीरसाध्याभाववद्वृत्तित्वरूपा व्याप्तिरेवानुमितिप्रयोजिका न्यायमते स्वीकार्या·
तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुतावच्छेदकधर्मानिवेशे वा हेतुतोपगंतव्या· तथा च हेतुतावच्छेदकभेदेन न तेषां कारणताभेदः। ज्ञानद्वयहेतुता
वादिना तादृशव्याप्तेरनुमितिप्रयोजकत्वोपगमेपि साध्यव्याप्यो धूम आलोकवान्पर्वत इत्यादिज्ञानद्वयादनुमितिप्रसंगवारणाय हेतुतावच्छेदकानां
विशिष्य निवेशनीयतया तेषां तद्भेदेन कारणताबाहुल्यमिति विशिष्टपरामर्शत्वेन हेतुत्वमेव सम्यक्· यदि च केवलान्वय्यनुमानं नैयायिका
नामनुपेक्षणीयमिति व्यापकसामानाधिकरण्यज्ञानमनुमितिकारणं वाच्यमित्युच्यते तदा केवलान्वय्यनुमानपदार्पणभीरुभिर्मीमांसकैः कृप्तता
दृशव्याप्तिमुपेक्ष्य व्यापकताया लाघवेन तज्ज्ञानपक्षधर्मताज्ञानयोः पृथक्कारणत्वं व्यवस्थापयिष्यत इति इत्यादिरीत्या परमतं निराकार्यं· अ

धिकमन्यत्रानुसंधेयं॰ विशिष्टपरामर्शरूपधर्मिणः सप्रमाणकत्वात्तत्कल्पनं गौरवायेति यद्रूपं सप्रमाणत्वादिति मूले॰ तत्राशंक्य यंयु
क्त्यंतरमवतारयति॰ नन्विति॰ तच्च॰ कार्यस्य प्रमाणत्वं च॰ कार्यकारणभावग्रहे सतीति॰ अन्यथानुकूलतर्कानवतारेण व्यभिचारशंकया सक्षणो
विशिष्टपरामर्शविरहे अव्यवहितपूर्ववर्तित्वसंबंधेनानुमितिमत्त्वादिति रीत्यानुमित्याज्ञानादयं स्थले विशिष्टपरामर्शानुमानासंभवा
दिति भावः। तत्फलस्य॰ कारणतानिर्णयाधीनस्य॰ तद्धटितेति॰ धर्म्यंतरघटितस्यार्थः। विशिष्टपरामर्शत्वावच्छेदेन कारणताग्रहे विशिष्टप
रामर्शत्वधर्मिकगौरवज्ञानं विरोधि॰ तच्च गौरवं॰ प्रमाणान्तरासिद्धं तत्तदनुमितिस्वाव्यवहितप्राक्कालीनस्वाश्रयकत्वादन्यत्तदुर्वचमेवेति गौ
रवस्य तादृशधर्मिघटितत्वमित्यभिप्रायः। गौरवानिर्णयासंभवेपि गौरवसंदेहेन प्रतिबंधात्कारणताग्रहः संभवतीत्याशंकते संभाव्य
तेतावदिति॰ संदिह्यत इत्यर्थः। इदं गौरवसंशयप्रयोजकमाह धर्म्यंतरेति॰ अशक्यनिर्वाहत्वादिति॰ तथा च कारणतासंशयात्तदुपपादकध
र्मिणोपि संशयो भविष्यतीति तत्संशयाद्गौरवसंशयेन प्रतिबंधाच्च न कारणतानिर्णयः संभवतीति भावः। ततः संभावनं॰ सामान्यतः॰ दंड
त्वघटत्वाद्यवच्छिन्नरूपसामान्यरूपेण॰ कार्यकारणभावग्रहस्येति॰ तन्निर्णयस्येत्यर्थः। जायघटाविलयप्रसंगात् इति॰ यत्र दंडाद्यवच्छिन्नरूपकारणका
र्यमात्रे यं तत्स्थलीयधर्मिघटितगौरवसंशयेन प्रतिबंधसंभवादिति भावः। यत्र कार्याव्यवहितपूर्वकाले कार[illegible]तावच्छेदकावच्छिन्नस

त्वं प्रमाणांतरासिद्धं तत्र तादृशगौरवस्याभावात्प्राथमशरहेतुमुक्तं· तत्रेति· घटत्वदंडत्वादिना कार्यकारणभावस्थल इत्यर्थः। गौरवमप्यास्थीय
ते· गौरवसंदेहो विरोधितयास्वीक्रियते· विशिष्टपरामर्शस्य हेतुतासिद्ध्यै· न चैवमादिनाऽसंनिकृष्टधूमादौ विशिष्टपरामर्शासंभवशंका
निराकरणस्यतैः त्सिद्धकप्रयोगितामाविष्करोति· व्यभिचारानिर्णये तैर्नैः संनिलाघवे व्यभिचारसंशयस्याकिंचित्करत्वाल्लिर्णयोपादानं·
ननु निरवयवद्रव्यत्वनित्यपरिमाणयोरेकतरं द्वयांते प्रसाध्यतावच्छिशिष्टेऽपरानुमित्यात्तदुभयसामानाधिकरण्यावगाहनं स्तु घटमे
वानुमितेः पक्षतावच्छेदके साध्यसामानाधिकरण्यावगाहित्वनियमादित्यनुमानयोरिति मूलासंगतिरत आह तानुमितेर्कोतिः उ
पगमेपीत्यनेन व्याप्तिप्रकारकधियोनुमितिहेतुतया संसर्गमर्यादया तादृशसामानाधिकरण्यग्रहस्यानुमित्युपयोगित्वं सू
चितं· तेन पक्षतावच्छेदकसाध्ययोरवच्छेद्यावच्छेदकभावस्य संसर्गतयानुमितौ भानोपगमेपि न निर्वाहः। नियतव्यापाराभावादिति मूलम
संगतं· नियतव्यापारपर्यंतस्य करणलक्षणेऽप्रवेशादतो व्यापाराभाव एवात्र विवक्षितः। व्यापारत्वं तु नियतत्वमित्यांतरालिकस्य कुत्रचित्तत् निर्वाह्य
भवेपि न तस्य उपनीतप्रमात्वावच्छिन्ने उपनये न जननीये व्यापारत्वमेतत्सूचयितुं मूले नियतपदमिति सूचयितुं व्याचष्टे एकसंबंधीति· ह
स्त्यादिज्ञानतज्जन्यहस्तिपकादिस्मरणाभ्यां हस्तिपकादिविशिष्टहस्त्यादिविषयकोपनीतभानजननेपीत्यर्थः। तस्य· मध्यवर्तिनः स्मरणस्या

प॰रा॰भा॰
८२

89

नियतत्वेपिकथंनव्यापारतेत्यतआह यामिति । यं । यद्रूपावच्छिन्नं । यस्य । यद्रूपावच्छिन्नस्य । यज्ज्ञानकत्वं । यद्रूपावच्छिन्नजनकत्वं । तस्यैव । तद्रूपावच्छि
न्नस्यैव । तत्र । तद्रूपावच्छिन्नजनने । तद्व्यापारत्वात् । तद्रूपावच्छिन्नव्यापारत्वात् । एतावपि तत्तदुपनयव्यक्तेस्तत्तदुपनीतभानव्यक्तित्वावच्छिन्न
जननेतन्नियततत्तत्स्मरणादिव्यक्तिव्यापारकत्वदुर्वारमित्यालोच्य उपनयस्य प्रमाकरणत्वमभ्युपेत्य प्रमाणांतरत्वं निराकरोति वस्तुतस्त्वि
ति । नक्षतिरिति । प्रत्यक्षप्रमाण एव तदंतर्भावे प्रमाणचातुर्विध्याव्याघातादिति भावः । नन्विंद्रियात्मकप्रत्यक्षप्रमाणे तदनंतर्भावात् । प्रमाणांतरत्वं
तस्य दुर्वारमेवेत्यत आह प्रमावैजात्यस्यैवेति । एवकारेण प्रमाकरणतावच्छेदकभेदव्यवच्छेदः । प्रमाणांतरत्वनिमित्तत्वात् । विभिन्नप्रमाणव्यु
वहारप्रयोजकत्वात् । ननूपनयहेतुतावादिनां तज्जन्यज्ञाने तज्जन्यतावच्छेदकधर्मस्वीकार आवश्यकः । स च लाघवाज्जातिरूप एवेति प्रमावै
जात्यं दुर्वारमित्यत आह नचेति । अत्र प्रमावैजात्यमिति । उपनीतभानेप्रत्यक्षव्यावृत्ता जातिरित्यर्थः । संभवतीति शेषः । युक्तिसत्वे योग्याया
मपिव्यक्तौ व्यंजकविरहेणोपपद्यमानो जात्यनुपलंभोन जातिबाधकः । अन्यथा संयोगादौ क्रियाजन्यतावच्छेदकजातेरपिविलयप्रसंगा
दित्याशंक्योपनयस्य जात्यंतराव्यवस्थाकत्वं व्यवस्थापयन्न युक्त्यभावमेव बाधकं दर्शयति मानाभावादित्यादिना । विशेषणज्ञानत्वेनेति ।
उपयोगितयेत्यग्रिमेणान्वयः । तथा चाविशिष्टज्ञानत्वमेव तज्जन्यतावच्छेदकं न तु जात्यंतरमिति भावः । उपनीतविशेष्यकमानसानु

८२

रोधेनकस्यकारणत्वांतरनिरूपितकार्यतावच्छेदकतयाजात्यंतरसिद्धेरावश्यकत्वेत्याशंक्याहसन्निकर्षविषयेति॰तथाचप्रत्यक्षत्वं
तज्जन्यतावच्छेदकमितिभावः॥ननुसंयोगत्वानात्मसाधारणंसन्निकर्षत्वमनुगतंतेनतिप्रसक्तंउर्वचमितिविशिष्यैवहेतुतावाच्या॰तथा
चज्ञानजन्यतावच्छेदकंयदिप्रत्यक्षत्वमात्रमुच्यते॰तदालौकिकादिप्रत्यक्षेव्यभिचारइतिसंयोगाद्यजन्यप्रत्यक्षत्वमेवतथावाच्यं॰ए
वंचसंयोगाद्यजन्यत्वानिवेशप्रयुक्तलाघवेनवैजात्यसिद्धिर्दुर्वारेत्यतआहातएवेति॰उपनयस्यजातिविशेषावच्छिन्नजनकत्वादेवेत्यर्थः॥
वद्घघटोत्पत्तिज्ञानत्वस्य॰सएवायंचैत्रइत्यादिका॰आभ्यंतरप्रत्यभिज्ञा॰सएवाहमित्यादिरूपा॰आदिपदाभ्यांज्ञानादिविषयादिपरिग्रहः॥यथा
योगमन्वयः॥अन्यथेति॰प्रत्यक्षाभिन्नत्वानितयास्वीकृतायाःस्वादृशाजातिव्यक्तेःप्रत्यभिज्ञाद्यनुरोधेनप्रत्यक्षसाधारण्यस्वीकारइत्यर्थः॥जाति
संकरेति॰किंचिद्विषयेचक्षुःसंयोगादिजन्यतयातत्रचाक्षुषत्वादेरावश्यकत्वात्॰तेनचसममुपनयजन्यतावच्छेदकजातेर्व्याप्यव्याप
कभावासंभवादितिभावः॥आत्मेरनांशिकतयाविशेष्यीभूततत्तद्विषयकज्ञानस्यप्रत्यभिज्ञात्वेव्यभिचारप्रसंगाच्चेत्यपिबोध्यं॰तत्तेदंत्वविशि
ष्टादिविषयकंतत्रज्ञानद्वयमेवभेदाग्रहसहकृतंविशिष्टव्यवहारादिनिमित्तंनत्वेकंज्ञानमतोनजातिसंकरादिप्रसंगइत्यतआहज्ञान
द्वयेति॰स्थैर्यमात्रमिति॰तस्यपूर्वगृहीतानुभूयमानयोरभेदस्यप्रत्यभिज्ञैकमानकत्वादितिभावः॥अनुमानादपिकुत्रचित्स्थैर्यसिद्धिसंभ

पराo भाo
९०
90 स्या

वा दाहव्यवस्थापितं चेति· अन्यथाख्याताविति शेषः। प्रत्यक्षसामग्र्यसमवहिततज्ज्ञानजन्यतावच्छेदकवैजात्यं न प्रत्यभिज्ञादाविति न संक
रप्रसंग इत्याशंकते नचेति· अजनकत्वादिति· प्रत्यभिज्ञानादौ तत्तादिभानार्थं संयोगाद्यजन्यप्रत्यक्षे ज्ञानस्य स्वतंत्रहेतुताया आवश्य
कत्वान्न तएव सर्वांशोपनीतभानस्याप्युपपत्तेः। उक्तरूपेण हेतुत्वे मानाभावादित्यभिप्रायः। ननु तदानीमिंद्रियसंयोगादिघटित
प्रत्यक्षसामग्र्या असंभवात् सर्वांशोपनीतभाने प्रत्यक्षत्वं न संभवतीति यज्जातीयप्रमासामग्रीविरह इत्यादिव्याप्तिबलात्तदभावे
जातिप्रसक्तिरुर्वरितैव न च तादृशव्याप्तौ मानाभावः। तादृशोपनीतभाने प्रत्यक्षत्वासंभवे तत्रोपनायकज्ञानस्य स्वतंत्रहेतुताया आवश्यक
त्वात्· तज्जन्यतावच्छेदकधर्मं विना तदनुपपत्तेरेव मानत्वात्· ज्ञानस्य जनकतायामेव प्रत्यक्षादिसामग्र्यसमवधानमवच्छेदकं भवतु त
त्सहकारित्वेऽन्यदेतदित्याह। असिद्धेश्चेति· उपनीतभानस्य तत्प्रत्यक्षसामग्र्यभावस्यैवासिद्धेः। असिद्धिमेव विवृणोति उपनयेति· लौ
किकसंनिकर्षस्य विषयिताविशेषावच्छिन्नप्रत्यक्षजनकतयोपनीतभाने तादृशविषयताविशेषानभ्युपगमेन न व्यभिचार इति भा
वः। न चांशिकोपनीतभाने उपनीतस्य प्रकारतयैव भानोपगमाद्विशेष्यताज्ञानविधयैव तत्रोपनयज्ञानस्य हेतुत्वात्· सर्वांशोपनीतभाने
जातिविशेषस्यैव तज्जन्यतावच्छेदकतया कल्पनमुचितं· अलौकिकप्रत्यक्षत्वस्य गुरुत्वात्· तथा च प्रत्यक्षत्वं तत्र निर्युक्तिकमिति वाच्यं· मु

रभिचंदनमित्याद्यौ मानससर्वांशोपनीतभाने विशेष्यस्य चंदनादेस्तादात्म्यसंबंधेन स्वांशे प्रकारतायाअभ्युपगमेन विशिष्टबुद्धौ विशेषणज्ञानहे
तुतयैव निर्वाहादुपनीतभाने उपनायकज्ञानस्य स्वतंत्रहेतुताया अकल्पनात्ः सिध्यतु वा सर्वांशोपनीतभाने उपनयजन्यतावच्छेदकतया जाति
विशेषः सोपि प्रत्यक्षत्वव्याप्य एव ननु लाघवरूप इति नोपनयस्य प्रमाणांतरता ः न च तादृशज्ञाने प्रत्यक्षत्वमप्रामाणिकं ः प्रत्यक्षत्वादन्यस्या अ
नुभवत्वव्याप्य जातेरप्रामाणिकतया तत्प्रकारकज्ञानत्वस्य स्मृतिसाधारण्येन व्यभिचारात् ः प्रत्यक्षत्वस्यैव विशेषणज्ञानादिजन्यतावच्छेदकत
यातत्र तत्प्रत्यक्षत्वानुपगमे तस्य विशेषणज्ञानजन्यत्वानुपपत्तेः। न चोपनयविधये वतत्र विशेषणज्ञानस्यापेक्षणीयतया विशिष्टप्रत्यक्षत्वा
वच्छिन्नाया विशेषणधीजन्यतायास्तत्रासत्वेपि न क्षतिरिति वाच्यं ः स्वरूपतो घटत्वादिप्रकारकोपनीतभाने घटत्वादिविषयकज्ञानस्योपनाय
कविधयापेक्षायामपि स्वरूपतस्तज्ज्ञानपर्यंतानपेक्षायां जातित्वादिना घटत्वादिज्ञानात् घट इत्येतादृशोपनीतभानापत्तेः स्वरूपतस्तद्वि
षयकज्ञानजन्यतावच्छेदकस्य स्वरूपतस्तत्प्रकारकप्रत्यक्षत्वस्य स्वरूपतस्तत्प्रकारकोपनीतभानसाधारणतयाआवश्यकत्वात् ः अथ
स्वरूपतो घटत्वादिविषयकं यत्र निर्विकल्पकं जातित्वादिना घटत्वादिज्ञानं च तत्र स्वरूपतो घटत्वादिप्रकारकोपनीतभानवारणाय तादृ
शोपनीतभाने स्वरूपतस्तत्प्रकारकज्ञानहेतुत्वमावश्यकं ः तथा च तस्य प्रत्यक्षसाधारणविशेषणज्ञानजन्यतावच्छेदकानाक्रांतत्वेपि न क्ष

परा०भा०
९१

91

तिः। नच तादृशस्थले तथाविधमुपनीतभानमिष्टमेवेति वाच्यं। येन रूपेण यस्य ज्ञानं तेनैव रूपेण तस्योपनयो न तु तद्विशेषितस्येति नियमादिति चेत्
हि। स्वरूपतस्तत्प्रकारकोपनयस्यापि स्वरूपतस्तत्प्रकारकालौकिकप्रत्यक्षत्वमेव जन्यतावच्छेदकं वाच्यं। न तु सर्वांशोपनीतभानवृत्ति वैजात्यं। तथा
सत्सु क्वचित्स्थले घट इत्याकारकचाक्षुषाद्युपनीतभानापत्तेः। तथा च सर्वांशोपनीतभानस्यापि तादृशोपनयजन्यतावच्छेदकाक्रान्तत्वनिर्वाहा
यैव तत्र प्रत्यक्षत्वस्वीकार आवश्यकः। उक्तनियमेन रूपेणेत्यादिनियमो निर्विकल्पकस्यानुपनायकत्वे। निर्विकल्पकस्योपनायकतामं
गीकुर्वतां च न तादृशो नियमः क्वचित्स्थले दर्शितोपनीतभानमिष्टमेवेति कृतं पल्लवितेन। किंचिदंशे तत्प्रकारकविशेषणज्ञानं स्वतन्त्रविशे
षणज्ञानमित्याशयेन शंकते न चैवमिति। धारावाहिकोच्छेदश्चेति। विशिष्टबुद्धिधारान्तःपातितृतीयादिविशिष्टबुद्ध्यनुपपत्तिरित्यर्थः। तत्स्वरूपं नि
र्विकल्पकात्मकस्य विशेषणज्ञानस्याविनाशात्। विशिष्टबुद्धिरूपस्य तस्य विशेषणप्रकारकत्वया स्वातन्त्र्यविरहादिति भावः। समा
धत्ते इतरमात्रेति। तत्तदितरोभयांशे तत्प्रकारकज्ञानात् तदंशे तद्विशिष्टज्ञानोत्पत्तये मात्रपदं। तेन यद्धर्मिणि यद्विशिष्टज्ञानं फलं तद्धर्म्यंशे
तदप्रकारकं यत्तत्प्रकारकं तदन्यतद्विषयकोपस्थितेरित्यर्थः। यत्तु तदितरविशेष्यतानिरूपितप्रकारत्वान्यतद्विषयताकोपस्थितेरित्येवार्थः
विशेष्यभेदेन प्रकारताभेदात् उभयविशेष्यकविशिष्टबुद्धिसंग्रहादिति तन्न। घटो पटो इत्यादिसमूहालम्बनं न विलक्षणे घटपटौ द्वौ इत्यादि

९१

ज्ञाने उभयाद्यंशे एकदेवह्नित्वादिविशेषणमवगाहमाने विशेष्यभेदे वह्नित्वादिप्रकारताया अभिन्नतया घटादीतरपटादिविशेष्यतानिरूपितत्वेन तज्ज्ञानस्य
घटो द्वो इत्यादिज्ञानान्तराजनकत्वप्रसंगात्. स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वमभ्युपेत्य संशयार्थस्वीकार्येण स्वतन्त्रवह्निस्मरणेन परामर्शोत्तरं पक्षे
वह्न्युपनीतभाननिर्वाहेऽपरितोषबीजं दर्शयन् विशेषणज्ञानहेतुतायाः स्वातन्त्र्यप्रवेशे युक्तिविरहमप्रदर्शकं न चेत्यादिमूलमवतारयति कोटीति। संशयेनोन्न
शादित्यग्रिमेणान्वयः। स्मरणानाशेऽपि संशयात्मकाविशेषणज्ञानादेव निश्चयोऽभविष्यतीत्याशंक्याह तस्य चेति। व्याप्तिस्मरणादिनेत्यस्य परामर्शार्थमुप
गंतव्येनेत्यादिः। व्याप्तिस्मरणानंतरं पक्षधर्मताज्ञानकाले विशिष्टज्ञानकाले वा पुनः संशयो भविष्यतीति ततो निश्चयस्त्याशंक्याह विशेषदर्शनेति। वि
शेषदर्शनं व्याप्यत्वग्रहीतस्य पक्षे निश्चयः। संशयायोगात् इति। तदभावस्य कार्यसहभावेन संशयहेतुत्वादिति भावः। यद्यपि परामर्शानंतरं वह्नि
रित्याकारकं स्मरणं कल्पयित्वा पक्षे उपनीतवह्निनिश्चयः शक्योपपादनः। तथापि तादृशाकारणतायाः प्रामाणिकत्व एव तत्कल्पनमुचितं तदेवने
तिवक्तुगतिमनुसृत्य तादृशाकारणत्वं मूलकृता निराकृतमिति भावः। मूलेन चेति नवेत्यर्थः। उक्तकारणतायां युक्तिसत्वे स्वातंत्र्यस्याधिकस्या
वच्छेदकत्वं गौरवेणाऽपवादमिति युक्तिं शंकते नैन चैवमिति। दीधितौ। एवं विशेषणज्ञानहेतुतायां स्वातंत्र्यानिवेशो भावस्य घटादेः ग्रहापत्तिः
भूतलं घटाभाववदिति निश्चयकाले भूतलादौ ग्रहापत्तिः। परिहरति अभावग्राहकेति। वत्त्वस्येति। तुल्यबलसामग्रीदशायां संशयोत्पत्त्या

पश०ग०

९२ ति

92

इष्टापत्तिरेवेति भावः। न च तादृशसामग्र्याः प्रतिबंधकत्वमप्रामाणिकमिति शंक्यं· स्वतंत्रविशेषणज्ञानसत्वे कदाचित्तथाविधनिश्चयकाले घटा
दिग्रहापत्तेः। कस्यचित्समाधानमुपन्यस्यति· अभावेति· उक्तक्रमेणैवोपपत्तौ अभावाविशेषणत्वप्रवेशे गौरवमन्याय्यं· तथासति वह्न्यभाववद्वृ
त्तित्वरूपव्याप्तिघटकतया वह्निविषयकज्ञानादपि वह्न्युपनीतभानानिर्वाहश्चास्य रसबीजं· विशिष्टबुद्धिसामान्यहेतुतायां स्वातंत्र्यनिवेशः
स्वतंत्रे तु विशेषणज्ञानं विनानुमितिमंगीकुर्वाणस्य शंकास्पदमेव नेति प्रत्यक्षत्वं कार्यतावच्छेदकोनिवेश्य कारणत्वांतरं चाति निर्युक्तिक
मित्याह वस्तुतस्त्विति· मानाभावादिति· अथ ज्ञानत्वस्य स्मरणेश्वरज्ञानवृत्तितयानुभवत्वस्य चेश्वरज्ञानवृत्तितया जन्यतावच्छेद
कत्वासंभवात् तद्व्यावृत्तं विशिष्टविषयकविजातीयप्रत्यक्षत्वमेव विशेषणधीजन्यतावच्छेदकं वाच्यमिति कथं मानाभावादितिचे
न्न· अनुभवत्वजातेरीश्वरज्ञानवृत्तित्वे मानाभावात्· अनुमितिसाधारणविशिष्टानुभवत्वेनैव विशेषणधीजन्यत्वोपगमात्· ९२
अन्यथानुमितौ कारणत्वांतरकल्पनापत्तेः। प्रत्यक्षत्वस्यापीश्वरज्ञानवृत्तित्वे मानाभावान्न संकरप्रसंगः। न च भगवज्ज्ञाने प्रत्यक्षत्वा
नंगीकारे तस्य जन्यमात्रं प्रत्युपादानगोचरलौकिकप्रत्यक्षत्वेन हेतुत्वानुपपत्तिरिति वाच्यं· उपादानप्रत्यक्षहेतुतायां लौकिकविषय
तायाः प्रत्यासत्तित्वावश्यकत्वेन ज्ञानत्वस्यावच्छेदकत्वसंभवात्· भगवज्ज्ञाने लौकिकप्रत्यक्षत्वानंगीकारे क्षतिविरहात्· लौकिकविषयता

याः प्रत्यक्षत्वमात्र निरूपितत्वेमानाभावादीश्वरज्ञाने प्रत्यक्षव्यवहारस्य लौकिकविषयताकत्वनिबंधनत्वेनौपचारिकत्वात्· ननु तदृत्यादिमूलमयु
क्तं· तथाहि· यो यत्र विशिष्टे साध्ये हि नियमे विशिष्टेस्य तन्मात्रवृत्तिधर्मप्रकारेणेति नार्थः। किंतु फलीभूतग्रहधर्मितावच्छेदकप्रकारेणैवेत्येवं· एवं
च पर्वतीयधूमत्वादिना व्याप्यग्रहेपि धूमत्वेन पर्वतीयधूमे सामान्यलक्षणया व्याप्तिग्रहात् वह्निव्याप्यधूमवान्पर्वत इति परामर्शो नानुपपन्न
इत्याशंक्योक्तनियमे बाधकांतरमाह वस्तुत इति· यत्र क्वचिदित्यादि· फलीभूतज्ञानाविषयधर्मिमात्रस्येत्यर्थः। धर्मिणि· फलीभूतग्रहविष
यधर्मिण्यास्त्यर्थः। संशयादिसाधारणानिश्चयपरिग्रहः। ननु अपूर्वधर्मिणि संशय एव स्वीक्रियते न तूपनीतधर्मनिश्चयः। यत्र संशयस्तत्रै
व सति व्याप्यदर्शने निश्चयोनुभूयते सत्त्वानु मानिक एव व्याप्यदर्शनस्यास्माकमनुमितिहेतुत्वादिति निश्चयात्मकोपनीतभाने कुत्रचि
त नियमो निराबाध एवेति कदाचित्तदृशा इति शंकायां तादृशसामग्र्याः कोट्यंतरभासकसामग्र्याः समवधानकाले संशयात्मकतत्कोटि
विशिष्टधीर्जन्यते तादृशसामग्र्यास्तु समया विपरीतकोटिभासकसामग्र्या निश्चयोनुभवसिद्ध तदा उत्पद्यतेवः। विपरीतकोटिभा
नसामग्र्याः विगमश्च विशेषदर्शनादिर्वा तत्कोट्यस्मरणादेरिति· एककोटिमात्रस्मरणे व्याप्यदर्शनं विनाप्येककोटिनिश्चयोत्पत्त्यानोक्त
नियमो निश्चयमादायापि संभवतीत्याह इयांस्त्विति· तु रवधारणे· तथा चैतावानेव संशयनिश्चययोरुत्पत्तौ विशेष इत्यर्थः। एतेनापूर्वध

प॰रा॰ग॰
८२

93

र्मिविषयकसंशयादौ व्यभिचारस्य दुर्वारत्वेन· व्याप्तिमनुमायेति· तथा च पर्वतीयधूमे विशिष्य व्याप्तिग्रहीतायां व्याप्तेस्तत्रोपनीतभानानभ्युप
गमादुक्तनियमो दुर्वार एवेति भावः। सर्वत्र व्याप्त्यनुमितिरपि न संभवतीति मूलोक्तं दूषणं दर्शितरीत्या उक्तदूरमित्याह धूमत्वत्वेति· व्याप्ति
व्याप्यत्वग्रह इति· व्याप्तिव्याप्यत्वानिश्चयस्य लक्ष्यत्वार्थः। व्याप्यतावच्छेदकनिश्चयं विना व्याप्तेर्दुर्निश्चेयत्वादिति भावः। वह्न्यनुमितीति·
व्याप्त्यनुमानासंभवादिति भावः। एतेन· दर्शितसंशयाद्यनुपपत्त्योक्तनियमस्यैव तत्तद्धर्मशालिस्य नियमान्तरस्याप्यनभ्युपगमेन· यद्धर्मा
वच्छेदेनेति· पर्वतीयधूमे विशिष्य व्याप्तिग्रहेऽपि धूमत्वावच्छेदेन व्याप्तेर्ग्रहान्तविशिष्टपरामर्शानुपपत्तिरिति भावः। अवच्छेदकधर्मनि
श्चयाधीनोपनीतभानमादाय नियमोपगमात् दर्शितसंशयादिव्यभिचारोऽपि शक्यते वारयितुमित्याशंक्याप्रयोजकतामप्याह मानाभा
वादिति· अवच्छेदकधर्मनिश्चयाधीनापूर्वधर्मितावच्छेदकविशिष्टविषयकनिश्चये व्यभिचारस्वरूपं बाधकमप्याह चंदनत्वेनेति· सौर
भादेर्बुद्धावित्यग्रिमेणान्वयः। व्याप्तिप्रकारेणा चंदनत्वादेरग्रहान्न तत्र सौरभानुमितिसंभव इति भावः। ननु तद्धर्मविशिष्टस्य तज्ज्ञासत्
इत्यस्य तदन्यधर्मविशिष्टेन भासत इति नार्थः। किंतु तद्धर्मविशिष्टे भासत इत्येव· एवं चोक्तस्य तत्वे इदं चंदनं सुरभीत्येवोपनीतभानमुपेयत इत्यतो
न व्यभिचार इत्यत आह यदि वेति· इत्येव धीरस्त्विति· उपनीतभ्रमस्यैकस्या एतादृशधीरेवानुमितिकार्यकारिणी भवतु इत्यर्थः। ननु लिंगोप

धानमते बाधकसत्वान्न तादृशोपनीतभानस्वीकारसंभव इत्यत आह न हीति॰ साधकविरहादिति॰ उपनीतभानोपगंतॄणां दर्शितनियमएवलिं
गोपधाने साधक इति भावः। व्यभिचारादर्शनसहकृतसहचारदर्शनरूपव्याप्तिग्राहकसंभवान्महानसीयधूम इव पक्षीयधूमेपि सन्निकृष्टेव्या
प्तेर्लौकिकप्रत्यक्षमेवस्वीक्रियते न तदुपनीतभानमिति कथं योयत्रेत्यादिनियमे विशिष्टपरामर्शानुपपत्तिरित्याशंकां निरस्यति॰ मूलेन
चेत्यादिना॰ हेतुसाध्योभयेसौर्यक्षात्कारस्य व्याप्तिप्रत्यक्षापेक्षणीयतां मूलोक्तामुपपादयति दीधितौ संबंधीति॰ मीमांसकमते सत्संबंधिक
वस्तुव्यवहार एव संबंधिप्रत्यक्षहेतुतानतु तत्र तत्प्रत्यक्षे। तस्त्वपैवेति॰ नैयायिकेनैवेसर्थः। तन्मतत्वादित्यस्य यत्किंचिदेकसंबंधिग्रहविरोधीन्द्रिया
सन्निकर्षदोषसमवधानादिदशायां प्रत्यक्षवारणायेत्यादिः। ननु संबंधिद्वयप्रत्यक्षस्य हेतुत्वेपि यत्र संबंधिप्रत्यक्षोत्पत्तिक्षणे तत्सामग्रीविगम
स्तत्र तद्द्वितीयतृतीयक्षणयोः संयोगादिप्रत्यक्षापत्तिः। संबंधस्य लौकिकप्रत्यक्षानात्मकस्य संयोगादेर्लौकिकप्रत्यक्षस्यानुभवविरुद्धत्वमे
वापत्तेर योगादिति संबंधिग्राहकसामग्र्याहेतुतायाआवश्यकत्वे संबंधिसाक्षात्कारहेतुतायां मानाभाव इत्यपरितोषात् संबंधिप्रत्यक्षसाम
ग्र्यभावस्यैव प्रकृते व्याप्तिप्रत्यक्षविरोधितामाह तदनादरेपीति॰ साध्यघटितमूलेति किंत्यनेन व्याप्तिप्रत्यक्षे साध्यभानानुरोधेनापि साध्यस
न्निकर्षापेक्षेतिसूचितं॰ भ्रमात्मकविशिष्टज्ञाने विशेष्यविशेषणसंबंधस्यानपेक्षणात् भ्रमात्योपयोगितया तत्परिगणनं संगमयति वि

विशेषणेति· तदंशे· विशेषणविशेष्यसंबंधांशे· न तु विशेषणांशे· संयोगेन द्रव्यविशेष्यकस्थले विशेष्यविशेषणसंयोगस्य संयोगसंबं
धेन विशेषणप्रमात्वनिर्वाहकत्वेपि इंद्रियसंयुक्तविशेषणसंयोगस्य लौकिकसन्निकर्षभिन्नत्वेन तथा विशेषणांशे लौकिकत्वानुपयो
गित्वेन लौकिकत्वे वा इत्यत्रैव तदन्वयानुपपत्तेः। संबंधांशे प्रमात्वस्य संबंध्यघटितं प्रमात्वं· अत्र च विशेषणविशेष्यसंबंधस्य तदानीमविद्य
मानत्वेपि इदं द्रव्यमासीदिति भ्रमोत्पत्तेरित्यपरितोषात्कल्पांतरमाह लौकिकत्वे वेति· इदमुपयुज्यत इत्यग्रिमेणान्वयः। लौकिकत्वमपि सं
बंधांशे बोध्यं· विशेष्यविशेषणसंबंधस्य संबंधे विशेष्यघटितलौकिकसंनिकर्षसंपादकतया लौकिकत्वोपयोगिता· अयमेवात्र दृशा इत्यस्य
विशेषणांशादित्येवार्थः। विशेष्यविशेषणसंबंधे विशेषणांशे लौकिकत्वोपयोगिताकथनं समवायेन गुणादिविशिष्टेषु अभिप्रायेण·
द्वितीयकल्पे विशेष्यपदं च सन्निकृष्टधर्मिमात्रपरं· अतोनुभूयमानारोपे विशेष्यविशेषणसंबंधासत्वेपि विशेषणांशे लौकिकत्वाद
सिद्धेर्नावकाशः। लौकिकपदस्य प्रमात्वघटकलौकिकविषयतापरतया यथाश्रुतमेव वा समर्थनीयं· विशेषदर्शनस्य स्वमते निश्च
यविशेषं प्रति हेतुतयोपयोगिताप्रकारमाह विशेषदर्शनं चेति· क्वचिदिति· विपरीतकोटिभासकत उपस्थित्यादिकालीननिश्चय इत्यर्थः।
अत्राप्युपयुज्यत इति संबध्यते· क्वचिदिति· प्रकारांतरेण यत्र न विशेषणाज्ञानं तत्र सविशिष्टज्ञान इत्यर्थः। दर्शनत्वेन संतं स्मारकता

यांहेतुः । स्मारकतयोपयुज्यत इति संबंधः । एवं च विशिष्टप्रत्यक्षनिर्वाहकानामेव कीर्तनमिदं न तु तत्कारणमात्रस्यैवेति भावः । वि
शेषणज्ञानस्यैव विशेषणभासकसन्निकर्षत्वात् सन्निकर्षांतरकथनं किमर्थमित्यत आह विशेषणस्य चेति । तद्दशे । विशेषणांशे
लौकिकतायामिति । इत्थं च मूले सन्निकर्षपदं लौकिकसन्निकर्षपरं बोध्यं । व्याप्तिप्रविष्टचरमांशस्य व्याप्यैक्यमते धूमत्वरूपस्य लौकिक
सन्निकर्षाद्विभानात् प्रकृतव्याप्तिविशिष्टप्रत्यक्षसामग्रीघटकत्वमपि विशेषणालौकिकसन्निकर्षस्येत्यविरोधः । एकैव हीति मू
ले परमतसिद्धं सामान्यप्रत्यासत्त्यभावमभ्युपेत्य । सामान्यलक्षणासत्त्वे व्याप्यैक्यस्यानुपयोगितां दीधितिकृदाह । वस्तुत इति । पर
मार्थत इत्यर्थः । एतेन यदि सामान्यप्रत्यासत्त्यभावोऽभ्युपगम्यते तदा क्षतिरेवेति सूचितं । न च योग्यत्वादिनियमोपगमेनैव पर्वती
यधूमे व्याप्तिविशिष्टप्रत्यक्षसामग्रीसंभवतीति । ननु पर्वतवाह्यविशिष्टप्रत्यक्षसामग्रीति विशेषव्युत्पादनं मूलं कथमुपपद्यते । नि
यमानभ्युपगमे ज्ञानसन्निकर्षघटितसामग्र्या उभयत्राविशेषेणाविशेषोक्तेरसंगतत्वात् । तथा च व्याप्तेर्धूमत्वादिरूपत्वे ए
व पक्षीयधूम एव तद्दशस्य लौकिकसन्निकर्षाद्विभानात् धूमत्वांशे वह्निसमानाधिकरणधूमवृत्तित्वस्यैव ज्ञानसन्निकर्ष
ग्राह्यतया तत्र च तथाविधमहानसीयधूमवृत्तित्वस्य तन्मात्रवृत्तिधूमत्वप्रकारेण×त्व×पूर्वं गृहीतत्वाउक्तानियमानिर्वाह

ति॰ ननु व्याप्तेः सामानाधिकरण्यरूपत्वे॰ तथा च व्याप्तेरैक्ये मूलकृतो निर्भरएव ते श्रीदीधितिकृतां व्याप्तिभेदपक्षे तस्याभावाभिधानविरोध इति वा
च्यं॰ मूलकृता स्वतव्याप्तेः पक्षधर्मधूमसत्व एव हेतुतया व्याप्तेरैक्याभिधानात् पक्षतिरिति दीधितिग्रंथे पक्षतिपदस्य पक्षीयधूमे स्वतव्याप्य
सत्वरूपपक्षतिपरतया व्याप्तिनानात्वेऽक्तनियमभंगरूपपक्षतिसत्वेपि तद्रूपथाविरोधात्॰ केचित्तु॰ ननु व्याप्तिभेदेपि सामान्यप्रत्यास
त्त्या सकलव्याप्त्यनुभवात् स्वतव्याप्तेः पक्षवृत्तिधूमे सत्वमुपपद्यत इति कथमेकैव हीत्युक्तं इत्यनुशयस्य च यमेव वक्ष्यमाणत्वादाह वस्तुतइ
ति॰ वस्तुगत्येत्यर्थः। भेदेपीत्यनेनान्वयः। सामान्येतः सामान्यप्रत्यासत्तिबलात्॰ तथैव॰ व्याप्तित्वेनैव॰ तथा च धूमनिष्ठस्य व्यापकवह्नि
सामानाधिकरण्यरूपस्यैव व्याप्तिरिहाभिप्रेता॰ प्रतियोगितावच्छेदकादीनामैक्यात्॰ उपचारादेकपदप्रयोग इति व्याप्तिवादोक्तमेवा
नुसरणीयमिति॰ न च प्रतियोगितावच्छेदकादीनामैक्यस्य किंचित्करतया तद्व्यक्तिपादनमात्रफलस्योपचारस्य वैयर्थ्यमिति वा
च्यं॰ सखंडेपरंपरासंबंधाखंडस्यैव प्रत्यासत्तितया तादृशावह्नित्वादिरूपसामान्यप्रत्यासत्त्या निखिलवह्निमदादिभाने व्याप्तित्वेन
व्याप्तिप्रत्यक्षस्य सकलव्याप्तिविषयकत्वेन लाभाय तमुपचारानुसरणात्॰ अन्यथा जातिलिंगतावादिमते सामान्यलक्षणानुपयो
गरूपदोषस्य स्वमतेपि सत्वादसंगत्यापत्तेः। एवं च सिद्धांतलक्षणे तन्मूलग्रंथसंगतार्थतया वस्तुतइत्यादिफक्किकावर्णनं प्रमाद

जंभितमेवेत्याऽऽह। पक्षवृत्तिधूमासन्निकर्षदशायां धूमत्वरूपव्याप्तेरपि तत्रोपनयेनैव ग्रहस्य स्वीकरणीयतया उक्तनियमसत्वे च तदनुपपत्त्यात
स्यल्लीयमानसविशिष्टपरामर्शानुरोधेनोक्तनियमोऽनुमानप्रामाण्यवादिनापि न स्वीकार्य एवेत्याशयेन सामान्यप्रत्यासत्तिपक्षमालंब्य प्र
र्वपक्षयति नन्विति· निरूप्यतां· निश्चीयतां· पर्वतो वह्निमानित्यादिचाक्षुषसामान्य एव वह्निचक्षुःसंयोगादेर्हेतुतया वह्नेः सन्निकर्षा
दिति मूलस्य संगतिरिति विवृतो मिश्रस्य मतं निराकरोति· नहीति· बहिरिंद्रियेण द्रव्यस्याधेयतया ग्रहे· आधेयत्वविषयित्वावच्छिन्नद्र
व्यविषयताशालिबहिरिंद्रियजन्यज्ञानसामान्ये प्रतियोगितयोपनीतघटादिविषयके घटो नास्तीति चाक्षुषादौ व्यभिचारवारणायाधे
यतयेति· मानसे लघ्व्यहृत्स्वश्व्यादिविषयकस्वात्मज्ञाने व्यभिचारवारणाय बहिरिंद्रियेणेति· गुणादिगोचरचाक्षुषादौ तद्वारणाय द्रव्यस्येति आ
धारत्वाधेयत्वयोरुक्तत्वे विनिवेशत्वाभावे पर्वतो वह्निमानित्यादिज्ञानसंग्रहाय तद्धत्वस्येति· द्रव्याधारत्वस्य वेसर्गः। अत्रापि बहिरिंद्रियेणे
त्यनुषज्यते· तथा चैतन्मते आधारत्वविषयितानिरूपितद्रव्यविषयताशालिबहिरिंद्रियजन्यज्ञानत्वं कार्यतावच्छेदकं· वस्तुतस्तु· त्व
गिंद्रियादिसंयोगात् चाक्षुषाद्यनुत्पत्त्या चक्षुःसंयोगत्वादिनैव हेतुता वाच्या· तथा च चाक्षुषत्वादिकमेव कार्यतावच्छेदकं निवेशनी
यं· ननु बहिरिंद्रियजन्यज्ञानत्वं· इत्याद्यावर्तिः इत्याद्युपनीतं द्रव्यादिमनावगाहिनि तद्विशिष्टविशेषणकाभावचाक्षुषादावि

प॰रा॰ग॰
९६
96

सर्थः। फलायत्तायमाशंक्य निराकरोति कथमिति· अन्यथा· असन्निकृष्टद्रव्यस्य विशेषणांशेप्यभाने मुख्यविशेष्ये वृत्तिनियामकसं
बंधेन साक्षात् द्रव्यप्रकारकत्वं कार्यतावच्छेदकं वक्तव्यमतो विशेषणांशे द्रव्यत्वावगाहिन्युक्तस्थले न व्यभिचार इत्याशंक्य निरा
करोति· न चेति· पक्षधर्मव्याप्तेः प्रकारत्वे परंपरया व्याप्तिघटकवह्नेरपि प्रकारत्वात् तत्र व्यभिचारं गायसाक्षादिति· आधेय
तेयस्य व्याप्तिमाह अभेदारोप इति· स्मर्यमाणरजतस्याभेदेनारोप इत्यर्थः। आधेयतया· वृत्तिनियामकसंबंधेन भूतले घटाभा
व इत्याद्यभावचाक्षुषेपि व्याप्तिर्बोध्या· नन्वेवमयं दंडवानित्यादि विशिष्टे मुख्यविशेष्ये दंडाद्यात्मके तत्ताप्रकारकप्रत्यभिज्ञाने व्यभि
चार इत्यत आह दंडेति· तत्तावद्भेदोभासत इति· न तु तत्तादिसंसर्ग इति शेषः। तावतापि सोयमित्याकारकतानिर्वाहादिति भावः।
मानाभावादिति· ईदृशाकारणतायामित्यादिः। सामान्यप्रत्यासत्त्यजन्यत्वस्य कार्यतावच्छेदके निवेशे सामान्यप्रत्यासत्तिज
न्यप्रत्यक्षे न व्यभिचार इत्यत आह तत्रेति· भानसंभवात्· भाने युक्तिसंभवात्· तदनभ्युपगमे तत्तासंसर्गाभावसंशयानि
वृत्त्यनुपपत्तेरिति भावः। यदि तत्तावद्भेदग्रहोपि तादृशसंशयादिविरोधी पयतेन दाहप्रकृतेपीति· अनुमितिस्थलेपीत्यर्थः। अभेदग्रहेण·
अभेदोपनीतभानेन· कृतार्थत्वात्· वह्न्यभावसंशयानिवृत्त्यानुपपत्तेः। प्रकारांतरेण प्रत्यभिज्ञायां व्यभिचारोद्धारं निरस्यति· एतेन

वार

९६

नेति · व्यभिचारस्य दुर्वारत्वेनातत्प्रकारानुपनीतत्वं · तत्तात्वेनाभासमानत्वं · तच्छब्देनाव्यवहृियमाणत्वं वा · आद्ये · तत्तात्वानवच्छिन्नप्रवृत्ति
नियामकसंबंधावच्छिन्नइच्छाविषयताविषयताविशिष्टचाक्षुषत्वादिकं कार्यतावच्छेदकं · द्वितीये तच्छब्दप्रयोगजनकत्वसहितं
तादृशसंसर्गावच्छिन्नइच्छाविषयताविशिष्टमिति बोध्यं · अयोग्यस्यैवासंनिकृष्टस्याप्यनुपनीतस्य चाक्षुषादौ भानमविशेषणदुरप
न्हवमिति सत्यपि तु चैत्रपदेत्यादिदृष्टांताभिधानं · दंडप्रयमसीदिति ज्ञाने व्यभिचारस्य अनुपनीतत्वानवगाहित्वविशेषणेनशक्यवारणत
यातदनवगाहिनियतत्वे तु नीतदंडादिज्ञाने व्यभिचारमाहायं दंडीति · निरुक्तकार्यतावच्छेदकयोराद्यं दूषयति तत्तात्वस्येति · अतिरिक्तस्येति ·
दंडत्वविशेष्यत्वाद्यतिरिक्तस्येत्यर्थः । तथा च तदनवच्छिन्नइच्छाप्रकारतैवाप्रसिद्धेति भावः । न चैतत्कार्यतावच्छेदकत्वमन्यद्वा किंचिदादृशांवह्न्या
दिनिष्ठं तत्तात्वं न तु वह्नित्वादिकमिति वाच्यं · तद्ग्रहेपि वह्नित्वादिनावह्न्यादिमत्त्वग्रहे सोयमिति व्यवहारात् · द्वितीयपक्षे जनकत्वं · फलानुपधाय
कत्वं स्वरूपायोग्यत्वं वा · तत्राद्यं दूषयति · तच्छब्देनेति · निमित्तांतरविरहेति · प्रयोगेच्छादिविरहेत्यर्थः । तथा च तादृशधर्मस्य कार्यतावच्छेदकत्वे
यत्र जातेपि घस्याभिज्ञाने निमित्तांतरविरहान्न तच्छब्दप्रयोगस्तत्र व्यभिचार इति भावः · द्वितीयं दूषयति तज्जनेति · प्रकृतेपि · वह्निमानित्या
दिज्ञानेपि · इष्टत्वादिति · तच्छब्दस्य वह्नित्वावच्छिन्नवदर्थकतया व्यवहर्तव्यज्ञानाविषयात्प्रयोगे वह्नित्वादिविशिष्टप्रकारकज्ञानस्यैव

पराoगo
९७
97

स्वरूपयोग्यत्वादितिभावः। तथा च तद्योग्यद्रव्यत्वादिप्रकारकज्ञानमेवाप्रसिद्धमितिभावः। अत एव। विधमाभदंडाद्यात्मकत्वेनावगाहिप्रत्यभि
ज्ञायां व्यभिचारादेवं। चक्षुराद्युपनीतप्रभादिगोचरभूतलस्पार्शनादौ मानसादौ वाद्यविषयकस्वप्नाद्यनुभवे च व्यभिचारवारणाय तदिंद्रियग्राह्ये
ति। तदिंद्रियासाधारणकारणकलौकिकप्रत्यक्षयोग्यार्थकं। घटस्पार्शनादौ चक्षुरादिसंयोगस्य व्यभिचारवारणाय तेनेति। त्वगादिसंयोगात्
घटादेश्चाक्षुषादिवारणाय तत्तत्संयोग इति। एतन्मते आधेयत्वे कार्यप्रतिरादिश्यनिवेशादन्यत्रापि व्यभिचारं दर्शयति नयमादिनेति। उक्त
कार्यकारणभावानभ्युपगमेऽनिष्टमाशंकते अथेति। मानसनिश्चयस्येष्टत्वात्। अन्यथोक्तकार्यकारणभावेनापि तद्वारणासंभवात्। नाय
मिति। संशयस्यानुभवसिद्धतया निश्चयपरेति। निश्चयानुत्पत्तिप्रयोजकाभिधानेनोत्तरयति। क्वचिदित्यादि। तत्सहचरितेति। दंडसहचरितेत्यर्थः।
अदर्शनादित्यंतं तत्स्मरणे हेतुः। तत्स्मरणादिति। तथा च विशेषणज्ञानाभावादेव तत्प्रकारकनिश्चयाभाव इत्यर्थः। साधारणधर्मदर्शनादिना। को
टिद्वयसहचरितधर्मदर्शनादिना। कोटिद्वयस्मरणमितिशेषः। संशयस्यैव जननादिति। तथा च निश्चयत्वप्रयोजकविपरीतकोटिभानसामग्रीवि
रहस्यासत्त्वान्न निश्चयापत्तिरितिभावः। ननु कोटिद्वयोपस्थितावपि यत्र विशेषदर्शनवशाद्विपरीतकोटिभानसामग्रीविरहः तत्र चैतत्कोटि
मात्रसहचरितधर्मदर्शनात्तत्कोटेरेवोपस्थितिस्तत्र तन्निश्चयोऽदुर्वार इत्यत आह सति च विशेषदर्शनाद्यभावेति। आदिना कोट्यंतरोपस्थिसमा

९७

वस्य विकल्पेन परिग्रहः। संशयनिश्चयसाधारणाद्व्यावृत्तविशिष्टबुद्धिविशेषे इंद्रियसंयोगहेतुतायाः संशयानुपपत्तोक्तिसंभवोपि नेत्याह
युक्तं चैतदिति॰ एततः॰ व्यवहितस्याऽपि दंडादेः मतिविशेषदर्शनादौ उपनयान्निश्चयजनुनं॰ कथमन्यथेत्यनंतरं विशेषादर्शन इति पूरणीयं॰
असौ॰ संशयः॰ तद्विशिष्टबुद्धिः॰ बहिरिंद्रियजन्यविशिष्टबुद्धिः॰ ॥ निश्चयत्वं जन्यतावच्छेदके प्रवेश्यं इत्याशयेन शंकते न तन्निश्चय इति॰ नि
श्चयत्वस्यार्थसमाजग्रस्तत्वेन जन्यतावच्छेदके प्रवेशासंभव इति कथयिष्यन् निश्चयत्वाभावस्य व्यभिचारे किं चिन्त्यकरत्वमाह किं तेने
ति॰ ननु व्यभिचारवारणान्यथानुपपत्त्या आर्थसमाजग्रस्तस्यापि कार्यतावच्छेदकत्वमुपेतव्यमित्यत आह स्तु वेति॰ तथा॰ नि
श्चयत्वस्यापि जन्यतावच्छेदकत्वस्वीकारः। दर्शनात्प्रत्ययात्रासमस्ततया विशेषस्येत्यनुषज्यते॰ संभवादुत्पत्तेः। उक्तकार्यकारणभावस्य
निर्युक्तिकत्वादिति शेषः। यद्यपि प्रागेव निश्चयस्येष्टत्वमुक्तं तथापि तदा युक्त्यनभिधानादनुभवकलहापत्तिर्वृत्तिः। इदानीं यादृशासाम त्रि
ग्रीतो विशेषादर्शनदशायां संशयस्तत एव विशेषदर्शनकाले निश्चय इत्यनुभवसिद्धं नियममवलंब्य निश्चयोत्पत्तिर्द्रढीकृता॰ अभ्युपे
त्याह मास्त्विति॰ तत्र॰ मानसे॰ तादृशनियमस्य॰ चक्षुरादीन्द्रियसंयोगापेक्षानियमस्य॰ ज्ञानविशेषः। विजातीयं ज्ञानं॰ तथा च तत्करणतयानु
मानस्य प्रमाणतेति भावः। न च व्याप्यदर्शनानंतरजातालौकिकप्रत्यक्षत्वं तादृशानुव्यवसायविषय इति वाच्यं॰ साध्यनिर्णयाधिकतरकाली

नतादृशप्रत्यक्षानंतरं तादृशानुव्यवसायानुदयात् । न च साध्यनिश्चयाद्यनुत्तरत्वमपि निवेशनीयमिति वाच्यं · तदनुपस्थितावपि तथाविधानु
व्यवसायोदयात् · अस्त्वनुव्यवसायबलादनुमितित्वं जातिः सा प्रत्यक्षत्वव्याप्यैवेति न तत्कारणस्य प्रमाणांतरतेति शंकते मानस इति · अनु
मितौ प्रत्यक्षत्वस्याप्रामाणिकतयानुमितिः प्रत्यक्षविजातीयैवेति तत्करणं प्रमाणांतरमेवेति समाधिस्तु प्रत्यक्षत्वे मानं पृच्छति कुत इति ·
पूर्वपक्षी शाब्दोपमित्योरपि प्रत्यक्षत्वमंगीकुर्वाणोनुभवत्वमेव प्रत्यक्षत्वसाधकमित्युत्तरयति अनुभवत्वादिति · अनुभवत्वप्रत्यक्षत्व
योः समनियतत्वे समनियतजातिद्वयानंगीकारेणानुभवत्वं यदि साक्षात्करोमीत्यनुव्यवसायसाक्षिकजातिस्तदा प्रत्यक्षत्वमेव तादृशसाध्याविशेषद
ति दूषयति किमेवमिति · स्मृत्यन्यज्ञानत्वरूपोपाधिरेवानुभवत्वं प्रत्यक्षत्वसाधकमतो न साध्याविशेष इत्याशंकते स्मृत्यन्यज्ञानत्वमिति · अनु
भवत्वमित्यनुषज्यते · अप्रयोजकत्वादिति · अनुकूलतर्कं विना पक्षेतत्समे व्यभिचारसंदेहस्यापि व्याप्तिधीविरोधित्वादिति भावः । ननु विशे
षणज्ञानादिजन्यतावच्छेदिकाऽनुभवत्वपृथसाधारणी जातिरथ साक्षात्करोमीत्यनुवसाक्षिकं प्रत्यक्षत्वं न त्वनुमित्यादित्रयव्यावृत्ताऽ
न्यापि जातिः प्रामाणिकी · तथा च प्रत्यक्षानुमानयोर्न पृथक्प्रमाणता · न च विशेषणज्ञानजन्यतावच्छेदकजातेरनुमित्यादिसाधारण्ये
मानाभावः विशेषणज्ञानासत्वे परामर्शादिविरहेपि वानुमित्याद्यापत्त्योगादिति वाच्यं · पृथिव्यामितरभेद इत्याकारकाप्रसिद्धसाध्यवि

शेष्यकानुमित्युत्साहकाले साध्यविशेषणकानुमितिवारणाय विशेषणाधीनजन्यतावच्छेदकस्यानुमितिसाधारणतया आवश्यकत्
त्वात्· यदि च पक्षे वा तद्भिन्ने सत्यनुमितिर्विशिष्टवैशिष्ट्यविषयिणीति विशेषणतावच्छेदकप्रकारकधीविरहान्न तस्याः साध्यविशे
ष्यकानुमितिदशायामापत्तिरित्युच्यते तदाप्यनुमितेर्विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकाक्रान्तत्वेनैव प्रत्यक्षानुमित्योः स्मृ
तिव्यावृत्तैकजातीयत्वमावश्यकं· स्मृतिव्यावृत्तजातेरेव तज्जन्यतायामप्यवच्छेदकत्वात्· यदि चान्वयिपरामर्शरूपकारणविरहादेव ना
प्रसिद्धसाध्यकस्थले साध्यतावच्छेदकविशिष्टवैशिष्ट्यानुमितिः स्वतन्त्रसाध्यतावच्छेदकप्रकारकज्ञानदशायामप्यप्रसिद्धसाध्यकव्यतिरेकिप

त

रामर्शात्साध्यविशेष्यिकैवानुमितिरुत्पद्यते· साध्याप्रसिद्धेस्तत्र प्रतिबन्धकत्वानुपगमात्· अथवाऽप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेष्य
कानुमित्यनभ्युपगमे क्षतिविरहात्तादृशव्यतिरेकिपरामर्शात्सर्वत्र विशेष्यविशेषणभावमित्यादिरीत्या साध्यविशेष्यिकैवानुमितिरुत्प
द्यते इत्युच्यते तदापि समानविषयकशाब्दबोधचाक्षुषादिसामग्रीकालेऽनुमितिवारणायानुमितित्वावच्छिन्नं प्रति तादृशसामग्र्याः प्रति
बन्धकत्वं सिद्धान्तिनावश्यं वाच्यं· अनुमितेः प्रत्यक्षविशेषत्वोपगमे मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः हेतुत्व प्रतिबन्धकतयैवोपपत्तौ न
तत्कल्पनमिति लाघवादनुमितेः प्रत्यक्षत्वसिद्धिरित्यस्तूहैवेति· न च कथितशाब्दादिसामग्रीकाले भिन्नविषयकानुमित्सुत्वस्यानुमितेर्मा

परा०ग०
९९
99

नसत्वनयेसमानविषयकमानसत्वमेवमत्प्रतिबध्यतावच्छेदकं वाच्यं· तथा च भिन्नविषयकानुमित्यनुमानसासंग्रह इति वाच्यं· भि
न्नविषयकमानसेच्छानुत्तेजकीकृत भिन्नविषयकमानसस्थले पृथक् प्रतिबंधकताया भवतोऽवश्यकतया समानविषयकमान
ससाधारणप्रतिबध्यतया तदसंग्रहे क्षतिविरहात्· न चानुमित्यनुमानसस्थलीयप्रतिबंधकतायां अनुमितित्वप्रकारकेच्छा
या अतिप्रसंगभयेनानुत्तेजकतयाऽनुमितित्वप्रकारकेच्छानुत्तेजकीकृतस्यानुमितिस्थले पृथक् प्रतिबंधकत्वमुभयोरेवावश्यक
मिति नोक्तलाघवावकाश इति वाच्यं· यादृशविषयकशाब्दादिसामग्रीकालेनुमितित्वप्रकारकेच्छया न कदाप्यनुमितिर्जाता तत्रैव दर्शिति
लाघवसंभवात्· न च तत्र लाघवेपि यत्रानुमितित्वप्रकारकेच्छाबलादनुमितिर्जाता तत्स्थलीयानुमित्यनुमानसानिष्ठप्रतिबध्यता
यामनुमित्यनुमानसत्वमेवावच्छेदकं वाच्यं· अन्यथाऽसत्यां मानसत्वप्रकारकेच्छायां सत्यां च कथितशाब्दादिसामग्र्यांऽनुमिति
त्वप्रकारकेच्छासत्वेप्यनुमित्यनुत्पत्तेरिति गौरवमिति वाच्यं· अनुमित्यनुमानसे सर्वत्र लौकिकसंनिकर्षबलोदात्मत्वभानोप
गमेन लौकिकविषयितासंबंधेनात्मत्वस्यैवानुमितिभिन्नमानसत्वस्थलीयस्य तादृशप्रतिबध्यतावच्छेदकत्वोपगमेनानुमि
तेरुपपादनादिति नोक्ताप्रयोजकत्वशंकेयतोऽनुमितौ प्रत्यक्षत्वस्य बाधकमाह अनुमिताविति· साक्षात्कारित्वग्रहप्रसं

९९

गवारणप्रकारं माशंकते तद्व्यंजकेति· सुरभिचंदनमित्यादिचाक्षुषादेः सौरभादिसाक्षात्कारत्वेनानुव्यवसायवारणाय विशेष्यितासंबंधे
न तत्तद्विषयधर्मितावच्छेदकतापन्नसाक्षात्कारित्वप्रकारकप्रत्यक्षं प्रति स्वरूपसंबंधेन तत्तद्विषयनिष्ठलौकिकसंनिकर्षादिज
न्यत्वस्य हेतुत्वात्· तादृशहेतुमित्यनंतरं न वह्निं साक्षात्करोमीत्याद्यनुव्यवसायापत्तिरित्यर्थः। लौकिकसन्निकर्षादीत्यादिना
दोषविशेषपरिग्रहः। आत्मानुमितावपीति· तस्यात्मनिष्ठमनःसंयोगरूपलौकिकसंनिकर्षादिजन्यत्वस्य· नचैवमात्मोपनी
तभाने भवतामपि न कथं साक्षात्कारित्वग्रहः। अनुमितेरिव तस्यापि आत्ममनोयोगासमवायिकारणकत्वादिति वाच्यं· मानस
त्वावच्छिन्नायाः एवं मनोयोगजन्यतायास्तद्व्यंजकत्वोपगमात्· मानसज्ञाने आत्मलौकिकसंनिकर्षादिवभानात्· चाक्षुषादावेव तस्यो
पनीतभानात्· तत्र च मानसत्वावच्छिन्नजन्यताया अभावात्· अनुमितौ मानसत्वादीनां चानुमितौ तादृश्या अपि जन्यताया अनया
यादिति भावः। ननूक्तलाघवेनानुमितेर्मानसत्वासिद्धेरुक्तातिप्रसंगवारणाय साक्षात्कारित्वग्रहं प्रति अनुमितिभेदस्य का
रणत्वमेकं कल्पनीयं इत्यतः प्रत्यक्षप्रमायेनानुमितौ प्रत्यक्षत्वाभावं व्यवस्थापयति वह्निमिति· यद्यपि वह्निं न साक्षात्करोमी
ति प्रतीतेरात्मनिष्ठो वर्तमानकालावच्छिन्नो वह्निसाक्षात्काराभाव एव विषयः। न त्वात्मनिष्ठवर्त्तमानवह्निज्ञाने साक्षात्का

परा०गु०
१०० प

भावः। स्वरूपतोभासमानसाक्षात्वजातेः पदार्थतावच्छेदिकायाः अभावस्य तादृशशब्देन प्रत्यायनात् तथाप्येकविशेषणविशिष्टा
धिकरणे विशेषणद्वयविशिष्टाभावप्रतीतेस्तद्विशेषणावच्छिन्नतद्विशेषणाभावपर्यवसन्नत्वमिति शब्दविषयकत्ववति ज्ञाने साक्षात्व
रूपविशेषणाभावः प्रकृते पर्यवस्यतीत्याशयेनोक्तं साक्षात्वाभाववेति। ननु सुरभिचंदनमित्यादिचाक्षुषदशायां जातस्य सौरभं न
पश्यामीतिप्रत्ययस्यैवोक्तप्रत्ययस्यापि भ्रमत्वमस्तु इत्यत आह गत्येति। चंदनं पश्यामीत्यादिप्रतीत्या सुरभिचंदनमित्यादिज्ञाने
चाक्षुषत्वादेरावश्यकतया गत्यंतरविरहेण सौरभं न पश्यामीत्यादौ चाक्षुषत्वाद्यभावांशे भ्रमत्वकल्पनमित्यर्थः। अनुमितौ च साक्षात्वा
नुपगमेन साक्षात्करोमीति प्रतीतेः प्रमात्वसंभवात् न तत्परित्यागः धियां प्रमात्वस्यौत्सर्गिकत्वादिति भावः। अत्र नव्याः। सौरभं
न पश्यामि न साक्षात्करोमीत्यादिप्रतीतेः प्रमात्वानुरोधेन लौकिकत्वाख्यो विषयताविशेषः कल्प्यते तद्विशिष्टचाक्षुषत्वं पश्या
मीत्यस्य तद्विशिष्टप्रत्यक्षत्वं साक्षात्करोमीत्यस्य तदभाव एव न पश्यामि न साक्षात्करोमीत्यस्य विषयः। न च तथापि सौरभनिरूपि
ततादृशविषयताविशिष्टचाक्षुषाप्रसिद्ध्या सौरभं न पश्यामीत्यत्रागतिरेवेति वाच्यं। चाक्षुषनिष्ठतादृशविषयितायां सौरभनिरू
पितत्वाभावस्यैव तादृशप्रत्ययविषयत्वोपगमात्। अथ आकाशं न पश्यतीत्यादावपि कथंचित्प्रमात्वमुपपादनीयं। न चातिरि

१००

100

क्तविषयतापसिद्धांतभियानस्वीकरणीयेतिवाच्यं·अतीत्यनुरोधेनतत्कल्पनेऽपसिद्धांतभयस्याविरोधित्वात्·अतएवाभावत्वप्रतियो
गित्वादीनामतिरिक्तपदार्थत्वंग्रंथकृतामनुमतं·नचैवंप्रत्यक्षत्वजातिरेवाप्रामाणिकीस्यात्तत्कार्यस्यलौकिकत्वेनैवोपपादनसंभ
वादितिवाच्यं।विशेषणज्ञानादिजन्यतावच्छेदकतयैवतत्सिद्धेर्विषयिताविशेषापेक्षयाजातेस्तथात्वेलाघवात्·सर्वांशोपनीतभान
स्याप्रामाणिकत्वेतदसंग्राहकतयालौकिकत्वस्याऽपि।विशेषणतावच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदकत्वासंभवाच्च·ए
वंचानुमितेःप्रत्यक्षत्वमतेपिनतत्रसाक्षात्वाभावप्रयुक्तानुपपत्तिरितितस्याःप्रत्यक्षत्वाभावेयुक्त्यंतरमेवानुसंधेयं·सन्निकर्षवि
रहादिति·अनुमानप्रामाण्यव्यवस्थापिकांमूलयुक्तिंसामान्यलक्षणानभ्युपगमपक्षेसंगमयति·सामान्येति·अप्रसिद्धवह्न्या
दीति·पूर्वज्ञातपर्वतीयवह्न्यादिरित्यर्थः।व्याख्यातं·प्रत्यक्षविजातीयतयाव्यवस्थापितं·अन्येषांयुक्तिमुपन्यस्यतिव्यवस्थापयि
ष्यतइति·केचिदित्यस्वरसोद्भावनं·तद्वीजंत्वसन्निकृष्टस्याभावस्यसाध्यतयानुमितौभानेपितस्याःप्रत्यक्षत्वंनिराबाधमेवव्य
क्तिविशिष्टविषयसन्निकर्षजन्यतयैवप्रत्यक्षत्वनिर्वाहात्साध्यांशेप्रकारतयाभासमानस्याभावत्वादेःसामान्यस्यापिसन्निक
र्षतयाज्ञातत्वमात्रेणाप्यसन्निकृष्टत्वानिर्वाहाच्च·नचाज्ञातस्यसाध्यस्यानुमितौभानेतादृशाभावविषयकोपनयस्यतत्रव्यभि

परा०ग०
१०१
101

चारप्रसक्तिरेव तस्याप्रत्यक्षत्वे बाधिकेति वाच्यं । प्रकारताया एवोपनायकज्ञानजन्यतावच्छेदकत्वोपगमेन व्यभिचारानवकाशात् ।
तन्मुख्यविशेष्यकमानसोपनीतभानेपि तस्य स्वांशेऽभेदसंबंधेन प्रकारत्वोपगमेन तत्संग्रहात् । अन्यथा सामान्यप्रत्यासत्तिज
न्याज्ञातविशेष्यकबोधे व्यभिचारस्य दुर्वारत्वात् । न च तत्तत्साध्यतावच्छेदकप्रकारेणाज्ञानेपि अभावत्वादिना साध्यस्य सा
मान्यप्रत्यासत्त्यैव ज्ञानं प्राक् संभवतीति नोपनयस्य व्यभिचारसंभव इत्याद्यमनुसरणीयं । अप्रसिद्धसाध्यकानुमितिमनभ्युपगम्य
एतादृशयुक्तिं दूषयतां परेषां मतमाह तत्रेति । भेदत्वादिना । पृथिवीनिष्ठभेदत्वादिना । आदिना कृद्धे धूमव्याप्यं तदभाववद् इत्याद्यनुमि
तिप्रकारस्यासत्ताभावत्वस्य परिग्रहः । जलादिप्रतियोगिकत्वग्रहः । जलादिप्रतियोगिकत्वानुमितिः । जलादिप्रतियोगिक
त्वं साध्यतयानुमितिविषयः । वृत्त्यनियामकसंसर्गस्याव्यापकताघटकत्वे तु जलादिरूपसाध्यस्य संसर्गतयापि तत्प्रतियोगि
कत्वं विषयः संभवतीति द्रष्टव्यं । एतावतैव जलादिभेदस्य ताद्रूप्येणाज्ञानदशायां पृथिव्यादिनिष्ठजलादिभेदसिध्याकृत
मप्रसिद्धसाध्यकानुमितिस्वीकारेणेति भावः । जलादिप्रतियोगिकत्वानुमापकान्वयिनोनुपस्थितिदशायामपि व्यति
रेकिणा तद्व्याप्तित्वादिनापि तदनुमानसंभवो बोध्यः । अत्राप्यपर इत्यस्वरससूचनाय । तद्बीजं तु पृथिवीनिष्ठभेदत्वादिना

१०१

भेदमात्रानुपस्थितावपि जलत्वादिव्यापकपृथिवीत्वाभावाभावेन पृथिव्यादौ जलादिभेदसिद्धेरप्रसिद्धसाध्यकानुमितिमनभ्युपगम्य दु
रुपपादता· तत्पक्षे पक्षैकदेशे जलादिभेदस्याप्रसिद्ध्यैव कदाचित्साध्यकानुमितेरुपपादनसंभवात्· तादृशानुमित्यैवाप्रसिद्धसाध्य
कानुमानखंडनोचित्यात्· एवं तद्धर्मावच्छिन्नप्रतियोगिकत्वातिरिक्तधर्मितत्वस्याभावात्तस्य साध्यग्रहात्पूर्वं दुर्ग्रहत्वात् ग्रहे तत्त्वं तस्या
भावाच्चेत्यादि· अनुमितिकारणविशिष्टपरामर्शानुपपत्तिरूपं पूर्वपक्षमध्ये कथितबाधकमुद्धरन्यो यत्र पूर्वमित्यादिनियमं स्था
पयित्वानुमितिस्थले पक्षे साध्योपनीतभानं सामान्यप्रत्यासत्तिनामलेपि निराकुर्वाणस्य कस्यचिन्मतं निरसयितुमुपन्यस्यति
मूलेकश्चित्विति· परंपरासंबंधेन व्याप्यत्वं· परंपरासंबंधघटितं व्याप्यत्वं· सामान्यप्रत्यासत्युपादानं· सामान्यप्रत्यासत्तिनास्वीकारः· जा
तिमात्रस्य लिंगत्वोपगमेनुभवविरोधमप्याह दृश्यते चेति· ननु धूमे धूमत्वेन व्याप्तिग्रहदशायां धूमत्वोपस्थितेरावश्यकत्वात्तत्रापि प
रंपरासंबंधघटिता व्याप्तिः शक्यग्रहा· अधिकरणे धूमत्वावच्छिन्नवत्वघटितधूमव्यापकताग्रहे धूमघटितपरंपरासंबंधेन धूम
त्वस्याधिकरणांशे भानसंभवेन धूमत्वव्यापकतायाः अपि वह्नौ भानसंभवात्· धूमत्वव्यक्तिसंयोगेन वह्निमद्वृत्तित्वभासमाने धूम
त्वेपि वह्निमतः स्वसंयोगिसमवायरूपपरंपरासंबंधभानसंभवाच्चेति· व्यक्तिव्याप्तिज्ञानदशायां जातिव्याप्यग्रह एवास्ति

प॰रा॰ग॰
१०२
102

द्धः इत्यत आह नहीति॰ भानाभावादिति॰ धर्मिणः साक्षात्संबंधभाने धर्मस्य परंपरासंबंधभानमिति नियमासिद्धेरिति भावः॥ अनुमित्यन्य
थानुपपत्तेर्मानि[?]त्वसंभवेनात्रापरितोषान्नाह शनियमे बाधकं दूरयति दीधितौ तन्निच्छेति॰ तन्निष्ठं॰ अवच्छेदकधूमत्वादिनिष्ठं॰ अवच्छे
दकत्वांतरं॰ धूमत्वत्वाद्यसंभवात्॰ अवच्छेदके धूमत्वादौ अनुमित्सौपाधिकव्याप्तिग्रहासंभवात्॰ अभावे हेतुतावच्छेदकविशिष्टहेतु
सामानाधिकरण्यस्य व्यापकताघटकत्वयाहेतुतावच्छेदकस्यापि तथात्वात्॰ प्रकृते ऽविशेषित धूमत्वादि विशेषिताधिकरणस्य व्याप
कताघटकत्वोपगमेपि धूमत्वत्वादिप्रकारेण व्यापकसामानाधिकरण्यप्रकारकज्ञानमेवानुमितिहेतुर्वाच्यं॰ सामानाधिकरण्यां
शे निर्धर्मितावच्छेदकज्ञानस्यानुमितिहेतुत्वात्॰ तथासति परंपरासंबंधेन धूमत्वादिविशिष्टन्यतया निश्चीयमाने ऽरूढवपि वह्न्याद्यनु
मानापत्तेः॥ वह्निसमानाधिकरण्यासामान्याभावस्य तत्राग्रहे ज्ञाने वत्वेन वह्निसमानाधिकरण्यत्वेन धूमत्वादेस्तत्र ग्रहसंभवा
त्॰ धूमत्वत्वाद्यवच्छिन्ने सामानाधिकरण्यग्रहश्च कथं धूमत्वत्वाद्यनुमितिं विना साध्याभाववद्वृत्तित्वरूपव्याप्तिरपि पक्षधर्मो
व्याप्यतावच्छेदकनिश्चयं विनाप्रायशो ऽनिश्चया॰ तत्रोपनीतविपरीतकोटेरपि भानसंभवेन संशयसंभवात्॰ निर्धर्मितावच्छे
दकसंशयानभ्युपगमेन साध्याभाववद्वृत्तिमानिति निश्चयसंभवेपि पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशये च पक्षः साध्याभा

१०२

ववह्निमानितिनिश्चयोऽघट इति भावः। मानाभावादित्यस्य मानस्यावच्छेदके व्याप्तिप्रमितिजनकस्य तन्निष्ठावच्छेदकान्तरग्रहस्याभावात्तन्नि
यमेनासत्वादित्यर्थः संभवेन पूरणं विनापि निर्वाह इति द्रष्टव्यं। तस्मात्। इत्यादेरव्यवधानव्यवस्थापितानुमानप्रामाण्योपनयप्रयासनित्व
योरुपसंहारत्वासंभवात्प्रागव्यवस्थापितविशिष्टपरामर्शहेतुतोपसंहारमात्रविवक्षन्नाह उपसंहरतीति। मूले पक्षधर्मव्याप्तिविशिष्ट
ज्ञानमिति। विशेष्यतायां विशेषणतायां वावच्छेदकया व्याप्त्याप्रकारेण विशेष्यस्य विशेषणस्य वा पक्षीयहेतोर्ज्ञानं प्रथमम् इत्यर्थः। ए
तच्च ज्ञानं सामान्यलक्षणाप्रत्यासत्तिमते स्मरणमेव। अन्यथा तु महानसीयधूमादिविशेष्यकव्याप्तिस्मरणाधीनं प्रत्यक्षं। तत्र व्याप्ति
पक्षधर्मतयोरेकत्रद्वयमितिरीत्याभावेन तस्य व्याप्तिविशिष्टतद्धूमे पक्षधर्मतायाः पक्षे वा तादृशतद्धूमस्य वैशिष्ट्यावगाहिता सं
भवति। तादृशतद्धो व्याप्तिविशिष्टतद्धूमज्ञानस्य विशेष्यतावच्छेदकविशिष्टविशेष्यादिज्ञानविधया हेतुत्वात्। अत एव न तस्यानुमिति
हेतुतापि। तत्साधारणैकत्र व्याप्तिपक्षधर्मतोभयावगाहिज्ञानत्वेनानुमितिहेतुत्वे व्याप्त्यंशे संशयादनुमितिवारणाय तदन्यत्वस्याधि
कस्यानुमितिजनकतावच्छेदके निवेशनापातात्। विशिष्टवैशिष्ट्यावगाहित्वेनैवानुमितिजनकत्वोपगमादिति। तदनन्तरमिति। तदनन्त
रजातमित्यर्थः। विशिष्टज्ञानं। व्याप्तिविशिष्टे पक्षवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं। पक्षे वा ततीयलिंगपरामर्शः। पक्षे व्याप्तिविशिष्टत्र

परा०गा०
१०३

103

तियोगिकवैशिष्ट्यावगाहित्वानत्वावच्छिन्नं वानुमितिहेतुरिति शेषः। उभयोः पक्षयोस्तुल्यतया पूर्वत्रापरितोषाभावात् वाकारस्मैकत्रानि
भरसूचकत्वव्याख्या च हेदीधितौ वेति। ननु पूर्वमेकविधस्यैव परामर्शस्यानुमितिहेतुतायाः प्रतिज्ञातत्वादत्र विकल्पेनोभयविधस्य तद्धे
तुत्वोपसंहारविरोधः इत्यत आह उभयथेति। प्रक्रान्ताक्षतेरिति। अनुमितिलक्षणनिर्वाहादित्यर्थः। यादृशस्य हेतुता तादृशपरामर्शजन्यता
या एवानुमितिलक्षणे निवेश्यत्वादिति भावः। एवं च पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुरित्यस्यापि पक्षतावच्छेदकावच्छिन्नवि
शेष्यकं व्याप्तिविशिष्टप्रकारकं। व्याप्यवच्छिन्नविशेष्यकं पक्षप्रकारकं वा ज्ञानं मनुमितिहेतुरित्येवार्थ इति नोपक्रमविरोध इत्याशयः। उ
क्तपरामर्शयोरेकस्मादनुमितिर्नान्यस्मादित्यत्र युक्तिविरहं प्रत्येकरूपावच्छिन्नस्य न तज्जनकत्वं उभयासंग्राहकत्वादिति मूलोप
यस्विरसंप्रकाशयन् उभयानुगमकं कारणतावच्छेदकमाह वस्तुत इति। अथवा मूलस्य वाकारः समुच्चायकः। तथा च प्रत्येकरूपेण
हेतुत्वं न विवक्षितं अपि तूभयोरनुगतरूपेणैवेत्याह वस्तुत इति। विनिगमनाविरहेण। विनिगमकाभावात् हेतुभूतयोरसंग्राह
कत्वेन। अतंत्रत्वात्। विशिष्यजनकतानवच्छेदकत्वात्। इदमत्र बोध्यं। व्याप्यपक्षयोर्वैशिष्ट्यावगाहित्वं न वास्तवं पक्षानुयोगिकं व्याप्य
प्रतियोगिकं यद्वैशिष्ट्यं हेतुतावच्छेदकसंबंधस्तदवगाहित्वं। भ्रमस्य त्वासंग्रहात्। व्याप्याघनवगाहिज्ञानसाधारण्याच्च। नापि व्या

१०३ रुभयो

प्यप्रतियोगिकत्वपक्षानुयोगिकत्वोभयोपरागेणतादृशसंबंधावगाहित्वं·संबंधसंसर्गकज्ञानासंग्रहात्·संसर्गानुयोगित्वप्रतियोगित्वयो
र्विशिष्टबुद्ध्यविषयत्वात्·समूहालंबनवैलक्षण्यस्यविषयतावैलक्षण्याद्देवोपपत्तेः। नापिव्याप्यपक्षोभयोपरागेणहेतुतावच्छेदकसं
बंधावगाहित्वं·तच्चतदुभयनिरूपितहेतुतावच्छेदकसंबंधीयसंसर्गताकत्वं·भ्रमस्थलेउभयीयसंसर्गताप्रसिद्धावपिसंसर्गतायाविशेष्य
विशेषणोभयनिरूपितत्वानुपपत्तिरिति·एवंसतिपर्वतवान्वह्निव्याप्यइतिज्ञानादप्यनुमित्यापत्तेः॥ नचतत्रसंयोगरूपहेतुतावच्छे
दकसंबंधावच्छिन्नाधारत्वंसंबंधः·नतुसंयोगः·तस्योभयनिष्ठत्वेपतादृशबुद्धेरपिप्रमात्वप्रसंगात्·यत्रचसंयोगोव्याप्यताघट
कसंबंधः।तत्रपक्षेसंयोगावच्छिन्नाधारतयाव्याप्यप्रकारकात् व्याप्येचसंयोगावच्छिन्नाधेयतयापक्षप्रकारकात्ज्ञानान्ने
ष्यतएवानुमितिरपितुसंयोगमात्रेणतदेकतरांशेऽपरप्रकारकज्ञानादेवेतिवाच्यं·एवमपियत्राधारत्वादिरेवव्याप्यताघटक
संबंधस्तत्रोक्तज्ञानादनुमित्यापत्तेर्दुर्वारत्वात्·अथसंयोगोयत्रहेतुतावच्छेदकसंबंधस्तत्रैवव्याप्यपक्षवैशिष्ट्यावगाहित्वेनहेतु
तास्वीक्रियतेननुसंयोगावच्छिन्नाधारतादिर्यत्रहेतुतावच्छेदकसंबंधस्तत्रापितत्रतेनसंबंधेनहेतुप्रकारकस्यपक्षविशेष्यकपरा
मर्शस्यैवानुमितिहेतुतयातादृशपरामर्शत्वस्यैवजनकतावच्छेदकत्वोपगमात्·नहितत्रसंयोगावच्छिन्नाधेयतासंबंधेनव्याप्यांशे

परा·ग·
१०४

104

पक्षप्रकारकमपिज्ञानंहेतुः। तस्यहेतुतावच्छेदकसंबंधानवगाहित्वात्· तद्धेतुत्वेनोक्तरूपेणतत्संग्रहासंभवाच्चेतिचेन्नहिसंयोगोयत्रहेतुता
वच्छेदकसंबंधस्तत्रापितेनसंबंधेनहेतुप्रकारकपरामर्शएवहेतुर्नतुतेनसंबंधेनपक्षप्रकारकोपि· तथासतिसंयोगेनहेतुनिष्ठेसाध्यश्शू
न्येपिद्रव्येहेतुविशेष्यकात्तद्द्रव्यप्रकारकयथार्थपरामर्शात्साध्यानुमितिप्रसंगात्· सल्लिंगपरामर्शाद्बाधितसाध्यविषयकलाघवज्ञा
नादिरूपदोषासमवहितात्तद्भ्रमानुमित्युत्पत्तेःसर्वानुभवविरुद्धत्वयेशायस्ययोगात्· तथाचतत्रापिउक्तानुगतरूपेणहेतुतानयुज्य
तइतिधत्तयाहेतुत्वं· नचसाध्यशून्येहेतुसंयोगसत्वेतेनसंबंधेनव्याप्तिरेवबाधितेतिकथमुक्तस्यात्तेप्रसंजितभ्रमानुमितिजनकताक
स्यपरामर्शस्ययथार्थतेतिवाच्यं· हेतुसंयोगिन्यपिहेतुवृत्तिद्रव्येहेतुसंयोगानुयोगित्वाविरहेणतत्रसाध्याभावस्यव्याप्यविघटकत्वात्·
अन्यथासंयोगेनतद्वृक्षादेःतद्वृक्षान्यत्वाद्यव्याप्यताप्रसंगात्· साध्याभाववतितद्वृक्षादौतद्वृक्षादिसंयोगसत्वात्· अत्रवदंति· धूमवान्पर्व

त तःपर्वतेधूमइत्युभयत्रैवसंयोगःसंबंधर्य्याभासते· नतुसंयोगावच्छिन्नाधारत्वाधेयत्वे· तथासतिसंयोगस्यसंबंधताविलोपप्रसंगात्· एवं १०४
चतादृशज्ञानयोर्विषयतावैलक्षण्यमपिनमिथोवैलक्षण्येपिधूमवान्पर्वतः धूमेपर्वतइत्यनयोः पर्वतेवान्धूमः पर्वतेधूमइत्यनयोश्चाविशेषप्रसंगः
तस्माद्धूमवान्पर्वतइत्यत्रपर्वतेधूमइत्यत्रचसंबंधस्यसंबंधाविधयाधूमप्रतियोगित्वंपर्वतेचानुयोगित्वंभासतइत्युक्तप्रायं· धूमेपर्वतः पर्वतवान्

धूम इत्यनयोश्च धूमेनुयोगित्वं पर्वते प्रतियोगित्वमिति विशेषः। न च विशेषणस्यानुयोगित्वभाने विशेष्यस्य च प्रतियोगित्वभाने विशेषणविशेष्य
भाववैपरीत्यप्रसंगः। यतो विशेषणविशेष्यत्वेन भासमाने वैशिष्ट्यप्रतियोगित्वानुयोगित्वे अपि तु विषयताविशेषाववेसाक्षायेन ग्रंथकृतोक्तानुगमक
रूपस्य कारणतावच्छेदकत्वमंगीकृतं· तथा च व्याप्यांशे संबंधस्य प्रतियोगित्वं पक्षांशे चानुयोगित्वमवगाहमानत्वेव व्याप्यपक्षवैशिष्ट्यावगाहित्वेपि न
कश्चिद् इति प्रसंगः। इदं तु तत्वं· तद्धानवथमित्यत्र विशेष्यविशेषणस्य संयोग एव संबंधः। तत्रेदमित्यत्र संयोगावच्छिन्नाधेयत्वमित्येव वि
शेषः। प्रथमे संयोगावच्छिन्नाधारत्वं परत्र संयोगमात्रं संबंध इति वैपरीत्यस्य न प्रसक्तिः। विशेष्यसंबंधानुयोगितायाश्च प्रमात्वनियामक
तया धूमे पर्वतस्यादिबुद्धेः प्रमात्वापातात्· एवं च संबंधविधया भासमानसंयोगादेः प्रतियोगित्वानुयोगित्वभानमप्रामाणिकं· एवं च पक्ष मा
विशेष्यकपरामर्शस्य वाजुमितिहेतुत्वं परइत्यत्र विनिगमकमपि सुलभं· व्याप्यविशेष्यकपरामर्शस्य संयोगावच्छिन्नाधेयतासंसर्गकत्व
नैव हेतुतया वाच्यतया तदपेक्षया पक्षविशेष्यकधियः संयोगसंसर्गकत्वेन हेतुत्वे लाघवादिति· हेतुसामानाधिकरण्याघटितत्वेन मू
लोक्तव्याप्यपेक्षया व्यापकत्वस्य लाघवं निराकर्तुं व्यापकत्वेपि तन्निवेशापि तु माशंकते अथेति· तच्च स्वप्रतियोग्यधिकरणवृत्तित्वमिति· न
स्ववृत्तित्वांत विशेष्यतयाविवक्षितताभावः। स्वप्रतियोग्यधिकरणवृत्तेर्यायेपेत दन्यत्वनिवेशासंयोगी सत्वादित्यादावतिव्याप्तिरिति

पृ०ज्ञा०
१०५

105

भावः। धर्ममात्रव्यापकत्वं· येनयेनसंबंधेनयद्यत्किंचिदपिसंबद्धं तेनतेनसंबंधेनतत्प्रतियेनयेनसंबंधेनस्वमद्वृत्तितेनसंबंधेनतद्व्याप
कत्वं· तादृशेति· प्रतियोग्यनधिकरणदृ मीत्यर्थः। गगनादेर्हेतुमन्निष्ठस्याभावप्रतियोगित्वमकिंचित्करमित्याह तदधिकरणेति·
तदधिकरणं· गगनाद्यधिकरणं· तदभावस्य· गगनाद्यभावस्य· तद्व्यावृत्तये· उक्तापत्तिवारणाय· हेतुसामानाधिकरण्यं· व्या
पकताघटकं वाच्यं· नचैवं· एवंचेन· समाधत्ते· अस्मत्तावदिति· एवं गगनाद्यभावस्यप्रतियोग्यसामानाधिकरण्यविशेषणेनव्या
वृत्तिः। वस्तुतस्तु उभयाभावघटितस्य प्रतियोग्यसामानाधिकरण्यस्य गगनाद्यभावसाधारणतया व्याप्तिवादे दर्शितत्वान्नत
द्व्यावृत्तिरित्यत उक्तमायातततइति· वृत्तिमत्वं· व्यापकताघटकसंबंधेनसंबद्धत्वं· नतु तेनसंबंधेनहेतुसामानाधिकरण्यपर्यंतमितिशे
षः। हेतुसाध्ययोरसामानाधिकरण्यज्ञानं जनकज्ञानविघटकत्वेनैवानुमितिविरोधि· तच्चतस्यतद्वेवोपपद्यते· यद्वितयोः सामाना
धिकरण्यज्ञानमनुमितिजनकं संभवतीतिशंकते नचैवमिति· एवं· हेतुसाध्यसामानाधिकरण्यज्ञानस्याहेतुत्वे· पक्षधर्मत्वाग्रहे· तद
ग्रहदशायां· परामर्शविरहात्· पक्षधर्मतयाहेत्ववगाहितव्यापकताज्ञानरूपानुमितिकारणविरहेणतदापत्त्ययोगात्· तत्क्वहे· तद्ग्र
हदशायां· साध्यासमानाधिकरणधर्मांतरग्रहस्यैवेति· साध्यासमानाधिकरणतयानिश्चितजलत्वादेः पक्षधर्मताग्रहस्यैव· तस्यापि·

१०५

प्रकृतहेतौ पक्षधर्मताग्रहस्यापि । तद्वद्वृत्तित्वस्य तदभावव्याप्तिपर्यवसिततया साक्षादेवानुमितिविरोधित्वात् । साध्यवदवृत्तितयाधर्
मान्तरस्य ग्रहेऽपि न साध्याभावव्याप्तित्वेन तद्व्याप्तिविषयक इति तद्विषयकधर्मान्तरस्य पक्षे ग्रहेऽपि अनुमितिरिष्यत एवेति यदि तदा प्रकृते
ऽपि तुल्यमित्याह अन्यथेति । एतन्मते विरोधः साध्याभावव्याप्यत्वं । असाधारण्यं चावृत्तित्वं गगनादेरेव । अनुकूलतर्कविरहेणासाधारण्य
संदेहादेव शब्दत्वादिकं शब्दहेतौ नित्यत्वाद्यसाधकमिति संक्षेपः । अस्तु हेतौ साध्यवदवृत्तित्वग्रहसहितः पक्षधर्मताग्रहो विरोधिधर्मवत्ता
ज्ञानविधया साक्षादनुमितिविरोधी । तथापि साध्यहेत्वसामानाधिकरण्यग्रहकालेऽनुमित्यापत्तेरुद्धरिततया साध्यहेतुसामानाधिक
रण्यधीरनुमितिहेतुरवश्यमेव वाच्येत्यत आह पर्वत इति ज्ञानेन तुल्ययोगक्षेममिति । प्रथमज्ञानकालेऽनुमित्यनुत्पादेऽप्याद्यविरोधि
तया गृह्यमाणधर्मग्रहस्यैव ग्राह्ययद्विरोधितया गृहीतं तद्धर्मग्रहस्याप्यनुमितौ साक्षाद्विरोधितया द्वयोरेव तथात्वं । तदानुमित्युपग
मे च प्रकृतेऽप्यनुमितिरिष्यत एवेत्यर्थः ॥ साध्यहेत्वोरसामानाधिकरण्यग्रहात् क्वचिदप्यनुमित्यनुत्पादानुभवश्च । असामानाधिकरण्यस्या
व्यापकत्वव्याप्यतया तद्ग्रहदशायामसामानाधिकरण्यग्रहस्य व्यापकताधीविरोधित्वादिति भावः । व्याप्तिव्यापकतयोः सामग्र्यां व्या
प्तावपि न साध्यहेतुसामानाधिकरण्यान्तर्भाव इति शंकते न चेत्यादिना । साध्येति । साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वावच्छि

परा०ग्रं०
१०६
106

न्नसमानाधिकरणसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकयावदभाववत्त्वमित्यर्थः। साध्यतावच्छेदकानवच्छिन्नस्वावच्छिन्नस
मानाधिकरणाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नयावत्प्रतियोगिताकधर्मवत्त्वमितितु परमार्थः। अतो वह्निमान्धूमादित्यादौ हे
तुमन्निष्ठस्य संयोगेन गुणाद्यभावस्य स्वरूपसंबंधावच्छिन्नवह्नित्वावच्छिन्नाभावसमनियततया तदभावाभिन्नत्वेपि न क्षतिः। अभावेप्य
पि प्रतियोगिताभेदात्। यावदर्थस्य लघोर्गुरुवृत्तित्वमित्याशंक्याह साध्याप्रतियोगित्वेति। अत्रापि साध्यतावच्छेदकानवच्छिन्नत्वावच्छेदेन
स्वविशिष्टसमानाधिकरणाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितात्वव्यापकत्वमिति पर्यवसितार्थः। अवच्छेदकत्वं वेदं स्व
रूपसंबंधात्मकमननतिप्रसक्त्यनियतमित्यभिमानः। वस्तुतो ह्यर्थः संबंध उभयत्रैव यः कश्च न संबंधत्वेन संबंधविधयात्र विवक्षितः। प्रमेय
सामान्यसाध्यकस्थले अन्योन्याभावेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वाप्रसिद्धिरतः संबंधविशेषावच्छिन्नात्यंताभावेवेति
उक्तं। संयोगादिसंबंधावच्छिन्नाभावइत्यर्थः। प्रथमे गौरवं प्रकाशयति। व्यापकत्वानंतर्भावेनेति। तथा च तदंतर्भावेआवश्यकइति
भावः। द्वितीये गौरवं प्रकाशयति। प्रमाणाभावेनेति। प्रतियोगितादिभिरेवसमम ननतिप्रसक्तधर्मस्य स्वरूपसंबंधात्मकावच्छेदाव
च्छेदकभावस्यानुभविकत्वादितिभावः। अनतिरिक्तवृत्तित्वपर्यवसायित्वात्। अनतिरिक्तवृत्तित्वरूपत्वात्। ननु व्यापकतायामपि स्व

१०६

समानाधिकरणाभावीयत्वं किंचित्प्रतियोगिताद्यभावमादायातिप्रसंगवारणाय यावत्तदभावकूटो निवेश्य इति यावत्त्वनिवेशस्तत्स्यद
यत आह प्रतियोगित्वादेरित्यादिना· निरुक्तलक्षणघटकतदवच्छेदकत्वपरिग्रहः। सामान्याभावस्य तादृशप्रतियोगितात्वावच्छिन्नाभा
वस्य· इदंत्वावच्छिन्नत्वं प्रतियोगित्वे सर्वमेतदेव स्वरूपसंबंधो न तु व्यापकत्वमन्यथा दर्शितव्याप्तिलक्षणप्रविष्टसाध्यप्रतियोगिकत्वसा

दि

मान्याभावस्याव्यापकत्वांतरघटितया महागौरवापत्तेरित्याह संबंधादिनिष्ठेति· आदिपदं संबंधांतरावच्छिन्नाभावपरिग्राहकं· संबं
धप्रतियोगित्वाभावप्रतियोगित्वयोर्वैलक्षण्येपि अतिप्रसंगस्य दुर्वारताव्यंजकं। तस्य· सामान्याभावस्य· स्वसमानाधिकरणाभाव
प्रतियोगितानवच्छेदकसाध्यतावच्छेदककत्वाभिधानेपि तादृशसाध्यतावच्छेदकीयसंबंधस्याधिकस्य हेतौ द्विधा विषयतायाः कारण
तावच्छेदके निवेशनीयतया व्याप्यवृत्तापरामर्शो हेतुतामते गौरवं दुष्परिहरमेवेति भावः। व्यापकसामानाधिकरण्यनू पक्षासिद्धिहेतु
तामतेपि व्यापकताप्रदर्शकोदाहरणप्रयोगसंगतेरत एवं व्यापकपदं भासंगतिरत आह साधनेति· ननु वीप्सावशादुद्देश्यधर्मे धूमादौ
विधेयवह्न्यादिमदन्यावृत्तित्वमेव प्रतीयते न तु विधेयगतमुद्देश्यधर्मव्यापकत्वमित्युपेयं· अतो न साध्यवदन्यावृत्तित्वज्ञानहेतुतामते
प्युक्तोदाहरणासंगतिरित्यत आह वीप्सेति· वीप्सासमभिव्याहारो व्याप्तिपदसमभिव्याहारः। उद्देश्यधर्मः। उद्देश्यगतधर्मश्च· सचवी

क्षितपदसंदेतरोद्देश्यवाचकपदघटितवाक्ये ग्रामो ग्रामो रमणीय इत्यादौ तत्पदोपस्थाप्यग्रामत्वादिरूपोद्देश्यतावच्छेदकधर्म एवं यत्त
दवीप्सास्थलेऽपि यो यो धूमवानित्यादौ यत्तदार्थे विधेयतयाविवक्षितो धूमादिस्तस्यापि यत्तद्घटितवाक्यद्वयोद्देश्यधर्मिसंबंधितयावि
वक्षितत्वात् अन्योन्याभावघटितव्यापकतायाल्लघुत्वात् अन्योन्याभावस्य चरमसमुपादानं प्रतियोगित्वाभावः प्रतियोगितान
वच्छेदकावच्छिन्नत्वं विधेयधर्मः। विधेयकोटिनिविष्टधर्मः। स च धर्मो ग्रामो ग्रामो रमणीयः ग्रामो ग्रामो न रमणीय इत्यादौ यथा
योग्यं निरुक्तोद्देश्यवाचकपदसमभिव्याहृतपदोपस्थाप्यविधेयतावच्छेदको रमणीयत्वादिर्विधेयो रमणीयभेदादिश्च। यो
यो धूमवान्स वह्निमान् स न जलह्रद इत्यादौ च वीप्सितपदघटितवाक्यसमभिव्याहृततत्पदघटितवाक्यान्तरोपस्थाप्यवह्न्यादिरूपो
विधेयतावच्छेदको ह्रदभेदादिरूपो विधेयश्च। विधेयधर्मतद्वतोरत्यन्तान्योन्याभावाप्रतियोगित्वाभ्यां यथासंख्यमन्वयः। उद्देश्य
धर्मविधेयधर्मौ वीप्सितपदघटितवाक्योपस्थाप्योद्देश्यतावच्छेदकविधेययोर्विस्तरव्याख्यानं यो यो धूमवान्स वह्निमानित्यत्र धूमव
त्त्वाद्योर्विभिन्नवाक्योपस्थाप्ययोर्यत्तदार्थांशे विधेयत्वात् धूमादेर्वह्न्याद्युद्देश्यतावच्छेदकत्वविरहात् यत्तु यत्तत्पदयोस्तात्पर्यग्रा
हकत्वमेव धूमवान्वह्निमानित्यनयोरेवोद्देश्यविधेयभावेनान्वय इति तदशुद्धं य इच्छति स जानाति इत्यादावव्याख्यातार्थस्य सुल

त्तिविरोधेनधर्म्यनुपस्थित्योर्श्चोद्देश्यतावच्छेदकत्वासंभवात्·यत्पदाभ्यांविरूपेणोपस्थितयोरपितत्पदेनपरामर्शादितिमणिकारलि
खनविरोधाच्च·एतेनपूर्ववाक्यमेवनिरर्थकमुत्तरवाक्यस्यतत्पदधूमाद्यवच्छिन्नपरमित्यपिपरास्तं·अप्रक्रांतस्यतत्पदेनपरामर्शा
योगाच्च·विधेयेति·विधेयधर्मतद्धर्मयोरत्यंतान्योन्याभ्यांxभावाx यथासंख्यमन्वयः।उद्देश्यधर्मवति·ननुभासइत्यनेनान्वयः।धूमवतिवह्न्य
भाववद्वह्निमदन्यत्वानधिकरणत्वभानेऽर्थाद्धूमेवह्निमदन्याधिकरणकत्वाभावरूपव्याप्तिलाभःसंभवतीतिनपरानभिमतप्रतिक्षेपा
शंका।असंभवादिति·विधेयधर्माद्यभावाद्यसिद्धेरित्यर्थः।इदमत्रावधेयं·ग्रामोग्रामोरमणीयइत्यादौग्रामत्वव्यापकताविशिष्टाभे
दादेरुद्देश्येरमणीयादिसंबंधत्वोपगमात्·व्यापकताबोधनिर्वाहः।व्यापकत्वस्यापदार्थत्वेनप्रकारत्वायोगात्·नचद्विरुक्तग्रामप
दंग्रामत्वव्यापकार्थकंतस्यचाभेदेनविधेयान्वयः।शक्तिग्राहकवृद्धरुक्तानुशासनमेवेतिवाच्यं·तथासत्युद्देश्यतयाग्रामादीनामन्वया
नुपपत्तेः।स्वातंत्र्येणानुपस्थितत्वात्·नचैकग्रामपदमुद्देश्यवाचकमपरंचोक्तार्थकमितिवाच्यं·एकपदस्यानेउभयात्मकसमुदाया
देशात्·पदद्वयस्यैवाभावात्·द्वितीयाद्यर्थकर्मत्वादौप्रकृत्यर्थस्यविधेयतयैवान्वयस्यव्युत्पन्नतयाग्रामंग्रामंददातीत्यादौवीप्सितप
दस्यव्यापकार्थकत्वेव्यापककर्मकदानादेःप्रत्ययापत्तेश्च·नचोद्देश्यविधेयभावस्यत्वेवीप्सांविनाप्युद्देश्यतावच्छेदकावच्छेदेनविधे

परा०ग०
१०८

108

यभानाद्व्यापकताबोधार्थं द्विरुक्तप्रयोगो व्यर्थ एव यत्र द्व्यापकतायां न प्रकारतेति वाच्यं उद्देश्यतावच्छेदकसामानाधिकरण्यमात्रेणापि
कश्चिद्विधेयबोधान्नियतव्यापकत्वपरतास्फुटीकरणाय द्विरुक्त्यादरात्। असकृद्वारमणीयादिपदस्येव ग्रामत्वव्यापकरमणीयत्वादि
नानिरूढलक्षणा· निरूढलक्षणायां द्विरुक्तोद्देश्यवाचकपदसमभिव्याहारनियतत्वात् न द्विर्वचनवैयर्थ्यं· ग्रामंग्रामं दद्यादित्यादौ
कर्मत्वादिरूपविधेयवाचकविभक्तेस्तु लक्षणा न संभवति· सुब्विभक्तित्वात्· अतस्तत्र व्यापकत्वसंबंध एव· दानकर्मतात्वादिना क
र्मत्वादेरनुपस्थितावपि तद्रूपावच्छिन्नव्यापकत्वं कर्मत्वादौ ग्रामादेः संबंधेन तु शुद्धकर्मतात्वावच्छिन्नमतिप्रसंगात्· यो यो धूमवानि
त्यादौ तु वह्न्यादिपदस्य धूमव्यापकवह्नित्वादिना निरूढलक्षणैव· उद्देश्यतावच्छेदकव्यापकताया विधेयसंसर्गघटकतया भानस्य प्रा
माणिकतया पूर्वोक्तयुक्त्या च तत्र धूमादेरुद्देश्यतावच्छेदकताविरहेण तद्व्यापकतायाः संसर्गघटकत्वासंभवात्· द्विरुक्तयत्पद
स्य व्यापकत्वमर्थः। तत्र प्रतियोगित्वेन धूमस्यानुयोगित्वेन च वह्नेरन्वय इति प्रलपितमपि तुच्छं· नामार्थयोर्भेदेनान्वयायोगात्· य
त्पदस्य धूमवत्पदसामानाधिकरण्याभावे सामान्यतया नपुंसकतापत्तेः। यत्र यत्र धूमस्तत्रादौ आधारत्वरूपार्थानन्वयेन सप्तम्यनु
पपत्तेश्च· अंशे च स्तु· वीप्सास्थले व्यापकतायां न शाब्दधीः। किंतु द्विरुक्तयामादिपदात् ग्रामत्वादिनोपस्थितेषु सकलग्रामादिषु

१०८

द्विरुक्तं यत्पदार्थं महानसत्वमहानसान्यत्वादिनोपस्थितेषु तत्पदेन च तेन तेन रूपेण परामृष्टेषु सकलधूमादिमत्सु विधेयसंबंधः शब्दात्प्रतीयते । ता
वता च क्वचिदपि व्याप्याधिकरणे व्यापकाभावशंकाया असंभवात् । व्यभिचारज्ञानाभावसहकृतसहचारदर्शनसत्वात्तदुत्तरकालीनमानसएवव्याप
कताबोधः । सकृदुच्चरितइत्यादिनियमस्य प्रामाणिकत्वेऽप्यस्यास्य संकोचः । अथ तादृशनियमास्वत्वे द्विरुक्तिवैयर्थ्यमिति चेत् । सकलव्यक्ति
परत्वग्राहकतया तदुपयोगात् । योयइत्यस्य पदद्वयक्रमेण महानसत्वत्वादिधर्मद्वयमात्रपरत्वभ्रमसंभवादतिस्फुटत्वाय तन्न्यायातिरिक्तस्थले
तत्पदेऽपि वीप्सा दृश्यते । एकतत्पदेनापि धर्मद्वयपरामर्शसंभवात्तन्मात्रपरत्वे तत्पदान्तरवैयर्थ्यमिति भ्रान्तिसंधानेन तादृशभ्रमनिवृत्तिसंभवात् ।
एकदा यावद्व्यक्तिप्रसायनेच्छैव वीप्सापदार्थः । युगपद्व्याप्तुमिच्छा वीप्सा इत्यभियुक्तैर्विवरणात् । ननु व्यापकत्वप्रत्यायनेच्छा । युगपदित्यस्य वैयर्थ्या
पत्तेः । योयोधूमवानित्यादौ यत्पदार्थव्यापकताबोधात्तत्पदादेर्द्विर्वचनानुपपत्तेश्चेत्याहुः । तत्र च व्यापकतायाः शाब्दबोधानुपगमे महानस
त्वादिना सकलव्यक्तिषु वह्न्यादिमत्वबोधेऽपि धूमादिमत्त्वेन तेषु वह्न्याद्यभावशंकासंभवात् न मनसा व्यापकतानिश्चयः संभवतीत्यनुपपत्तिः । समा
नविषयकत्वमात्रेण विरोधिताव्यवस्थापनमन्तरेणानुर्विवारेति चिंत्यं । साध्याभावयोगिपदेन × अवच्छेद × व्यापकताभावं व्याचष्टे अयोगइ
ति । अभाववत्प्रतियोगित्वं हेतुमन्निष्ठाभावप्रतियोगित्वं । विरोधाप्रकृतानां तदधिकरणविरोधिनो योगपदार्थत्वमित्यभिप्रायः । सा

परा० म०
१०९

109

धपस्याप्रयोगान्वये तन्निष्ठव्यापकत्वालाभात् अवच्छेदान्वयितया व्याचष्टे तथा चेति। यावच्छेदेनेति। व्यापकत्वान्वय्यभेदस्य तृतीयार्थः। न्यू
नताभंगाय साध्यवदन्यावृत्तित्वधीहेतुतामते केवलान्वय्यनुमानानुपपत्तिदोषमपि दर्शयति न स्याच्चेति। हेतौ साध्यप्रतियोगि
काभावसामानाधिकरण्यरूपव्यभिचारधियः साध्ये हेतुमन्निष्ठाभावप्रतियोगित्वविषयकतया समानविषयकत्वेन विरो
धितामते व्यापकताधीविरोधित्वमावश्यकमिति हेतुः साध्यव्यभिचारीत्युक्तावनस्यापि मुक्तत्वात् दोषोपीत्यादिमूलासंगतिरत
आह एतच्चेति। विरोधस्य। व्यापकताधीप्रतिबंधकत्वस्य। अतिस्फुटत्वं। सर्वथासिद्धत्वं अभिसंधाय न तु हेतुधर्मिकव्यभिचार
धियो विरोधित्वं। अत्रैव हेतुमाह साध्याभावेति। स्वयंसमानप्रकारकधिय एव विरोधित्वोपगमात् वदंतीति मूले किमनुमेयमि
ति। वास्तवपक्षीयसाध्यभानमेवानुमानफलमित्यभिमानेन। स्मृते व्याप्तिः पक्षतावच्छेदकविशिष्टे साध्यसंबंधमगृहीत्वैव धूमेव ग
म्यते। पक्षतावच्छेदकानवच्छिन्नेपि पक्षे संबंधग्रहादनुमानवैफल्यं वैपरीत्यमेवेत्याह वस्तुतस्त्विति। ननु धूमसामानाधिकरण्यमिति। ये
न पर्वतीयधूमसामानाधिकरण्यस्यैव कृशानौ भानेनादृशधूमाधिकरणपक्षसंबंधस्य तत्र भानमावश्यकमिति शंक्यते इति शेषः। मानस एव
परामर्श इति योजना सर्वत्र हेतुरिति शेषः। अत्र सर्वपदस्यानुमितिसामान्यार्थकत्वे संगतिः। साध्यविशेष्यकस्यापि परोक्षत्वापस्य

१०९

कदाचित्चाक्षुषादिरूपस्य परामर्शस्यानुमितिजनकत्वसंभवादत आह दीधितौ प्रायिकत्वाभिप्रायेणेति। इंद्रियासन्निकृष्टसाध्यकप्रत्यक्षपराम
र्शजन्यानुमितिसामान्याभिप्रायेणेत्यर्थः। साध्येंद्रियसन्निकर्षसत्वे प्रत्यक्षतः साध्यसिद्धेः कथं परामर्शेणानुमितिर्जननीयेत्याकांक्षायां तदुपपादकं
हेतुमाह पक्षइति। जनकज्ञाने इत्यादिनियमे विशेषणापूरणेन व्यभिचारोद्धारमाशंकते यदुभयेति। यदुभयनिरूपितवैशिष्ट्यविषयतावच्छिन्नस्वज
नकताश्रयज्ञाने तयोरेकतरांशे उपसर्जनतया भातस्य तदन्यतरस्य न प्राधान्येन स्वाविषयत्वेत्यर्थः। दंडी पुरुष इति ज्ञाननिरूपितायां पुरुषे दंड
इतिज्ञाननिष्ठजनकतायां च दंडपुरुषोभयवैशिष्ट्यविषयतानावच्छेदिका अपि तु दंडे दंडत्ववैशिष्ट्यविषयतैवेति पुरुषे दंड इतिज्ञाने दंडो
पसर्जनतया भातस्यापि पुरुषस्य फलीभूते दंडी पुरुष इति ज्ञाने प्राधान्येन भाने ऽपि न क्षतिरिति भावः। चैत्रानुयोगिकदंडवैशिष्ट्यज्ञा
नत्वेन दंडविशिष्टचैत्रानुयोगिककुंडलवैशिष्ट्यज्ञानजनके दंडिचैत्रे कुंडलमिति ज्ञाने कुंडलांशे उपसर्जनतया भातस्य चैत्रस्य फली
भूतज्ञाने प्राधान्येन भानात्तयोरेकतरांशे इति। दंडानुयोगिकरक्तत्ववैशिष्ट्यज्ञानत्वेन रक्तदंडवान्पुरुष इति विशिष्टवैशिष्ट्यधीजनके पु
रुषे रक्तदंड इति ज्ञाने दंडोपसर्जनतया भातस्य पुरुषस्य फलीभूतज्ञाने प्राधान्येन भानात्तदुभयान्यतरस्येति। अथ एवमपि व्याप्यविशेष्यक
पक्षविशेषणकपरामर्शात्पक्षविशेष्यकानुमितेरुत्पत्त्या व्यभिचारः। यद्दिवानुभवे विवदमानस्तत्र साध्यविशेष्यकानुमितिमेवस्वी

प०रा०ग०
११०
110

करोति· तथापि व्याप्त्यंशेऽउपसर्जनतया जनकज्ञाने भातसाध्यस्यानुमितौ प्राधान्येनुभानात्तव्यभिचारोऽपरिहार्य एवाथ यद्यनुमितेः पक्षवि
शेष्यकत्वनियमानुभवस्योक्तनियमस्य चानुरोधात्पक्षविशेष्यक एव परामर्शोनुमितिहेतुरित्युच्यते तत्रैव यत्र पक्षस्यैव×पि×हेतुतानत्र पक्षां
शे भातस्याहेतोरुपसर्जनतया×नुरूपपक्षस्यानुमितौ प्राधान्येन भानाद्व्यभिचारः। अभावादिपक्षकानुमितौ प्राधान्येन भासमानस्याभावादे
र्जनकीभूतव्याप्तिज्ञाने प्रतियोगित्वाद्यंशेऽउपसर्जनतया भानाद्व्यभिचारः। एवं दण्डी चैत्रे दण्ड इति ज्ञाने दण्डांशे प्रकारतया भातस्य चैत्रस्य त
ज्जन्ये दण्डी चैत्रः कुण्डलीति ज्ञाने प्राधान्येन भानादपि व्यभिचार इति चेन्नैवं उपसर्जनतयेति सावधारणं तथा च तदेकतरांशेऽउपसर्जन
तया भातस्येत्यस्य तदेकतरविशेष्यतयाऽभातस्येत्यर्थः। विशेष्यत्वं च साक्षात्परंपरासाधारणमतोऽभावपक्षकानुमितिजनकपरा
मर्शेऽउ अभावादिरूपपक्षस्य प्रतियोगितांशे प्रकारतयैव परंपरया विशेष्यतयापि भानान्न तद्विशेष्यतयाऽभातत्वरूपहेतुसत्व
मिति व्यभिचारः। न च परामर्शे तस्य विशेष्यत्वेपि कारणीभूतव्याप्तिज्ञाने उपसर्जनत्वेनैव भानाद्व्यभिचारस्य दुर्वारतेति जनकज्ञानसा
मान्ये विशेष्यत्वनिवेशे चाव्यापकता परामर्शहेतुतावादिमते क्वाचित्कसमूहालंबनरूपज्ञाने पक्षस्याविशेष्यतया तत्र हेतुसत्वेऽभि
क्षमिति वाच्यं· स्वफलोपधायकज्ञानसामान्ये साक्षाज्जनकयत्किंचित्ज्ञाने वाऽविशेष्यत्वविवक्षणात्· व्याप्यविशेष्यकपरामर्श

११०

भ्रमानुमितौहेतुरित्याशयः।पक्षस्यव्यापकतापरामर्शेपक्षतावच्छेदकांशेविशेष्यत्वेपियदुभयेत्यनेनपक्षहेतूभयमुपादायतदेकतरा
विशेष्यतयाहेतुसत्त्वंसुघटं·नचैवमपिरक्तोदंडइतिज्ञानेविशेषणतयैवभानस्यरक्तत्वस्यतज्जन्येरक्तदंडवान्पुरुषःरक्तत्वंधर्मेयमि
तिज्ञानेप्राधान्येनभानाद्व्यभिचारइतिवाच्यं·नप्राधान्येनभानमित्यस्यतज्ज्ञानीयप्रकारतारहितत्वेसतितद्विषयकमित्यर्थक
त्वात्·अत्र·व्यापकतापरामर्शस्यानुमितिहेतुत्वे·पक्षधर्मेति·पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावस्यज्ञानं
पक्षधर्मरासभादिसमानाधिकरणाभावप्रतियोगित्ववतिवह्न्यादौभ्रमात्मकंनसंभवतीत्यर्थः।तथाचतस्यानुमितिहेतुत्वेऽभ्रांतस्यनानु
मितिःस्यादितिभावः।तादृशप्रतियोगित्वप्रतियोगिकत्वेनधूमादिसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावज्ञानस्यहेतु
तायामुक्तदोषाभावात्तत्रदोषांतरमाह तादृशेति·अवगाहित्वेप्यत्रज्ञानमित्यनुषंजनीयं·अतिप्रसक्तमिति·व्यभिचारज्ञानदशासा
धारणमित्यर्थः।पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वावगाह्यभावज्ञानहेतुतांदूषयतिपक्ष
धर्मेति·तज्ज्ञानं।अभावावगाहित्वं·अव्यापकं·शुद्धधूमत्वादिरूपहेतुतावच्छेदकावच्छिन्नव्यापकताज्ञानासंग्राहकं।पक्षधर्मधूमत्वावच्छि
न्नव्यापकतात्मकाद्भावाद्धूमत्वाद्यवच्छिन्ननिरूपितव्यापकतात्मकस्यसामान्याभावस्यान्यत्वादिति·नचतादृशज्ञानासंग्रहेनदोषा

परा०ग०
११३

य· सर्वत्र पक्षीयधूमादिसमानाधिकरण्याभावप्रतियोगित्वत्वावछिन्नाभावज्ञानादेवानुमितिरूपगंतव्येतिवाच्यं· तादृशव्यापकता
याग्रहे यत्र पर्वतीयेधूमस्तत्रवह्निरितिसहचारग्रहस्यापेक्षिततया महानसादौसहचारदर्शनेनास्याअगृहीतत्वेन पक्षीयधूमदर्शनदशा
यामुत्पत्त्यसंभवात्· कथंचित्तदुत्पत्त्यसंभवेपि पूर्वगृहीतव्यापकतायाअनुपयोगितायस्तज्ज्ञानादनुमितिस्वीकारेनुभववि
रोधात्· नचपक्षीयधूमत्वावछिन्नव्यापकताज्ञानाद्भवतामपि क्वचिदनुमित्युत्पत्तेस्तद्धेतुत्वेकथमनुभवविरोधइतिवाच्यं· पक्षीयधूमत्वेनप
क्षधर्मत्वावगाहिन एवतादृशव्यापकताघटितव्याप्तिविषयकपरामर्शस्यमयानुमितिहेतुत्वोपगमात्· तेनरूपेणपक्षधर्मताज्ञानंविना
तादृशव्यापकताज्ञानादनुमित्युत्पत्त्यादस्यानुभवविरुद्धत्वात्· मन्नु धूमसमानाधिकरण्याभावप्रतियोगित्वत्वावछिन्नप्रतियोगिता
कत्वसंबंधेनपक्षधर्मधूमसमानाधिकरण्याभावप्रतियोगित्वत्वेनतादृशाभावप्रतियोगित्वप्रकारकमभावज्ञानमनुमितिहेतु
रितितन्दसत्· यादृशधर्मप्रकारेणप्रतियोगिनोऽभावांशेप्रकारतातादृशस्यैवप्रतियोगितावछेदकत्वंनन्यूनेऽधिकेवेत्यनुभवे
नपक्षीयत्वघटितधर्मप्रकारेणप्रतियोगिनिभासमानेपक्षीयत्वांशंपरित्यज्यप्रतियोगितावछेदकत्वभानस्यानुभवविरुद्धत्वा
त्· नहिनीलोघटोनास्तीत्याद्याकारिकाक्वदाचिदपिघटादिसामान्याभावबुद्धिःसमावा तादृशप्रतियोगितावछेदकत्वमनुभवविरो

११३

त्सीत्· तथा प्युक्तज्ञानस्यैतादृशज्ञानत्वरूपेणानुमितिहेतुत्वे धूमसमानाधिकरणाद्यंशस्य संबंधविधया विषयतायाः प्रकारत्वेन विषय
ताश्चावच्छेदकतयानुप्रवेशाद्गौरवं· व्याप्यवत्ताधीहेतुतामते त्वेवं प्रतियोगितासंबंधे धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्न
प्रकारकत्वस्यैव लघोरवच्छेदकत्वात्· न चोभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वं संबंधविधया धूमसमानाधिकरणाभावप्रतियोगित्व
त्वं च प्रतियोगित्वांशे प्रकारतयावगाहमानां बुद्धिं वारयितुं व्याप्यपरामर्शहेतुतावादिनापि धूमसमानाधिकरणाभावप्रतियोगित्व
त्वावच्छिन्नप्रतियोगितासंसर्गकत्वपर्यंतं निवेश्यमिति कृतं लाघवमिति वाच्यं। प्रतियोगिप्रकारतावच्छेदकधर्मावच्छिन्नत्वोपरागेणैव प्र
तियोगितायाः संसर्गत्वोपगमेनोक्तज्ञानस्यैवासिद्धेः। अथ व्यापकताधीहेतुतामतेपि प्रतियोगितासंसर्गकत्वमात्रं निवेश्यं· शुद्धप्र
तियोगित्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गकज्ञानादनुमितिरिष्यत एव· उभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधेन पक्षी
य धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकज्ञानं तेनापि नेष्यते· प्रतियोगिनि प्रकारीभूतो यादृशो धर्मस्तदवच्छिन्न
त्वतद्घटकधर्मावच्छिन्नत्वान्यतररूपेणैव प्रतियोगितायाः संसर्गतोपगमादिति चेत्। माभूदेवं गौरवं· तथापि किंचिदंशपरित्यागेन
प्रतियोगिप्रकारीभूतधर्मे प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहनोपगमे बाधादिबुद्धेः प्रतिबंधकतायां गौरवेणातस्य हेतुतयोक्त

परा०गा०
११२
112

परामर्शहेतुत्वासंभवात्· तथाहि· घटत्वाद्यवच्छिन्नविशिष्टबुद्धिं प्रति घटादिसामान्याभावज्ञानस्य तादृशज्ञानत्वेन न प्रतिबंधकता· घटादिसामा
न्याभावत्वेनाभावांतरावगाहिभ्रमासंग्रहात्· नापि प्रतियोगितासंबंधेनाभावांशे शुद्धघटत्वाद्यवच्छिन्नप्रकारकज्ञानत्वेन शुद्धघटत्वाद्य
वच्छिन्नप्रतियोगिताकत्वसंसर्गकनीलघटत्वाद्यवच्छिन्नप्रकारकभ्रमतस्सिद्धज्ञानासंग्रहात्· नापि शुद्धघटत्वाद्यवच्छिन्नप्रतियो
गितासंसर्गेण प्रतियोगिप्रकारकाभावज्ञानत्वेन शुद्धघटत्वाद्यवच्छिन्नतया तदनवच्छिन्नप्रतियोगित्वावगाहिभ्रमासंग्रहात् किं
तु संसर्गघटकतया घटत्वाद्यंशे प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहिज्ञानत्वेनैवास्मन्मते च प्रतियोगितासंसर्गकघटत्वादिप
र्याप्तिप्रकारतावच्छेदकताकज्ञानत्वेन स्वरूपसत्पर्याप्तिनिवेशापेक्षया च पर्याप्त्यवगाहितौ मते ×निवेश× अनेकविषयतानिवेशाधिक्या
ज्ञो रवमिति· इदं त्ववधेयं· सर्वत्र पक्षीयत्वविशिष्टतत्तन्निरूपितव्यापकतापरामर्शद्वैधानुमितिस्तादृशव्यापकतायाः आग्रहेपि त
द्घटकप्रत्येकपदार्थज्ञानात् विशिष्टविषयकोपनीतभानात्मकस्तद्विषयकः परामर्शः सुघटः धूमादिसामान्यव्यापकताग्रहः पु
ष्टीय धूमाद्यव्यापकत्वशंकानिरासद्वारोक्तपरामर्शे उपयुज्यते इति तु समीचीनतया प्रतिभाति· ननूक्तव्यापकताज्ञानवतस्स्वर्गका
मो यजेतेत्यादिविधिवाक्यजन्यस्वर्गजनकताघटकव्यापकताबोधोपि वितर्कयस्य इति भवतामपि तत्र का गतिस्तथाहि· स्वर्ग

११२

व्यापकत्वं यदि स्वर्गसमानाधिकरणाभावप्रतियोगितावच्छिन्नाभावः। तदा यागत्वावच्छिन्ने तद्बाधः। गंगास्नानादिजन्यस्वर्गस्य
यागव्यभिचारित्वात्। नापि स्वर्गसमानाधिकरणाभावप्रतियोगित्वप्रतियोगिकोभावः। अतिप्रसक्तस्य छित्वाद्यवच्छिन्नतदभावस्या
पि तथात्वप्रसंगात्। नापि विजातीयस्वर्गसमानाधिकरणाभावप्रतियोगित्वावच्छिन्नाभावः। कार्यकारणभावे गृहीत एव तदन्यथानुपप
त्त्या कार्यतावच्छेदकजातिकल्पनात्। प्रथमं मानाभावेन तादृशजात्यनुपस्थित्या तद्घटितरूपावच्छिन्नाभावस्य विधिना बोधयितुमश
क्यत्वादित्यत आह स्वर्गेति। अयं भावः। स्वावच्छेदकक्षणाव्यवहितोत्तरक्षणावच्छिन्नत्वस्वानुयोग्यनुयोगिकत्वोभयसंबंधेन तद्रूपाव
च्छिन्नाभावाधिकरणताविशिष्टाद्यक्षणावच्छिन्नाधिकरणतानिरूपकतानवच्छेदकतद्रूपावच्छिन्ननिष्ठान्यथासिद्धिनिरूपकतानव
च्छेदकधर्मवत्कार्यकत्वमेव तद्रूपावच्छिन्नस्य तज्जनकत्वं। तादृशाधिकरणत्वान्निरूपकान्यथासिद्धनिरूपकत्वं कार्यकत्वं घटत्वा
दिना दंडादिकार्यस्यापि तद्घटत्वादिना दंडत्वाद्यवच्छिन्नान्यथासिद्धिनिरूपकतया दंडादेर्घटादिकारणत्वमपि न स्यादतोन्यथासिद्धिनि
रूपकतानवच्छेदकधर्मपर्यंतनिवेशः। तादृशं च यागत्वाद्यवच्छिन्नं स्वर्गादिजनकत्वं अन्यथासिद्ध्यादिनिरूपकतानवच्छेदकधर्मत्वेन जन्य
तावच्छेदकं जातिविशेषघटितमपि विशेषतस्तेनाघटिततया विशिष्य तदुपस्थितिविरहेपि सुग्रहं। केवलान्वयिनीश्वरज्ञानादावेतादृश

कारणत्वासंभवेपिनक्षतिः। प्रकृतेसुपयोगिकारणतायाएवनिरूपकरूपत्वात्· अथवास्वरूपसंबंधविशेषएवकारणत्वं नत्वनन्यथासिद्धनि
यतपूर्ववर्तित्वं· अन्यथासिद्ध्यभावकूटस्यदुर्ज्ञेयत्वात्· एवंचप्रमाणांतरावेद्यजातिविशेषस्ययागादिनिष्ठजनकतावच्छेदकत्वोपगमेविशि
ष्टजनकतावच्छेदकघटितस्यनिरुक्तरूपस्यदुर्ग्रहत्वेपिनक्षतिरितिदिक्॥ ॥इतिपरामर्शग्रंथरहस्यं॥ ॥श्रीरस्तु॥ उपलक्षण
स्यपरिचायकत्वेनप्रसिद्धतयापरिचायकत्वाप्रतिक्षेपेणालिंगमेवविशेषणमितिविशेषणत्वोपगमोमूलेऽसंगतः नचपरिचायकत्वप्रतिक्षे
पकएवायंग्रंथः अग्रिमस्येंद्रियसंयोगपरिचायकत्वाभिधानस्यासंगतेः। अतएवोपलक्षणविशेषणसाधारणपरिचायकत्वपरतांप्रक्र
तेदर्शयति· परिचायकत्वमिति· परिचायकत्वमन्यथाप्रयोजकत्वेनाभिहितं इतितन्निराकरणमाकांक्षितमतःपरिचेमइत्यादिरूपल
क्षणतयापरिचायकत्वनिराकरणपरतामाहतच्चेति· अन्यथासिद्धिप्रयोजकमुपलक्षणतयापरिचायकमेवेतिभावंस्फुटीकर्तुंविशे
षणमपिपरिचायकत्वेनान्यथासिद्धमेवेत्याशंकायांतथाचेतिमूलमवतारयतिविशेषणतयेति· तत्वे· परिचायकत्वे· अवच्छेदकत
यान्यथासिद्धिरूपलक्षणतयेवविशेषणतयापिपरिचायकस्यार्थविशिष्टाद्याशंकायामनुपधेयाद्यतिवादिमवतारयतिअवच्छे
दकतेति· मात्रपदेनविशेषणत्वस्याप्रयोजकत्वमुक्तं· ज्ञायमानलिंगजन्यत्वसाध्यकानुमानेविशेषणजन्यत्वत्वेनसामान्यतः

साध्यत्वे पक्षतावच्छेदकादिजन्यतयार्थांतरमनुमितौ च व्यभिचारावारकाणां हेतुविशेषणानां च वैयर्थ्यं । सर्वत्रैवानुमितौ किंचिद्वि-
शेषणजन्यत्वेन साध्यसत्वात् । धूमजन्यत्वत्वेन साध्यत्वे दृष्टांताभिधानविरोध इत्यतः सामान्यव्याप्त्या पक्षधर्मतावलात् धूमज-
न्यत्वसिद्धिरिति दर्शयन्नुद्देश्ययोजनान्याहृत्यापदिति । समानकालीनतयेति । विषयितारूपवैशिष्ट्यं तृतीयार्थः । तस्य च वृत्तावन्व-
यः । तादृशी अशाब्दी । पक्षधर्मतासंपत्तये धूमजन्यत्वसिद्ध्यौपयिकं विशेषणं भवद्धूमकालीनत्वावगाहित्वघटितहेतोः पक्षवृत्ति-
त्वलाभाय अनुमितौ धूमस्याविशेषणत्वे तत्कालीनतायामनुमित्यादावभानेन तत्र तादृशहेतुसत्वानिर्वाहादिति भावः । धूमाविशेषणि-
केत्यादीति । आदिपदाद्धूमसमानकालत्वादिविषयेत्यस्य परिग्रहः । एवं च धूमाविशेषणिकेति मूलस्य यथाहेतुव्याख्यानं विशेष्ये धूमवि-
शेषणिके साध्यार्थकत्वमवसेयं । तादृशस्य यथाव्याख्येयधूमविशेषणकत्वस्य । आनुमानिकत्वप्रदर्शनायेति । अन्यथा तत्र प्र-
माणानुयोगानिर्वाहादिति भावः । धूमवानित्यादीति । धूमवान्वह्निमानित्याकारकथनमित्यर्थः । ननु साध्ये विशेषणस्य ज्ञायमानत्वकथ-
नेन तेन रूपेणाजनकतासिद्ध्या प्रत्यक्षविशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकस्य विषयाविधया हेतुत्वस्य सर्वैर्मतत्वसिद्धतया ज्ञायमान-
त्वेन हेतुतायामसिद्ध्या दृष्टांतविरोधेन तद्रूपावच्छिन्नजन्यत्वस्य साध्यत्वासंभवादिति तद्वैयर्थ्यमित्यत आह ज्ञायमानेतीति ।

लिं०गा०
११४

115

तज्ज्ञानस्य· लिंगज्ञानस्य· जनकत्वलाभाय· जनकत्वेऽपि तद्धेतुमतत्वलाभाय· ननु तद्विशिष्टजन्यत्वस्य सिद्ध्या तस्य जनकत्वसिद्धेर्व्यर्थः। त
त्राविवादात् साध्यविशिष्टानुमितेरिति· पक्षपि यद्विशेषणकत्वमात्रस्याशयाद् बुद्धिविशेषणत्वे पक्षतावच्छेदकादिविशिष्टविषयकानु
मितेः पक्षतावच्छेदकाद्यजन्यतयापि व्यभिचारः प्रसज्यते· तथाप्युद्देश्यतावच्छेदकविशिष्टे यद्विशेषणकेषु ज्ञानेन तथा व्यभिचार इति सा
ध्यमात्रोपादानं· धूमेति· धूमस्यातीततयानुमित्यजनकत्वं सूचयितुं धूमध्वंसहेत्वनुसरणं· विशेष्यविषयकत्वस्य बुद्धिविशेषणत्वेऽपि दर्शि
तव्यभिचारस्य दुर्वारतया विशेष्यविषयया द्विशेषणं तत्समानकालीनतया हि योजनामादत्र व्याचष्टे विशेष्य इति· मुख्यविशेष्यतानिरूपित
विशेषणतयावच्छिन्नतया विशेषणतांशे भासमानसमानकालीनत्वविशिष्टतानिरूपिता यदीया विशेषणता तत्प्रतियोगित्वमर्थः। धूमगान्य
र्तते वह्निमानित्याद्यनुमितेर्धूमांशे भासमानसमानकालीनत्वप्रतियोगितया हेतुभानं धर्मिपारतन्त्र्येणैव न तु स्वातन्त्र्येण· धूमसमानकालीनवह्नि
मानित्याकारकतापत्तेः। तत्पारतन्त्र्येण भानं च तन्निरूपितविशेषणतावच्छिन्नं विशेषणत्वमिति तादृशानुमितेर्यत्पदोपादेयधूमघटितहेतुमत्त्व
मव्याहतं यत्तु एकधर्मिपारतन्त्र्येणान्यांशे विशेषणत्वं· तद्धर्मिनिरूपितविशेषणत्वाभिन्नविशेषणत्वमेव· तथा चावच्छिन्नत्वस्य लेऽ
भेद एवानिवेशनीय इति· तदसत्· तथासति तुल्ययुक्त्या विशिष्टप्रतियोगिकवैशिष्ट्यबुद्धावपि विशेषणपारतन्त्र्येण विशेष्यांशे परंपरा

११४

न्म

संबंधेन विशेषणतावच्छेदकभानस्य विशेषणनिरूपितविशेषणत्वाभिन्नविशेष्यनिरूपितविशेषणत्वात्मकतया पर्वतो धूमकालीनवह्नि-
मान् धूमध्वंसादित्यादिस्थलीयधूमाजन्यानुमितेः पर्वतनिरूपितप्रकारत्वाभिन्नसमानकालीनत्वविषयतानिरूपितधूमनिष्ठप्रकारताप्रति-
योगित्वेन व्यभिचारस्य दुर्वारत्वापत्तेः। अस्मन्मते च तत्र मुख्यविशेष्यांशे या धूमीयप्रकारता सा विशेषणांशे धूमीयप्रकारतयावच्छिन्ना न तु वै-
परीत्यमिति व्यभिचारानवकाशः। मुख्यविशेष्यांशे या विशेषणता तत्सामानाधिकरण्यमुपेक्ष्य तदवच्छिन्नत्वस्य निवेशने मुख्यवि-
शेष्यतानिवेशनस्य च प्रयोजनमाह तदानीमिति। धूमस्य मुख्यविशेष्यांशे विशेषणताभावविवक्षणे धूमवान्नित्यं तत्पक्षविशेषणं।
वर्तमानत्वैशिष्ट्यस्य मतुपाद्यायशाबोधनात्तदानीमित्यनुक्तौ धूमस्यानुमितिसमये विद्यमानताऽनभिसंभवात्। न च तस्य जनक-
त्वमपि संभाव्यते तत उक्तिः। विशेषण इति। वह्निविषयतानिरूपितसमानकालीनत्वसंसर्गावच्छिन्नधूमविशेषणताविशेषणी-
भूतकालनिरूपितविशेषणतावच्छिन्नैवं। ननु मुख्यविशेष्यतानिरूपितविशेषणतावच्छिन्नेत्यर्थः। इदं च विशेषणविशेषणस्य विशे-
षणघटितपरंपरासंबंधेन तद्विशेष्यांशे विशेषणत्वाभिप्रायेणोक्तं न तु पर्वतविशेषणतापन्नस्य धूमस्य कालीनत्वसंबंधेन वि-
धेयांशे विलक्षणप्रकारत्वमेवासिद्धमिति कथं तस्य हेतुघटकत्वमित्यत आह अनुभवेति। अयमाशयः। एकत्र द्वयमिति रीत्या दं

लिं०ग०
११५

115

डकुंडलवैशिष्ट्यावगाहिज्ञानविलक्षणेन तयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञाने विशेष्यतावच्छेदकधर्माधिकरणतावन्निष्ठतदवच्छेदक
कालावच्छिन्नाधिकरणताकत्वं विधेये भासते· अत एवासमानकालीनयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञानस्य भ्रमत्वं निरुक्तरूपमे
व च समानकालीनत्वमित्युच्यते· यथाश्रुतस्य धर्म्यंतर एव समानकालवर्त्तमानयोरतिप्रसक्ततया तादृशयोस्तथाविधज्ञाने भ्रमत्वा
निर्वाहकत्वात्· निरुक्तसमानकालीनत्वभानोपगमे च तद्रूपविशिष्टविधेयवैशिष्ट्यस्य धर्म्यंतर एव सत्वेनान्यधर्मिकज्ञानस्य
तदवगाहित्वेन भ्रमत्वोपपत्तेः। समानकालीनत्वस्य नियतोपस्थितिविरहेण संसर्गतयैव भानमुपेयं· अनुपस्थितस्य वि
शेषणत्वायोगात्· एवंच दंडीकुंडलीत्यादिविशिष्टवैशिष्ट्यबोधस्य दंडकालीनकुंडलीत्याकारकतावारणाय प्रकारतावै
लक्षण्यमावश्यकं। यदि च लाघवाद्विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदककाला×अधिकरण×वच्छिन्नाधिकरणतैव
विधेयस्य संबंध इत्युच्यते तदा तदनुसारेणान्वय्येव हेतुर्निर्वाच्य इति· पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रमनुमि
तिविषयः न तु पक्षविशिष्टेऽपरवैशिष्ट्यमिति प्राचीनमतानुसारेण· पक्षतावच्छेदकावच्छिन्नाधिकरणत्वमेतद्विशिष्टानुयो
गिकवैशिष्ट्यं भासते न तु निरुक्तरूपमित्यभिप्रायेणेदमनुमानं· नातः पक्षतावच्छेदकमादाय क्वापि व्यभिचारः इत्यपि

११५

मेप्यतीभविष्यति· विशेष्यविषय इत्यस्य व्यत्यासमसहमानः प्रकारांतरेण हेतुं व्याख्यातुमुपक्रमते विशेषणमिति· धर्मितावच्छेदकं· स्वधर्मितावच्छेदकं· विधेयं· विधेयतावच्छेदकावच्छिन्नं· विशेष्यविषय इतिसप्तम्याश्च बुध्यन्वयिविधेयित्वार्थकतया विधेयतावच्छेदकावच्छिन्नं स्वधर्मितावच्छेदकयद्धर्मसमानकालीनतयाऽवगाहते या बुद्धिरित्यर्थो लभ्यते· तत्र च धूमकालीनवह्निमान्पर्वतो वह्निमान्धूमध्वंसादित्यादौ व्यभिचारवारणाय पक्षं स्वधर्मितावच्छेदकत्वं धर्मविशेषणमव्यावर्त्तकं· धूमादेशांतरएव तस्य वह्नित्वावच्छिन्नधर्मितावच्छेदकत्वात्· स्वनिरूपिततत्ज्ञानीयधर्मितावच्छेदकतानिवेशोपि तत्रैव धूमस्याधिकस्य पक्षतावच्छेदकप्रवेशेन व्यभिचारोद्धारादिष्यत इतिस्वसमानकालीनतया विधेयतावच्छेदकावच्छिन्नभानांशे धर्मितावच्छेदकत्वं निवेशयति तथा चेति· यद्धर्मविशिष्टे· यं धर्मं धर्मितावच्छेदकीकृत्य तत्समानकालीनत्वेन विधेयतावच्छेदकावच्छिन्नमवगाहते· विधेयतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं तत्समानकालीनत्वधर्मितावच्छेदकतापन्नं तद्रूपावच्छिन्नावगाहिनी या बुद्धिरित्यर्थः। विधेयतावच्छेदकतापर्याप्त्यधिकरणे समानकालीनत्वधर्मितावच्छेदकतापन्नत्वपर्यंतनिवेशप्रयोजनमाह धूमकालीनेति· धूमं धर्मितावच्छेदकीकृत्य साध्यतावच्छेदकधूमकालीनत्वेन विधेयमवगाहमानाया

मपिधूमवानयंधूमकालीनवह्निमानित्यन्यलिंगकानुमितौविधेयतावच्छेदकतापर्याप्त्यधिकरणंधूमकालीनत्वसहितंवह्नित्वंनधूम
कालीनत्वधर्मितावच्छेदकतयाभासते·अपितुशुद्धवह्नित्वमेवेतिनतत्रव्यभिचारइत्यर्थः।यद्यपिशुद्धवह्नित्वमपिअनुमित्यंतरस्य
समूहालंबनरूपधूमविशिष्टपक्षकशुद्धवह्नित्वावच्छिन्नधूमकालीनवह्नित्वावच्छिन्नोभयसाध्यकप्रकृतानुमितेश्चविधेयता
याअवच्छेदकत्वपर्याप्त्यधिकरणंभवतीतितद्व्यभिचारोदुर्वारः।अथतत्कालीनत्वधर्मितावच्छेदकतापन्नपर्याप्तविधेयतावच्छे
दकताकत्वनिवेशान्नायंव्यभिचारः।समूहालंबनानुमितौधूमकालीनत्वधर्मितावच्छेदकतयाविधेयत्वांतरावच्छेदकतया
चशुद्धवह्नित्वस्यभानेपिधूमकालीनत्वधर्मितावच्छेदकतामापन्नस्यैवतस्यविधेयत्वांतरानवच्छेदकत्वादितिचेदेवंसतिय
द्धर्मविशिष्टइत्यस्यवैयर्थ्यं·वक्ष्यमाणधूमकालीनवह्न्यवच्छिन्नपक्षकानुमितावुद्देश्यतावच्छेदकमध्यएवधूमकालीनत्वध
र्मितावच्छेदकतयावह्नित्वभानात्·विधेयतावच्छेदकतयातस्मिन्भासमानेतदवच्छिन्नेसमानकालीनत्वाभानेनतादृशविषय
त्वस्येतरधर्मितावच्छेदकतानवच्छिन्नएवतत्रपर्याप्तेर्व्यभिचाराप्रसक्तेः।यत्तुविधेयत्वतदवच्छेदकावच्छिन्नविषयतयोरेक
विषयतानिरूपितत्वनिवेशान्नोक्तसमूहालंबनानुमितौव्यभिचारः।तत्रशुद्धवह्नित्वावच्छिन्नविधेयत्वधूमसमानकालीन

त्वधर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविधेयत्वविषयत्वनिरूपकधर्मिविषयतयोः परस्परपरिहारेणप्रत्येकसाध्यकानुमितिसं
वद्धयोर्भेदात् इत्थंतद्दर्पिनसाधु· धूमवान्धूमकालीनवह्निमान्पर्वतोवह्निमानितिवक्ष्यमाणानुमितावपिधूमसमानकालीनत्वध
र्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविषयतानिरूपकशुद्धपर्वतत्वावच्छिन्नधर्मिविषयतातो विशेषणद्वयविशिष्टपर्वतत्वावच्छि
न्नायाविधेयतानिरूपकधर्मिविषयतायाभेदेनयद्विशिष्टइत्यस्यवैयर्थ्यापरिहारात्· तथापिस्वानिरूपकज्ञानानिरूपितविधेय
तावच्छेदकतापर्याप्त्यधिकरणंयद्रूपंसमानकालीनत्वधर्मितावच्छेदकतापन्नंतदवच्छिन्नविषयतानिवेशान्नोक्तोव्यभिचारोनवा
यद्विशिष्टइत्यस्यवैयर्थ्यं· समूहालंबनरूपोक्तानुमितौसमानकालीनत्वधर्मितावच्छेदकतापन्नंयद्वह्नित्वंयादृशविषयतायामव
च्छेदकंतादृशविषयत्वानिरूपकशुद्धवह्नित्वावच्छिन्नमात्रसाध्यकानुमितिनिरूपितविधेयतायाएवावच्छेदकत्वपर्याप्तिस्त
त्रनतुस्वनिरूपकज्ञानमात्रीयविधेयतायाइतिनिरुक्तहेत्वसत्वात्· धूमत्वसमानकालीनवह्निधर्मितावच्छेदकतापन्नपर्व
तत्वावच्छिन्नपक्षकशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितौचशुद्धवह्नित्वावच्छिन्नविधेयतायाःस्वनिरूपितोद्देश्यतावच्छे
दकतारूपधूमकालीनत्वावच्छिन्नवह्निविषयतानिरूपकमात्रनिरूपितत्वेनहेतुसत्वात्· यद्विशिष्टइत्यस्यप्रयोजन

माहृधूमवानयमिति· अत्र च धूमधूमकालीनवह्न्योः परस्परविशेषणविशेष्यतावच्छेदकभावानापन्नयोर्विधेयधर्मिताव
च्छेदकत्वमिति सत्त्वमिदं मधूमप्यमिति विशेष्यवाचकपदनिर्देशः। विशिष्टपक्षतावच्छेदकवतीति· तदुभयधर्मितावच्छेदक
तापन्नपर्वतत्वावच्छिन्न इत्यर्थः। वह्निमत्त्वमिति· भासतइत्यनुषज्यते· एकधर्मावच्छिन्नविशेषणतापन्नयोर्विधेयस्य धर्मि
तावच्छेदकयोरविशेषणभासमानयोरेव तथात्वं न तु कापि विशेषणविशेष्यतावच्छेदकभावापन्नयोरिति हृदयं· एतेन य
त्र पर्वतत्वावच्छिन्नविशेषणतापन्नधूमधूमकालीनवह्न्योः मिथो विशेषणविशेष्यतावच्छेदकभावानापन्नयोः· पक्षताव
च्छेदकघटकत्वं तत्राकेरी साव्यभिचारवारणे यत्र धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमस्य पर्वतत्वावच्छिन्नविशेषण
तया पक्षतावच्छेदके प्रवेशस्तत्र व्यभिचारादुर्वार एवेति निरस्तं· अथ स्नेहगंधाविशिष्टस्य द्रव्यत्वस्य यत्र पक्षतावच्छेदकता तत्राश्रया
सिद्धदोषत्वानुरोधेनान्यतरविशिष्टद्रव्यत्वस्यान्यतरधर्मितावच्छेदकत्वमावश्यकं। अन्यथा शुद्धद्रव्यत्वावच्छेदेनान्यतराभाव

स्याप्रसिध्या तत्सामानाधिकरण्येनान्यतराभावस्याविरोधितया तत्र दोष एव दुर्लभः स्यादिति एकधर्मावच्छिन्नविशेषणता
पन्नस्य विधेयधर्मितावच्छेदकद्वयस्य न विशेषणविशेष्यतावच्छेदकभाव इति नियमासंभव इति चेत्· तादृशनियमाभावेपि

तादृशधर्मद्वये धर्मितावच्छेदकविशेषणभावस्याप्यनियमात् ॰ यत्र तथाभूतयोरेव गंधस्नेहयोः द्रव्यत्वावच्छिन्नविशेषणतयाप
क्षतावच्छेदके प्रवेशस्तत्रासिद्धेरीदृशतया तदनुभवानुरोधादुभयत्वाप्रकारकत्वमपि ॰ द्रव्यत्वं धर्मितावच्छेदकीकृत्यैकत्र द्वयमिति
न्यायेन गंधस्नेहप्रकारकं ज्ञानं प्रति उभयाभावप्रकारकज्ञानस्य विरोधित्वमुपगम्य द्रव्यत्वावच्छेदेन तदुभयाभावसत्वस्यैव
तत्र दोषत्वमुपपादनीयं ॰ उक्तनियमेपि सामंजस्यात् ॰ न चैवमपि यत्र पर्वतत्वस्यैव धूमस्यैव धूमसमानकालीनवह्निधर्मिताव
च्छेदकता तत्र शुद्धवह्नित्वावच्छिन्नसाध्यकान्यलिंगकानुमितौ पक्षतावच्छेदकधूमाजन्यायां निरुक्तहेतोर्व्यभिचारो दुर्वार एवे
ति वाच्यं ॰ यद्धर्मविशिष्टे इत्यस्य किंचिद्धर्मावच्छिन्नविशेषणतापन्नयद्धर्मविशिष्टे इत्यर्थकत्वोपगमात् ॰ विशेषणसमान
कालतया विशेष्यविषयकत्वं समानकालीनत्वसंबंधेन यद्विशेषणाविशिष्टविषयकत्वरूपं विवक्षितं ॰ धूमकालीनवह्नित्वा
वच्छिन्नस्य यत्र साध्यता पक्षतावच्छेदकता वा तत्र समानकालीनत्वं प्रकारो न तु संसर्गः । अन्यथा तल्लिंगकानुमिताववतत्स
मानकालीनत्वस्य साध्यांशे संसर्गतोपगमात् ॰ अन्यत्र तत्संसर्गताया अप्रामाणिकत्वादिति केचिदूचुस्तन्मतमुपन्यस्यति
संसर्गेति ॰ अन्यत्र समानकालीनत्वस्य संसर्गतेत्यत्र विवादाद् दस्वरसः । उक्तकल्पे पर्वतत्वावच्छिन्नविशेषणतापन्नधूम

स्य धूमसमानकालीनवह्निधर्मितावच्छेदकतापन्नस्य यत्र पक्षतावच्छेदकघटकता तत्र व्यभिचारो दुर्वारः। सुंदरनीलपर्वतो वह्निमानि
त्यादौ नीलादेः सौंदर्यधर्मितावच्छेदकताया आनुभविकत्वेनोक्तनियमासिद्धेः। भवतु वा तथाविधज्ञानांतरे नीलसौंदर्यादेर्विशेषण
विशेष्यतावच्छेदकभावानापन्नस्यैव पर्वतत्वाद्यवच्छिन्ने प्रकारता· तादृशवाक्यजन्यशाब्दबोधे तु प्रथमकर्मधारयलभ्य नीलपदार्थ
विशिष्टपर्वतादौ सुंदरादिपदार्थस्य कर्मधारयांतरलभ्यत्वादन्यथेन नीलादेः सुंदरादिपदार्थधर्मितावच्छेदकतापन्नस्यैव विधेयधर्मिता
वच्छेदकतया भानात्· न तादृशनियमः। न चानुमितावेव किंचिद्विशिष्टविशेषणतापन्ने कोद्देश्यतावच्छेदकस्यापरोद्देश्यतावच्छेद
कधर्मितानवच्छेदकत्वनियम इति वाच्यं· व्याप्यवत्तापरामर्शे हेतुधर्मितावच्छेदकतया पक्षतावच्छेदकस्य यादृशं भानं अनुमितावपि
तस्य साध्यधर्मितावच्छेदकतया तादृशभानमित्यनुभवस्य दुरपह्नवतया यत्र परामर्शे धूमकालीनवह्निधर्मितावच्छेदकतापन्नधू
मस्यैव पर्वतत्वविशिष्टविशेषणतापन्नस्यालोकादिहेतुधर्मितावच्छेदकता तत्रानुमितावपि धूमस्य तादृशस्यैव साध्यधर्मि
तावच्छेदकताया अवर्जनीयत्वात्· न चोक्तनियमाभावेपि न व्यभिचारः। इतरधर्मितावच्छेदकतानापन्नपक्षधर्मधर्मितावच्छेदकीक
स्येति विवक्षणीयत्वात्· धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमावच्छिन्नपक्षकस्थले विधेयधर्मितावच्छेदकतापन्नधू

मस्यैव धूमकालीनत्वेनभासमानवह्निधर्मितावच्छेदकतयाविवक्षणीयहेतोरत्रासत्त्वादिति वाच्यं· एवं सति धूमवान्पर्वतो धू
मकालीनवह्निमानालोकादित्यादौ पक्षतावच्छेदकधूमस्य हेतुधर्मितावच्छेदकतापन्नस्यैव साध्यधर्मितावच्छेदकतया व्यभिचारा
भावेन विधेयतावच्छेदकावच्छिन्नत्वनिवेशस्य कथितव्याहृत्यसंगतेः। अत्र चोक्तव्याख्यायामपि धूमकालीनवह्निधर्मितावच्छेद
कतापन्नधूमवत्पर्वतवृत्तित्वादिनावह्न्यादेर्यत्र साध्यतातादृशानुमितौ इतरधर्मितावच्छेदकत्वेन धूमाभानात्तत्र व्यभिचारवारणा
य विधेयतावच्छेदकावच्छिन्नत्वनिवेशस्यावश्यकत्वेपि यत्समानकालीनत्वे यसंशास्य वैयर्थ्यस्य दुर्वारत्वात्· धूमघटितपक्षताव
च्छेदकावच्छिन्ने विधेयतावच्छेदकावच्छिन्नावगाहिन्यामनुमितौ स्वलिंगकार धूमस्य हेतुधर्मितावच्छेदकतापन्नस्यैव विधेयधर्मि
तावच्छेदकतया साध्यतावच्छेदकघटकधूमस्यान्यधर्मितानवच्छेदकत्वेपि तस्य विधेयतावच्छेदकावच्छिन्नधर्मितावच्छेदकत्वासं
भवेन व्यभिचारानवकाशात्· इत्यनुशयेन प्रकारांतरेण हेतुं व्याख्यातुमुपक्रमते अथवेति· व्यावृत्तत्वं· विलक्षणत्वं· धूमकाली
नवह्नित्वाद्यवच्छिन्नसाध्यकानुमितेरपि केनचिद्रूपेण कुतश्चिद्विलक्षणतया न व्यावृत्तिसंभव इति समानकालीनत्वग्रहजन्या
नुमितिव्यावृत्तधर्मवत्त्वरूपतया तद्व्याकुरुते तच्चेति· समानकालीनत्वेति· किंचिद्धर्मसमानकालीनत्वग्रहाजन्यत्वमित्यर्थः।

लिं० गा०
११९

119

विशेषणत्वविशेष्यत्वयोर्वैयर्थ्यमाशंक्याह । विशेषणेति । धूमेद्वयोपदर्शक इति । विशिष्टपदार्थघटकधर्मयोस्तद्धर्मत्वेन बोधक इत्
यर्थः । समुदितार्थमाह तथा चेति । एकस्मिन् धर्म इति । यद्धर्मे यद्धर्मसमानकालीनत्वग्रहाजन्याया अशाब्द्यास्तद्धर्मे तद्धर्मसमानकाली
नत्वबुद्धिरित्यर्थः । आलोककालीनवह्निमानयं वह्निमान् धूमात् । धूमकालीनालोकवानयं वह्निमान् धूमानित्यादेः संग्रहाय स
मानकालीनत्वप्रतियोग्यनुयोगिधर्मयोर्विशिष्योपादानं । रूपान्तरेण धूमवह्न्योर्यत्र समकालीनतानिरूपकतया पक्षतावच्छेदक
प्रवेशः । धूमत्वावच्छिन्नलिंगकवह्नित्वावच्छिन्नसाध्यकतादृशानुमितिसंग्रहाय यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नसमकालता
ग्रहाजन्येत्यादि विवक्षणीयं । एवं चायं धूमकालीनवह्निमान् धूमादित्यादेरपि संग्रहः । धूमकालीनवह्नित्वावच्छिन्ने धूमकालीन
त्वावगाहिन्यास्तादृशानुमितेस्तादृशवह्नित्वावच्छिन्ने धूमकालीनत्वग्रहाजन्यत्वात् । धूमकालीनवह्निमानयं पर्वतो वह्निमान् धू
मादित्याद्यनुमितिस्त्वगत्या पक्षाद्बहिर्भावनीया । समानकालीनत्वविषयत्वाप्रयोज्यसमानकालीनत्वविषयतां निवेश्य तादृशा
नुमितिसंग्रह एकस्मिन् धर्म इत्यादेर्वैयर्थ्यमिति । ननु धूमरूपपक्षतावच्छेदकावच्छिन्ने साध्यवैशिष्ट्यावगाहिन्यामन्यलिंगकानुमितौ व्य
भिचारः । पक्षतावच्छेदकोपलक्षितसाध्यवैशिष्ट्यावगाह्यनुमितितो वैलक्षण्याय तस्याः साध्यांशे पक्षतावच्छेदकसमानकाली

११९

नत्वभानस्यावश्योपेयत्वात्. तज्ज्ञानकक्षानेचतद्भानात् इत्यत आह साध्यस्येति. मानाभावादिति. पक्षतावच्छेदकसाध्ययोरेकत्र
द्वयमितिरीत्यैवभानं न तु धर्मापि विशिष्टवैशिष्ट्यमितिरीत्या तथाभानेपि पक्षतावच्छेदकावच्छिन्नत्वमेव तत्र भासते. ननु तत्समान
कालीनत्वं। अवच्छिन्नत्वं तु समानकालीनत्वादिनियतं स्वरूपसंबंधविशेषः। अतो विभिन्नकालीनपक्षतावच्छेदकविशिष्टसाध्यवैशि
ष्ट्यानुमितेर्नभ्रमात्वप्रसंगो ह्यनुभवबलेन चानुमितेः साध्यांशे लिंगसमानकालीनत्वावगाहितासिद्धिरिति भावः। ननु धूमकालस्य यत्र प
क्षतावच्छेदकता तत्रत्यायामवच्छेदकावच्छेदेन साध्यवत्त्वावगाहिन्यामन्यलिंगकानुमितौ व्यभिचारः। साध्यांशे धूमकालावच्छिन्न
त्वात्मकतत्कालीनत्वावगाहिन्यास्तादृशानुमितेस्तज्जन्यत्वादित्यत आह नवीननय इति अन्यदेतदिति. एतदेत. कालावच्छिंत्व न्न
भानं. तत्कालीनत्वभानादन्यदित्यर्थः। तत्रकालीनत्वघटकाधेयतातो वच्छिन्नत्वस्य भेदादिति भावः। शाब्दधीवारणायेति. अन्यथा
दंडादिसमानकालीनत्वावगाहिन्या अपितादृशशाब्दबुद्धेस्तज्जन्यतया व्यभिचारापत्तेरिति भावः। यद्यपि पक्षतावच्छेदकविशि
ष्टसाध्यवैशिष्ट्यविषयकानुमितावपि तादृशशाब्दबुद्धावपि संसर्गतया विशेष्यतावच्छेदकसमानकालीनत्वभाने मानाभावः।
मनुयागमनादिरूपविधेयसमानकालीनत्वस्य दंडादेर्बोधने पितादृशबुद्धेस्तदंशे समानकालीनत्वावगाहि योग्यताज्ञानजन्य

लिं॰ ग॰
१२०
120

तथा न निरुक्तहेतुमत्त्वं॰ तथाप्येकपदार्थेऽपरपदार्थवत्त्वं न योग्यता। किंतु विशेषणे विशेष्यनिष्ठाभावाप्रतियोगित्वमिति मतेन मनुपज
न्यसमानकालीनत्वबुद्धेर्विशेष्यांशे समानकालीनत्वग्रहाजन्यत्वान्न द्वारणायायाशाद्दत्वनिवेशनमावश्यकं तुल्यन्यायत्वेयिति॰
शाद्दबुद्धिवदुपनीतभानस्याप्यविषयाऽजन्यत्वेत्यर्थः। उपनीतभानवारणाय॰ धर्म्यंतरग्रहितसमानकालीनत्वस्यान्यत्रोपनय
प्रत्यासत्तिजन्यज्ञानवारणाय॰ स्मरणात्मकसमानकालीनत्वभानस्य च समानधर्मिकतदनुभवाधीनतया न तत्र व्यभिचार इति
ध्येयं॰ नन्वतीतादिलिंगज्ञानजन्यानुमितौ लिंगस्याव्यवहितपूर्ववर्तिताविरहेणाजनकतया व्यभिचारस्तत्रापि समानकाली
नत्वभानविरोधिज्ञानासत्त्वेऽसतोपि तस्य भानादित्यत आह एतन्नयुचेति॰ अतीतत्वाग्रहेपि॰ साध्यहेत्वोरसमानकालीनत्वा
ग्रहेपि॰ अपि नातद्रूहध्यतिवंधकवशाद्यथानानुमितिरिति दृष्टांतः सूचितः। नानुमितिरिति॰ लिंगद्वयकारणाविरहान्नसमान
कालीनत्वावगाह्यनुमितिरित्यर्थः। समानकालीनत्वानवगाहिनी पुनरनुमितिर्भवतु वा मा वोभयथापि न प्रकृतेक्षतिरितिध्ये
यं॰ तत्रानुमितिं स्वीकृत्य हेतौ विशेषणांतरप्रक्षेपेण व्यभिचारं वारयतो मतमाह कालेऽत्रेति॰ अत्र तत्कालीनत्वपरिरे॰ वर्तमा
नः। प्रकृतबुध्यव्यवहितपूर्वः। नन्वेवमप्यतीतादिलिंगाधिकरणत्वेन स्वाव्यवहितप्राक्कालविषयिण्यामनुमितौ व्यभिचा

१२०

रोदुर्वार एवेत्यत आह तद्वैशिष्ट्येति । तादृशकालस्य धर्मविशिष्ट्यांशे इत्यर्थः । धूमादिघटकस्य धर्मे तादृशकालवृत्तित्वस्य वास्तवस्य नि
वेशे नैयोपपत्तौ अन्यांशप्रवेशो नालमित्याह वर्तमानत्वं वेति । अव्यवहितप्राक्कालवृत्तित्वं वेत्यर्थः । धर्मविशेषणं । यत्पदोपादेयध
र्मविशेषणं । कालीनत्वघटके स्वाव्यवहितप्राक्काले वा तत्त्वनादृशधर्मवत्त्वं विशेषणमिति तु परमार्थः । ज्ञायमानलिंगकरणता

भि

मते कारणविरहेण तत्रानुमित्यसंभवात् तद्वारकविशेषणदानं न युक्तमित्यस्वरसः । स्वाव्यवहितप्राक्क्षणावच्छिन्नधूमाद्यवच्छि
न्नविशेष्यकानुमितित्वमेव धूमादिजन्यतावच्छेदकमिति तदवच्छिन्नविशेष्यकतत्कालीनत्वावच्छिन्नसाध्यकान्यलिंगकानु
मितावपि तज्जन्यत्वस्याव्याहततया तत्र व्यभिचारवारणाय विशेषणान्तरप्रवेशो व्यर्थ इति वदतां मतमाह केचित्त्विति । विशेषणपद
स्य यथाश्रुतपरत्वे धूमानवच्छिन्नविशेष्यकान्यलिंगकवह्न्यनुमितेर्धूमजन्यतावच्छेदकोक्तरूपानाक्रान्ततया व्यभिचार इति तद्वाच
द्वे विशेषणमिति । अतीतादिधूमावच्छिन्नविशेष्यकतत्कालीनत्वावच्छिन्नसाध्यकानुमितौ व्यभिचारवारणाय विशेष्यतावच्छेदके स्वा
व्यवहितप्राक्क्षणसत्त्वमधिकं प्रवेश्य समुदितार्थमाह तथा चेति । सतः । स्वाव्यवहितप्राक्काले सतः । नन्वेवं वर्तमानतादृशविशेष्यताव
च्छेदकावगाहित्वमेव हेतुरस्तु । धूमकालीनत्वानवगाहिन्या अपि वर्तमानधूमावच्छिन्नविशेष्यकानुमितेर्दर्शितधूमजन्यतावच्छे

लिं०ग्र०
१२२
121

दकत्त्पाक्रांततया व्यभिचारानवकाशात्‌· किं समानकालीनत्वावगाहित्वानुसरणेनेत्यत आह समानेति· ताद्रूप्यविषयकत्वे· तत्समा
नकालीनत्वग्रहाजन्यानुमितेस्तद्वगाहित्वे· विशेष्यतावच्छेदके ति· विशेष्यतावच्छेदकतद्धर्मेत्यर्थः। प्रयोजकत्वसूचनायेति· तथा च तल्लिं
गकानुमितेस्तद्जन्यत्वे तत्कालीनत्वावगाहितानियामकाभावेन तद्वगाहितानियमो न स्यादिति विषयपरिशोधकतर्कस्फोरणा
येव तदुक्तिर्न तु हेतौ तत्प्रवेश इति भावः। न च समानकालीनत्वविषयताया लिंगजन्यतानवच्छेदकत्वे तज्जन्यताया न तत्प्रयोजकत्वसं
भव इति तस्यास्तथात्वमावश्यकं। तथा च प्रतिबंधकवशेन विद्यमानविशेष्यतावच्छेदककालीनत्वमवगाहमानाया अनुमितेस्तज्ज
न्यतावच्छेदकानाक्रांततया व्यभिचारवारणाय समानकालीनत्वावगाहितायां हेतुघटकत्वमावश्यकमिति वाच्यं· समानकालीन
त्वविषयताया लिंगजन्यतानवच्छेदकत्वेपि तद्घटितसामग्रीघटकविरोधिज्ञानाभावजन्यतावच्छेदिकायां तस्यां तद्घटितसामग्र्याः
प्रयोजकत्वसंभवात्‌· एतन्मते चासति विरोधिनि अविद्यमानपक्षतावच्छेदकसमानकालीनत्वमपि नियमेनानुमितिविषयः। प्रयो
जकसत्वात्प्रमात्मकादपि परामर्शादेतादृशानुमितिरिष्टैव· अत्र चैवं विशेषणपदस्य विद्यमानविशेषणमात्रपरत्वे नाप्युप
पत्तेर्विशेष्यतावच्छेदकपरतयोपवर्णनमाकिंचित्करं· विद्यमानधूमादिविषयकानुमितित्वस्यैव धूमादिजन्यतावच्छेदकत्वसंभवा

१२१

द्विधमानधूमादिसाध्यकानुमितेरपि धूमादिजन्यत्वसंभवेन व्यभिचारानवकाशात्। नचैवं तत्साध्यकाद्यनुमितेरपि तत्कालीनता
वगाहितास्यात्तत्प्रयोजकतज्जन्यत्वसत्वादिति वाच्यं· तदवच्छिन्नविशेष्यकत्वप्रयोजकतल्लिंगकपरामर्शत्वदवच्छिन्नविशेष्यकप
रामर्शान्यतरघटितसामग्रीजन्यत्वसहितस्यैव तज्जन्यत्वस्य तत्कालीनत्वभानप्रयोजकतया तिप्रसंगवारणसंभवात्· एवं पक्ष
तावच्छेदकसमानकालीनत्वस्यानुमितिविषयत्वे धूमादेः पक्षतावच्छेदकत्वेनैव धूमकालीनवह्निसिद्धिनिर्वाहात् लिंगोपहित
भानस्य निर्युक्तिकतापत्तिरित्यस्वरसबीज· कारणतावच्छेदकरूपावच्छिन्नजन्यस्यैव व्यापारतेति नियमाभिप्रायेण शंकते नचेति·
परामृश्यमाणत्वेनेति। विषयनिष्ठयावद्धर्मस्य ज्ञानकारणतावच्छेदकत्वे मानाभावादिति भावः। नियमं निराकुर्वन्समाधत्ते· व्या
पारमिति· रूपांतरेण· विषयत्वादिना· ताद्रूप्येण· परामृश्यमाणत्वेन· विरोधाभावात्· बाधकाभावात्· मतांतरमाह लिंगत्वेनैवे
ति· एवकारेण परामर्शस्यावच्छेदकत्वव्यवच्छेदः। तर्हि परामृश्यमानात्कुतो नानुमितिरित्यत आह परामर्शस्त्विति· तथा च व्या
पाराभावान्नातिप्रसंग इति भावः। अत्रोक्तनियमसत्वे लिंगत्वेनापि न कारणतासंभवः। तेन रूपेणापि परामर्शहेतुताया अप्रामा
णिकत्वादित्यस्वरसः। मूलेन लिंगं तद्धेतुरिति· व्यभिचारेण नानुमितिहेतुरित्यर्थः। व्यापारेति· व्यापारपदं स्वव्यापारपूर्ववर्तिता

लिं०ग०
१२२
122

परं· पूर्ववर्त्तित्वं च स्वस्य पूर्ववर्त्तिता· तथा च स्वस्य स्वव्यापारस्य· नियतान्यवहितपूर्ववर्त्तित्वविरहादित्यर्थः। तदुच्छेत्तुरिति· अतीतादि
लिंगज्ञानजन्यानुमित्यव्यवहितपूर्ववर्त्तत्वस्यार्थः। तदा· उक्तानुमित्यव्यवहितपूर्वकाले· तस्य· विद्यमानलिंगांतरस्य· कारणताया
हकाभावादिति· अनुमितेरज्ञायमानलिंगांतरसमानकालीनतानवगाहित्वेन हेतुत्वसिध्योक्तानुमानस्य तत्कारणत्वाग्राहकत्वा
दिति भावः। ननु दर्शितानुमानात्परामृश्यमाणलिंगस्य हेतुतासिद्धावपरामृश्यमाणसाधारणलिंगत्वस्यैव तत्कारणतावच्छेदक
त्वोपगमाद् परामृश्यमाणस्यापि कारणत्वं दुर्वारमेवेत्याशंकायां दीधितिकृत्तस्याकारणत्वं व्यवस्थापयति विनिगमनाविरहाद्
ति· लिंगतत्परामर्शयोः कस्य वा कारणत्वं कस्य वा तदवच्छेदकत्वमित्यत्र त्यादिः। विशेषणत्वं· परामर्शकारणताग्रहे विषयित
या विशेषणतया भासमानत्वं· तस्य· लिंगस्य· इदं· एतद्बीजद्वयं· अज्ञायमानेति· तस्याविषयतया परामर्शानुपहेतुतावच्छेदका
नाक्रांततया विशेषणत्वस्य चासंभवादिति भावः। यद्यपि तदा तस्य परामर्शेऽपि विनिगमनाविरहेण परामर्शस्य हेतुतावच्छेद
कत्वे कालांतरीणपरामर्शविषयतयैव कारणत्वसंभवः। विशिष्टकारणताकूटसत्तायाः फलोपधानप्रयोजकत्वेनातिप्रसंग
वारणसंभवात्· तत्कालीनपरामृश्यमानत्वेनाहेतुत्वात्· एवं तत्कालीनानुमित्युपधायकपरामर्शविद्यमानलिंगस्याविशेष

१२२

णत्वेपिलिंगपरामर्शसामान्येऽनुमितिसामान्यकारणताग्राहकप्रमाणविषयकालांतरीणपरामर्शे विद्यमानलिंगस्य विशेषणतया
द्वितीययुक्त्यापितस्य कारणत्वमावश्यकमितितदातस्यापरामर्शाद्विषयादिमूलकमसंगतं· तथापियत्रविशिष्टस्यनियतप्राक्सत्वंकार
णताघटकंतत्रैवविशिष्टसत्वंफलोत्पत्तिप्रयोजकं।अत्रचनतादृशस्यप्राक्सत्वनियमइतिविशिष्टापेक्षणीयताप्रयोजककारणता
संभवोलिंगस्येतितत्कालपरामृश्यमानत्वेनहेतुत्वंवाच्यं·एवंविशिष्टकारणताग्राहकप्रमाणेनविशेष्यविशिष्टस्यैवविशेषणस्यनि
यतपूर्ववर्त्तिताघटितंकारणत्वंप्रत्याय्यते·तथाचकालांतरीणपरामर्शविषयतामादायनविद्यमानलिंगस्यतादृशकारणतानि
र्वाहइत्यत्रमूलतात्पर्यं·नचैवंसतिपरामर्शाविषयस्यकारणताग्राहकाभावकथनविरोधःलिंगमात्रकारणताबाधकव्यभिचारस्यै
वसत्वादितिवाच्यं·कारणताग्राहकपदेनाव्यभिचारनिर्वाहकस्यतत्कारणतावच्छेदकवैशिष्ट्यस्यविवक्षितत्वात्·विशेषणतावच्छेद
कावच्छेदेनापीति·विशेष्यवैशिष्ट्यमनंतर्भाव्यकेवलविशेषणतावच्छेदकावच्छेदेनापीत्यर्थः।साध्यव्याप्यत्वादिकमिति·साध्यव्या
प्तिविशिष्टपक्षधर्मताबलमित्यर्थः।तदप्रसिद्धाविति·साध्यव्याप्यत्वाप्रसिद्धावित्यर्थः।इदमुपलक्षणं·व्याप्याद्यिभ्रमविषयादप्य
नुमित्युत्पत्त्याव्याप्यादिविशिष्टविशेषितस्यकारणत्वासंभवेनव्याप्तेर्विषयनिष्ठविशेषणतायाः××मवच्छेदकत्वासंभवोपिद्रष्टव्यः॥

लिं०ग०
१२३
123

वस्त्विति॰ वस्तुमात्रस्यैव परामर्शविषयतावच्छेदकाधिकरणत्वाभावत्वादिति भावः। इदमुपलक्षणं॰ परामर्शविषयतावच्छेदकवत्ज्ञा
नत्वेनाहेतुत्वात्तदवच्छेदकवत्वस्यापि विशेषणतावच्छेदकत्वाभावो बोध्यः। इदं॰ उक्तलिंगत्वेन हेतुत्वं॰ तथा॰ तेन रूपेण॰ अन्यथा॰ तेन रूपे
णान्वयव्यतिरेकविरहेपि जनकज्ञानविषयतावच्छेदकत्वेन हेतुत्वे॰ अतीतादिलिंगज्ञानादनुमित्युपधापे परामृश्यमानत्वेन हेतुता
संभवतीत्यत आह नवेति॰ परामृश्यमाणत्वं॰ ज्ञायमानत्वमात्रं॰ व्याप्तिपक्षधर्मताभ्यांज्ञायमानत्वंवा॰ आद्यं दूषयति प्रमेयत्वा
दिनेति॰ द्वितीयं दूषयति व्याप्तीति॰ लाघवात्॰ अवच्छेदकलाघवात्॰ व्याप्तिपक्षताज्ञानस्य हेतुतावच्छेदकत्वे धर्मिणोधिकस्यानि
वेशनगौरवादिति भावः। ननु व्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयताविशिष्टज्ञानत्वेन हेतुत्वेविशेष्यविशेषणभावेवि
निगमनाविरहप्रयुक्तितादृशविषयतासंबंधेनज्ञानस्य कारणतावच्छेदकत्वमेवोचितमित्याशंक्य लिंगकरणतापक्षे दोषांतरमाह किं
चेति॰ गौरवादिति॰ विशिष्टसत्वस्य विशेषणविशेष्योभयसत्वगर्भत्वादितिहृदयं॰ इतोपि॰ कालांतरे प्रतिबंधकाभावविशिष्टात् प्रति
बंधकसमवहितात् कार्यापत्तितोपि न कारणतावच्छेदकत्वं॰ अपितु सहकारित्वमेव॰ अपिकारेणाविनिगमनाविरहोपि सूचितः।
अत्रापत्तिवारणाय विशिष्टसत्वमेव प्रयोजकमन्यथानुपपत्त्यावाच्यं तत्राह परामर्शेति॰ तत्र च॰ परामर्शसत्वस्य प्रयोजकत्वे च॰ ना

१२३

तिप्रसंगशंकापीति· परामर्शशून्यकालेनानुमितिप्रसंगशंकापीत्यर्थः। एवं सति विषयेंद्रियसंयोगस्य हेतुत्वकल्पे विषयसंयुक्तेंद्रियस्या
पि विनिगमनाविरहाद्धेतुत्वमित्यपि न स्यात् तत्रापि संयोगस्य कारणतावच्छेदकत्वे कालांतरे संयुक्तादिंद्रियात्संयोगविरहदशायां प्रत्यक्षा
पत्तिः। संयोगविशिष्टसत्वस्य प्रयोजकत्वाभिधाने च लाघवादावश्यकत्वात् च संयोगसत्वस्यैव तथात्वमुचितमिति विनिगमकसंभवादि
तींद्रियहेतुरेव न स्यादित्याशंकते अथेति· यदि न स्यात्तामिति· तथा चेंद्रियनाशे संयोगसत्वेपि प्रत्यक्षानुत्पादानुरोधेन तस्य हेतुत्वमिति
भावः। इंद्रियनाशे ततोद्वितीयक्षणे तत्संयोगोपि नश्यति· अधिकेकक्षणे प्रत्यक्षोत्पाद इष्यत एवेत्याशंक्याह स्यादेवेति· व्यवधानं अन्य
थासिद्धिः। तादृशीं हेतुतांव्यवस्थापकयुक्तिं प्रकृते निराकरोति· नु चेति· लिंगशून्ये धर्मिणि भ्रमात्मकपरामर्शसत्वेपि लिंगव्यतिरेका
द्भ्रमानुमितिव्यतिरेकश्च्यनुमितिविशेषे लिंगस्यान्वयव्यतिरेकौ संभवत इति अनुमितिमात्रत्वस्य त्र मात्रपदोपादानं· तौ· अन्वयव्य
तिरेकौ· अतींद्रियस्येति· तत्परामर्शजनकेंद्रियसंयोगरहितस्येत्यर्थः। तेनातीतादिपरिग्रहः। न परामर्शो व्यापार इति· तादृशस्य परामर्श
विषयीभूतस्यापि· तदजनकत्वात्· परामर्शस्य तद्दशालौकिकत्वाभावादिति भावः। ननु विशिष्टसत्वं· विशेषणावच्छिन्नविशेष्यनिरूपि
तविलक्षणाधिकरणत्वं न विशेषणसत्वगर्भं· अपितु विशेषणसत्वानियतमेव· तथा चाविशिष्टसत्वस्य प्रयोजकत्वे च विशेषणसत्व

स्यतदवश्यकत्वं तथा च पूर्वोक्तिपुंके ज्ञानस्य जनकतावच्छेदकत्वमेव युक्तमित्याशंक्य दोषांतरमाह चैत्रेणेति परामर्शहेतुतामते तत्पुरु
षीयत्वानिवेशेपि अतिप्रसंगमुद्धरति इच्छेति इच्छादिकार्यमात्रके पृथासंख्यं ज्ञानादिकारणमात्रकस्यान्वयो बोध्यः। एकार्थप्रत्यासत्त्या
सामानाधिकरण्यप्रत्यासत्त्या नातिप्रसंगशंकायामिति कारणतावच्छेदकसंबंधेन स्वाधिकरण एव कारणस्य कार्यतावच्छेदकसंबंधेन
कार्योत्पत्तिप्रयोजकत्वादिति भावः। मूले व्यक्त्यैकत्र मिलितविद्यमानान्यव्यक्तिरित्यर्थः। तथा च विद्यमानपक्षे तन्मात्रवृत्तिरूपादिव्यक्तेरेव
लिंगत्वावच्छिन्नस्य विद्यमानत्वसंभवात् पक्षस्याविद्यमानताऽभिमानात्तत्पक्षपरिग्रहः। भाविन्येत्यादिना यत्र पक्षस्य भावित्वमतीत
त्वं वा तत्र तत्पक्षवृत्तित्वघटितलिंगस्य विद्यमानत्वासंभवो योक्तस्तत्र विद्यमानस्य लिंगत्वाप्रसक्तेः यदि चेत्यसंगतमत उक्तं विद्यमानलिंगा
संभवं दूषयन् यदि चेत्यादिकमवतारयति दीधिताविति अकृतादिभेदविशिष्टकृदान्यानिर्वह्निभेदादित्यर्थः। निर्वह्न्यादिसामान्यभेदस्य वह्न्या
धनतिरिक्ततया विशिष्टविशेषभेदानुधावनं मूले वर्तमानवह्न्यनुमानापत्तिरिति अपरामृश्यमाणस्याहेतुत्वेन विद्यमानलिंगस्याप
या रामर्शदशायामनुमितिमपलप्य तत्परामर्शदशायामेवानुमितेः स्वीकरणीयतया तादृशविशिष्टपक्षानुयोगिकसाध्यवैशिष्ट्यस्यानुमितौ भाने
न तत्समानकालीनो विद्यमानवह्निरनुमितौ भासत इत्यर्थः। वस्तुगत्यातीतानागतहेतुकानुमितौ अतीतानागतलिंगज्ञानजन्यत्वादतो

तानागतवह्निरेवसिध्यति॰यदितत्रव्यभिचारवारणार्थमुक्तस्यवर्त्तमानलिंगस्यहेतुत्वमादर्त्तंतदाज्ञायमानस्यैवतस्यहेतुत्वंस्वीकरणीयमितितत्
कालीनोवर्त्तमानोऽपिवह्निर्भासतामितिभावः।वर्त्तमानस्यप्रागभावादेर्लिंगत्वेऽपिकथितवर्त्तमानवह्न्याद्यनुमानापत्तिताद्वस्थ्यादृश्येसादिशंका
याअसंगतिरतस्तादृशापत्तिमुद्धरतिदीधितौतस्यचेति॰विरोधिकालावच्छेदेनेति॰यदायत्रधूमप्रागभावस्तदुत्तरंतत्रवह्निरितिविभिन्नकाल
मंतर्भाव्यव्याप्तिग्रहादित्यर्थः।नतत्कालीनसाध्यसिद्धिः।नवर्त्तमानप्रागभावादिकालीनसाध्यस्यानुमितिरित्यर्थः।विभिन्नकालाघटितव्याप्ति
विषयकपरामर्शस्यैवहेतुसमानकालतयासाध्यभासकत्वादितिभावः।धूमनिश्चयंविनाऽनुमितेरसिद्धिरतोमूलेऽतीतभाविदिनवृत्तितयानिश्चिता
दिति॰अतीतदिनावच्छेदेनभाविदिनावच्छेदेनवापक्षवृत्तितयानिश्चितादित्यर्थः।धूमस्यावर्त्तमानतयानिश्चयेप्रागभावध्वंसयोर्निश्चयसंभ
वेनलिंगत्वसंभवात्॰वर्त्तमानतयासंदिग्धात्इति॰पक्षवृत्तितयाऽनिश्चितत्वेनप्रागभावादेरलिंगत्वमुक्त्वापक्षवृत्तितयाऽज्ञातत्वेनालिंगत्वमा
ह किंचेति॰भूतभाविवर्त्तमानत्वाविषयात्॰पर्वतेवर्त्तमानध्वंसप्रागभावप्रतियोगित्वाविषयकात्॰तत्कालावच्छिन्नपर्वतवृत्तित्वाविषयकाच्चे
त्यर्थः।धूमस्यावर्त्तमानत्वलाभायवर्त्तमानत्वाविषयकत्वाभिधानं॰तस्यवर्त्तमानत्वेवर्त्तमानत्वाभानस्यानुमित्यविरोधित्वात्॰धूमप्रागभावाद
रलिंगत्वस्यविचारासहत्वात्॰अपिचेत्यादिदूषणंमूलकृतोऽनिर्भरंदर्शयति॰अपिचेत्यादीति॰अभ्युपगमवादः।धर्मिभेदेऽपिवैयर्थ्याभ्युपगमेनो

क्तिः। साध्यसामानाधिकरण्यावच्छेदकत्वरूपायाः व्याप्तेः धूमप्रागभावत्वादेः सामानाधिकरण्यानवच्छेदकत्वे धूमप्रागभावादावसत्वसंभवे
नाहनियतसामानाधिकरण्यरूपाया इति शंकते धूमप्रागभावत्वादिकमिति नावच्छेदकमिति गौरवेण व्याप्यतानवच्छेदकमित्यर्थः। तथा च
न तदवच्छिन्नं लिंगमिति भावः। किंचातइति धूमप्रागभावत्वादेर्लिंगतानवच्छेदकत्वेपि व्याप्तिपक्षधर्मतावत्वरूपलिंगत्वेन प्रागभावादेरनु
मितिहेतुतायाः दुर्वारत्वादिति भावः। ज्ञोद्धातत्वेस्यापि लिंगतावच्छेदकत्वं व्यवस्थापयति नचैतद्युक्तमिति परिशेषेण धूमप्रागभावाद्यव
च्छिन्नधूमत्वावच्छिन्नत्वव्याध्यसहितावच्छिन्नत्वहेतुना प्रागभावादिनिष्ठव्याप्तेर्धूमप्रागभावत्वाद्यवच्छिन्नत्वसिध्या तस्यैव धूमप्रागभाव
त्वादेरेव तथात्वात्तत्तथात्वसिद्धेः। व्याप्यतावच्छेदकत्वसिद्धेरितियावत् अन्यथा व्याप्तेरवच्छिन्नत्वानियमे व्याप्तिः नाव्यभिचरितसामानाधिकर
ण्यं किंतु स्वव्यापकसाध्यसामानाधिकरण्यं तथा च धूमप्रागभावादिनिरूपिताव्यापकता न प्रसिध्यतीति न तस्य व्याप्यतेति शंकते अथेति अ
भाववत्वादिकमित्यादिना स्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावपरिग्रहः। विशेषणमिति व्यापकताघटकसा
मानाधिकरण्यप्रतियोगिनि विशेषणमित्यर्थः। व्याप्यवच्छेदकइति व्यवह्रियत इति शेषः। एवं च व्याप्तेः स्वरूपसंबंधात्मककिंचिदवच्छिन्नतायाः अप्रा
माणिकत्वेपि न धूमत्वादीनां व्याप्यतावच्छेदकत्वानुपपत्तिः। न चेति धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं च न प्रतियोगिताव

छेदकमित्यन्वयः।तादृ×तथाच×शप्रतियोगितात्वावच्छिन्नाभावत्वरूपव्यापकत्वस्याप्रसिद्धिरितिभावः।गौरवावधिंदर्शयतिअपिलिखितीति·अतएव·
प्रमेयधूमत्वविशिष्टसमानाधिकरणाभावप्रतियोगितात्वादेर्गौरवेणाप्रतियोगितानवच्छेदकत्वादेव·नहीति·स्वसमानाधिकरणाभावप्रति
योगितात्वस्यगुरुतयानवच्छेदकत्वेनस्वस्वनिष्ठधर्मयोर्व्याप्यत्वतदवच्छेदकत्वाभावइत्यर्थः।जातिसमनियतोपाधिगुणानांगोत्वजलत्वादि
समनियतानांसास्नास्नेहादीनां·व्याप्यत्वेन·गोत्वजलत्वादिव्याप्यत्वेन·गोत्वादिवृत्तिधर्माणां·गोत्वत्वादीनां·अवच्छेदकत्वेन·व्याप्यतावच्छे
दकत्वेन·स्वरूपतएवगोत्वादीनांप्रतियोगितावच्छेदकशरीरेनिवेशासंभवेनगोत्वत्वादीनामनिवेशात्·आपत्तितुंचेति·नीलधूमत्वाद्य
वच्छिन्नेपिस्वयंव्याप्त्युपगमात्·आधिक्येनैवनीलधूमादितिप्रयोक्तुर्निग्रहस्यवक्ष्यमाणत्वात्·नइत्युक्तं·अस्यचवैयर्थ्यस्थलेव्याप्तिमनं
गीकुर्वित्यादिः।अतिरिक्तत्वात्·धूमादिसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नाभावव्यापकत्वात्·तन्न्यूनवृत्तित्वादितिभावः।ननु
तादृशप्रतियोगितात्वादेःपारिभाषिकमभावप्रतियोगितावच्छेदकत्वंनिवेशनीयं·तच्चगुरुधर्मसाधारणं·तथाचतादृशप्रतियोगितात्ववि
शिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नाभाववत्त्वादिरेवपर्यवसितंव्यापकत्वमितिसास्नास्नेहादीनांव्याप्यतोपपत्तिरित्यत
आहप्रमेयेति·यथाप्रमेयधूमत्वावच्छिन्नवह्न्याद्यव्यापकत्वार्थंप्रतियोगितानवच्छेदकेत्यत्रपारिभाषिकावच्छेदकत्वंनिवेशितं·तथाप्रतियोगि

लिं॰ग॰
१२६
126

तात्वेनतदवछेदकत्वं त्वेवोक्तपारिभाषिकावछेदकत्वविलक्षणे इत्यर्थः। तद्व्युदासः। धूमप्रागभावादेर्व्याप्यत्वव्युदासः। मूले लिंगविषयत्वमिति·
पाकरक्ते श्यामोयमिति धियः। श्यामत्वांशे भ्रमत्वमित्यभिमानेन· आयातं लिंगस्य प्रमानुमितिहेतुत्वमिति· लिंगप्रमाया नियतपूर्ववर्ति
त्वे लिंगस्यापि तथात्वादिति भावः। ननु लिंगस्य नियतपूर्ववर्त्तित्वेपि यत्सामान्य इत्याद्युक्तनियमात्· प्रमापरामर्श एव प्रमानुमितिहेतु
रावश्यक इति कथमेषाशंकेति शंकां निरसितुं भावं प्रकटयति· दीधितौ तत्रैवेति· अन्यथा· विशेषलघुरूपावच्छिन्नकारणांतरसंभवेपि गुरु
विशेषरूपेण सामान्यकारणस्यैव हेतुत्वे· विशेषकारणाविलयप्रसंगात्· ज्ञानादिविशेषकारणाविलयप्रसंगात्· ज्ञानादिविशेषप्र
त्यक्षानुमित्यादौ संनिकर्षपरामर्शादिविशिष्टमनोयोगत्वादिनैव हेतुतापत्या सन्निकर्षपरामर्शादीनामकारणत्वप्रसंगात्· तथा च लिंगत्वापे
क्षया विद्यमानलिंगज्ञानत्वस्य गुरुतया प्रकृते लिंगत्वेनैव कारणतौचित्येति भावः। मूले पक्षीयधूमकालीनत्वपर्यंतस्य साध्यांशे भाननिर्वाहाय यद्दा
पत्रेत्यादिसामान्यव्याप्तिराद्दता· तत्र यत्पदार्थस्याननुगततया पर्वते यदा धूमस्तदा तत्कालावच्छिन्नो वह्निरिति सहचारस्याग्रहीतत्वेन तादृशवह्निसिद्धिर्न भ १२६
वतीत्यालोच्याह सामानाधिकरण्य इति· कालविशेषस्य· स्वसमानाधिकरणधूमकालस्य· संबंधघटकतया· साध्यसंबंधघटकतया· तादृशकालावच्छि
न्नसंयोगः साध्यतावच्छेदकसंबंध इति भावः। एतादृशसंबंधेन पर्वते वह्निसिद्धावेव फलतः पर्वतीयधूमकालीनवह्निसिद्धिः। एतावतापि अतीतानाग

तपक्षीयधूमकालीनत्वभानमादायार्थांतरनिरासासंभवात् तत्तद्धूमकालस्यपक्षतावच्छेदकत्वंमूलकारोंगीकरिष्यति·मतांतरमाह यद्वायत्रेतीति·
व्याप्तिग्रहयत्नेनाक्षिप्ति·एवंचयदाधूमस्तदावह्निःयत्रधूमस्तत्रवह्निरितिमूलस्ययोजना·कालदेशयोःपक्षीकृतयोरेतद्धूमकालपर्वतयोः·कालि
कदैशिकसंबंधाभ्यामितिशेषः।एकमेव·एकत्वविशिष्टमेव·।अत्रकल्पे·एतत्कालेवह्निसिद्धेःपूर्वं एतत्कालीनवह्नित्वावच्छिन्नस्यासिध्या
तदभेदरूपमेकत्वंलाघवज्ञानादनुमितिःकथंविषयीकरिष्यतीत्यस्वरससूचनायवदंतीत्युक्तं।पक्षतावच्छेदकसमानाधिकरणसाध्यसिध्या
नोद्देश्यासिद्धिः·तदसमानकालीनस्यापितत्कालाश्रयसंबंधितयातत्कालसामानाधिकरण्यसिद्धावपिसाध्येतत्कालीनत्वासिद्धेरतःसमानाधि
करणपदमवच्छिन्नार्थकंतथाचावच्छेपक्षतावच्छेदकेति·कालादीत्यादिनानितंवादिरूपदेशपरिग्रहः।तदसंभवः।व्याप्तिज्ञानस्यकारणत्वासंभवः।
अनुभवात्मकपरामर्शस्थलेसविशेषणतावच्छेदकप्रकारकज्ञानविधयाव्याप्तिप्रकारकज्ञानस्यहेतुत्वादितिभावः।स्मरणविशेषणतावच्छेद
कधीविधयाव्याप्तिधियोऽहेतुत्वेपिस्मरणस्यसमानविषयकानुभवजन्यत्वात्प्राचीनानुभवात्मकपरामर्शस्यव्याप्तिज्ञानत्वेनकारणत्वमक्ष
तमेवेतिसमाधत्तेतत्रेति·ननुतत्फलजनकव्यापारेतत्फलकरणकव्यापारविधयातत्फलाजनकस्यनहेतुतेतिनियमः।आचार्यमतेपिलिं
गव्यापारतयाऽनुमितिजनकेपरामर्शेऽनुमित्यजनकस्येंद्रियादिव्यापारस्यहेतुतयाव्यभिचारइतितत्फलकरणव्यापारविधयेति·एवंचानुमि

लिं०ग०
१२७
127

स्यजनकस्य संस्कारस्यानुमितिजनके परामर्शे कथमनुमितिकरणस्य व्यापारतयाहेतुते साशंकां नियमं प्रतिक्षेपन्निरस्यति फलजनकेति·
ननुस्मरणात्मकपरामर्शद्वारा प्राचीनपरामर्शस्य करणत्वं तदा संभवति यदि तयोरित्यर्थः। कार्यकारणभावावच्छेदकाभ्यां व्याप्यविशिष्टपक्ष
ज्ञानत्वतत्स्मृतित्वाभ्यां करणव्यापारभावः स्यात्· स्याद्धि करणतावच्छेदकव्याप्तिज्ञानत्वाद्यवच्छिन्ननिरूपितजन्यतायामनुमितिजनकतायां च वि
शिष्टस्मृतित्वमवच्छेदकं· यद्वारा यस्य यत्कारणं तत्तन्निष्ठतात्फलजनकतावच्छेदकावच्छिन्नजन्यतानिरूपितजनकतावच्छेदका
वच्छिन्नतत्फलकरणताकमिति नियमस्य तावतैव निर्वाहात् तदेव नेत्याशंकते नचेति· न करणत्वमिति· अपितु व्याप्तिज्ञानत्वेनैवेति
शेषः। विशिष्टस्मृतिहेतुत्वं· विशिष्टस्मृतित्वावच्छिन्नहेतुत्वं· अपितु व्याप्तिस्मृतित्वावच्छिन्नहेतुत्वमेवेति शेषः। नानुमितिहेतुत्वमि
ति· व्यभिचारादिति शेषः। व्याप्तिविषयकज्ञानत्वस्मृतित्वाभ्यां· व्याप्तिविषयकज्ञानत्वव्याप्तिविषयकस्मृतित्वाभ्यां· विशिष्टविषय
कत्वाभ्यां· विशिष्टविषयकज्ञानत्वविशिष्टविषयकस्मृतित्वाभ्यां· वाशब्दो नास्थायां· उक्तनियमस्याप्रामाणिकत्वं विशेषस्त्वेवेति तं प्र धो १२७
तिक्षिपति नहीति· साध्यकाभावमुक्तानियमे बाधकमप्याह इन्द्रियेति· इन्द्रियं तत्वेन चक्षुरादिना वा प्रत्यक्षकारणं· व्यापारीभूततत्संयोगः
तत्संयोगत्वेन तद्धेतुः· तेन तेन च रूपेण न तयोर्मिथः कार्यकारणभावः। अपितु संयोगत्वेन द्रव्यत्वेनैव· एवं शाब्दबोधे पदज्ञानं तत्वेन कर

णं· व्यापारभूतउपदार्थोपस्थितिः पदज्ञानजन्यार्थोपस्थितित्वेन हेतुः। तयोश्च न तत्संबंधिज्ञानत्वेन तत्स्मृतित्वेन परं हेतुहेतुमद्भाव इति व्यभिचारादि
त्यर्थः। एवं यद्रूपेण न मिथो हेतुहेतुमद्भावः तत्तद्रूपेणापि करणव्यापारभावे बाधो द्धहनस्थले· विशिष्टबुद्ध्यनंतरं विशिष्टबुद्ध्यंतरो
त्पादस्थले· पूर्वपूर्वेषां· प्रथमविशिष्टज्ञानजनकानां· उत्तरोत्तरतद्द्वारा· स्वस्वजन्यविशिष्टबुद्ध्यात्मकविशेषणज्ञानांतरद्वारा
विशिष्टप्रत्यक्षं प्रति विशिष्टबुद्धित्वेन तदुत्तरविशिष्टप्रत्यक्षं प्रति करणत्वापत्तिः। विशेषणज्ञानत्वेन करणत्वापत्तिः। समाध
त्ते अयमिति· यत्र· यद्रूपावच्छिन्नं· यस्य· यद्रूपावच्छिन्नस्य· यज्जनकत्वं· यद्रूपावच्छिन्नजनकत्वं· तस्यैव· तद्रूपावच्छिन्नस्यैव तत्र· तद्रूपाव
च्छिन्ने· व्यापारत्वादिति· तथा च विशिष्टज्ञानजनकतावच्छेदकविशेषणज्ञानत्वस्य· करणत्वाभिमततद्रूपावच्छिन्नविशेषणज्ञानजन्यता
वच्छेदकत्वाभावेन तद्रूपेण व्यापारताविरहप्रयोजकः अपि तु तद्रूपावच्छिन्नमजनयित्वापि तद्रूपावच्छिन्नस्य विशिष्टधीजनकत्वमेव·
उत्तरोत्तरविशिष्टबुद्धिव्यक्तिं प्रति पूर्वपूर्वविशिष्टबुद्ध्यात्मकविशेषणज्ञानव्यक्तिद्वारा तज्जनकविशेषणज्ञानव्यक्तीनां तत्तद्व्यक्ति
त्वेन करणत्वस्य च नापत्तिः। व्यवहितव्यक्तीनां तत्तद्व्यक्तित्वेन कारणताया अप्रामाणिकत्वात्· अन्यथोक्तनियमोपगमेप्यप्रतीका
रादिति भावः। तथा नियममुपगम्यापि व्याप्तिज्ञानपरामर्शयोः करणव्यापारभावमुपपादयतां परामर्शस्य व्याप्तिविशिष्टज्ञानत्वेन व्यापार

लिं०गा०
१२८
128

त्वाभिमानिनां मतमुपन्यस्यति यत्त्विति· न क्षतिः। न प्रकृते क्षतिः। व्याप्तिविशिष्टज्ञानतयानुभवेन संस्कारेण वा जननादित्यन्वयः। वि
शिष्टज्ञानतयेति तेनैव यथार्थावच्छिन्नत्वं· अनुभवेनेत्यादेर्निरूपितत्वं· जननं· जन्यता· तथा चानुभवादिनिरूपितविशिष्टज्ञानत्वाव
च्छिन्नजन्यतानुभवत्वादित्यर्थः। स्मृतिं प्रति संस्कारद्वारानुभवं प्रति साक्षाद्विशेषणधियः पूर्ववर्तितया स्मृतिसाधारणविशि
ष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानत्वेन हेतुत्वमिति मतेः पूर्वानुभवेनेति· तद्रूपावच्छिन्नं विशेषणविषयकत्वेन संस्कारादिसाधार
णेन हेतुतेति मतमनुसृत्य संस्कारेण वेति· विशिष्टबुद्धिं प्रति विशेषणविषयकत्वेन हेतुत्वे प्रकृते व्याप्तिज्ञानत्वेन करणत्वमप्युक्तं
नियमसत्वे तन्न निर्वहतीत्यतस्तन्मते करणतावच्छेदकं ज्ञानत्वं परित्यजति· व्याप्तिविषयकत्वेनैवेति· व्यापारानिष्ठकरणजन्यतावच्छे
दकेऽधिकनिवेशं दर्शयति जन्यत्वविशेषितेनेति· नित्यसाधारणधर्मस्य जन्यतानवच्छेदकत्वादिति भावः। तत्र न्यूनतां दर्शयति सं
शयसाधारणेनेति· तथा च निश्चयत्वानिवेशान्न्यूनता। व्याप्तिविशिष्टज्ञानत्वेनेत्यत्रापि विशिष्टवैशिष्ट्याप्रवेशात् न्यूनता लभ्यते·
तल्लिङ्गानुमितिजनकतावच्छेदके न्यूनताधिक्ये दर्शयति नित्यसाधारणेनेत्यादिना· नित्यसाधारणेनेत्यनेन जन्यत्वाप्रवेशाद्दर्शि
तः। नित्यस्य स्वरूपयोग्यस्य सहकारिविरहात् फलानुपधायकत्वमिति भावः। व्याप्तिप्रकारकत्वेन करणत्वोपगमेपि विशिष्ट

भा०
१२८

वैशिष्ट्यावगाहितायाः परामर्शनिष्ठानुमितिजनकतावच्छेककोटिनिवेशेनन्याधिक्यं· विशिष्टवैशिष्ट्यावगाहितांविशेषणतावच्छेदकत्वे याः
ऽप्रकारकत्वावच्छिन्नानिरूपितजन्यतावच्छेदकत्वादिति· किंतु संशयान्यत्वनिवेशादेवाधिक्यं· प्रथमं· परामर्शहृत्वे विशेषणतावच्छेदकविशि
ष्टविशेषणज्ञानं विनाविशिष्टवैशिष्ट्यबोधासंभवादाह विशेष्येविशेषणमिति· तादृशबोधेविशेषणज्ञानविधयाप्रत्येकपदार्थोपस्थि
तेरेवहेतुतयाविशाकलितानांव्याप्तिघटकपदार्थानामुपस्थित्यापितादृशरीत्यापरामर्शसंभवादितिभावः। व्याप्तिघटकपदार्थांशेनि
श्चयत्वपर्यंतानिवेशेनलाघवाद्व्याप्तिविशिष्टवैशिष्ट्यबोधत्वेनैवानुमितिहेतुता· व्याप्त्यंशेसंशयाकारबुद्धेश्च न तद्विशिष्टवैशिष्ट्यावगा
हिता· तस्यैवं तद्विशिष्टवैशिष्ट्यधीजनकतन्निश्चयासत्वनियमात्· यत्र च विशेष्ये विशेषणमितिरीत्यापरामर्शस्तत्र तदनंतरोत्पन्नविशि
ष्टवैशिष्ट्यावगाहिपरामर्शादेवानुमितिरित्युक्तिसंभवाघाद्ंतदेयुक्तं· नियततोपस्थितिकेति· तादृशपदार्थस्यः। व्याप्तिघटकाभावत्वादयः। कर
णत्वं तत्तत्पदार्थज्ञानत्वेनवाच्यं· परामर्शजनकत्वेनेति· अभावत्वज्ञानत्वादिनाहेतुत्वेनानाकरणताप्रसंगात्· विनिगमनाविरहेणैकमात्ररू
पेणहेतुत्वासंभवात्· परामर्शजनकत्वस्य सर्वसंग्राहकतया विनिगमनाविरहानवकाशादितिभावः। अन्यं प्रतिपूर्ववर्त्तिलिंगग्राहित्वेवेति· पराम
र्शजनकत्वरूपावच्छेदकग्रहस्य परामर्शपूर्ववर्त्तित्वग्रहात्मकतयातंविनातेनरूपेणानुमितिपूर्ववर्त्तित्वग्रसंभवादितिभावः। फलानुगुणमि

लिं०प्र०
१२९

129

त्तिं परामर्शस्य। तथाच अनुमित्यनुगुणतया तत्पूर्ववर्त्तित्वग्रहं विना परामर्शजनकत्वेनानुमितिपूर्ववर्त्तित्वाग्रहेपि न तेन रूपेणान्यथासिद्धि
रिति भावः। एवमन्यथासिद्धिशरीरे सामान्यतएवान्यथासिद्ध्युक्तौ· नस्यादिति· उक्तान्यथासिद्धिनिरूपकत्वादिति भावः। इष्टापत्त्या समाधत्ते
दृष्टत्वादिति· तद्धटकेन रूपेण घटजनकतेत्याकांक्षायामाह दंडत्वेनेति· नन्वेवं भ्रमिजननायोग्यात्कोमलदंडादपि घट उत्पद्येतेत्यत आह
क्वचिदिति· कोमलदंडे घटार्थिनो प्रवृत्तिश्च फलानुपधाननिश्चयादिति भावः। भ्रमियोग्यत्वेन हेतुत्वेपि भ्रमिविरहस्य घटानुत्पादप्रयो
जकतां दर्शयति क्षुद्रेति· दंडात· क्षुद्रदंडात· ननु भ्रम्युपहितत्वेन हेतुतोच्यते· तथाच भ्रमिविरहस्य न घटानुत्पत्तिप्रयोजकत्वमुपपद्यते· उक्त
स्थले भ्रम्युपहितदंडव्यतिरेकेणैव घटानुत्पादसंभवादित्यत आह भ्रमिविशिष्टत्वेनेति· पृथक्चक्रत्वादिना· भ्रम्युपधानसंदेहेन सकं
पप्रवृत्तिसंभवादाह निष्कंपेति· तादृशप्रवृत्तौ स्वरूपयोग्यतावच्छेदकनिश्चयस्य हेतुत्वादिति भावः। प्रथमं· प्रवृत्तिपूर्वं· ननु सौवर्णदं
डसाधारणं दंडत्वं न जातिः संकरादिति भ्रमिजनकत्वमेवेत्यत आहास्कवेति· भ्रमिप्रयोजकः। भ्रमिजनकतावच्छेदकः। अवयव
संयोगविशेषादिरिति· दार्ढ्यरिव्यु विजातीयावयवसंयोगादिरित्यर्थः। तथा· घटजनकतावच्छेदकः। तस्य चावच्छेदकत्वमुभयत्रैवस्व
समवायिसमवेतत्वसंबंधेन समवायेनैव वा दंडावयवानामेव तेन रूपेण हेतुत्वोपगमात· दंडावयविनो हेतुत्वेपि क्षतिविरहात· यत्रच

१२९

परस्परसंबद्धैर्वेणुभिः कोमलदंडैर्नुन्नं चक्रं भ्राम्यते तत्र तेषामेव संयोगे तादृशी जातिरिति चेत्तत्र तेषां तेन रूपेण हेतुता तत्र तत्तदवयवानाम
पि तादृशसंयोगवत्त्वावश्यकत्वात्· परस्परसंबंधेन तेषां दंडादावपि सत्त्वात्तेन संबंधेन हेतुतावच्छेदकत्वपक्षे प्युक्तदोषैः। अथैवं तादृशजातेर्व्या
नारंभकसंयोगसाधारणतया तदारंभकतावच्छेदकजात्या संकरप्रसंगः। तत्र नावयवे दंडे दंडांतरारंभोपगमे ऽनुभवविरोधात्· दारुवेण्वा
द्यारभ्यस्य दारुत्ववेणुत्वादिनियमेन दारुत्ववेणुत्वादिजातीनां संकरभिया कोमलदारुवेण्वादिसंवलनस्थले ऽवयवांतरोत्पादोपगमा
संभवात्· अत एव वृक्षादीनां नैकावयवित्वमिति सिद्धांतः। एतेन कोमलदंडैकत्वव्याप्यैकत्वगतजातिभेद एव भ्रम्यादिप्रयोजकः इत्यपिप
रास्तं· न चानारंभकसंयोगेष्वेव भ्रमिघटप्रयोजिका जातिरूपेयते· एकैकदंडादुत्पादस्थले चु तद्देकावयवापरावयवयोः संयोगस्य द्रव्याना
रंभकतया तस्यैव घटादावप्रयोजकत्वोपगमादिति नारंभकतावच्छेदकजात्या संकरप्रसंग इति वाच्यं· एवमपि यत्र यादृशकोमलदंडत्र
यसंवलनादेव घटादिव्यक्तिर्न तु तदुभयमात्रसंवलनात् तत्र तदुभयसंवलनादपि तदुत्पादप्रसंगो दुर्वारः। अन्त्यत्वंतरसंयोगसहकारेण तदु
भयसंयोगात्तदुत्पत्तिनिर्वाहाय तादृशसंयोगे जातिभेदोपगमस्यावश्यकत्वात्· एतेन दंडचक्रसंयोगएव तादृशी जातिस्तद्वत्त्वेन घटादिज
नकत्वेत्यपि निरस्तं· दंडांतरसंयोगसापेक्षाद्यादृशचक्रदंडसंयोगात्तच्चक्रभ्रमणमिति तन्निरपेक्षतत्संयोगव्यक्तितो घटाद्यापत्तेर्दुर्वारत्वात्

लिं०ग०
१३०

130

प्रथमतश्च कूसंयोगादिमत्वनिश्चयाभावेन प्रवृत्त्यनुपपत्तेश्चेति चेत्तर्हि किंमलदंडादिसाधारणेन पृथिवीत्वेनैव भ्रम्यादिजनकतास्वीक्रि
यते। अतिप्रसंगभंजकश्च सहकारिविशेषविरह एव। प्रवृत्त्यतिप्रसंगम् फलानुपधाननिश्चय एव करोति निरोत्स्यति। यद्विचक्रत्ववत्तामारुतेना
भिहतमपि चक्रं भ्रांत्वा घटं जनयति तदा स्पर्शवत्वेन द्रव्यत्वेन वा तथात्वं। मूर्तत्वजातिपक्षेतु तथैव। तत्परिग्रहायैव चादिपदमुपात्तं इति बो
ध्यं। एवकारेण भ्रमिजनकत्वं व्यवच्छिद्यते। प्रथमोपस्थितत्वादिति। जनकताग्रह। तदवच्छेदकग्रहस्यापेक्षणीयतया भ्रमिजनकताम
पेक्ष्य तदवच्छेदकस्य प्रथममुपस्थितत्वादित्यर्थः। आवश्यकत्वादिति। नियतपूर्ववर्तितावच्छेदकधर्मस्यैव जनकतात्मकतया भ्रमिजन
कतया घटजनकतावच्छेदकत्वे भ्रमिजनकतावच्छेदकस्य तथात्वावश्यकत्वादित्यर्थः। तथा च जनकतात्वेन तादृशधर्मस्य तथात्वापेक्षया
विशिष्य तथात्वे लाघवमिति भावः। अन्यथा अन्यतजनकतासाधारण्यव्याहतये एकजनकत्वेनापरजनकत्वोपगमे। घटजनकत्वेनैवेति।
विनिगमनाविरहादिति भावः। अन्योन्याश्रयेण च परस्परजनकत्वेनोभयहेतुता न संभवतीति बोध्यं। दंडत्वेन कथितहेतुतामतेऽनिर्भरवीजं
स्वयमेवाह अत एवेति। अनुगतदंडत्वविरहेपि सुवर्णत्ववेणुत्वादिजातेः संकीर्णतया साधारणदंडत्वादिजातिविरहेपीत्यर्थः। न
न्वन्वयतासाधन्यथासिद्धिकं वलित तया घटजनकत्वेन भ्रमिजनकता न संभवति। तत्र चान्यस्मिन्फलानुपधानगुणत्वविशेषणात् घटं प्रति

१३०

अपि जनकत्वे न हेतुत्वमविरुद्धमित्याशंक्य फलाननुगुणत्वविशेषणप्रतिक्षेपाय प्रतिबंदिं दर्शयति। किंचेति। एवं फलाननुगुणकार्यजनकत्वेना
न्यथासिद्धत्वे। कार्यांतरं घटादिकं। तज्जनकपदार्थकारणानां। दंडचक्रकुलालादेः कारणानां। तज्जनकत्वेन। इष्टसाधनताज्ञानादिजनकत्वेन हेतुत्वे
हेतुत्वेप्रसक्ते। तत्वेनैव। इष्टसाधनताज्ञानत्वादिनैव। बाधकाभावेति। न तु तज्जनकत्वेन गुरुतया अन्यथासिद्धिनिरूपकत्वादिति शेषः। प्रकृते। दंडघ स्थान
टयोर्हेतुहेतुमद्भावस्य लेमनसोनुमितिकरणतां व्यवस्थापयिष्यन्मूलोक्तव्याप्तिसहकृतकपदार्थानां वा धियोनुमितिकरणत्वं निराकरोति इदं
पुनरित्यादिना। तत्तद्घटत्वादिजनकतावच्छेदकतत्तद्धर्मिकत्वादिव्यापके सामान्यधर्मेण सामान्यधर्मावच्छिन्न तत्तद्घटत्वादिजनकत्वात्तदवच्छि
न्नत्वद्वयं फलतः कार्यताविशेषणं। स्वस्यापि। स्वव्यापकत्वात् तदवच्छेदकांतरेति। ननु जनकतावच्छेदकांतरव्यापकस्यापि नियतपूर्वव
र्तितावच्छेदकत्वान्न कथं तस्य जनकतावच्छेदकत्वमित्यत आह दर्शयिष्यते हीति। तथा। व्यापकरूपेण अन्यथासिद्धत्वमिति। तथा चान्यथा
सिद्धिनिरूपकत्वान्न तस्य तथात्वमिति भावः। व्यापकरूपेणान्यथासिद्धत्वे युक्तिमाह अन्यथेति। नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव
नियमपक्षमवलंब्याह जन्यत्वविशेषितेनेति। तादृशनियमपक्षमवलंब्य मानमभ्युपगम्याह शुद्धेनेति। हेतुत्वप्रसंगादिति। नियतपूर्ववर्ति
तायाः अन्यथासिद्ध्यंतरविरहस्य च तत्तद्रूपावच्छिन्नेऽपि सत्वादिति भावः। विशिष्टाविशिष्टेति। विशिष्टपदार्थः अभावत्वविशिष्टादिः

अविशिष्टपदार्थोऽभावत्वादिः। परामर्शजनकज्ञानस्य॰ व्याप्तिप्रकारकज्ञानस्य॰ तथात्वं॰ करणत्वं॰ चिकीर्षाद्वित्यपीति॰ तत्रापि कारणांतरा
संभवादित्याशयः। चिकीर्षायां करणांतरसंभवमाशंकते॰ तत्रेति॰ इहापि॰ अनुमितावपि॰ तदेवास्तु॰ मन एव करणमस्तु॰ शंकते मनो
साधारणेति॰ चाक्षुषादेरपींद्रियत्वेन मनःकरणत्वात्॰ तद्धारणायासाधारणपदं॰ मनोसाधारणकरणत्वं च॰ मनस्त्वावच्छिन्नकरण
ताकत्वं। ज्ञाननिवेशाच्चिकीर्षासुखादिव्यावृत्तिः। अप्रयोजकत्वात्॰ निष्प्रमायाकमानसत्वव्याप्तिकत्वात्॰ न किंचिदिति॰ मानसत्वस्य जाति
त्वेन तस्याजन्यत्वादिति भावः। करणभेद एव कार्यवैचित्र्यमिति नियमाभिमानेन शंकते करणाभेद इति॰ कार्यवैचित्र्यं॰ अनुमितिमानसचि
कीर्षादिवैचित्र्यं॰ सामग्रीभेद एव कार्यवैजात्यप्रयोजको न तु करणभेदमात्रमिति समाधत्ते सामग्रीति॰ एतदेव दृष्टांतेन द्रढयति यथा मनः
करणकानां॰ इति॰ पाकजानां रूपरसादीनां॰ करणाभेदेपि सामग्रीवैचित्र्यात् कार्यवैजात्यमित्यनुषंगेणान्वयः। तर्हि मनसोनुमितिकरण
त्वे कथं प्रमाणविभागः। प्रत्यक्षप्रमाणात् स्वातंत्र्येणानुमानस्य परिगणनं मनस इंद्रियत्वेन प्रत्यक्ष एवांतर्भावादिति भावः। करणविशेषके
ति॰ करणताभेदक इत्यर्थः। एतच्च क्रियावैजात्यविशेषणं॰ क्रियावैजात्यात्॰ प्रत्यक्षप्रमितितोनुमितिवैजात्यात्॰ करणताभेदस्यैव प्र
माणपार्थक्यप्रयोजकत्वादिति भावः। अथवा करणविशेषकेति॰ करणविशेषणीभूतायाः क्रियायाः पार्थक्यादित्यर्थः। तथा च क्रिया

रूपविशेषणभेदेनैव विशिष्टभेदव्यपदेश इति भावः। अनुमितिमात्रं प्रति· अनुमितित्वावच्छिन्नं प्रति· व्याप्तिभेदादिति· करणाननुगमे व्यभि
चारादिति शेषः। अभावज्ञानत्वेनेति· अभावत्वज्ञानत्वेनेत्यर्थः। तेन व्याप्तिशरीरे सर्वत्राभावत्वेन पदार्थान्तरभानेपि नानुमित्यनुपपत्तिर्नवा
धर्मिनिवेशाधिक्याद्गौरवं· विशेषसामग्र्या अतिप्रसंगवारणस्यावश्यकत्वे विषयनिवेशो निष्फल इत्याशयेनाह ज्ञानत्वेनवेति· ननु पक्षज्ञा
नत्वस्य पक्षताघटितत्वात् तच्छरीरे च साध्यादिविशेषाणां तर्भावात् कथमनुगम इत्यत आह पक्षोपि चेति· प्रकृते पक्षपदार्थो विचेत्यर्थः। धर्मिमा
त्रमिति· तथा च पक्षतानं तर्भावान्नाननुगम इति भावः। न चैवं धर्मित्वस्य केवलान्वयितया धर्मिविषयकत्वमव्यावर्तकतया कारणतावच्छे
दककोटौ निवेशानर्हमिति वाच्यं· एतदवलोक्यैव कल्पांतरानुसरणात्· ज्ञानत्वादेरनुमितिकारणतावच्छेदकपरामर्शत्वव्यापकत्वेपि न
तेन रूपेणान्यथासिद्धिः। परामर्शत्वस्याननुगततया विशेषरूपावच्छिन्नं प्रत्येव जनकतावच्छेदकतया ज्ञानत्वाद्यवच्छिन्नजन्यतावच्छेदकत्वा
भिमतशुद्धानुमितित्वावच्छिन्नजनकतानवच्छेदकत्वात्· एतदभिप्रायेणैव परामर्शत्वादेरनुमितिजनकतावच्छेदकत्वनिराकरणात्· अथ
ज्ञानत्वेनानुमितिहेतुत्वे संयोगत्वविभागत्वादिनैव कथं न हेतुता· विशेषसामग्र्या अतिप्रसंगवारणस्यावश्यकतया विनिगमकस्य दुर्लभत्वा
दिति चेन्न सा विनिगमनाविरहेण नानाकारणताया उपगमात्· यत्तु विनिगमनाविरहेण नानाकारणत्वकल्पनापेक्षया परामर्शत्वाख्यजाति

विशेषं कल्पयित्वा तेनैव रूपेणानुमितिहेतुत्वकल्पनमेवोचितं· तेन रूपेण हेतुत्वे च न विनिगमनाविरहावकाशः। कारणतावछेदकतयैव तत्
सिद्धेः। न च तादृशज्ञाते श्चाक्षुषत्वादिना संकरप्रसंगः। न मानसज्ञान एव तदभ्युपगमात्· चाक्षुषादिपरामर्शस्थलेपि तदुपनीततत्तत्पदार्थ
विषयकमानसपरामर्शकल्पने आक्षणिकव्याजेनानुमित्युपपादनसंभवात्· पक्षादिना चक्षुरादिसंनिकर्षसत्वेपि चक्षुर्मनोयोगाद्यभा
वस्य फलबलेन कल्पनात्· चाक्षुषादिसामग्र्या विरहोपपत्तेः। चाक्षुषादिपरामर्शानंतरं तज्जन्यसंस्काराधीनस्मरणात्मकपरामर्शकल्पनेना
नुमित्युत्पादसंभवेन स्मृतित्वव्याप्यैककल्पनं साजात्यमिति तु न वाच्यं· लाघवाभावेऽधिकैकक्षणविलंबस्यान्याय्यत्वात्· अनुमितिपूर्वं स्मृति
कल्पने उभयबाधसिद्धौ तत्तत्स्थलीयस्मृतिसामग्र्या उभयबाधसिद्धायामानसंप्रतिप्रतिबंधकताकल्पनाधिक्येन गौरवाच्च· उद्बोधका
नामननुगमेन स्मृतिसामग्र्या अननुगमात्· उभयसिद्धौ स्मृतिसामग्रीस्थलीयप्रतिबंधकतयाऽनिर्वाहात्· न च परामर्शत्वस्य स्मृतित्व
व्याप्यत्वे विशेषकारणतायामपि तज्ज्ञातेरवछेदकघटकतया तत्र संशयान्यत्वानिवेशेन लाघवं· संशयरूपस्मृतेरभावेन तद्दनि
वेशेऽप्यतिप्रसंगविरहादिति वाच्यं· परामर्शत्वस्य मानसत्वव्याप्यतामतेपि संशये तदनभ्युपगमादेव ततोनुमितिप्रसंगविरहात्·
तन्मतेपि विशेषकारणतावछेदकगर्भे संशयान्यत्वानिवेशादिति· तदसत्· ज्ञानद्वयसंयोगादावपि अनुमितिजनकतावछेदकत्व

याजातिविशेषकल्पनसंभवेनाविनिगमनाविरहानुद्धारात्• परामर्शत्वावच्छिन्नस्य व्यापारविरहेण करणत्वासंभवात्• ज्ञानत्वेनक
रणतया आवश्यकत्वाच्च• अतएव विभागत्वादिकमादाय विनिगमनाविरहस्यापि नावकाशः॥ विभागादीनापरामर्शाजनकत
याकरणत्वासंभवात्• एतेन विशेषकारणकार्यतावच्छेदकेनुमितित्वनिवेशस्यावश्यकत्वेन तत एव तदवच्छिन्नोत्पत्तेराकस्मि
कतावारणादनुमितित्वावच्छिन्नं प्रति सामान्यतो ज्ञानत्वेन हेतुत्वं निर्युक्तिकमित्यपि परास्तं• विशेषकारणस्य परामर्शादेरनुमित्य
करणतया ज्ञानत्वेन तत्करणताकल्पनस्यावश्यकत्वादिति कृतपल्लवितेन• विशिष्य पक्षतावच्छेदकमनिवेश्य वह्न्याद्यनुमितिं प्रति
वह्निव्याप्यवत्तानिश्चयत्वेन किंचिद्धर्मावच्छिन्नविशेष्यकतान्निश्चयत्वेन वा सामान्यतो हेतुत्वं कस्यचिदभिमतं दूषयति• तत्तत्पक्षता
वच्छेदकेति• तर्हि केन रूपेण वह्न्यवच्छिन्नं प्रति हेतुतेत्याकांक्षायामाह ×नुमितिः× किं त्विति• विशेषसामग्र्या अतिप्रसंगवारणस्याव
श्यकत्वे व्याप्तिविषयकत्वनिवेशनमफलमित्याशयेनाह वस्तुत इति• वह्निज्ञानत्वेनेति• न चैवं ज्ञानत्वेनैव न कथं हेतुतोपयत इति
वाच्यं। सामान्यविशेषयोरेकरूपावच्छिन्नजनकत्वाभावनियमात्• वह्न्यभावानुमितिप्रत्यपि वह्निज्ञानत्वेनैवेत्यनुषंगेनान्वयः॥ तत्सर्वंवि
ह्न्यभावज्ञानस्यावश्यकत्वे वह्निज्ञानस्याप्यवश्यकत्वादिति भावः॥ अयं चाभ्युपगमवादः। तत्तत्पक्षतावच्छेदकावच्छिन्नविशेष्य

लिं॰ग॰
१३३
133

कथमुक्त्याद्यनुमितित्वरूपविशेषकारणकार्यता[illegible]देकगर्भेयुक्त्यनुमितित्वादिनिवेशादेवोपपत्तेस्तदवच्छिन्नंप्रतिहेतुत्वांतरस्यानियु
क्तिकत्वात्‌ सुखादिसाधारणजन्यात्मविशेषगुणत्वावच्छिन्नंप्रतिमनस्त्वेनकारणताकल्पनात्तत एवानुमितेः सकरणकत्वनिर्वा
हेणानुमितित्वावच्छिन्नंप्रतिज्ञानत्वादिनाहेतुत्वमपिनियुक्तिकमित्याद्यस्यरसबीजमत्रवोध्यमिति ॥ इतिलिंगकरणतारहस्यं ॥
॥श्रीः॥ अनुमानविभागपरमूलग्रंथेकेवलान्वयिपदस्यप्रसिद्धार्थपरत्वेज्ञानकरणतापक्षेज्ञानस्यकेवलान्वयित्वादसंगतिः लिं
गकरणतापक्षेपिकेवलान्वयिसाध्यकव्यतिरेक्यसंग्रहः अन्वयव्यतिरेकिलक्षणेव्यतिरेकिपदस्ययथाश्रुतार्थासंभवात्‌ यत्कृत था
याग्रहीतसाध्यसहचारव्यतिरेकप्रतियोगित्वमेवान्वयव्यतिरेकित्वमस्तु तथाचोक्तहेतुरन्वयव्यतिरेकिष्वेवांतर्भवतु नचैवम
सद्विपक्षकेवलान्वयीतिमूलोक्तलक्षणविरोधः विपक्षपदस्यसाध्याभाववदर्थकतयाप्रसिद्धत्वेनसाध्येकेवलान्वयित्वस्यैव
ततोलाभादितिवाच्यं तथाहिकेवलान्वयिनोभिधेयत्वस्यनविपक्ष इतिलक्षणासंगमनेविपक्षपदस्यसाध्याभाववदर्थकत्वेऽभि १३३
धेयत्वस्यैवनत्वयेनतस्याभावेवत्वमात्रार्थकतयाआवश्यकत्वात्‌ लक्षणस्यतत्पदस्यापितदर्थकतौचित्यात्‌ नचसाध्यस्यकेव
लान्वयितायाःकेवलान्वय्यनुमानानंतर्भावेतत्रसाध्यसंदेहरूपपक्षतायाःसाध्याभावाप्रसिध्याऽसंभवादनुमित्यनिर्वाहशंकायाअ

ग्रिमायाअसंगतिरिति वाच्यं हेतोः केवलान्वयित्वे साध्यस्यापि तथात्वमावश्यकमन्यथा सद्धेतुत्वानिर्वाहादिति तदाशंकासंगतेरिति चेन्न·
तादृशहेतोरन्वयव्यतिरेकित्वे तादृशहेतुकानुमानस्य मीमांसकैरभ्युपगंतव्यतया तेषां साध्याभाववद्वृत्तित्वस्य व्याप्तित्वाभ्युपगमे विरोधाद
तो व्याचष्टे केवलान्वयीति· साध्यकादौ यादृक्पदात् केवलव्यतिरेकि अन्वयव्यतिरेकिसाध्यकयोः परिग्रहः। तत्र व्यतिरेकित्वविशेष्यतया सा
ध्यानंतर्भावे केवलान्वयित्वलक्षणे साध्यांतर्भावेन केवलान्वयिसाध्यके व्यतिरेकिहेतौ केवलान्वय्यनुमात्रस्य साध्यसहचारग्रहदशायां मान
केवलव्यतिरेकिलक्षणं· तद्ग्रहदशायां चान्वयव्यतिरेकिलक्षणमतिव्याप्तं स्यादिति तदुभयलक्षणेऽपि साध्यनिवेशः। यद्यपि केवलान्व
यिपदं केवलान्वयिसाध्यकार्थकतया मूलकृतैव विवक्षणीयं मूलस्यासद्विपक्षपदस्य तदर्थकतया। असद्विपक्षमत्यंताभावाप्रतियो
गिसाध्यकमित्यनेन स्वयं व्याख्येयत्वात्· अत्यंताभावाप्रतियोगिसाध्यकत्वस्यैव केवलान्वयिसाध्यकत्वरूपत्वात्· इत्येतद्व्याख्यानमनुप
युक्तं न च मूलकृतोऽव्याप्यवृत्त्यत्यंताभावादेरभावप्रतियोगितया केवलान्वयित्वासंभव इत्याक्षिप्य वृत्तिमदत्यंताभावाप्रतियोगित्वं केव
लान्वयित्वमिति साध्यनिष्ठकेवलान्वयित्वनिरुक्त्या सिद्धांतप्रणयनं केवलान्वयिपदेन साध्यविशेषणप्रतिपादन एव संगच्छत इति
तदर्थमेव तादृशव्याख्यानमुचितमिति वाच्यं· केवलान्वयिपदेन साध्यविशेषणप्रतिपादनस्य मूलेऽभावादिति· दीधितिस्थपदार्थनिर्व

के॰ग॰
१३४

134

चनस्यमूलकृतोऽसंभवात्तादृशासंगतेर्दुष्परिहरतया तादृशासंगतिपरिहारायच पूर्वपक्षे नकेवलान्वयीत्यस्य नकेवलान्वय्यनुमाने सा
ध्यमित्यर्थकतया वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति सिद्धांतग्रंथस्य च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यविशे
षणतया केवलान्वयिलक्षणघटकमित्यर्थपरतया व्याख्येयत्वादिति· तथापि केवलान्वयिपदमत्र न मुख्यार्थपरं किंतु भाक्तमेवेतिसू
चयितुं केवलान्वयिसाध्यकेतिशब्देन तदर्थो व्याख्यातः। तत्रेति सप्तम्या आधारत्वार्थकत्वासंभवान्निर्धारणार्थकत्वमाह तेषुमध्ये इ
ति· यद्यपि तत्रेत्यस्य तस्मिन्नित्येकवचनांतेन वर्णनमपि संगच्छते· केवलान्वय्यादित्रयस्य तत्पदपरामर्शनीयस्यैकवचनार्थैकत्वविर
हेऽपि तदविवक्षया सामंजस्यात्· अतएव घटादेरामङ्व्यस्येतिषष्ठ्येकवचनस्य निर्धारणार्थकतयाऽचार्यव्याख्यानमपि संगच्छते· त
थानुमानमितिप्रकृतमूलेऽपि एकत्वाविवक्षया एकवचनसंगतिः। तथापि तत्रानुमानमित्यपेक्षया संनिहितेन केवलान्वय्यादिपदेन
प्रत्येकमुपस्थापितस्यानुमानत्रयस्य परामर्शकं तत्पदमिमाशयेन बहुवचनादरः। उद्देश्यतावच्छेदकशब्दसामान्यधर्माकिंतमतत्त्रितयत्वा
वच्छिन्ने केवलान्वयित्वरूपविधेयस्यावच्छेदबोधकतयैव निर्धारणसंभवात्तत्रित्वार्थकबहुवचनं विना सामान्यधर्मानुपस्थितेः प्रत्येक
पर्याप्तधर्मस्य सामान्यत्वाभावेनैकवचनासंगतेः। अतएव घटपटयोर्मध्ये घटोदंडजन्य इत्यादौ निर्धारणानुरोधेन नियमतो द्वि

१३४

वचनापेक्षेति॰असद्विपक्षमित्यत्रविपक्षेऽसत्वस्याप्रसक्त्याऽदुर्ग्रहत्वमाशंक्यव्याचष्टेअसत्वेति॰अत्यंताभावाप्रतियोगितत्साध्यवि
षयकानुमितिकरणंतत्साध्यककेवलान्वय्यनुमानमित्यर्थः।यद्यपिविपक्षपदस्यसाध्याभाववदर्थकतयाऽभावाधिकरणत्वप्रवेशेनवृत्तिम
द्भावाप्रतियोगित्वमेवलभ्यतेतथाप्याकाशाभावरूपाप्रतियोगितयाऽऽकाशाभावस्यकेवलान्वयित्वानुपपत्तेः पूर्वपक्षेशंकनीयतयातच्छं
कायाविपक्षपदस्यसाध्याभावमात्रपरत्वाभिमानमूलकतयैवसंगमनीयतयातदाशयेनैववृत्तिमत्वानंतर्भावः।वृत्तिमदत्यंताभावाप्रतियोगि
त्वंकेवलान्वयित्वमितिसिद्धांतग्रंथेचमूलकृतांतादृशाभिमानोनिराकरिष्यते॰असत्सपक्षंकेवलव्यतिरेकीतिव्यतिरेकिग्रंथेवक्ष्यमाणके
वलव्यतिरेकिलक्षणस्यासत्सपक्षोनिश्चितसाध्यवान्यस्येतियथाश्रुतार्थेऽप्रसिद्धिमाशंक्यप्रसंगाद्धत्वेवतच्छिद्रयोरतिएवमगृहीतेति॰
अगृहीतस्तदाऽनिश्चितअन्वयोहेतुसहचारोयत्रएवंभूतंव्यतिरेकप्रतियोगिप्रकृतंसाध्यंयत्रतत्कालावच्छिन्नप्रकृतहेतुसहचारनिश्चय
विषयत्वाभाववद्व्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणमितितुफलितार्थः।अयोगोलकमात्रेवह्निप्रसिद्धिदशायांधूमहेतुक
तदनुमानस्यसंग्रहायनिश्चयेप्रकृतहेतुसहचारविषयकत्वानिवेशनं॰अन्वयसहचारनिश्चयदशायामपिकालांतरीणतन्निश्चयवि
षयत्वाभावमादायातिप्रसंगवारणायाभावेतत्कालावच्छिन्नत्वविशेषणं॰तत्कालीनस्यहेतुसहचारनिश्चयस्ययोविषयस्तदन्यत्वस्य

के०ग०
१३५

135

चनसाध्यविशेषणत्वसंभवः। यद्यपि प्रकृतहेतुसहचारनिश्चयो नास्ति तदाऽप्रसंगान्निश्चये तत्पुरुषीयत्वमपि निवेशनीयं अतो व्य
तिरेकि तादृशायामप्यं ततो भगवतः सहचारनिश्चयस्य सत्वेपि नासंभवः। कालविशेषसाध्यविशेषैरिव पुरुषविशेषैरपि नियंत्रितं व्यति
रेकित्वमिष्यत एव। न चैवं यस्य पुंसः प्रकृतहेतुसहचारनिश्चयः क्वचिदपि कदापि न प्रसिध्यति तं प्रति तद्धेतुकं किमप्यनुमानं व्यतिरेकि न
स्यादिति वाच्यं। एवं सति तत्कालावच्छिन्नस्वविषयकतद्धेतुसहचारनिश्चयाभाववत्तत्पुरुषकत्वस्य साध्यविशेषणत्वोपगमात्। तादृ
शं च सद्धेतुमानसाध्यमप्रसिद्धं। यद्विषयकप्रकृतहेतुसहचारनिश्चयो न प्रसिध्यति सर्वेषां साध्यानामं ततो भगवतः प्रकृतहेतुसह
चारनिश्चयस्यावश्यकत्वात्। एतत्कल्पे तत्कालीनतादृशनिश्चयवदन्यत्वेनापि पुरुषविशेषणं संभवति। तत्कालीनतादृशनिश्चयस्यां
ततो भगवत्येव प्रसिद्धेः। साध्ये व्यतिरेकप्रतियोगित्वानिवेशश्चान्वयसहचाराग्रहदशायामपि केवलान्वयिसाध्यकस्योक्तकेवलान्व
य्यनुमानलक्षणाक्रांततया त्रालक्ष्यत्वात्तद्वारणाय। न च यत्र व्यतिरेकसहचारमात्रेण व्याप्तिग्रहस्तत्केवलव्यतिरेक्यनुमानं। तदुक्तमणि
कृता यत्र व्यतिरेकसहचारेण व्याप्तिग्रह इति। एवं च यदान्वयव्यतिरेकसहचारयोर्द्वयोरेवाग्रहस्तदापि हेतोस्तज्ज्ञानस्य वा केवलव्यतिरेकि
तापत्तिः उक्तलक्षणसत्वादिति वाच्यं। अगृहीतान्वयव्यतिरेकिसाध्यकेऽयनेनान्वयसहचारग्रहानधीनव्यतिरेकिसाध्यकानुमितिफलो

१३५

पहितकरणत्वस्याविवक्षणीयत्वात्: उक्तस्थले चानुमित्यनुत्पत्त्या फलोपधायकताविरहेणानतिप्रसंगात्: अनुमितेस्तद्ग्रहानधीनत्वं: त
द्ग्रहाधीनव्यापकताग्रहानधीनत्वं· तेन केवलव्यतिरेकितादृशोत्पन्नायामप्यनुमितेः प्रकृतसाध्यसाधनसहचाररूपान्वयसहचारगर्भव्या
प्तिज्ञानप्रयोज्यत्वेपि न क्षतिः। अन्वयसहचारनिश्चयः सर्वत्र सर्वज्ञस्यैव प्रसिद्धः। तदधीनत्वं सामानाधिकरण्यप्रकारकस्य वच्छिन्नजन्यता
वत्वं· अतोनुमितिमात्रस्यैवेश्वरीयान्वयसहचारग्रहाधीनत्वेपि न क्षतिः। यत्साध्यसाधनसहचारो नास्मदादिज्ञानविषयस्तत्र परमेश्वरीयत
त्सहचारज्ञाननिरूपितनिरुक्तजन्यत्वाप्रसिद्धावपि योगिज्ञानीयतादृशजन्यतायास्तदीयज्ञानान्तरे प्रसिध्यासामंजस्यात्: एवं च सह
चारज्ञाने तत्कालीनत्वं न निवेशनीयं· कालान्तरीयान्वयसहचारज्ञानस्य केवलव्यतिरेकितादृशाप्रभवानुमितावप्रयोजकत्वात्: तादृशा
नुमितिमादाय लक्षणसमन्वयस्य कालानिवेशेपि संभवात्: अन्वयव्यतिरेकसहचारज्ञानयोरनुगतरूपेण व्याप्तिग्रहहेतुत्वसंभवे के
वलव्यतिरेकिसहचारज्ञानं यद्व्याप्तिग्रहोपधायकं तत्र कालान्तरीणान्वयसहचारग्रहस्य स्वरूपयोग्यत्वेपि न क्षतिः। फलोपधानरूपप्र
योजकताया निवेशनीयत्वात्: ज्ञायमानलिंगकरणतामते तत्पुरुषीयत्वमप्यनुमितौ निवेशनीयं· अन्यथैकस्य पुंसोन्वयसहचारादं
न्यस्य व्यतिरेकसहचारमात्राधीने कलिंगकानुमितिस्तत्र तल्लिंगस्य व्यतिरेकसहचारमात्राधीनानुमितिमादाय तद्धावेव पुरुषोप्रति केव

के० ग० १३६ 136

लव्यतिरेकितापत्तेः। हेतुज्ञानस्यानुमानतामते तत्तद्रूपवीयत्वं न निवेशनीयं तत्साध्यकत्वेन तद्धेतुकत्वेन चानुमितिविशेषणीयाऽतो वह्नि
धूमसहचारज्ञानाधीनान्यसाध्यकान्यहेतुकानुमितिकरणेऽन्वय्यनुमानेनातिव्याप्तिः। फलोपधानस्य विशेषणत्वोपगमात्‌ लिंगक
रणतापक्षे कालांतरीणानुमितिफलोपधानमादायान्वयितादशायां तस्य हेतोर्व्यतिरेकितापत्तिः। एवं च साध्ये व्यतिरेकित्वविशेष
णं यदा केवलान्वयिसाध्यके स्थलेऽभावांशे साध्यीयत्वावगाहिभ्रमात्मकव्यतिरेकसहचारग्रहाद्‌ अनुमित्युपधानं तदातिप्रसंगवारणाये
ति बोध्यं अन्वयव्यतिरेकिलक्षणस्य मूलानुक्तत्वात्तत्स्वयं तद्दाहृत्य हितेति पूर्ववह्निग्रहणे तत्तद्रूपीय प्रकृतहेतुसहचारनिश्चयाविष
यव्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति फलितार्थः। प्रकृतहेतुसाध्यकसहचारनिश्चयाधीनव्यापकताग्रहप्रयोज्य
व्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति तु निष्कर्षः। अत्रापि केवलान्वय्यनुमानेऽतिव्याप्तिवारणाय व्यतिरेकप्रतियो
गित्वं साध्ये विशेषणं ननु यत्र व्यतिरेकसहचारमात्रेण व्याप्तिग्रहस्तस्य केवलव्यतिरेकित्वे तुल्ययुक्त्या यत्रान्वयसहचारमात्रेण व्याप्तिग्रहस्तस्ये १३६
व केवलान्वयिसाध्यकस्य व्यतिरेकिसाध्यकस्य च केवलान्वय्यनुमानत्वं उचितमिति मूले पदर्शितिकेवलान्वयिलक्षणं तथाविधव्यतिरेकि
साध्यकाव्यापकमेव एवमन्वयव्यतिरेकिलक्षणमपि व्यतिरेकिसाध्यके अन्वयसहचारमात्रग्रहदशायां केवलान्वय्यतिव्यापकमेवेत्यथे

वकेवलान्वयित्वादिकं निर्वक्तुमुपक्रमते व्याप्तिग्राहकेत्यादि·सहचारभेदात्·सहचारस्यान्वयव्यतिरेकनिरूप्यत्वरूपवैलक्षण्यात्·भेदे·अनु
मानस्यान्वयित्वव्यतिरेकित्वरूपवैलक्षण्ये·केवलान्वयितायां व्याप्तिग्राहकसहचारस्य व्याप्तेर्वान्वयनिरूपितत्वाधीनत्वं मणिकारान
भिमतं·साध्यस्य केवलान्वयित्वनिर्वचनविरोधादिति तस्यास्तथात्वाभिधानं स्वातन्त्र्येणैवेत्यवधेयं·अन्वयसहचारमात्रेति·लिंगकर
णतावच्छेदेन्वयसहचारमात्रज्ञानजन्यव्याप्तिग्रहाधीनतत्पुरुषीयानुमितिकरणत्वं तदा तं पुरुषं प्रति केवलान्वयित्वमित्यर्थः। अन्वयव्यति
रेकिण्यतिव्याप्तिवारणाय मात्रपदं·यत्र च यत्सार्थान्तरीयसहचारविषयकसमूहालंबनरूपप्रकृतसाध्यसाधनसहचारग्रहादन्यदीयव्या
प्तिविषयकः प्रकृतव्याप्तिग्रहो व्यतिरेकसहचारग्रहं विनैव तत्राव्याप्तिर्नाशंकनीया·प्रकृतसाध्यसाधनसहचारमात्रविषयताधीनव्याप्य
वगाहितादृशयोज्यतत्साध्यविषयकत्वावच्छिन्नतत्पुरुषीयानुमितिकरणत्वं तत्साध्यककेवलान्वय्यनुमानत्वमित्यस्य विवक्षितत्वात्·तत्सा
ध्यतदितरसाध्यविषयकसमूहालंबनानुमितिकरणत्वं यथा तत्साध्यककेवलान्वयिहेतोस्तथान्यसाध्यकस्य व्यतिरेकिणः केवलान्वयिनो
वा हेतोरिति तत्साध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यविषयकत्वस्य करणत्वे निरूपकतावच्छेदकतया प्रवेशः। वस्तुतस्तु·तत्सा
ध्यीयत्वमिव तत्साधनीयत्वमपि सहचारे निवेश्यं·तथा च तत्साधनघटितलक्षणे करणत्वविशेष्यतयापि तत्साधनत्वप्रवेशादुक्तातिप्र

के॰ग॰
१३७
137

संगचारणासंभवेन तत्साध्यकानुमानलक्षणे तत्साध्यविषयतावदनुमितिकरणत्वमेव निवेशनीयं॰ करणत्वविशेष्यतया सहचारनिरूपकता
वच्छेदकतया तत्साधनत्वनिवेश आवश्यकः। अन्यथान्वयसहचारमात्रगृहीतव्याप्तिकेन हेतुना व्यतिरेकसहचारगृहीतव्याप्तिकेन हेत्वंतरेण च
यत्रैकसाध्यानुमितिर्जनिता तत्र तत्साध्यविषयकत्वावच्छिन्नतदनुमितिकरणत्वमादाय व्यतिरेकिहेतावतिव्याप्त्यापत्तेः। व्याप्त्यवगाहिताप्र
योज्यविषयतायां तत्साध्यीयत्वनिवेशात्॰ यत्रान्वयसहचारमात्रग्रहाधीनवह्निधूमव्याप्तिग्रहात् धूमेपि वह्निव्याप्तिविशिष्टधूमस्यानुमिति
र्न तु वह्नेस्तदनुमितौ व्याप्तिविशिष्टधूमविषयतायाः साध्यतावच्छेदकवह्निव्याप्तिविषयताप्रयोज्यत्वेपि न तत्करणतामादाय तद्धानीं वह्निसा
ध्यककेवलान्वय्यनुमानता॰ व्याप्तिज्ञानस्यानुमानतामते तत्साध्यतत्साधनसहचारमात्रविषयताप्रयोज्याया व्याप्तिविषयतायाः तत्त्वे सति
तत्साध्यकानुमितिकरणत्वं तत्साध्यकतद्धेतुककेवलान्वय्यनुमानत्वमित्यर्थः। फलानुपहितव्याप्तिज्ञानवारणाय विशेष्यदलं॰ यत्र धू
मधर्मिकवह्निव्याप्तितानमन्यहेतुकान्यसाध्यकव्याप्तिविषयकसमूहालंबनरूपं कारणांतराभावेन च न वह्न्यनुमितिमजीजनदपि तत्त्वन्या
नुमितिमेव॰ तस्य वह्निसाध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यकत्वमनुमितिविशेषणं॰ न चैवं धूमालोकयोर्वह्निव्याप्तिविष
यकेन यज्ज्ञानेन सहकारिविशेषविरहाद्धूमलिंगकपरामर्शो न जनितः अपि त्वालोकपरामर्श एव तस्यालोकलिंगकवह्न्यनुमितिकरण

१३७

त्वमादाय धूमलिंगकानुमानत्वप्रसंगः। धूमलिंगकपरामर्शरूपव्यापारोपधायकस्यैव धूमलिंगकानुमानव्यवहारविषयतयेष्टापत्तेरयो
गादिति वाच्यं। स्वकरणकानुमितिनिष्ठतत्साध्यविषयकत्वप्रयोजकत्वमुक्तं तद्धेतुनिष्ठतादृशव्याप्त्यवगाहितायाएव निवेशनीयत्वात्। स्वम
नुमानत्वेनाभिमतं ज्ञानं अनुमित्युपधानप्रयोजकव्याप्त्यवगाहिताकतृतीयलिंगपरामर्शवारणाय स्वकरणकत्वमनुमितिविशेषणं।
ननु मात्रपदेन व्यतिरेकसहचारत्वावच्छिन्नो यदि व्यवच्छिद्यते तदा केवलान्वयिपिवाच्यत्वादिसाध्यकानुमानासंग्रहः। व्यतिरेकाप्रसिद्धेः। सा
ध्यसाधनसहचारातिरिक्तसहचारत्वावच्छिन्नस्य व्यवच्छेदेपि प्रमेयवानभिधेयात्वादित्याद्यनुमानाव्याप्तिर्दुर्वारैव। यत्तु मात्रसहचारस्यैव सा
ध्यसाधनसहचारत्वात्। न च साध्यतावच्छेदकसंबंधघटितसाध्यसाधनसहचारातिरिक्तसहचारानधीनव्याप्तिग्रहकत्वविवक्षया न दोषः।
स्वरूपादिसंबंधेन प्रमेयादेः साध्यसाधनभावस्थले समवायादिना तत्सहचारस्यैवानिरुक्तसहचारातिरिक्तस्याप्रसिद्धेरिति वाच्यं। एवमपि
संबंधसामान्येन प्रमेयादेः साध्यसाधनभावस्थले तिरिक्तसहचाराप्रसिद्धेर्दुर्वारत्वात्। अथ यो यत्संबंधसाधारणसंबंधतावच्छेदकं दुर्लभं।
अस्तु वा तावद्धन्यान्यत्वादिकं तथापि व्यतिरेकसहचारघटकतावत्पदार्थानां परस्परोपरागेणाविषयतात्तदनधीनत्वस्य यत्र प्रमेयाभाव
स्तत्राभिधेयाभाववत्साधिप्रमाप्रसिद्धेस्तु साध्यतावच्छेदकावच्छिन्नोपरागेणायासहचारविषयतातदन्यसहचारविषयतानधीनत्वस्यैवत

दनुरोधेनविवक्षणीयतयानानुपपत्तिः।प्रमेयवानभिधेयादित्यादौयत्रधूमस्तत्रवह्निरित्यादिसहचारज्ञानीयसहचारविषयितायाए
वनिरुक्तसहचारविषयितातिरिक्तायाःप्रसिद्धिरितिचेदेवमपियत्रप्रथममन्वयसहचारधीजन्यैकोव्याप्तिधीरनंतरंचसहचारांतरविष
यकव्याप्तिज्ञानाधीनाऽपराव्याप्तिधीस्ततोनुमितिस्तत्रान्वयसहचारज्ञानाधीनव्याप्तिधियमादायानुमानस्यकेवलान्वयित्वप्रसंगः।
स्वप्रयोजकव्याप्त्यवगाहितात्वव्यापकतादृशसहचारविषयतातिरिक्तसहचारविषयत्वाप्रयोज्यताकानुमितिकरणत्वादिविवक्षणेन
तत्स्थलीयानुमितिप्रयोजकद्वितीयज्ञाननिष्ठव्याप्त्यवगाहितायांव्यतिरेकसहचारविषयत्वाप्रयोज्यताविरहेणतस्याःस्वपदेनोपादा
नासंभवात् अतिव्याप्तिवारणेगौरवमितिमात्रपदस्यतदतिरिक्तानधीनतार्थकतांपरित्यज्यव्यापकत्वांतभाविनेसमुदितमन्यथाव्या
चष्टेतच्चेति।प्रकृतेति।स्वप्रयोजकप्रकृतव्याप्त्यवगाहिताप्रयोजकसहचारविषयतात्वव्यापकान्वयसहचारविषयतात्वकानुमितिकर
णत्वमित्यर्थः।स्वमनुमितिः।प्रकृतसाध्यसाधनसहचारत्वेनान्यस्यज्ञानस्यापिव्याप्तिग्राहकत्वात्।प्रमेयत्वादिनासहचारविष
यकज्ञानस्याप्यतथात्वादन्वयसहचारादेर्विषयस्यनव्याप्तिभानप्रयोजकतेतिसहचारस्थलेतद्विषयतानिवेशः।साध्यसहचारत्वाव
च्छिन्नविषयतात्वेनप्रवेशः।अन्यथासहचारत्वेनवस्त्वंतरावगाहिभ्रमाधीनव्याप्तिग्रहस्थलेवास्तवसहचारविषयितायाव्याप्तिभा

के०न्या०
१३८

138

१३८

नाप्रयोजकतया अव्याप्त्यापत्तेः। अन्वयसहचारविषयतात्वमपिसाध्यताघवच्छेदकावच्छिन्नविषयतानिरूपितविषयतात्वरूपंबोध्यं।
अन्यथोक्तधूमस्थलस्येवासंग्रहात्। यत्र च साध्यतावच्छेदकरूपेण साध्यादिभिन्नमेवावगाहते नान्सहचारग्रहाद्व्याप्तिधीस्तत्र ग्र
हानुरोधेन वास्तवसाध्यसाधनसहचारविषयतामुपेक्ष्य साध्यतावच्छेदकावच्छिन्नविषयतापर्यंतनिवेशः। अत एव सहचारघटक
संबंधविशेषानिवेशोपि समवायविषयित्वादिना प्रमेयाभिधेययोः साध्यहेतुभावस्थले व्यतिरेकसहचारे साध्यसाधनसहचारत्व
सत्वेपि व्यतिरेकिणि नातिप्रसंगसंभवः। परंतु भावसाधारणेनाभावत्वेन यत्र संयोगसमवायाभ्यां हेतुसाध्यभावस्तत्र व्यतिरे
चार किणि व्यतिरेकसहचारविषयतायामुक्तान्वयसहचारविषयतात्वसत्वेनातिव्याप्तेर्वारणायैव साध्यतावच्छेदकसंबंधसाधनताव
च्छेदकसंबंधयोरन्यतरः प्रवेशनीयः। अत्र साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोरेकतरोपरागेण सहचारविष
तायानिवेशादेव व्यतिरेकसहचारविषयतायावारणसंभवेपि जन्यज्ञानविषयत्वका न जन्यज्ञानविषयत्वाभावादित्यत्र य
त्र जन्यज्ञानविषयत्वाभावस्तत्र अजन्यज्ञानविषयत्वाभावाभावरतिस्त्वाभावरूपहेत्वभावत्वेन सहचारप्रतियोगिसाध्यविषयक
व्यतिरेकसहचारग्रहाद्व्याप्तिके कपिसंयोगाभाववान् कपिसंयोगादित्यत्र यत्र कपिसंयोगाभावाभावस्तत्र कपिसंयो

गाभाव इति स्वाभावरूपसाध्याभावत्वेन सहचारप्रतियोगिहेतुविषयकव्यतिरेकसहचारग्रहाद्गृहीतव्याप्तिके व्यतिरेकिण्यपि
व्याप्तेर्वारणायोभयोरुक्तसहचारविषयतानिवेशः। उक्तातिव्याप्तिवारणमपि विषयतायां तन्निवेशनफलं। सहचारस्य नि
रूपकतावच्छेदकभेदेप्यभेदात् जन्यज्ञानविषयत्वाभावाभावत्वाद्यवच्छिन्ननिरूपितसहचारस्यापि जन्यज्ञानविषयतात्वाद्यवच्छि
न्ननिरूपितत्वतया यथाश्रुतसहचारनिवेशेनोक्तातिव्याप्तेरुद्धरित्वात्। अथ प्रतियोगिवैयधिकरण्यावच्छिन्नयोरेव व्यतिरेकयोः
सहचारस्य व्यतिरेकव्याप्तेरिवान्वयव्याप्तेरपि ग्राहकत्वात्। उक्तस्थले च तादृशविशेषणावच्छिन्नव्यतिरेकसहचाराप्रसिद्धेर्न व्य
तिरेकितासम्भवः। न च प्रतियोगिवैयधिकरण्यावच्छिन्नव्यतिरेकयोरनुमित्यौपयिकव्यतिरेकव्याप्तिघटकतया तादृशयोः स
हचारस्य ग्राहकोक्तः। व्यतिरेकसहचारादन्वयव्याप्तिग्रहमते तु तादृशविशेषणावच्छिन्नयोरेव व्यतिरेकयोः सहचारस्य तद्ग्रा
हकत्वं निर्युक्तिकमिति वाच्यं। व्यतिरेकव्याप्तेर्गमकतापक्षे यादृशसहचारज्ञानस्यानुमितावपेक्षणीयता। व्यतिरेकसहचारेणान्व
यव्याप्तिरेव गृह्यत इति मतेपि फलसाम्यानुरोधेन तादृशसहचारज्ञानेपेक्षाया आवश्यकत्वात्। अधिकरणविशेषे व्यभिचारज्ञा
नविरोधिन एव सहचारज्ञानस्य व्याप्तिग्राहकतया प्रतियोगिव्यधिकरणव्यतिरेकसहचारस्य तथाभूतस्य व्याप्तिग्राहकत्वासं

भवाद्येतिचेन्न। प्रतियोगिव्यधिकरणव्यतिरेकाप्रसिद्धावपि भ्रमात्मकतादृशव्यतिरेकसहचारग्रहाधीनव्याप्तिग्रहकतया व्यतिरेकिता
संभवात्। अत्र च साधननिष्ठसाध्यसहचारसाध्यनिष्ठसाधनसहचारान्यतरत्वस्य तदन्यतरविषयतात्वस्य वा व्यापकत्वं विवक्ष
णीयं। एकविधसहचारमात्रोपादाने ऽन्यविधसहचारमात्रग्रहात् व्याप्तिग्रहे ऽव्याप्तेः। यत्तु। अन्वयव्याप्तिघटकसाधननिष्ठसाध्य
सहचारस्यैव व्याप्तिग्राहकता। अन्वयः पेयते। न तु साध्यनिष्ठसाधनसहचारस्येति साधननिष्ठसाध्यसहचारत्वस्यैव व्याप
कता विवक्षणीया। न च सहचारग्रहस्य व्यापकताग्रहे स्यात्तं ऋपेण हेतुतामत एवेदं लक्षणं। अन्यथा व्यतिरेकसहचारस्यान्वयव्या
प्तिघटकतया तद्ग्रहस्य तद्ग्राहकत्वानुपपत्त्या ऽतिप्रसंगापातात्। तथा च साधनस्य साध्यसहचारज्ञानमिव साध्ये साधनसहचार
ज्ञानमप्यविशेषेण व्यापकतां ग्राहयेदिति साध्यप्रतियोगिकसाधनप्रतियोगिकसहचारद्वयान्यतरत्वं अवश्यमेव निवेशनीय
मिति वाच्यं। उक्तसहचारयोरनुगमके द्वयस्य गुरोर्ऽवच्छेदतया लाघवात्साध्यप्रतियोगिकसहचारज्ञानत्वेनैव व्यापकताबुद्धेहेतुत्वोप
गमात्। साध्यधर्मिकसहचारग्रहस्य व्यापकत्वाग्राहकत्वात्। न च युक्तिनिगमनाविरहात् यत्येकमेव सहचारग्रहयोर्हेतुत्वं स्वीकारमिति वाच्यं।
व्याप्तिग्रहे तद्घटकसाध्यप्रतियोगिकसहचारज्ञानस्यावश्यापेक्षणीयत्वेन साधनप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहकत्वे ऽ

के० गा०
१६०
160

नुमितिपूर्वं नियमतोऽविधसहचारज्ञानकल्पने गौरवात् लाघवस्यैव साध्यप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहकत्वे विनिगमकत्वा
दिति॰ तन्न॰ व्यापकताग्रहे साधनधर्मिकसाध्यसहचारग्रहस्यैव हेतुत्वेपि यत्र साधनसामानाधिकरण्यविशिष्टसाध्यस्य क्वचिद्वैशि
ष्ट्यावगाही व्यापकताग्रहस्तत्र साधनधर्मिकसाध्यसहचारग्रहस्य कल्पनीयतया विनिगमनाविरहस्य दुर्वारत्वात्॰ नन्वन्वयव्याप्तिघ
टकीभावविनिष्ठहेतुसहचारग्रहस्य तद्विशिष्टवैशिष्ट्यावगाहिबुद्धौ हेतुतया ×व्याप्तिः× तादृशसहचारस्यापि ग्राहकतया तत्र
च प्रकृतसाध्यसाधनसहचारत्वात् सत्वेन न तस्य व्याप्तिग्राहकसहचारत्वे व्यापकता॰ एवं यत्र साध्यतावच्छेदकं सा ×व्याप्तिः× धनतावच्छे
दकं वा यपदार्थान्तरसहचारघटितं तत्र पदार्थान्तरसहचारस्यापि व्याप्तिग्राहकतया तत्साधारण्याप्तिग्राहकसहचारत्वे व्यापक
त्वं नान्वयसहचारत्वस्य [illegible]तो भावविनिष्ठसाधनसहचारसाधारणव्याप्तिघटकसहचारत्वेनान्वयसहचारं निवेश्य न लक्षणां
तरमाह ता[illegible]इति॰ यद्यपि पदार्थान्तरीयव्यापकत्वाविषयकप्रकृतव्यापकताज्ञानजनकग्रहविषयपदार्थान्तरीयसहचारवारणा
य प्रकृतव्यापकत्वभानप्रयोजकसहचारोवश्यं विवक्षणीयस्तत्वं च प्रकृतव्यापकताविषयकत्वावच्छिन्नकार्यतानिरूपितृ
कारणतावच्छेदकविषयताकत्वं॰ एवं चाभावादिनिष्ठहेतुसहचारमादायोक्तकल्पेपि न दोषावकाशः तादृशसहचारविशिष्टवे

१६०

शिष्ट्यावगाहिबुद्धित्वस्यैव तादृशसहचारज्ञानजन्यतावच्छेदकत्वात्. प्रकृतव्यापकत्वावगाहितायाअतथात्वात्. प्रकृतव्यापकत्व
विशिष्टसाध्यवैशिष्ट्यावगाहिबोधादिनिष्ठप्रकृतव्यापकताविषयकत्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतायांप्रकृ
तव्यापकताविषयकत्वावच्छिन्नायांतद्घटकाभावादिनिष्ठहेतुसहचारविषयतायाअवच्छेदकत्वेऽपिजन्यतायांव्यापकताप्रत्यक्षत्वाव
च्छिन्नत्वंनिवेश्यविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नजनकतावच्छेदकविषयताकोक्तसहचारवारणंसुकरमेव. तथापिकालांतरीणप्रकृतव्याप्तिग्रह
जनकज्ञानीयव्यतिरेकसहचारविषयतायाअपिइदानींतनानुमितिप्रयोजकप्रकृतव्यापकताविषयताशालिप्रत्यक्षत्वावच्छिन्ननिरूपित
जनकतावच्छेदकत्वंदुर्वारमेव. कालांतरीणव्याप्तिज्ञानविषयतायाइदानींतनव्याप्तिज्ञानविषयतोभेदविरहात्. नचानुमितिव्यक्तेरुपधा
यकग्रहनिष्ठायाव्यापकत्वविषयताशालिप्रत्यक्षत्वावच्छिन्नकार्यतातत्प्रतियोगिककारणतावच्छेदकत्वविवक्षायांनायंदोषः इदानींतना
नुमित्युपधायकेदानींतनव्यापकताग्रहेन्वयसहचारमात्रग्रहाधीनेव्यतिरेकसहचारग्रहकार्यतायाअसत्वादितिवाच्यं. अन्वयव्यतिरेकस
हचारज्ञानयोःप्रत्येकमुक्तसहचारज्ञानाव्यवहितोत्तरत्वंकार्यतावच्छेदककोटौनिवेश्यहेतुताकल्पनएवव्यतिरेकसहचारज्ञानकार्यता
याअन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहावृत्तित्वोपपत्तेः अव्यवहितोत्तरत्वनिवेशेचव्यभिचारावारकव्यापकत्वविषयत्वादीनां

कार्यतावच्छेदके निवेशस्याप्रामाणिकत्वया व्यापकत्वविषयकत्रसक्षत्वावच्छिन्नकार्यताघटितलक्षणेऽसंभवात्‌· कार्यतावच्छेदके
व्यवहितोत्तरत्वमनिवेश्य व्यभिचारवारणायान्वयव्यतिरेकसहचारविषयत्वान्यतरवत्वेन सहचारज्ञानस्य व्यापकताग्राहकत्वे व्यति
रेकसहचारविषयताया अन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहनिष्ठकार्यताप्रतियोगिककारणतावच्छेदकतया उपवादत्वाद
तः स्वोपधानप्रयोजकस्य व्यापकत्वविषयतासंबंधस्य प्रयोजकं यादृशसहचारविषयत्वं तादृशविषयतात्वव्यापकान्वयसहचार
विषयतात्वकत्वमनुमितौ विशेषणमुपगंतव्यं· प्रयोजकत्वं च स्वरूपसंबंधविशेषः ननु पूर्वनिरुक्तमिसुपगंतव्यं· एवं च कालांतर
रीयज्ञाननिष्ठव्यतिरेकसहचारविषयताप्रयोज्यव्यापकत्वविषयतासंबंधेनेदानींतनानुमितिसुपधानप्रयोजकइतिसकलके
वलान्वय्यनुमानेषु उक्तलक्षणानिर्वाहः। स च न संभवति· व्यापकत्वविषयतांतर्गतसाधनसहचारविशिष्टाभाववैशिष्ट्यविषयता
संबंधप्रयोजकाभावनिष्ठसाधनसहचारादिविषयताया अपि व्यापकत्वविषयतासंबंधप्रयोजकत्वादित्याशयेनान्वयसहचार
त्वघटितलक्षणेऽनिर्भरः। तादृशसहचारः। प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारः। यद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानि
रूपितसहचारविषयता· प्रकृतव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नविषयतांतःपातिनी· तद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषय

तानिरूपितविषयतात्वस्यप्रकृतव्याप्तिग्राहकसहचारत्वावच्छिन्नविषयतात्वव्यापकत्वंविवक्षणीयमतोनपूर्वोक्तलक्षणोक्तदोषः।
केवलान्वयिन्यपिव्याप्तिग्राहकसहचारादिज्ञानीयसाध्यादिविषयतायांनिरुक्तविषयतात्वासत्वादसंभवइतिव्याप्यदिशिसहचारत्वांशनि
वेशः।यद्रूपावच्छिन्नसहचारविषयताव्याप्तिविषयतांतःपातिनातद्रूपावच्छिन्नविषयतात्वस्यैवव्यापकत्वोक्तौव्याप्तिघटकताव
च्छेदकसहचारत्वस्यव्यतिरेकिसहचारज्ञानीयसहचारविषयतावच्छेदकत्वादतिप्रसंगइतिव्यापकदिशिप्रतियोग्यनुयोगिनोर्वि
षयताविशेषनिवेशः।प्रतियोग्यनुयोगिनोरेकतरमात्रनिवेशेजन्यज्ञानविषयत्ववान्जन्यज्ञानविषयत्वाभावादित्युक्तव्यतिरेकिणिव्यतिरेकस
हचारविषयतायाःसाध्यतावच्छेदकेतररूपावच्छिन्नविषयतानिरूपितत्वेनातिप्रसंगःस्यादितिउभयरूपावच्छिन्नविषयतानिवेशः।हेतु
तावच्छेदकावच्छिन्नसहचारविषयतात्वेनसामानाधिकरण्यविषयतांतःपातिताविरहेपिनक्षतिः।हेतुतावच्छेदकविशिष्टविशेषणतापन्न
तादृशप्रकृतव्याप्तिविषयतांतःपातितायाएवनिवेश्यत्वात्।व्यापकदिशिसहचारत्वनिवेशोनकार्यः।प्रयोजनविरहात्।प्रतियोग्यादिनिष्ठविषय
ताविशेषनिरूपितविषयतात्वपर्यंतनिवेशलाभायैवचतत्रसहचारपदं।अथात्रलक्षणेधूमाभाववान्वह्न्यभावादित्यत्रधूमप्रमाविषयत्वाभा
ववान्वह्निप्रमाविषयत्वाभावादित्यत्रवासाध्याभाववत्त्वहेत्वभावत्वाभ्यांसहचारदर्शनगृहीतव्याप्तिकेव्यतिरेकिण्यतिव्याप्तिर्वारितैव·अ

न्वयव्याप्तेरप्यभावत्वावच्छिन्नसहचारत्वेन सहचारस्याप्रवेशादुक्तसहचारज्ञानीयविषयतायां अर्पितरूपावच्छिन्नत्वात्. व्याप्तिघटकता
नवच्छेदकरूपानवच्छिन्नतद्रूपावच्छिन्नप्रतियोग्यादिविषयतानिवेशश्च महानसीयवह्नित्वादिना सहचारदर्शनेगृहीतशुद्धवह्नित्वाद्यवच्छिन्न
व्याप्तिकेकेवलान्वयिन्यव्याप्तिः। सहचारप्रतियोगिन्यधिकस्य महानसीयत्वादेर्भाने प्युक्तसहचारदर्शनस्याधिकं त्वित्यादिन्यायेनोक्तव्याप्तिग्रा
हकतायामनिर्विवादत्वात्. नच प्रकृतव्याप्तिग्राहकताप्रयोजकं यद्व्याप्तिघटकतानवच्छेदकरूपावच्छिन्नत्वं तच्छून्यविषयतानिरूपितविषयता
त्वस्य व्यापकत्वं विवक्षणीयं. महानसीयवह्नित्वादिना वह्न्यादेः सहचारग्रहात् शुद्धवह्नित्वावच्छिन्नव्याप्तिग्रहस्थले प्रकृतव्याप्तिघटक
तानवच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नस्य त्वे व्याप्तिभानप्रयोजकसहचारप्रतियोगिविषयतानिष्ठस्य व्याप्तिग्राहकतायामनुपयोगाद्विशिष्ट
व्यतिरेकस्य तादृशविषयतायामक्षततया ऽव्याप्त्यनवकाशात्. दर्शिताभावसाध्यकव्यतिरेकिणि च व्याप्तिभानप्रयोजकसहचारप्रतियोगिवि
षयतानिष्ठस्याभावरूपसाध्यात्मकप्रतियोग्यवच्छिन्नत्वस्य व्याप्तिग्राहकतायामपेक्षणीतया न तद्विषयतायां विशिष्टव्यतिरेक इत्यतिव्याप्ते
रप्यनवकाश इति वाच्यं। यद्रूपावच्छिन्नसाध्यसाधनयोः केवलान्वयिनोर्व्यतिरेकसहचारभ्रमः कस्यापि कदापि न प्रसिद्धः। तद्रूपावच्छिन्नसाध्य
साधनकव्याप्तिग्राहकताप्रयोजकतद्व्याप्तिघटकतानवच्छेदकावच्छिन्नत्वस्याप्रसिध्या तद्रूपावच्छिन्नसाध्यसाधनकत्वे केवलान्वयिन्यतिव्याप्ति

को० गा० १५२

152

१५२

रितिचेन्न॰प्रकृतव्याप्तिघटकतानवच्छेदकरूपनिरूपितत्वप्रकृतव्याप्तिग्राहकताप्रयोजकत्वोभयाभाववत्त्वनिष्ठावच्छेदकतासामान्यकप्रतियोग्यनु
योगिविषयतायाव्यापकादिशिनिवेशो सामंजस्यात्॰प्रकृतव्याप्तिग्रहसामान्यनिष्ठप्रतिबंधकतावच्छेदकविषयतात्वस्यवाविवक्षणीयत्वात्॰तादृशा
प्रतिबंधकतास्य प्रतियोग्यनुयोग्यनुपरागेण सहचारविषयज्ञानावृत्तित्वेनापिविशेषणीया॰तेनधूमाभाववान्वह्न्यभावादित्यादौयत्रधूमाभावा
भाववत्तत्रवह्न्यभावाभाववदित्यादिज्ञानीयसहचारविषयतायाआधेयत्वेनाभावाधिकरणीयइत्यादिज्ञाननिरूपितव्याप्तिज्ञानसामान्यनिष्ठप्र
इकले तिबंधकतावच्छैपिनातिव्याप्तिः।अभावाधिकरणावृत्तिरभावइतिज्ञानस्यचाहार्यतयातत्प्रतिबंधकतावच्छेदकत्वं व्यतिरेकसहचारविषय
तायामसंभावितमेव॰।व्यतिरेकिणिव्यतिरेकसहचारादेवान्वयव्याप्तिर्ग्रह्यते न देवचव्यतिरेकित्वप्रयोजकमितिमतंनयुक्तं॰व्यतिरेकसहचा
रस्यसत्वात्तंत्रेणव्याप्तिग्राहकत्वेमानाभावात्॰अधिकरणविशेषेव्यभिचारशंकानिवर्त्तनद्वारेवक्वचित्तदुपयोगात्॰अन्वयसहचारस्यग्रहंवि
नातद्घटितायाअन्वयव्याप्तेर्दुर्ग्रहतयाकेवलव्यतिरेकिविलोपापत्तेश्च॰नचविशिष्टसहचारानुपस्थितावपितद्घटकपदार्थानांविशेष्यत्वेनाना
मुपस्थित्यान्वयव्याप्तिधीविशिष्यविशेषणमित्यादिन्यायेनसंभवत्येवेतिवाच्यं।एवंसतिव्यतिरेकसहचारान्वयसहचारयोरुभयोरप्यग्रहेउ
करीत्याव्याप्तिग्रहसंभवेनतदनुमानस्यतुरीयतापत्तेः।अस्तुवान्यतरसहचारस्यसत्वात्तंत्रेणैवव्यापकताग्राहकत्वं तथापितत्प्रत्यक्षेएव

के०ग०
१४३
143

तद्धेतुतयाशब्दादिना व्याप्तिग्रहे तदपेक्षाविरहात्‌ । शब्दादिजन्यप्रत्येकपदार्थोपस्थितिमूलकग्रहविषयव्याप्तिकानुमानस्य तुरीयता
पत्तिरुद्धरिष्यत इति व्यतिरेकिणि व्यतिरेकव्याप्तेरेवगमकता । व्याप्तेरन्वयादिनिरूप्यत्वमेवान्वयित्वादिप्रयोजकमिति मणिकारीयमतमे
वसाधीयस्तन्मतमेवावलंबमानः केवलान्वयित्वं निर्वक्ति गृहीतेति । गृहीतव्याप्तिभेदात्‌ । तत्कालीनतत्पुरुषीयानुमित्यौपयिकव्या
प्तेरन्वयादिनिरूप्यत्वरूपवैलक्षण्यात्‌ । प्रकृतहेतुकेति । प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयकत्वघटितधर्मावच्छिन्नतत्काली
नतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतायां यादृशरूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्व
मवच्छेदकं तादृशरूपनिष्ठविषयताकव्यापकप्रकृतसाध्यव्याप्तित्वावच्छिन्नविषयताकानुमितिकरणत्वं तद्रूपावच्छिन्नसाध्यकतद्रूपा
वच्छिन्नहेतुककेवलान्वय्यनुमानत्वमित्यर्थः । यत्र व्यतिरेकिणि महानसवृत्तित्वादिना विशिष्टस्य हेतुता तत्र साध्याभावव्यापकाभावप्र
तियोगितावच्छेदकतादृशहेतुतावच्छेदकरूपव्याप्तो धूमव्यापकवह्निसामानाधिकरण्यत्वरूपप्रकृतसाध्यव्याप्तित्वसत्त्वात्‌ । तद्व्याप्तिरतो
विषयतापर्यन्तनिवेशः । हेतुतावच्छेदकावच्छिन्नस्य साध्याभावव्यापकाभावप्रतियोगित्वस्य हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नस्यवा
तस्य व्याप्तित्वमत एतद्दोषानवकाशोप्यखण्डव्याप्यत्राप्रसिद्धिः स्यात्‌ केवलान्वय्यनुमानसंग्रहाय विषयतानिवेशानं बोध्यं । सद्धेतुमानात्मकव्या

१४३

प्ति विशिष्ट लिंगज्ञानरूपस्यैव लक्ष्यत्वेच यथाश्रुत व्याप्तिरेव निवेश्यते· तेजोविशेषत्वादिना वह्नेर्व्यतिरेकव्याप्तेर्वह्नित्वादिना च तस्यान्वय
व्याप्तेर्ग्रहात् उभयरूपेण यत्र वह्न्यनुमितिस्तत्र केवलान्वयिनि वह्नित्वावच्छिन्नसाध्यकानुमाने यत्र च धूमत्वावच्छिन्नेऽन्वयव्याप्तेर्द्रव्यविशेषत्वा
द्यवच्छिन्ने च व्यतिरेकव्याप्तेर्ग्रहादनुमितिस्तत्र केवलान्वयिनि धूमत्वावच्छिन्नहेतुकानुमानेऽव्याप्तेर्वारणाय उक्तसाध्यतावच्छेदकयुक्त
तद्धेतुतावच्छेदकयोर्निवेशः। ननु पृथिवीत्वादिव्यापकीभूताभावप्रतियोगित्वादिरूपहेतुतावच्छेदकपुरस्कारेण गृहीतान्वयव्याप्तिके तद्रूपा
वच्छिन्नहेतुककेवलान्वय्यनुमानेऽव्याप्तिः हेतुतावच्छेदकरूपव्यतिरेकव्याप्तौ अन्वयव्याप्तित्वविरहात्· तादृशहेतुतावच्छेदकावच्छिन्नहे
तुमत्तानिश्चयत्वस्यापि तदनंतरानुमितिजनकतावच्छेदकत्वात् तादृशहेतुतावच्छेदके निरुक्तयुक्तसाध्यकानुमित्सौपयिकव्याप्तित्वस्या
क्षतत्वाच्चेत्सत आह उक्तमिति· तद्विशिष्टपक्षधर्मताज्ञानेऽपि· पक्षे तद्विशिष्टवत्तानिश्चयेऽपि व्याप्त्यंतरबोधं विना· तद्रूपावच्छिन्नविधेय
तातया निर्गंधत्वव्याप्तिभानं विना· निर्गंधत्वानुमित्युदयादिति· अयं भावः। निरुक्तनिश्चयत्वस्यावच्छेदकत्वं न स्वरूपसंबंधविशेषः। व्या
प्तित्वेन पदार्थान्तरावगाहिनिश्चयस्याप्यनुमितिजनकतया तदसंग्राहकस्य व्याप्तित्वविशिष्टवत्तानिश्चयत्वस्य तादृशावच्छेदक
त्वासंभवात्· किंत्वनतिरिक्तवृत्तित्वं· एवं च निर्गंधत्वव्याप्त्यनवगाहिज्ञानसाधारणस्य दर्शितहेतुतावच्छेदकविशिष्टवत्तानिश्चय

के०ग०
२५४
144

त्वस्यानिर्गंधत्वानुमितिजनकतातिरिक्तवृत्तित्वात् तत्र न निरुक्तव्याप्तित्वमिति। यद्यपि धूमत्वावच्छिन्नवत्तानिश्चयत्वस्य तद्रूपसंबंधतद्रू
पावच्छेदकत्वाश्रयत्वमादाय धूमत्वावच्छिन्नहेतुकान्वयिन्यपि लक्षणानुपपत्तेः। व्यतिरेकव्याप्त्यवच्छिन्नहेतुकान्वयिपर्यंतानुसरण
मनुचितं तथापि किंचिद्व्यापकताघटितत्वरूपं अन्वयव्यतिरेकव्याप्त्यन्यतरत्वरूपं वा व्याप्तित्वं यद्धि जनकज्ञानविषये निवेश्यते त
द्धूमत्वादौ तद्विरहेण न तदवच्छिन्नहेतुकेनुपपत्तिरिति व्यतिरेकव्याप्त्यवच्छिन्नहेतुकस्थले दर्शितरीत्यानुपपत्त्युद्धारः। इदमुपलक्ष
णं। प्रकृतसाध्यीयव्यतिरेकव्याप्त्यवच्छिन्नहेतुकेन्वयिन्यव्याप्तिवारणार्थं वक्ष्यमाणरीत्यैतद्दोषोद्धारो बोध्यः। ननु उक्तरीत्या साध्यांत
रीयव्यतिरेकव्याप्त्यवच्छेदकहेतुतावच्छेदककवत्वेनान्वयिन्यव्याप्तिपरिहारेपि वह्न्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिमानित्यादौ केव
लान्वयिन्यव्याप्तिर्दुर्वारैव तत्र हेतुतावच्छेदकरूपाया व्यतिरेकव्याप्तेरपि प्रकृतसाध्यकानुमित्यौपयिकत्वात् तद्विशिष्टवत्ताज्ञा
नसत्वे व्याप्त्यंतरबोधं विनापि प्रकृतसाध्यानुमित्युत्पत्तेरित्यत आह वह्न्यभाववानयमिति। न त्वेवं व्यतिरेकव्याप्तिरेव प्रकृत
साध्यकानुमित्यौपयिकीत्यनुपज्यते प्रकृतहेतुतावच्छेदकविशिष्टविशेष्यतापन्नपक्षधर्मविशिष्टवत्ताज्ञानत्वं प्रकृतानुमिति
जनकतावच्छेदकं तत्त्वमनुमित्यौपयिकत्वं प्रकृते विवक्षणीयमिति भावः। अथ दर्शितव्यतिरेकव्याप्तिरूपहेतुतावच्छेदकविशि

२५४

ष्टविशेषणतापन्नमेयत्वादिविशिष्टयत्तानिश्चयत्वस्यापिप्रकृतानुमितिजनकतानतिरिक्तवृत्तित्वात् मेयत्वादौ च प्रकृतसाध्यव्याप्तित्वा
भावादव्याप्तिर्दुर्वारैव· अनुमितिप्रयोजकविषयताश्रयत्वेन धर्मविशेषणत्वे च व्यतिरेकव्याप्त्यवच्छिन्नान्वयव्याप्तेरप्यनुमित्यौपयिकत्वं दु
र्दृटं· तदनवगाहिनोपि व्यतिरेकव्याप्तिविशिष्टवत्ताज्ञानादनुमित्युत्पत्त्या तद्विषयताया अपि अनुमित्यप्रयोजकत्वात्· अन्वयव्यतिरेकव्या
प्त्यन्यतरत्वेन धर्मविशेषणे यत्र व्यतिरेकव्याप्तिरप्रसिद्धा तत्साध्यकानुमानाव्याप्तिरिति चेन्न· निरूढव्याप्तिविषयताव्यापकव्यति
रेकव्याप्तिविषयतात्वाभाववत्वस्य विवक्षितत्वात्· व्यतिरेकव्याप्तेर्वाच्यत्वादिसाध्यकेऽप्रसिद्धावपि न क्षतिः। एवं शब्दच्छेदकपदार्था
नां विषयताकूटस्य विवक्षणीयत्वात्· वस्तुतस्तु· यद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वं अनुमितिकार
णतानतिरिक्तवृत्तितत्वमेवानुमित्यौपयिकव्याप्तित्वं· मेयत्वादिकं च न तथा· मेयत्वाद्यवच्छिन्नवह्निव्यापकीभूताभावप्रतियोगि
त्वावच्छिन्नप्रकारकस्यापि यदवच्छिन्नाभावत्वेन व्यापकताव्यतिरेकशरीर×व्याप्ति×रेप्रविष्टाप्रकारांशे तादृशहेतुतावच्छेदकाप्रकार
कनिश्चयस्यानुमित्यजनकत्वात्· तादृशनिश्चयत्वस्य जनकतानतिरिक्तवृत्तित्वात्· वह्निव्यापकीभूताभावप्रतियोगित्वसहितस्यज
लत्वत्वादेर्हेतुतावच्छेदकताया यत्र तत्रान्वयव्याप्तेस्तदवच्छिन्नांशभानस्यानुपयोगात्· तत्रैकेवलान्वयितायाएवानुपयमात्· अपितु

के०ग०
२८५
145

जलत्वत्वाद्यवच्छिन्नलिंगकव्यतिरेकितायाएवोपगमात्. निरुक्तहेतुतावच्छेदकासहितव्यापकाभावप्रतियोगित्वप्रकारकनिश्चयस्या
नुमित्यजनकत्वमित्याशयेनैववह्निव्यापकाभावप्रतियोगित्वरूपहेतुतावच्छेदकस्यानुमित्यौपयिकव्याप्तित्वनिराकरणं. न च धूमव्याप
कवह्निसमानाधिकरणरासभवानित्यादिज्ञानादनुमितिवारणायहेतुतावच्छेदकसहितस्यैवव्यापकसामानाधिकरण्यस्यहेतुत्वेऽभि
मानमनुमितावुपयुज्यतां साध्याभावव्यापकाभावप्रतियोगित्वस्य च केवलस्यैवभानमुपयुज्यतां इति वाच्यं. तथासति द्रव्यत्वाभा
वव्यापकविशिष्टसत्ताद्यवच्छिन्नाभावप्रतियोगिसत्तादिमत्ताज्ञानात् गुणादौ बाधानवतारदशायां द्रव्यत्वाद्यनुमानापत्तेः हेतु
तावच्छेदकस्य च व्याप्तिधर्मितावच्छेदकतयाभानं यदि नोपयुज्यते तदा नोपयुज्यतामिति. एतेन केषांचिद्व्यतिरेकव्याप्तिरनुमित्यौप
यिकी. ननु सैव. अन्वयव्याप्तिरेव. एवकारोऽप्यर्थः. एवं च तत्र केवलान्वयिताऽभाभ्युपेयत एव. अन्वयव्याप्तिभानस्यावश्यकत्वा
दित्यलक्ष्यतयानाव्याप्तिरिति भावः इति व्याकारो व्याकार एव. तन्मते ज्ञातानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुक
केवलान्वय्यनुमानत्ववत् तदवच्छिन्नहेतुकव्यतिरेक्यनुमानत्वमपि न संभवति तद्रूपावच्छिन्ने व्यतिरेकव्याप्तेरयहेतस्य हेतुता
नवच्छेदकत्वात्. न च तादृशानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नलिंगकव्यतिरेकित्वासंभवोऽपि तद्रूपशरीरे यद्रूपाव

२८५

छिन्नाभावत्वावच्छिन्नव्यापकत्वं निविष्टं तद्रूपावच्छिन्नहेतुकव्यतिरेकित्वमव्याहतमिति तदेवोपगंतव्यमिति वाच्यं· तथा सति ग्रंथकृ
तो वह्निव्यापकाभावप्रतियोगिमत्वादिति हेतुनिर्देशासंगतेरिति चिंतनीयं· सांप्रदायिकास्तु· जलं निर्गंधमित्यादिकं प्रकृतसाध्यके
त्यस्य व्याप्तिप्रदर्शनपरं· वह्न्यभाववानित्यादिकं तु प्रकृतहेतुकेत्यस्य व्याप्तिप्रदर्शनपरमिति वदंति तन्न· यतः जलं निर्गंधमित्यादौ
हेतुतावच्छेदकीभूतपृथिवीत्वाभावानुमित्यौपयिकव्याप्तेर्वह्न्याद्यभावसाध्यकहेतुतावच्छेदकीभूतवह्निव्यापकाभावप्रतियोगित्व
रूपव्याप्तेरिव प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वाभावाद्देववाक्ये तत्र प्रकृतसाध्यकत्वनिवेशव्यापृत्यसंगतेः। न च यदव
च्छिन्नाभावत्वे हेत्वभाववन्निष्ठसाध्याभावव्यापकतायादृशव्यतिरेकव्याप्तेरप्रविष्टासात् तद्धर्मावच्छिन्नहेतुकाव्याप्तिः। एवं च जलत्वत्वा
वच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेः पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुकत्वविरहेपि पृथिवीत्वव्यापका
भावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेस्तादृशाभावप्रतियोगित्वावच्छिन्नहेतुकतया तादृश्याः पृथि
वीत्वव्यापकताघटितव्याप्तेरेव प्रकृते विवक्षणान्न प्रकृतहेतुकेत्यनेनेतद्व्यावृत्तिरिति वाच्यं। एवं सति पृथिवीत्वव्यापकाभाव
प्रतियोगित्वावच्छिन्नाभावत्वत्वरूपपृथिवीत्वव्यापकतावच्छेदकस्य पृथिवीत्वव्यापकताघटितत्वेनात्माश्रयात्· अवच्छेदा

के०गा०
१४६
146

वच्छेदकत्माभावानुपपत्तेः। अवच्छेदकप्रविष्टपृथिवीत्वव्यापकताजलत्वत्वावच्छिन्नाभावत्वावच्छिन्ना· अवच्छेदीभूतपृथिवीत्वव्यापकाभावप्र
तियोगित्वावच्छिन्नाभावत्वावच्छिन्नपृथिवीत्वव्यापकतातोभिन्नैवेति नात्माश्रय इति चेत्तर्हि हेतुतावच्छेदकीभूतपृथिवीत्वव्यापकाभावप्र
तियोगित्वान्नादृशाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितात्(?) तद्व्यापकतावच्छेदककोटिप्रविष्टं जलत्वत्वावच्छिन्ना
भावत्वावच्छिन्नपृथिवीत्वव्यापकाभावप्रतियोगित्वमन्यदेवेति कथं हेतुतावच्छेदकीभूतव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्या
प्तित्वं· तथा च प्रकृतहेतुतावच्छेदकगर्भितद्वच्छिन्नाभावत्वाद्यवच्छिन्नव्यापकतायास्तद्रूपघटितत्वेन कथंचिदपि निवेशासंभवात्· प्रकृत
हेतुतावच्छेदकतद्रूपव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वं दुर्घटमेव· अ…· वह्न्यभाववान् वह्निव्यापकाभावप्रतियोगिम
त्वादित्यादिका प्रकृतहेतुकत्वव्याप्तिज्ञदर्शनपरा फक्किकैव प्राथमिका· तदुपरि जलं निर्गंधं पृथिवीत्वव्यापकाभावप्रतियोगिमत्वादित्या
दिकं प्रकृतहेतुकेऽस्य व्याप्तिज्ञानस्थलं किमर्थमुपेक्षितमित्याकांक्षायां च रमा जलं निर्गंधमित्यादिफक्किका· जलं निर्गंधं इत्यादौ हेतुताव
च्छेदकव्यतिरेकव्याप्तेः प्रकृतसाध्यकानुमित्यप्रयोजकत्वाभावाद् अवधारणे(?) प्रकृतहेतुतावच्छेदकेऽस्य न तत्कारणप्रयोजकत्वमिति तदर्थ
दृश्यावृत्तः(?)। तदपि न सम्यक् वह्निमान् धूमादित्यादेः केवलान्वय्यनुमानस्यैव तद्व्यक्तित्वादिना धूमादेर्व्यतिरेकिनादृशायां संग्रहापत्तेः

१४६

हेतुकेऽस्य स्वावश्योपादेयतयात व्याप्तिस्थलांतरानुसरणानौचित्यात्· गृहीतव्याप्तिके हेत्वाङ्केऽप्राचीनसंवादमाह अत एवेति· यल्लिंग
ज्ञानं· यद्रूपावच्छिन्नलिंगविषयता·नत्र प्रकृतसाध्यानुमितिहेतुः। न प्रकृतसाध्यानुमितिजनकतावच्छेदकीभूता· तथा चेतरव्याप
काभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिंगविषयतासामान्यमभावप्रतियोगित्वविषयतानिरूपितयद्रूपावच्छिन्न
लिंगविषयतासामान्यं वा तत्कालीनतत्पुरुषीयप्रकृतसाध्यानुमितिजनकतावच्छेदकत्वशून्यं तद्रूपावच्छिन्नतत्पुरुषीयतत्कालीनप्र
कृतसाध्यककेवलान्वय्यनुमानमित्यर्थः। यद्यपि यत्र साध्याभावातिरिक्तकिंचिद्व्यापकाभावप्रतियोगित्वस्यान्वयव्याप्तेश्च विशेष्य
विधया लिंगतावच्छेदकावच्छिन्नस्यैकधैव समूहालंबनवैलक्षण्येन भानं तत्र केवलान्वयिन्यव्याप्तिस्तत्र तादृशाभावप्रतियोगित्व
प्रकारतानिरूपितविशेष्यतायाः एव अन्वयव्याप्तिप्रकारतानिरूपिततया प्रकृतानुमित्यौपयिकत्वात्· केवलान्वयिसाध्यके साध्या
भावाप्रसिध्या प्रकृतसाध्याभावव्यापकाभावप्रतियोगित्वप्रकारतापर्यंतनिवेशासंभवात्· तथापि तादृशप्रकारतानिरूपितलिंग
विषयतास्थले लिंगविषयतानिरूपिततादृशप्रतियोगित्वप्रकारताया विवक्षणान्न दोषः। एवं चाभावप्रतियोगित्वप्रकारतामा
त्रनिवेशेनाप्युपपत्तेः। अभावविशेषणव्यापकताप्रवेशनमनर्थकं इत्याशयेनाभावप्रतियोगित्वेनवेत्युक्तं· साध्यसामानाधिकर

के॰ गा॰
१५७
157

एतद्रूपान्वयव्याप्तेरपिसाध्यसंबंधिनिष्ठसंबंधप्रतियोगित्वरूपतयाऽसंभवइत्यतोऽभावोपादानं॰ केवलान्वयिमेयत्वादिहेतुकस्थ
लेचाभावप्रतियोगित्वेनलिंगतावच्छेदकावच्छिन्नविषयताभ्रमएवप्रसिद्धइतिनाव्याप्तिः। सर्वत्रभ्रमस्याप्रामाणिकतयास्वय
मन्यथाकेवलान्वयित्वंनिरुक्तमितिबोध्यं॰ एवंकेवलव्यतिरेकित्वादिकमपितिन्यथामतं॰ अन्वयसहचारान्वयव्याप्तिस्थलेव्य
तिरेकसहचारंव्यतिरेकव्याप्तौनिवेश्यकेवलव्यतिरेकित्वंउभयव्याप्तिनिवेशेनचान्वयव्यतिरेकित्वंनिर्वाच्यमित्यर्थः। केवलान्व
यिनोऽभिधेयत्वस्यनविपक्षद्वयमभिधेयत्वसाध्यकेकेवलान्वय्यनुमानेलक्षणासंगमनपरेमूलग्रंथेऽभिधेयत्वंयदिशाब्दबो
ध्यत्वरूपंविवक्षितंतदायथाआकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठतेइत्यपिमूलग्रंथविरोधः। प्राचीनमतेशा
ब्दाश्रयत्वस्याकाशपदाशक्यत्वेऽपिशाब्दबोध्यत्वरूपाभिधेयत्वेऽविवादात्॰ अन्यथाशब्दाउपतिष्ठतइत्यस्यैवव्याघा(ता)दित्यतो
व्याचष्टेऽभिधेयत्वमिति॰ अनभिधाने॰ अभिधेयत्वशून्यत्वात्मके॰ आभिधेयत्वशून्यत्वरूपाभिधेयत्वेविपक्षताविरहप्र
संकत्वरूपंतद्व्याघातकत्वंनसंभवतीतिव्याघातपदमन्यथाव्याचष्टेविपक्षेति॰ विपक्षत्वासिद्धिरिति॰ विपक्षादिपदेनविपक्ष
तयाभिमतस्यानभिधानेतत्रशब्दप्रमाणाप्रवृत्तेस्तदप्रवृत्तौचान्यायसाध्यपरार्थानुमानस्यानवकाशात्॰ परंतितस्यविपक्ष

१५७

त्वसिद्धेरसंभवइतिभावः।मूले॰नभिधेयमिति॰तच्छब्दानभिधेयमित्यर्थः।उपतिष्ठतइति॰संबंधिस्मृतौप्रकारांशेसंबंधग्रहस्यान
पेक्षिततया शब्दाश्रयत्वस्याशक्यत्वेपितत्प्रकारेणधर्मिणिशक्तिग्रहादेवतत्प्रकारेणधर्मिस्मरणस्यतद्धर्मांशे इष्टत्वादि
त्यावर्तकानतिप्रसक्तलक्षणशक्यतावच्छेदकत्वग्रहादेवतत्प्रकारकशाब्दबोधस्यचसंभवादितिभावः।एतच्चोपलक्षणं।
लक्षणयाभिधेयत्वस्योपस्थितेरपि दृष्टांतत्वसंभवात्॰शब्दानभिधेयविपक्षस्या॰क्षस्योपस्थितावपितत्रविपक्षत्वमाना
भावः।शब्दस्यपरंप्रतिआप्तोक्तत्वासिद्धेः।अनुमानंचसाध्याप्रसिद्ध्यानसंभवतीत्याशंक्याभिधेयत्वविपक्षसिद्धिपर्यव
सायिसाध्याप्रसिध्याद्यनुपस्कन्दितमभिधेयत्वपक्षकमनुमानमाह एवंचेति॰अनभिधेयत्वेपिशब्दादुपस्थितिसंभवेचेत्यर्थः।
एतेनविपक्षस्योक्तानुमानसामान्यतःसाध्यघटकतयाशब्दात्तदनुपस्थितौशब्देनसाध्यादेःप्रतिपादनासंभवात्परार्थानुमाना
संभवोनिराकृतः।प्रकृतानुमानेनैवविपक्षधर्मिपर्यंतसिद्धयेधर्मिणमंतर्भावयतिकृतोपीति॰इत्यनुमानात्॰विपक्षसिद्धि
रितिशेषः।अव्याप्तृत्वे॰सार्वत्रिकत्वे॰केवलान्वयिपि॰व्याप्तृत्वरूपसाध्यविरहि॰एवमग्रेपि॰ननुव्याप्तृत्वस्यासत्ताभावप्रति
योगित्वरूपत्वे॰एवमसत्ताभावप्रतियोगित्वस्यसत्तादिनाव्याप्तृत्वस्यसत्तादेःपौनरुक्त्यमतोव्याप्तृत्वमन्यथाव्याचक्षाणएवव्या

के०ग्र०
१४८

148

वृत्तित्वस्येत्यादिना दर्शितं व्यभिचारमुद्धरत्यत्यंताभावप्रतियोगित्वे व्यभिचारप्रदर्शनपरमेवमित्यादिग्रंथमवतारयति दीधितौ न
न्विति अन्योन्याभावेति अन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वमित्याशयेन निरुक्तव्याप्तिमत्त्वसाधनमित्याश
यः। लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेऽन्योन्याभावप्रतियोगितावच्छेदकत्वरूपव्याप्तिमत्त्वसाध्य
कानुमानेकं बुयीथादिमत्त्वात् तादृशधर्मत्वहेतौ व्यभिचारः इत्यतस्तन्निराकरणाय गुरोरप्यवच्छेदकत्वमंगीकरोति लघ्विति व्या
प्तिमत्त्वं यतो व्याप्तिमत्तस्य केवलान्वयित्वनिबंधनमुक्तव्यभिचारं निरस्यति गगनेति इति न व्यभिचार इत्यत्रेतिनाऽतद्व्यवर्थके
नोक्तोभयमेव परामृश्यते प्रथमे साध्यसत्त्वात् गगनादौ तादृशधर्मत्वरूपहेतुघिरगा व्यभिचारनिरासो बोध्यः। मूले केवला
न्वयीति अत्यंताभावप्रतियोगित्वस्यान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्याप्तिमत्त्वाप्रसक्तेरिति भावः। नानेति त
थाचैकधर्मनिष्ठव्याप्तिमत्त्वादिकं तद्रूपवद्भिन्नांतिरिक्तव्याप्तिमत्तस्य च न केवलान्वयित्वसंभव इत्यतो न व्यभिचार इति भावः॥ त
योः अनुगतयोः। नन्वव्याप्यवृत्त्यभावादेः केवलान्वयित्वाकथनात् तन्निराकरणं मूलेऽयुक्तं यद्यपि लक्ष्याप्रसिद्ध्या लक्षणा
संभवं दर्शयितुं यस्य यस्य केवलान्वयित्वसंभावितं तस्यैव तथात्वं निराकर्तुमयमुद्यमस्तथापि अभावप्रतियोगित्वादेस्त

१४८

थात्वस्य प्रदर्शितत्वात्तन्निराकरणेन न्यूनतेत्यत आह दीधितौ नन्विति · प्रतियोगित्वादिकमित्यादिनान्योन्याभावप्रतियोगिताव
च्छेदकत्वपरिग्रहः। अभावादीत्यादिनावच्छेदकपरिग्रहः। विशेषणतावच्छेदकेति · संबंधमभावत्वादिकं · एवं चोक्तरीत्यात्यंताभा
वप्रतियोगित्वादेर्यन्निष्ठात्यंताभावप्रतियोगित्वं तस्य न केवलान्वयित्वमिति भावः। एवं चेति · अत्यंताभावप्रतियोगित्वादेः के
वलान्वयित्वासंभवे चेत्यर्थः। अभ्युपगमवादः। ध्वंसप्रागभावयोरत्यंताभावाविरोधित्वाभ्युपगमेनोक्तिः। तादृशविरोधस्याभ्युप
गमेऽनभ्युपगमात् · प्रकारान्तरेणाश्रयनाशजन्यगुणनाशात्यंताभावस्य केवलान्वयित्वं निराकरोति यस्मात इति · तुल्यत्वाच्चे
त्यनंतरं नोक्ताभावः केवलान्वयीति पूरणीयं · देशः स्वप्रतियोगिसमवायिघटाद्याश्रयो बोध्यः। स्वप्रतियोग्याश्रयसत्वदशायां
उत्पन्नस्य नाशस्य स्वप्रतियोगिसमवायिनि स्थाश्रयनाशाधीनगुणनाशस्य स्वप्रतिसमवायिनोऽधिकरणेऽप्रसत्वे स्यानु
भाविकतया तच्च वर्त्तमानतेति भावः। तादृशप्रत्यये विवादसंभवात् · समये वैकालिकविशेषणताया एव संबंधतया देशि
कविलक्षणाविशेषणतासंबंधेन तादृशनाशाभावस्य केवलान्वयित्वात्तत्राह आकाशाभावतुल्यत्वाच्चेति · यथाकाशा
भावस्यावृत्तिप्रतियोगिकत्वेऽपि प्रतियोगिस्वरूपाभाववत्तेयाः प्रतियोगि न केवलान्वयित्वं तथा तन्नाशस्यावृत्तित्वेपि

के०भा०
१४९
149

तदभावस्य तदात्मकाभावप्रतियोगित्वान्न केवलान्वयित्वमित्यर्थः ।प्रतियोगिनोऽभावाभावत्वनियममंतरेण क्वाशस्य प्रतियोगि
तयास्वाभावाभावत्वव्यवस्थापनेन संभवतीति · अभावाभावस्येति मूलं अभावाभावस्यैवेत्यर्थकतया वर्णयति · अभावेति
वाभावत्वादेः किंचिद्विशिष्टस्वाभावाभावत्वेपि भावत्वस्याभावाभावत्वव्याप्यत्वं नियुक्तिकमतोऽभावपदं प्रतियोगिपरतया व्याचष्टे भा
वत्वादिरिति · प्रतियोगित्वस्य चाभावाभावत्वनियतत्वं निष्प्रत्यूहमेव · अभावाभावत्वस्यैव प्रतियोगितानिरूपकत्वात् · अत्रैवाचार्यसं
वादमाह यदाऽऽहुरिति · ननु ध्वंसप्रागभावयोरत्यंताभावविरोधित्वे मते ध्वंसप्रागभावदशायामपि तदधिकरणेऽत्यंताभावविरहसत्वा
त्तस्य च प्रतियोगिनिरूपकत्वासंभवात् प्रागभावादेरेव तन्निरूपकता · तथा चात्यंताभावाभावः प्रतियोग्येवेति मूलासंगतिरत आह प्रागभा
वादेरिति · तदभावनिरूपकतया · प्रागभावाद्यभावनिरूपकतया · तस्यापि · प्रागभावादेरपि · प्रतियोगित्वात् · अत्यंताभावप्रतियोगित्वात् · घ
टादिसाधारणधर्मनिरूपणादिविशेषकं वृत्त्यादिमत्वादेर्घटादिभेदाभावत्वविरहात् असाधारणो धर्म इति मूलस्य यथाश्रुतार्थासंगते
राह प्रतियोगितावच्छेदक इति · प्रतियोगितावच्छेदकः संबंध एवात्यंताभावान्योन्याभावसाधारणोऽभावाभाव इति योजना · अन्यो
न्याभावात्यंताभावसाधारणः । अन्योन्यात्यंताभावयोः साधारणः स च संबंधविधयावच्छेदकः । क्वचित् · भेदप्रतियोगितायां · क्वचित् ·

१४८

संसर्गाभावप्रतियोगितायां प्रतियोगिसंबंधवत्ताज्ञानस्याभाववत्ताज्ञानप्रतिबंधकतया न प्रतियोगिसंबंधस्याभावाभावत्वमिति स
माधत्ते यद्वत्वेहीति। ज्ञात इत्यं तं न प्रतीयते इति व्यवह्रियत इत्युभयान्वयि। तथा च यद्भावव्याप्यत्वादिना गृहीते तद्धर्मवत्ताज्ञानं यत्प्रती
त्यनुत्पादे यदभाववत्ताव्यवहारे वाप्रयोजकमित्यर्थः। यदधिकरणे कदापि कस्यापि तदभावभ्रमो न जातस्तदभावप्रतीतेः प्रतियोगिम
त्ताप्रतीत्यनुत्पादप्रयोजकत्वविरहात्तस्यैव तदभावात्मकत्वमिति नियमासंभवः। अतोऽभावाभावव्यवहारस्यापि निवेशः। व्यवहार
श्च सामान्यतः सर्वत्रासंभवतीति न व्यवहारविषयत्वाभावे नियमभंग इति शंकापि। मिथस्तथात्वमिति। परस्परप्रतीत्यनुत्पादप्रयोज
कत्वं परस्पराभाववत्ताव्यवहारप्रयोजकत्वं चेत्यर्थः। तथा च न प्रतियोग्यभावयोः परस्पराभावत्वानुपपत्तिरिति भावः। तत्संबंधवत्त्वं प्र
तियोगिसंबंधवत्त्वं। तद्विषयः। अभावप्रतीत्यनुत्पादादिप्रयोजकधीविषयः। ननु प्रतियोगिसंबंधप्रकारकबुद्धिसत्वेपि अभावप्र
त्ययानुत्पादस्यानुभविकत्वात्तत आह क्वचिच्चेति। विशेषदर्शनतया। व्यावर्तकधर्मदर्शनतया। नस्य ततः। न व्यावर्तकधर्मदर्शनामपुरस्कृत्य।
न तस्याभावविरोधित्वं। किंतु तत्संबंधस्यैवेति शेषः। तथा च तत्संबंध एव तदभावाभावः। विरोधिन एवाभावाभावत्वादिति भावः। प्रतियो
गितावच्छेदकसंबंधस्य। घटसंयोगादेः अभाववति। घटाद्यभाववति कमदौ। संबंधांतरेण। कालिकादिना। न तथात्वं। न संबंधसामा

के०भा०
१५०
150

न्येन विरोधित्वं तुल्यमेव प्रतियोगिसाधारणमेव कचित्प्रतियोगिनः कचित्तत्वावच्छेदकस्याभावाभावत्वकल्पने कल्पनाभेद इति कल्प
नैक्यानुरोधात्संबंधस्याभावाभावत्वमित्युक्तं दूषयति अनतिप्रसक्तेयं चेति अनतिप्रसक्ते येघटसंयोगादेः पटाद्यभावाभावत्वेवा
रणाय अनुगमसंभावनापि अनुगमस्यैककल्पनासंभावनापि स्वांतर्भावादतिशेषः। तद्वेति गुणाद्यभावप्रतियोगितावच्छेद
कसंबंधवति संयोगादि अभावविलयप्रसंगः। स्वाभावसत्वेन तदभावासत्वप्रसंगः। प्रतियोगिनिरूपिततादृशसंबंध एवा
भावाभाव इति यदुच्यते तदाह भवतामिति भवतां अभावप्रतियोगितयाप्यधिकरणसंबंधावच्छिन्नाभावस्य केवलान्वयित्वं खंड
यतां तदभावेति अप्यधिकरणसंबंधावच्छिन्नगगनाद्यभावाभावेत्यर्थः। विलोपप्रसंग इति प्रतियोगिनिरूपिततादृशसंबंधाप्रसिद्धेरि
तिभावः। तादृशगगनाद्यभावस्याभावाप्रतियोगित्वं स्वमते इष्टमेवेति भवतामित्युक्तं पूर्वपक्षिणा लक्ष्याप्रसिद्ध्या लक्षणासंभवस्योक्तत्वाद्दूष
प्रदर्शनमेवोचितं न तु लक्षणाभिधानं [illegible] निरूपणस्य प्रागेवोक्तत्वादत आह लक्षणमिति गगनाभावादिसाध्यकानुमानानां लक्ष्यतानिर्वाहाय
लक्षणे विशेषणांतरं प्रक्षिपतीत्यर्थः। आकाशादेः स्वाभावाभावत्वस्यानियुक्तिकत्वात् आकाशाभावादिसंग्रहाय अभावे वृत्तिमत्व विशेषण
दानमयुक्तमित्यालोच्य तत्र मूलकृतोऽनिर्भरमाहाकाशस्येति घटादेरिवाकाशस्यापि स्वाभावाभावत्वमविशेषात्स्यादित्याशंक्य तद्विशे

१५०

संदर्शयति भावत्वेति · भावो घटादिरूपः प्रतियोगी · तदभावासत्वप्रतीत्या · तदभावाभावत्वप्रतीत्या · इह च · अनुमितिस्थले च · न तथा · न प्र
तियोगिमत्त्वं तदभावाभावत्वप्रत्ययः । प्रतियोगिमत एवाप्रसिद्धेरिति भावः । अधिकरणाविनिर्मोकेन च न नञ्पदोल्लेखी प्रत्ययः संभवति ·
अभावादिपदोल्लेखी संभवत्यपि प्रकृतेऽसिद्ध इति नाधिकरणानुपरक्त गगनाभावाभावप्रत्ययवलात् गगनस्य तत्त्वमिति शंकावसरः ।
ननु गगनस्य स्वाभावाभावत्वानुपगमे तस्य स्वाभावप्रतियोगित्वानुपपत्तिरित्याशंकायामाह अभावप्रतियोगित्वं चेति · स्वरूपसंबंध एव ·
न त्वभावाभावत्वं · अधस्तात् · व्याप्तिवादे · ननु प्रतियोगित्वं अभावाभावत्वानात्मकमपि तच्छाप्यते यात तत्साधयेदेवेत्यत आहाभावप्रतियोगित्वं
चेति · आकाशादेः स्वाभावाभावत्वविरहेऽपि प्राचां केवलान्वयिलक्षणे कृत्रिमसदोपादानं संबंधविशेषनिवेशसूचकतया संगमयति एवं चे
ति · संबंधविशेषनिवेशप्रयोजनमाह अत एवेति · समवायेनेति · संबंधेनाभावप्रतियोगित्वेऽपीत्यग्रिमेणान्वयः । विषयतया · ज्ञानस्य · परंप
रासंबंधेन · स्वसमवायिविषयत्वेन · ज्ञानत्वस्य · स्वरूपसंबंधेन च ज्ञानविषयत्वादेः केवलान्वयित्वं · तेषां केवलान्वयिताघटकतत्संबंधाव
च्छिन्नाभावाप्रतियोगित्वादिति भावः । प्रतियोगितायां केवलान्वयिताघटकसंबंधावच्छिन्नत्वानिवेशनं च प्रतियोगितावच्छेदकसंबंधेन प्रति
योग्यसामानाधिकरण्यस्य निवेशाभिप्रायेण · प्रकृतसंबंधनिवेशने च न प्रतियोगितायां प्रकृतसंबंधावच्छिन्नत्वं निवेश्यं · ननु प्रतियोग्यसमा

नाधिकरण्यं यादिस्वप्रतियोगिसमानाधिकरणो यस्तदन्यत्वं तदा संयोगादेरपि केवलान्वयितापत्तिः । संयोगाभावस्य द्रव्ये प्रतियोगिस
मानाधिकरणतया तदन्यत्वाभावात् । नापि तत्तदभावनिष्ठं यत्तत्तदभावप्रतियोगिसामानाधिकरण्यं तदत्यन्ताभाववत्त्वं हेतोः सामानाधिक
रण्यस्याव्याप्यवृत्तित्वानुपगमेन तद्दोषस्यैव दुर्वारत्वात् । किंतु स्वप्रतियोग्यनधिकरणवृत्तित्वमेव । एवं च तद्विशेषणकस्याभावस्यैव स्व
पदार्थतया गगनाद्यभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या न तदभावस्य तत्त्वमिति तथाविधाभावान्तराप्रतियोगित्वमादाय गगनादेः के
वलान्वयितापत्तिरत आह काशेति । अधस्तात् व्याप्तिवादे केवलान्वयितावच्छेदकसंबंधसामान्ये यदभावप्रतियोगिप्रतियोगिकत्व यत्किं
चिदधिकरणानुयोगिकत्वोभयाभावस्तत्त्वं विवक्षणीयं । तच्चाकाशाभावसाधारणमिति भावः । मूलेऽत्र विशेषणस्याप्रतियोगिविरो
षणतयैव गगनादिवारणे उभयाभावघटितप्रतियोगिवैयधिकरण्यनिवेशो गौरवादयुक्त इत्याशयेनाह वृत्तिमत इति । वृत्तिमत्त्वं प्रकृ
तसंबंधेन बोध्यं । तेन संयोगादिना गुणादेर्न केवलान्वयिता । तादृशाभावेति । प्रतियोग्यनधिकरणवृत्त्यभावेत्यर्थः । यादृशप्रतियोगिताश्रयान
धिकरणं किंचिद्वृत्तिमन्निष्ठत्वे सति तच्छून्यत्वमिति फलितार्थः । अतोऽगगनत एव किंचिद्देशकालाद्यवृत्तित्वविशिष्टतदभावाभावात्मकप्रतियो
गिमत्तया स्वरूपसंबंधस्य केवलान्वयिताघटकत्वस्य ते प्रतियोगिवैयधिकरण्याप्रसिद्धिरिति दोषानवकाशः । प्रकारान्तरेण संयोगाद्यभावस्य

केवलान्वयित्वमुपपादयन्आकाशादिकंच वारयन्तोवृत्तिमत्पदमपिसार्थकंकुर्वतोन्यस्यमतमाहव्याप्यवृत्तित्वार्थकमिति·अभावविशेषणं·अभाव
विशेषबोधकं·व्याप्यवृत्तित्वंचेदंयदवच्छिन्नवृत्तिकान्यत्वंतद्धटसंयोगाद्यभावस्यातथात्वात्संयोगाद्यव्याप्तिप्रसंगः।यदनवच्छिन्नवृत्तिकत्वं·तदाका
लिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाद्यभावस्यतद्वृत्तिकालेपितदनधिकरणदेशावच्छेदेनवर्त्तमानतयाकेवलान्वयिनोऽसंग्रहप्रसंगः।तदभा
वस्यघटत्वादेःसमवायेनव्याप्यवृत्तित्वात्·येनसंबंधेनाभाववत्ताज्ञानंयत्प्रतियोगिमत्ताज्ञानविरोधितेनसंबंधेनव्याप्यवृत्त्यभावीयतत्प्रतियोग्य
न्यत्वनिवेशेचगौरवमित्यस्वरसः।ननुतादात्म्यसंबंधेनप्रतियोग्यनधिकरणतयावृत्तिमत्त्वस्यचाप्रसिध्यातेनसंबंधेनाभिधेयत्वाद्यवच्छिन्न
स्यकेवलान्वयित्वानुपपत्तिरतआहतादात्म्येनेति·अभिधेयस्य·अभिधेयत्वावच्छिन्नस्य·व्याप्तिवदिति·यथाव्याप्तिशरीरेऽधिकरणत्वस्थले
संबंधित्वमात्रंनिवेशितंतथात्रापितन्निवेशनीयमित्यर्थः।ननुप्रमाजातीयविषयत्वरूपत्वेपिप्रमेयत्वस्यकेवलान्वयित्वानुपपत्तिर्दुर्वारेव·
अनुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वेपितदवच्छिन्नव्यक्त्यन्तर्विशेषरूपेणाभावप्रतियोगित्वात्तेनतदनवच्छेदकत्वघटिततयाल
क्षणपरिष्कार्यमितिमूलाशयंप्रकाशयति·तथाचेति·अनवच्छेदकंयद्रूपंतेनरूपेणकेवलान्वयीतिविवक्षणीयं·तेनघटादेर्नघटत्वादि
नाकेवलान्वयित्वंकिंतुमेयत्वादिनैवेतिनानुपपत्तिः।इत्थंचाप्रतियोगित्वस्यानेप्रतियोगितानवच्छेदकत्वनिवेशनेच·अप्रतियोगित्व

के०न्या०
१५२
152

घटितलक्षणेद्रव्यभेदगुणभेदयोःप्रतियोगिव्याधिकरणद्रव्यभेदत्वाद्यवच्छिन्नाभावप्रतियोगित्वेनकेवलान्वयित्वापत्तिविरहात्‌·प्रतियोगि
तावच्छेदकावच्छिन्नासामानाधिकरण्यपर्यंतनिवेशोवैयर्थ्यमित्युपष्टंभसंगतिः।द्वित्वादिनानकेवलान्वयित्वमिति।उभयत्वाद्यवच्छिन्नाभा
वस्यप्रतियोगिसामानाधिकरण्येपितदवच्छिन्नासामानाधिकरण्येनलक्षणघटकत्वादितिभावः।अन्यतरत्वेनकेवलान्वयित्वस्येष्टत्वा
त्‌·द्वित्वादिनेत्युक्तं।आदिनाधर्म्यंतरसाधारणात्रित्वादिपरिग्रहः।इदमुपलक्षणं·गगनाभावादेर्घटत्वादिविशिष्टत्वेननकेवलान्वयित्वमि
त्यपिद्रष्टव्यं·तादृशधर्मावच्छिन्नस्य·प्रतियोगितानवच्छेदकधर्मावच्छिन्नस्य·अधिकरणावृत्तितायाः।अधिकरणासंबंधितायाः।विवक्षित
त्वादिति·तथाचतादृशाभावप्रतियोगितानवच्छेदकं·यत्किंचिदधिकरणानिष्ठकेवलान्वयिताघटकसंबंधप्रतियोगितावच्छेदकंतद्रूपवत्त्वंते
नरूपेणकेवलान्वयित्वमितिलक्षणंकरणीयमितिभावः।तादृशोभयेति·विरुद्धोभयेत्यर्थः।तस्यातथात्वात्‌·विरुद्धोभयत्वस्यसंबं
धप्रतियोगितानवच्छेदकत्वात्‌·सिध्यभावरूपपक्षतामतेसाध्यसंदेहस्यानपेक्षणात्तथापिसाक्षेपासंगतेराहसंदिग्धेति·मूलेनप्रमे
यपक्षकः·नप्रमेयधर्मिकः·तर्हिकिंधर्मिकइत्याशंकायामाह।किंत्विति·भिन्नविषयकः।प्रकृतानुमितिविषयताविलक्षणविषयता
वान्‌·तथाचाविलक्षणविषयताशालिसाध्यसंदेहस्यैवानुमितिहेतुतयासोनुपयुक्तइत्यभिमानः।प्रमेयत्वसाध्यकानुमानासंभवेपि

१५२

प्रमेयत्वपक्षकास्तित्वानुमानमेव केवलान्वयिअनुमानं निष्प्रत्यूहमेवेति शंकां निरस्यति प्रमेयत्वपक्षकेति· अस्तित्वस्य पदार्थसाधर्म्यत्व
पदस्य केवलान्वयितया तत्साध्यकानुमानस्यान्वयव्यतिरेकित्वाभिधानं न घटत इत्यत आह दीधितौ अस्तित्वेति· घटास्तित्वं· घटप्रतित्वं· केवला
न्वयिनोस्तित्वस्य यत्र साध्यता तत्र संशयानुपपत्यानुमित्यनिर्वाहतादवस्थ्यादिति भावः। विषयावैलक्षण्ये विषयत्वावैलक्षण्यमित्याशयेना
शंकते मूलेऽध्येति· समानविषयकत्वेवेति· तथा चैकस्यानुमित्सविलक्षणविषयताकत्वेन्यस्यापि तथात्वमावश्यकमिति प्रमेयत्वधर्मिकसं
शयादपि तत्साध्यकानुमितिर्निष्प्रत्यूहैवेति भावः। अर्थभेदात· विषयतावैलक्षण्यात· प्रमेयसंदेहस्याप्रतिबंधकतयाविरोधिपदं प्रतिबध्य
परतयाव्याचष्टे दीधितौ साध्यसिद्धीति· साध्यं पक्षनिष्ठाभावप्रतियोगिन वेत्यसमानविशेष्यकः संशयः कथं साध्यवत्तानिश्चयप्रतिबध्य
इतिशंकायामाह विशेष्येति· विरोधिविषयतामात्रेणेतिप्राह्यविरोधिधर्मप्रकृतधर्मिसंबंधविषयतामात्रप्रयुक्तकारणानुभवं घटयति न
हीति· तदभावस्येत्यत्र तत्पदेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानं परामर्शार्थं अप्रतियोगित्वज्ञानांतं प्रतियोगित्वज्ञानांतभावेणव्याचष्टे पक्षे
ज्ञ ति· तज्ज्ञानप्रतिबंधकत्वत्र पंतद्विरोधित्वमेवाप्रतियोगित्वमित्येनेत्यर्थ इति भावः। अबाधितत्वे ज्ञानस्यानुमित्यहेतुतया साधकपदस्यासिद्धि
कारणपरतानसंभवतीत्यतस्तद्व्याचष्टे साध्येति· कथं चिन्नादृशविरोधिनिश्चयाभावसंपादनेन साधकपदस्य सिद्धिकारणपरत्वमु

के०ग०
१५३
153

पपादयितुमन्यथाभावच्छेदे पक्षनिष्ठेत्यादि· तत्पदस्य विशेष्यीभूताभावपरतया कर्मधारयोपगमेऽभावपदद्वैयर्थ्यमितः षष्ठीतत्पुरुषाभि
प्रायेणाप्याच तत्तदभावस्येति· तस्यैवस्वग्रिमेऽभावस्यैतत्त्रसत्त्वमानाधिकरण्येनान्वयितया च कर्मधारय एव विवक्षणीय इति वा· अभाव
प्रतियोगित्वप्रकारकज्ञानत्वेन ज्ञानाभावस्य पक्षताघटकत्वे साध्याभाववान्पक्ष इत्यादिनिश्चयदशायां पक्षताया विरहप्रसंग इत्य
तस्तत्साधारणप्रतियोगितावच्छेदकं दर्शयति· साध्य इति· साध्यविषयतानिरूपिततादृशप्रतियोगित्वविषयताशालिनिश्चयत्वे
नेत्यर्थः। प्रतियोगित्वानुयोगित्वयोस्तत्त्वविनिवेश्यत्वानुपगमे साध्याभाववान् पक्ष इति ज्ञानस्य न साध्यांशे प्रतियोगितावगा
हित्वं किं त्वभावांश एव तदनुयोगितावगाहित्वमतो नोक्तरूपेण तत्संग्रहः। एवं साध्यांशे कालिकादिसंबंधेन प्रतियोगित्वप्र
कारकधीवारणाय साध्यांशे प्रतियोगित्वप्रकारकधियः संबंधविशेषावगाहित्वेनैव निवेशनीयतया प्रतियोगितासंसर्ग
कबुद्धौ च तदीयसंसर्गस्याभानादपि न तयोरुक्तरूपेणानुगमसंभवः। एवमभावसाध्यके प्रतिमत्त्वावगाहिबाधबुद्धेरसंग्रहश्चेत्यतः प्र
कृतपक्षधर्मिकप्रकृतसाध्यविशिष्टबुद्धिप्रतिबंधकत्वेन तदुभयमनुगमयति साध्यविशिष्टेति· तत्प्रतिबंधकतावच्छेदकं चागत्यान
नुगतमेव वाच्यमिति ध्येयं· सपक्षसत्त्वादिरूपगमकतौपयिकगणने व्यतिरेकिपदेन विपक्षासत्त्वस्यागणनाद्व्यतिरेके वि

१५३

कत्ववदित्यत्र व्यतिरेकोपासनेत्यत्र व्यतिरेकश्चेत्यत्र च व्यतिरेकपदस्य तद्रूपार्थकतां स्फुटयति व्यतिरेक इति॰ व्यतिरेकव्याप्तेरनुमितिप्र
योजकतां व्यवस्थापयति व्यतिरेकस्य सहचारविधया तादृशव्याप्तिग्राहकत्वेनानुमित्युपयोगित्वं व्यतिरेकोपासनेत्यंते नाभिहितम
तः पुनर्विपक्षवृत्तित्वशंकानिरासमात्रद्वारा व्यतिरेकव्याप्तिग्रहोपयोगिताभिधानं विरुध्यते॰ अन्वयव्याप्तिग्रहे शंकानिवर्तनद्वा
रा तदनपेक्षणे केवलान्वयिन्यतः शंकानुदयेन तदनपेक्षणाभिधानमप्यसंगतमतो व्यतिरेकव्याप्ताविति मूलस्यान्वयव्याप्त्य
र्थकतामाह व्यतिरेकेति॰ केवलान्वय्यनुमानं स्वातंत्र्येण खंडयितुमुपक्रमंते अत्र वदंतीति॰ व्याप्तिरिति॰ अनुमित्यौपयिकीमि
त्यर्थः। एवकारेण केवलान्वयिसाध्यकसाधारणव्यापकसामानाधिकरण्यस्यानुमित्यौपयिकत्वव्यवच्छेदः। लाघवादिति॰ व्या
पकसामानाधिकरण्यापेक्षया लघुशरीरत्वादित्यर्थः। व्यापकतागर्भव्याप्तेर्वह्नित्वादिरूपसाध्यतावच्छेदकविशेषणहेतुमन्नि
ष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्य हेतुविशेषणसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभाववत्तुल्यशा
रीरत्वेपि अनवच्छेदकत्वधर्मितावच्छेदकवह्नित्वत्वादेः साध्यसामानाधिकरण्यस्य चाधिकस्य निवेशेन गौरवं बोध्यं॰ तादृशव्याप्ति
विशिष्टहेतुमत्ताज्ञानहेतुतामतेऽधिकविषयविषयतानां द्विधाहेतुविषयतायाश्चानिवेशात्कारणतावच्छेदकगौरवान्नविनि

के०भा०
१५४
154

गमनादिरहेणोभयव्याप्त्योरनुमितिप्रयोजकत्वेतिभावः। एतन्मतेऽवच्छेदकलाघवमुक्त्वा कल्पनालाघवमाह प्रायश इति। साध
नभेदेपीति। साधनतावच्छेदकभेदेपीत्यर्थः। अभेदादिति। तथा च धूमत्वालोकत्वाद्यवच्छिन्नलिंगकवह्निविधेयपरामर्शानां वह्न्य
भाववद्वृत्तित्वावच्छिन्नप्रकारकपक्षनिश्चयत्वेनैकमेव हेतुत्वं कल्प्यते। व्यापकसामानाधिकरण्यरूपव्याप्तेश्च हेतुतावच्छेदकघटि
ततया तदवच्छिन्नप्रकारकज्ञानहेतुतायाश्च हेतुतावच्छेदकधूमत्वादिभेदेन भेद इति गौरवं। न च व्यापकताया हेतुतावच्छेदकधूमत्वा
वच्छिन्नघटितत्वेपि व्यापकताघटकपदार्थानां विषयताकूटे निवेश्यमाने हेतुतावच्छेदकावच्छिन्नविषयताया सामान्यतः किंचिद्ध
र्मावच्छिन्नविषयतात्वेनैव कारणतावच्छेदककोटौ निवेशनीयतया व्यापकताज्ञानहेतुतामतेपि न धूमत्वालोकत्वादिभेदेन तद्भेद
इति वाच्यं। धूमव्यापकवह्निसमानाधिकरणद्रव्यवानित्यादिज्ञानवारणाय तद्धर्मावच्छिन्नव्यापकसाध्यसामानाधिकरण्येन त
द्धर्मेणावच्छिन्नतायाः प्रकारतातद्वत्वेनैव हेतुतायाः कल्प्यतयानुगमासंभवात्। स्वावच्छिन्नव्यापकसाध्यसाध्यसामानाधिक
रण्यावच्छिन्नत्वस्वावच्छिन्नत्वोभयसंबंधेन सामान्यतो धर्मविशिष्टत्वेनानतिप्रसक्तत्वेन धूमालोकादिनिष्ठपरामर्शप्रकार
तानामनुगमः संभवतीति तु न सम्यक्। तादृशपरंपरायाः संबंधत्वे मानाभावात्। जातिविशेषत्वादिना धूमत्वाद्यवगाहिना जातिवि

पाः
१५४

शेषवद्व्यापकवह्निसमानाधिकरणधूमवानित्यादिज्ञानादनुमित्यापत्तिश्चेति भावः । धूमाभाववद्वृत्तिधूमादेः समवायादिनाहेतोः साध्याभा
ववद्वृत्तित्वरूपव्याप्ता अपि हेतुतावच्छेदकीभूतसंयोगादिना ऽवृत्तित्वस्य प्रवेशनीयतया एकसंबंधेन साध्याभाववद्वृत्तित्वमपरसंबं
धेन च पक्षधर्मत्वमवगाहमानात् ज्ञानादनुमित्यापत्तेर्वारणाय विशिष्टसंबंधान्निवेशे एकसंबंधघटितव्याप्तिपक्षधर्मताविषयक
ज्ञानस्य हेतुतायाः कल्पनीयतया ऽविभिन्नसंबंधेन व्याप्येषु धूमरूपविशेषादिषु व्याप्तिभेदस्ताद्विषयकपरामर्शकारणताभेदश्चा
वश्यक इत्यभिप्रायेणाशयशाइत्युक्तं । अथ हेतुतावच्छेदकमात्रविशेष्यव्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानकालेऽपि निर्द्धर्मितावच्छे
दकव्याप्तिज्ञानोत्पत्त्यानुमित्युत्पत्तेरावश्यकतया व्यभिचारस्य हेतुदोषतानुपपत्तिरिति चेन्न । पक्षवृत्तित्वेन निश्चीयमाने धूमत्वाद्यवच्छेद
नाव्यभिचारनिश्चयं विना पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशयस्यानिवृत्तेः । पक्षे ऽप्यव्यभिचारिसामान्याभावकोटिकसंशयस्यौचित्यावर्जि
तस्य संभवेनाव्यभिचारांशे निर्द्धर्मितावच्छेदकस्यापि पक्षे ऽव्यभिचारिनिश्चयस्यासंभवेन धूमत्वादिविशिष्टे व्यभिचारग्रहस्यानुमित्यु
त्पत्तिविरोधित्वात् । अथ धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे धूमलिंगकेच्छाविरहविशिष्टसिध्यभावरूपपक्षताधूमलिंगकप
रामर्शस्येव सहकारिणी नालोकलिंगकपरामर्शस्येति नियमानुपपत्तिः सहकारिणाः । सिद्धिकाले धूमलिंगकानुमितीच्छासत्वे धूमप

के०गा०
१५५

155

रामर्शसत्वे च यद्धत्वकारणतावच्छेदकावच्छिन्नस्तोमात्मिका सामग्री फलं जनयति तस्याः सहानीभसति धूमपरामर्शे सति चालोकपरामर्शो
प्यावश्यकतयानुमितेर्द्वैविध्यापत्तिरिति चेन्न· एतन्मते हि पक्षतालिंगविशेषनियंत्रितानोपेयते· अपितु तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिं का
गकानुमितीच्छाविरहकूटविशिष्टसिध्यभावरूपा एकैव पक्षता नानालिंगकपरामर्शसहकारिणी· तत्र नातिप्रसंगशंकापि· न चैवमेकत्रा
नंतानां परामर्शविशिष्टेच्छाभावानां निवेशे तेषां मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण वक्तुं तत्कारणताधिक्यप्रसंग इति
वाच्यं· सिद्धिकाले विनापि धूमलिंगकेच्छामालोकलिंगकेच्छावतो वह्निमालोकोभयलिंगकसमूहालंबनपरामर्शाद्धूमलिंगकानुमित्युत्प
त्याव्यभिचारेण तत्तल्लिंगकानुमितौ तत्तल्लिंगकानुमितीच्छाविरहविशिष्टसिध्यभावत्वेन हेतुत्वासंभवाद् उक्तरीतेः सर्वैरेवादरणीयत्वात्
तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकानुमितीच्छानां स्वीयव्याप्तिविषयत्व-पक्षधर्मत्व-निरूपितविषयतावच्छेदकधर्मावच्छिन्न
लिंगकत्वप्रकारकत्वसंबंधेन परामर्शविशिष्टानुमितीच्छात्वेनानुगमय्यैकस्यैवाभावः सिद्धो विशेषणतया निवेश्यत इत्याहुः। ननु धू १५५
मालोकादिपरामर्शानाम् एकरूपेण हेतुत्वे तदवच्छेदकनिश्चयत्वशरीरे धूमत्वालोकत्वाद्यवच्छिन्नकोटिकनिखिलसंशयानामननुगतै
रननुगतेर्वा भेदस्यैकत्र निवेशनीतया वह्निव्याप्यधूमवानयं वह्निव्याप्यालोकवान्न वेति आंशिकसंशयादनुमित्यनुदयापत्तिः।

न च संशयत्वघटकव्याप्यविषयताभिन्नत्वं अनुमितिजनकतावच्छेदकव्याप्यविषयतायां निवेशनीयमिति एकज्ञानीयधूमादिविषयताया: सं
शयत्वाघटकतया तत्संग्रह इति वाच्यं· प्रत्येकं निश्चयीयविषयतातिरिक्तविषयताया: संशयेऽप्रामाणिकतया निश्चयीयव्याप्यविषय
ताया एव विपरीतकोटिविषयतासहिताया: संशयत्वघटकत्वात्· स्वनिष्ठसंशयत्वघटकीभूतविषयतान्यव्याप्यविषयताशून्यं यद्यत्तद्व्य
याप्यवत्त्वज्ञानत्वेन हेतुत्वोपगमे तत्तत्संशयव्यक्तीनां जातिस्थिकरूपेण भेदकूटपर्यवसानात् तावतां भेदानां विशेषणविशेष्यभावे विनिग
मनाविरहेण कारणतावाहुल्यप्रसंगादिति चेन्न· व्याप्यत्वावच्छिन्नाभावकोटिकसंशयभेद एव निवेशनीय:। ननु धूमत्वालोकत्वाद्यवच्छि
न्नाभावकोटिकसंशयानां तत्तद्रूपेण भेदकूट: धूमत्वावच्छिन्नाभावकोटिकव्याप्यान्तरनिश्चयानात्मके च व्याप्यवत्तासंशयेऽपास्यत
व्याप्यत्वावच्छिन्नाभावविषयकत्वं कल्प्यते· तादृशाभावभानविरोधिनो व्याप्यवत्तानिश्चयस्य च प्राक्सत्त्वे तदुत्तरं जायमानधूमत्वावच्छि
न्नाभावकोटिकसंशयो व्याप्यत्वपर्याप्तप्रकारतावच्छेदकताकनिश्चय एव भवति तादृशनिश्चयसामग्र्यास्तत्राक्षतत्वादिति तज्जाय

रिति

त एवानुमितिर्न कश्चिद्दोष इति· केचित्तु· विरोधानुपस्थितिकालीनभावाभावसंशयस्य तदुभयसमुच्चयवैलक्षण्यानिर्वाहान्नाविरोधिवि
षयकतया संभवति· अनुपस्थितविरोधस्य प्रकारत्वासंभवात्· तत्संसर्गताया अप्रामाणिकत्वात्· एतदनुरोधेन तदुपगमे संशयको

टिविषयतायाएवविलक्षणाया उपगंतुमुचितत्वात्· तथाच संशयत्वघटकविलक्षणकोटित्वविषयताभिन्नत्वमेवानुमितिजनकताव
च्छेदकमाप्यविषयतायांनिवेशनीयं· वैलक्षण्यंचतस्याः पदार्थांतरस्वरूपांतर्गतिर्वेत्यन्यदेतत्· नचाविरोधानुपस्थितिदशायांनभावा
भावयोः संशयः अपितुतदुभयसमुच्चयएवेतिविरोधस्याखिलसंशयप्रकारतयैवभानमितिवाच्यं। भावाभावयोरविरोधज्ञानमंत
रेणतदुभयसमुच्चयस्यानुभवविरुद्धत्वात्· नचतदानींसंशयसमुच्चययोर्द्वावेवनाभ्युपगंतव्याविति वाच्यं· प्रत्येकसामग्रीभ्यांप्रत्येकं
स्वकार्यजननेबाधकाभावात्· तुल्यबलसामग्र्याः परस्परफलप्रतिबंधकत्वात्· अन्यथासंशयोच्छेदात्· अन्येतु· संशयेभावाभावोभ
यप्रकारतानिरूपिताएकाविशेष्यतासमुच्चयेतुप्रकारभेदेनतद्भेदस्तूभयोर्वैलक्षण्यं· एवंचाभावप्रकारतानिरूपितव्याप्यप्रकारता
निरूपितविशेष्यताकत्वमेवसर्वसाधारणव्याप्यवत्तानिश्चयत्वं· भावद्वयकोटिकः संशयोनप्रामाणिकः। धूमवान्जलत्ववान्वायमित्य
त्राभावद्वयस्यापिभानोपगमात्· अभावभासकसामग्र्यसत्वेविरोधाग्रहेसमुच्चयस्यैवोपगमात्· विरोधग्रहदशायांतस्यैवविरोधिप्र
कारकनिश्चयसामग्रीसहितस्यतत्प्रकारकालौकिकविषयताशालिज्ञानप्रतिबंधकत्वयोभयप्रकारकज्ञानस्यैवासंभवात्· पीतत्व
शंखत्वयोर्विरोधित्वेनज्ञायमानयोर्दोषवशादेकधर्मिण्येकनिश्चयविषयतयाभावद्वयमात्रकोटिकज्ञानेसंशयत्वासंभवात्· असति

दोषविशेषे लौकिकसंनिकर्षादौ चैकधर्मिणि तादृशयोर्निश्चयासंभवेन च तादृशप्रतिवध्यप्रतिवंधकभावस्य प्रामाणिकत्वादिति वदंति । तु
दसत् । अभावत्वघटितधर्मावच्छिन्नहेतुमत्तापरामर्शस्य व्याप्यप्रकारतानिरूपितविशेष्यतायां अभावत्वावच्छिन्नप्रकारतानिरूपितत्वसत्त्वे
न तादृशपरामर्शस्य निश्चयत्वानुपपत्तेः । न च व्याप्यत्वावच्छिन्नप्रकारताभिन्नप्रकारतात्वेन विरोधिप्रकारतानिवेशान्नायं दोष इति वाच्यं ।
यत्र विरोधिकोटेरपि साध्यव्याप्यतयाभानं तादृशसंशयस्य दुर्वारत्वात् । एवं धूमरूपपर्वतत्वावच्छेदेनाभावप्रकारकस्य नीलपर्वतत्वादिविशि
ष्टव्याप्यवत्तावगाहिनः संशयस्य न्यूनाधिकधर्मावच्छिन्नयोर्भावाभावोभयप्रकारतानिरूपितविशेष्यतयोरैक्यासंभवात् नीलरूपवत्त्वावच्छे
देन वह्निव्याप्यवत्तानिश्चयदशायामपि तादृशसंशयोत्पत्तेः । तत्र नीलपर्वतत्वावच्छिन्नविशेष्यतायां वह्निव्याप्याभाववभावप्रकारतानिरूपि
तत्वाभ्युपगमासंभवात् । न च तादृशसंशय एवासिद्धः । एकधर्मपर्याप्तकोटिद्वयधर्मितावच्छेदकताकबुद्धेरेव संशयत्वादिति वाच्यं । यद्दशाभा
न प्रयुक्तं संशयत्वं तज्ज्ञाने धिकस्यैकतरकोटिधर्मितावच्छेदककोटौ भानेऽधिकं त्विति न्यायेन संशयत्वस्यावश्यकतया तुल्यबलसामग्रीभ्यां
तादृशज्ञानजनने बाधकविरहेण तथाविधज्ञानमेव न जायत इत्युक्तासंभवात् । संशये कोटिद्वयप्रकारतानिरूपितविशेष्यतयोरवच्छेद्यावच्छेदक
भावः । समुच्चये तु न तथा । एवं चाभावप्रकारतानिरूपितविशेष्यतानवच्छिन्नतत्प्रकारकविशेष्यताकत्वं निश्चयत्वमित्यपि न युक्तं । अविरुद्धतया

के०ग०
१५७

157

ज्ञायमानद्वंद्वोपस्थितभावाभावोभयविशिष्टधर्मिविषयकज्ञाने विशिष्टं खलु धर्मिविषयताद्वयोपगमे ज्ञानस्य समूहालंबनतया एकवाक्य
ताविरहेण समासानुपपत्त्या धर्मिविषयताद्वयस्यावच्छेद्यावच्छेदकभावध्रौव्येण तादृशज्ञानस्य निश्चयत्वानुपपत्तिरिति दिक्· भावद्वयकोटि
कोपि संशयोऽभावभानसामग्र्यसत्वेऽनुभवसिद्धः· समानबलसामग्रीद्वयसंवलनसिद्धश्च· उक्तसामग्र्याः प्रतिबंधकताया अप्रामाणिक
त्वात्· संशयत्वं चैकोद्देशे लौकिकविषयताविरहस्य प्रयोजकया कथितदोषविशेषजनितनिश्चये तदभावविरहात्· लौकिकविषयताव
साक्षात्वजातिव्यंजकविषयता· सा च दोषविशेषजन्यज्ञानेप्यक्षता शंखः पीत इत्यादिभ्रमानंतरं पीतिमानं साक्षात्करोमीति अनुव्यवसायोदया
त्· एवं चाभावाप्रकारकत्वादिना व्याप्यप्रकारकविषयताया निश्चयघटकत्वे तिप्रसंगो दुर्वार एवेसमपि वदंति· संशयसमुच्चययोर्वैलक्षण्या
य संशये कोटिद्वयप्रकारितयोरवच्छेद्यावच्छेदकभावः स्वीक्रियते· एवं च किंचित्प्रकारकत्वानवच्छिन्नव्याप्यप्रकारकज्ञानत्वमेव व्याप्यवत्तानि
श्चयत्वं धूमालोकादिपरामर्शसाधारणमनुमितिजनकतावच्छेदकं· तत्र च न काचिदनुपपत्तिः। अभेदेऽवच्छेद्यावच्छेदकभावविरहान्न तत्प्र
कारित्वावच्छिन्नशंकापि· संशयत्वं वा मानसत्वव्याप्या जातिरव्याप्यवृत्तिः। सर्वत्र संशयस्य मानसताया एवोपगमात्· चक्षुःसन्निकर्षादिना
पद्धर्मिकसंशयदशायां पर्वतं पश्यामीत्यनुव्यवसायश्च संशयस्य पूर्वं परतो वा जायमानतद्विषयकचाक्षुषादेर्ज्ञानस्य कल्पनेन तद्विष

१५७

प्रकृतये वोपपादनीयः। संशयत्वस्य चावच्छेदकं तत्तद्धर्मिविषयकत्वावच्छिन्नतत्तत्कोटिविषयकत्वमेव. एवं च पक्षविशेष्यकत्वावच्छिन्नप्रका
रकत्वावच्छेदेन संशयत्वाभाववत्त्वमेव पक्षे व्याप्यवत्तानिश्चयत्वं. वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यालोकवान्वा पर्वतो वह्निव्याप्यधूमवान्
भूतलं वह्निव्याप्यधूमवन्नवेत्यादिसंशये च पर्वतविशेष्यकत्वावच्छिन्नधूमप्रकारकत्वावच्छेदेन संशयत्वाभावोनुभवसिद्ध एव. पर्वते
धूमं न संदेह्मीति प्रतीतेस्तत्र सर्वानुभवसिद्धत्वादिति नानुपपत्तिः। चाक्षुषादिज्ञानस्यापि संशयत्वे संकरभयेन नानैव संशयत्वानि स्वी
क्रियंते तत्तद्भावकूटवत्त्वमेव निश्चयत्वघटकं. अनंतहेतुतावच्छेदकभेदेनानंतकारणताकल्पनापेक्षया कॢप्तपसंशयत्वजात्युभा
वघटितनिश्चयत्वेन सर्वसाधारणकारणताकल्पने लाघवात्. जातेरव्याप्यवृत्तिता च मिश्रादिभिरपि स्वीकृतेति नापसिद्धांतभीतिः।
भवतु वा संशयत्वजातिर्व्याप्यवृत्तिरेव तद्विशिष्टानिरूपितत्वं संशयकोटिविषयताया उपेयते. भवतु वा संशयनिश्चययोर्विषयता
भेदः। तं विना संशयसमुच्चययोर्वैलक्षण्यानुपपत्तेरुक्तत्वात्. एवं च संशयत्वविशिष्टानिरूपितत्वस्य पक्षविषयतानिरूपितव्याप्यविष
यतायां निवेशात्सर्वसामंजस्यमित्यादिकमालोचनीयं. धूमत्वालोकत्वाद्यवच्छिन्नाभावघटितधूमत्वज्ञानाभावादीनां पृथक्पृथक् परा
मर्शविशेषणतया सहकारितानावानुरोधात्साधनतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यक इति केचिद्। धीनेकारानाक्षिपति.

केण्गा० १५८ 158

तन्न तद्विषयतासंबंधेन तत्तद्ग्रामाण्यग्रहविशिष्टधूमादिप्रकारताभेदकूटविशिष्टत्वेन व्याप्यविषयतानां कारणतावच्छेदकत्वं आलो
कादिविषयतायाधूमाभावादिघटितभ्रमत्वग्रहस्वात्मत्वेण भानेपि तादृशभ्रमत्वग्रहविशिष्टधूमादिविषयताभेदसत्वात्तदानीमालोकपरामर्शा ता
दनुमितिः। अप्रामाण्यग्रहासत्वे च कार्यांतरीणतज्ज्ञानविषयतद्विशिष्टभेदोपगमाननुपपत्तिः। [illegible] कारणतावच्छेदकव्याप्यप्रकार
तायाः किंचिद्धर्मविशिष्टविषयताविशिष्टान्यत्वं निवेशनीयं। विषयतायां धर्मवैशिष्ट्यं च स्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्ना
भाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितत्वोभयसंबंधेन विषयतावैशिष्ट्यं च स्वनिरूपकप्रकारतावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञानस
मानाधिकरणज्ञाननिरूपितत्वस्वनिरूपकज्ञानविशेष्यीभूतज्ञानविषयत्वैतत्त्रितयसंबंधेन वाच्यं। तादृशविषयता धूमाद्यप्रामाण्यज्ञा
नीयधूमादिप्रकारतानिष्ठेति। ज्ञानभेदेन विषयताभेदमते तु न कश्चिद्दोष इति केचित्समादधिरे। परंतु जनकतावच्छेदके प्रकारतायां यद्ध
र्मावच्छिन्नत्वभानं फलतोऽत्याहाप्रयोजकं तदवच्छिन्नाभावघटितभ्रमत्वज्ञानमकिंचित्करं। एवं च व्याप्यप्रकारतायामवच्छेदकतया धूमत्वा १५८
द्यभानेपि व्याप्यवानयमित्यादिज्ञानादनुमित्युत्पत्त्या वह्निव्याप्यधूमवानयमित्यादिज्ञानाद्धूमाभाववत्तिधूमप्रकारकमिदं ज्ञानमित्यप्र
माण्यग्रहदशायां वह्निव्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वाग्रहे जायत एवानुमितिः। यत्र नानुमितिस्तत्र तादृशभ्रमत्वग्रहः कल्प्यते। या एव

प्यधर्मांतरानिश्चयस्थले व्याप्यधूमादिनिश्चये ऽप्रामाण्यग्रहसत्वे व्याप्यत्वावच्छिन्नाभावस्य धर्मिणि संभवेन तादृशाभावघटितभ्रमत्वग्रहस्य संशय
भ्रमत्वरूपसंशयस्यौचित्यावर्जितत्वे या ऽप्रायशः संभवात् एवं च व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव एव परामर्शस्य विशेषणं सह
कारित्वा न तु ह्रासीनधूमत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति न किंचिदनुपपन्नं यत्साध्यपक्षकस्थले व्याप्यतावच्छेदकधर्मवि
शेषावच्छिन्नाभावघटितभ्रमत्वग्रहदशायामितरानुमितिकारणसमुदासत्वे व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वग्रहनियमस्तत्साध्य
पक्षकस्थलाभिप्रायकमेवेतल्लाघवाभिधानमिति वदंति ननु सामानाधिकरण्यघटितव्याप्तिपक्षे सामानाधिकरण्यप्रविष्टसाध्यसं
बंधत्वमेवानुमितौ विधेयतावच्छेदकसंबंधताप्रयोजकं तद्घटितोक्तव्याप्तेरनुमितिहेतुत्वे च संबंधभाननियामकस्य वक्तव्यतया शंकानि
रस्यति यत्संबंधेति उक्तव्याप्तिघटकसाध्याभावप्रतियोगितायामवच्छेदकतया भानमेव विधेयतावच्छेदकतया संबंधभाननियामक
मित्यर्थः। ननु व्याप्तेः साध्यसाधनसामानाधिकरण्याघटितत्वपक्षे कदाचित्संयोगेन हेतुमत्ताज्ञानादेवानुमितिः कदाचिच्च समवाया
दिनेत्यत्र किं नियामकं व्याप्तेस्तद्घटितत्वे च तादृशसामानाधिकरण्यघटकसाधनीयसंबंधेन पक्षे साधनवत्ताज्ञानवत्ताज्ञानस्यानुमि
तिहेतुतया तन्नियम इत्यत आह साध्याभाववतीति येन संबंधेन हेतोरवृत्तिमत्वमिति यत्संबंधावच्छिन्नहेतोरभाव इत्यर्थः। नास्ति प्रसं

के॰ग्रा॰
१५९

159

गः। नाभ्रांतस्यसमवायेनधूमादिमत्तिवह्न्याद्यनुमितिप्रसंगः। ननूक्तव्याप्तेरवृत्तिसाधारण्यतयातद्धेतुकाप्यनुमितिरभ्रांतस्यस्यादित्य
तआह। आकाशादेरिति॰ तथात्वेपि॰ साध्याभाववदवृत्तित्वेपि॰ अभ्रांतस्यपक्षधर्मताज्ञानविरहान्नानुमितिः। नन्वेवमपिव्याप्तिभ्रमंविना
नावृत्तिहेतुकानुमितिरित्यनुभवोव्याहन्येतैवेत्यतआह निविशतांवेति॰ वाशब्देनास्यपक्षे॰ उक्तानुभवस्यसविवादत्वात्। तत्र॰ तादृशा
व्याप्तावपि॰ साध्यसामानाधिकरण्यमिति॰ तथापिदर्शितलाघवापत्तेरितिभावः। वृत्तिमत्वनिवेशेनैवोक्तानुमितिवारणसंभवेसा
ध्याधिकरणाशनिवेशोनिरर्थकः। हेतोः साध्यासामानाधिकरण्यनिश्चयदशायामनुमित्यापत्तेः। व्यापकताविचारोपदर्शितरीत्या
निराससंभवादित्याशयेनाह वृत्तिमत्वंचेति॰ वृत्तिमत्वं॰ व्यापकताघटकसंबंधेनसंबद्धत्वं॰ तेनतादात्म्यसंबंधेनाकाशादेरपिद्रव्यत्वा
दिव्याप्यत्वोपपत्तिः। साध्याभाववद्वृत्तित्वासत्ताभावसाध्याभाववद्वृत्तिभेदरूपसाध्याभाववदवृत्तित्वस्यप्रत्येकंहेतुत्वेननुगमः।
एकतरस्यहेतुत्वेविनिगमनाविरहात्तुर्वचं॰ साध्याभाववद्वृत्तिभिन्नत्वशरीरेएकस्यधर्मिणोऽधिकस्यनिवेशेनगौरवेपितद्धे
तुत्वेनुभवविरोधः। अनुमितिहेतुताप्रयोजकस्यव्यभिचारज्ञानविरोधित्वस्याविशेषादितितादृशव्याप्त्यास्तद्विषयकधियो
र्वानुगमेव्यापकसामानाधिकरण्यस्यतद्धियोर्वानुगमकरूपाक्रांततयाव्यापकसामानाधिकरण्यधीरप्यनुमितिहेतुःस्यादित्या

१५९

शंकते। अथेति· व्यभिचारधीति· साध्याभाववद्वृत्तित्वधीरित्यर्थः। व्यभिचारधीविरोधिधीविषयत्वेनेति। उक्तरूपेण व्याप्तिद्वयमनुगमय्य तद्विषयकत्वे
न ज्ञानानुगमः। शिरोवेष्टनेन नासिकास्पर्शतुल्य इति व्यभिचारज्ञानविरोधित्वेन ज्ञानानुगमकरूपेण हेतुतायामेव तात्पर्यं· व्यभिचारबुद्धिं· साध्याभा
ववद्वृत्तित्वबुद्धिं· न चैवमिति· व्यापकताधियः साध्याभाववद्वृत्तित्वधीप्रतिबंधकत्वमेव नेत्यर्थः। मानाभावादिति भावः। ननु वह्न्यभाववद्वृत्तिधू
म इति ज्ञाने तुल्यवित्तिवेद्यतया वह्नित्वधूमवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वभानाद्वह्नित्वधर्मिकतादृशावच्छेदकत्वाभावरूपव्यापकतावच्छे
दकत्वावगाहिनो ज्ञानस्य ग्राह्याभावावगाहितया विरोधित्वमविवादमेवेत्याशंक्य ग्राह्याभावावगाहिनोऽपि ज्ञानस्य विशेष्यांशे समानप्रका
रकस्यैव विरोधिता· जातित्वादिना भासमानवह्नित्वादौ अवच्छेदकत्वावगाहिबुद्धिं प्रति वह्नित्वत्वाद्यवच्छिन्नत्वेनानवच्छेदकत्वधियोऽप्रति
बंधकत्वात्· एवं प्रतियोगितावच्छेदकसंबंधावगाहि प्रतियोगिज्ञानं प्रत्येवाभावज्ञानं विरोधि· अन्यथातिप्रसंगादित्याशयेन प्रतिबध्य
प्रतिबंधकभावाभिमतज्ञानयोः समानप्रकारकत्वं व्यभिचारज्ञाने ग्राह्यस्यावच्छेदकत्वस्य संबंधताऽप्रदर्शनेन तत्संबंधानवगाहित्वं च दर्श
यति· वह्न्यभाववद्वृत्तिरिति· वह्नित्वं स्वरूपेणेति· भासत इत्यग्रिमेणान्वयः। स्वरूपेण भानं· निष्प्रकारभानं· वह्नित्वदभाववद्वृत्तिधूम इति
वह्नित्वत्वावच्छिन्नविषयकधीविरोधित्वेनानुगमे च स्वरूपतो वह्नित्वावगाहिनो वह्न्यभाववद्वृत्तिधूम इति ज्ञानासंग्रहो बोध्यः। संब

के० ग०
१६०
160

धर्मपर्याद्यस्यनेन तदंशे निष्प्रकारकत्वमपि दर्शितं· विषयविरोधविरहादिति· विरोधिताप्रयोजकविषयताविरहादित्यर्थः। अवच्छेदकत्वतद
भावरूपविषययोर्विरोधस्य निर्विवादत्वया यथाश्रुतासंगतेः। विशिष्टस्य· महानसीयत्वादिरूपविशेषणांतरधर्मितावच्छेदकतापन्नस्य· अव
च्छेदकत्वेन· धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन· तादृशप्रतियोगितानवच्छेदकत्वानुपपत्त्या· प्रकारांतरानुसरणे· प्रतियोगि
तानवच्छेदकसाध्यतावच्छेदकेत्यनेन यादृशसाध्यतावच्छेदकतापर्याप्तिस्तादृशधर्मे प्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकानवच्छिन्नत्वं किं
चिद्धर्मपर्याप्तिमत्वविवक्षणे· महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छेदकतायाः पर्याप्त्यवच्छेदको न शुद्धवह्नित्वादिमात्रधर्मः· न्यूनवृ
त्तित्वात्· तथा च तादृशधर्मावच्छिन्नबुद्धिविशेषणविषयतावच्छेदकत्वादिधर्मस्य पर्याप्तिमादाय वह्नित्वादेर्धूमादिव्यापकतावच्छेदकत्व
मिति भावः। वह्नित्वादिरूपसाध्यतावच्छेदकतदितरानवच्छिन्नप्रतियोगितानिवेशो वा· न च विशिष्टपर्याप्त्यवच्छेदकतायाः वह्नित्वप्रत्येकादि
त्वादिवदभावसाधारण्येन यथाश्रुतमेव साध्विति वाच्यं· एवं सति महानसीयवह्निभिन्नवह्निमान् धूमादित्यादौ अतिव्याप्तेः। साध्यतावच्छे
दकघटकयोर्महानसीयवह्निभिन्नवह्नित्वयोः प्रत्येकमवच्छेदकत्वपर्याप्तिविरहेण तदनतिरिक्तस्य विशिष्टस्याप्यनवच्छेदकताया उ
र्दरत्वात्· सुतरामिति· विषयविरोधविरहादित्यनुषज्यते· उक्तव्यभिचारज्ञाने दर्शितरीत्या परिष्करणे पि व्यापकताप्रविष्टाभावस्य ध

१६०

र्मिणितत्प्रतियोगितावच्छेदकावच्छिन्नत्वत्वभानाभावादिति भावः॥ ननु व्यभिचारव्यापकताज्ञानयोर्मणिमंजर्यादिन्यायेनैव परस्परविरोधित्वान्न तु
ग्राह्याभावावगाहित्वेनेति समानप्रकारकत्वमनपेक्षितमत आह मणीति इदमुपलक्षणं व्याप्तिकताज्ञानस्य व्यभिचारधीविरोधित्वेपि
सामानाधिकरण्यविषयतायास्तन्निरूपितहेतुविषयतायाश्च प्रतिबंधकतानवच्छेदकतया पक्षविषयतानिरूपितहेतुविषयतायास्ता
दृशधीप्रतिबंधकतानवच्छेदकत्वेन परामर्शकारणतावच्छेदके निवेशासंभवात् वह्निव्याप्यधूमो धूमवान्पर्वत इत्यादिसमूहालंबनरू
पाद्व्यभिचारधीविरोधिज्ञानादनुमित्यापत्तिर्दुर्वारेत्यपि बोध्यं॥ ननु केवलान्वयिसाध्यकानुमितेर्भ्रमत्वविनोपपादनाय गुरुशरीरापि
व्यापकसामानाधिकरण्यरूपा व्याप्तिरेवानुमितिप्रयोजिका वाच्येत्यत आह व्यापकत्वेति॥ ज्ञानादिमानित्यनुमितेरिति॥ स्वरूपतोज्ञा
नत्वादिविधेयतावच्छेदकावगाहिन्यनुमितिरित्यर्थः॥ यद्रूपावच्छिन्ने साध्यतावच्छेदके व्यापकत्वग्रहस्तेनैव रूपेण साध्यतावच्छेदकमनु
मितिविषय इति नियमस्यावश्यकतामभ्युपगंतव्यत्वादिति भावः॥ व्यतिरेकिसाध्यकस्थले साध्याभाववद्वृत्तित्वज्ञानं केवलान्व
यिसाध्यकस्थले तु व्यापकसामानाधिकरण्यज्ञानं हेतुरित्युक्तौ वह्न्यभाववद्वृत्तित्वज्ञानात्स्वरूपतो वह्न्यादिविषयिण्या वह्निमा
न् यमित्याद्यनुमितेर्निर्वाहात्॥ विषयतया केवलान्वयिनो ज्ञानस्य साध्यत्वानुसरणवाच्यत्वादेरखंडधर्मत्वाभावेन स्वरूपतोभाना

के०ग०
१६१
161

तदवच्छिन्नसाध्यकोपेक्षा·निरुद्धर्मितावच्छेदकव्यापकतावच्छेदकत्वग्रहस्यव्यभिचारग्रहाद्भतिवध्यतयासधर्मितावच्छेदकस्यस्वरूपतोज्ञानत्वा
नवगाहितयाचनतस्यज्ञानवानित्यनुमितिहेतुतासंभवइतिध्येयं·रूपांतरेणव्यापकतावच्छेदकत्वावगाहिपरामर्शस्यस्वरूपतोविधे
यतावच्छेदकभासकत्वोपगमेवाधकमाह अन्यथेति·तन्मात्रेहेतिधर्मपुरस्कारेणतत्रव्यापकतावच्छेदकत्वग्रहस्यस्वरूपतस्तद्भभास
कत्वोपगमेआत्मत्वेनआत्मेतरसाधारणेनव्यापकतावच्छेदकत्वग्रहान्नानुमितिप्रसंगइत्याशयेनाह अनुभवत्वव्यापकेति·प्रत्यक्ष
त्वानुभवत्वसाधारण्यवारणायानुभवत्वव्यापकेति·अनुभवतदन्यवृत्तीत्यर्थकं·स्मृतित्वव्यावर्त्तनायानुभववृत्तित्वनिवेशः।सत्ता
गुणत्वव्यावर्त्तनाय गुणत्वव्याप्येति·किंचिद्गुणावृत्तीत्यर्थकं·तथात्वग्रहेपि·व्यापकतावच्छेदकत्वग्रहेपि·तत्प्रसंगात्·स्वरूपतोज्ञानत्व
विषयकानुमितिप्रसंगात्·नचोक्तरूपेणव्यापकतावच्छेदकत्वग्रहस्यस्वरूपतोज्ञानत्वप्रकारकज्ञानानुमित्यजनकत्वेपिज्ञानत्वत्वेन
तद्ग्रहस्यतादृशानुमितिजनकत्वमविरुद्धमितिवाच्यं·तथासत्यसमातिसिद्धिविशेषादिरूपतादृशानुमितिप्रतिबंधकेज्ञानत्ववा १६१
नयमित्येतावन्मात्राकारायाअनुमितेर्विलोपप्रसंगात्·यत्तुस्वरूपतोयत्रज्ञानत्वादिकंसामानाधिकरण्यनिरूपकतावच्छेद
कतयाभासतेतादृशात्ज्ञानत्वेव्यापकतावच्छेदकेज्ञानत्ववत्ज्ञानसमानाधिकरणहेतुमानयमित्यादिपरामर्शात्ज्ञानवानयमित्याध

नुमितिः। यत्र च ज्ञानत्वत्वादिनैव तत्तथाभासते तादृशाद्व्यापकतावच्छेदकज्ञानत्ववत्समानाधिकरणहेतुमानयमित्यादिपरामर्शात् ज्ञानत्ववत्वा
नयमित्याकारानुमितिरिति केचिदुच्यते तदसत्ः व्यापकतावच्छेदकजातिविशेषवत्ज्ञानसमानाधिकरणहेतुमानयमित्यत इव तादृशज्ञानत्व
वत्ज्ञानसमानाधिकरणहेतुमानयमित्यतोपि ज्ञानवानयमित्यनुमितेरयोगात्ः तादृशपरामर्शयोरविशेषेणैकस्मादेव तादृशानुमिति
र्नान्यस्मादिति फलवैषम्यस्यानुभवविरुद्धत्वात्ः अन्यथा वैपरीत्यस्यापि सुवचत्वात्ः ज्ञानत्ववत्ज्ञानवानयमित्याकारानुमितिर्द्विविधाः
ज्ञानत्वविषयिणी कदाचित् कदाचित् ज्ञानवानयमित्यनुमितिरिति नियमस्य तावतोप्यनिर्वाहाच्चः तद्धर्मावच्छिन्नेतरावृत्तित्वेन व्यापकतावच्छेद
कत्वज्ञानात्तद्धर्मप्रकारेण साध्यानुमितिस्तत्तदितरत्वप्रतियोगितावच्छेदकतया तद्धर्मस्य यादृशभानेऽनुमितावपि तस्य तादृशभानमिति नि
यमः अतो व्यापकतावच्छेदकज्ञानत्ववदितरावृत्तिधर्मवत्समानाधिकरणहेतुमानयमित्यादिज्ञानात् ज्ञानत्ववत्ज्ञानवानय[illegible]नुमितिः।
व्यापकतावच्छेदकज्ञानेतरावृत्तिधर्मवत्समानाधिकरणहेतुमानयमित्यादिपरामर्शाच्च ज्ञानवानयमित्याद्यनुमितिरिति सूक्ष्मद[illegible]शिनः प्रतियोगि
ताधर्मिकसाध्यतावच्छेदकावच्छिन्नत्वघटितोभयाभावज्ञानमनुमितिहेतुः तत्र साध्यतावच्छेदकस्य स्वरूपतोपि भानसंभवात्तदीयसाध्य
तावच्छेदकविषयतातुल्यानुमितौ तद्विषयतेति नियमान्न किंचिदनुपपन्नमित्यपि वदन्तिः तत्तद्गुरुत्वेन रूपेण प्रतियोगित्वेपि गुरुत्वरूपेण

के०ग०
१६२
162

प्रतियोगित्वाभावमभ्युपगच्छतः प्रगल्भस्य मते साध्यतावच्छेदकावच्छिन्नेऽप्रतियोगित्वज्ञानमेवानुमितिहेतुः तत्र स्वरूपतोऽपि साध्यतावच्छेदकभान
संभवात् सर्वसामंजस्यमिति ध्येयं· ननु साध्याभाववद्वृत्तित्वज्ञानमात्रस्यानुमितिहेतुत्वे भ्रमं विना केवलान्वयिसाध्यकानुमानं नोपगंतव्यं तथा
च केवलान्वयिसाध्यकहेतुमतो परामर्शेऽप्यनुमितिहेतुरास्तां· व्यतिरेकिसाध्यके तु केवलान्वयित्वभ्रमादेवानुमितिरितिविपरीतमेव कुतो न
स्यादित्यत आह तत एवेति· ज्ञानत्वबाधावच्छिन्ने केवलान्वयितावच्छेदकत्वज्ञानात् स्वरूपतो ज्ञानत्वादिप्रकारकज्ञानाद्यनुमितेरनुपपद्यमानत्वादेवे
त्यर्थः। उक्तरीत्या तदुपपत्तिमाशंक्य दूषणांतरमाह सर्वेति· गृह्यमाणव्यतिरेकवृत्त्यादिज्ञानमानसमेवेति शंकानिरासाय सर्वजनानुभवसिद्धानुमिति
त्वकथनं· केवलान्वयित्वभ्रमासंभवाय गृह्यमाणव्यतिरेके ति· नन्वेवं केवलान्वयितया गृह्यमाणवाच्यत्वादेरनुमितिनिर्वाहाय व्यापकताज्ञानहेतुत्व
कल्पनमपि दुर्वारमेव· न च वाच्यत्वत्वमभावप्रतियोगितानवच्छेदकमिति ज्ञानकालेऽपि संबंधविधया अभावे वाच्यत्वत्वावच्छिन्नप्रतियोगिताक
त्वावगाहि समानप्रकारकं व्याप्तिज्ञानं संभवत्येवेति न व्यापकताधीहेतुतासंभव इति वाच्यं· अभावत्वावच्छेदेनानुयोगित्वावच्छेदेन वा स्वरूपसंबंधा
वच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकाभावज्ञानदशायां साध्याभाववद्वृत्तित्व
रूपव्याप्तिग्रहस्य दुरुपपादत्वात्· समानप्रकारकविरोधिज्ञानसत्त्वात् स्वरूपसंबंधावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वाप्रसिद्ध्या

१६२

वापिभ्रमात्मकबाधज्ञानसंभवात्· अभाववुद्धौ प्रतियोगितावच्छेदकस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रकारत्वे तादृशव्यधिकरणसं
बंधावच्छिन्नवाच्यत्वत्वाभावविषयकभ्रमात्मकविरोधिज्ञानस्यापि सुलभत्वात्· वस्तुतस्तु· स्वरूपसंबंधावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रकार
कज्ञानादिनिष्ठवाच्यत्वविषयितायामेव तादृशप्रतियोगिताकत्वं प्रसिध्यति· न चैवं विषयितानिष्ठं सप्रतियोगिकत्वमभावनिष्ठानंततोऽन्यजा
तीयमेव नत्वेकजातीयमिति वाच्यं· मिथो वैलक्षण्यस्याप्रामाणिकतया एकजातीयताया आवश्यकत्वात्· अत एव संयोगसाधारण्यात्
सप्रतियोगिकत्वमेवाभावत्वमित्यस्यासंभवं वक्ष्यति विरोधग्रंथे· एतत्त्वभावत्वाविषयके साध्यरूपप्रकारांशे निर्धर्मितावच्छेदके दर्शिते
विपरीतज्ञानाप्रतिबध्यं साध्यीयवृत्तित्वमाननियाकारकव्याप्तिज्ञानं तदापि संभवतीति कस्यचिन्मतं· तदसुद्धं· तावतापि भ्रांतस्यानुमिति
दुरुपपादैव व्यापकताघटितहेतुत्वमंतरेण· एवं तद्वत्ताज्ञानप्रतितदीयत्वादिसाहित्याभावत्वेनाभावविषयकमनतिप्रसक्तं तदीयत्वसाहित्या
नुयोगिताविशेषत्वेनानुयोगितारूपाभावत्वविषयकं वा तत्त्वनास्तीत्याकारकज्ञानमेव यथाविरोधि· न तु विषयताधिसाधारणतयातिप्रसक्तं
नकेवलं तदीयत्वादिनाभावमनुयोगितावावगाहमानं तथा· हेतुमति साध्यं नास्तीत्याकारकं साध्यीयत्वाभावत्वाभ्यां अभावविषयकं तदीयत्वानु
योगिताविशेषत्वाभ्यामनुयोगिताविषयतास्वव्यभिचारज्ञानमेवानुमितिजनकज्ञानविरोधि नत्वतिप्रसक्तं तदीयत्वमात्रेणाभावादिविषय

के०ग्गा०
१६३
163

कं॰ एवं चाभावत्वानवच्छिन्नेऽनुयोगिताविशेषत्वानवच्छिन्नानुयोगितायां वा तदीयत्वावगाहिज्ञानं प्रतिबध्यं ज्ञानं नानुमितिहेतुः संभवति॰ तदीय
त्वमात्रेणाभावादिविषयकसाध्याभावधर्मिकहेतुसामानाधिकरण्यज्ञानदशायामनुमित्यनुपपत्तेरित्युपदर्शितकेवलान्वयित्वग्रहेऽनुमिति
दुरूपपादैवेत्याशंक्य तत्र केवलान्वयित्वज्ञानदशायां तत्साध्यकानुमित्यसंभवेऽपि तत्र पक्षवृत्तित्वानुमित्युत्पत्तेर्वन्हेः कार्यस्य पक्षे साध्यसंशय
निवृत्त्यादेः संभव इत्याशयेनाह प्रमेयत्वादाविति॰ ननु केवलान्वयित्वस्य प्रमेयत्वादावग्रहदशायां घटादौ तत्संशयनिवर्तिकानुमितिः कथम
भ्रांतस्योपपद्यतामित्यत आह कथंचित्तद्वृत्तिधर्मे व्यापकत्वेनेति॰ लिंगेनेति शेषः। व्यापकताज्ञानाद्धटादौ प्रमेयत्वे साध्यकानुमितिर्वाऽप्रमि
तेः प्रमेयत्वादौ घटादिवृत्तित्वानुमापकोऽभि लिंगज्ञानस्यावश्यकत्वादिति भावः। ननु यत्र स्थले यत्र घटवृत्तिज्ञेयत्वादिस्तत्र प्रमेयत्वमित्यादि
सहचारग्रहाभावात्॰ घटवृत्तित्वाद्यवच्छिन्नव्यापकता मेयत्वादौ धूर्वं न गृहीताऽपि तु यत्र ज्ञेयत्वं तत्र प्रमेयत्वमित्यादिसहचारज्ञानात् ज्ञे
यत्वत्वाद्यवच्छिन्ननिरूपितव्यापकतामात्रं तत्र सिध्यतीति मते घटादौ प्रमेयत्वानुमितिः संभवति॰ ननु प्रमेयत्वादौ घटादिवृत्तित्वानुमितिः उ
क्तलिंगाग्रहादित्यत आह कथंचिदिति॰ व्यापकत्वनिरूपकतया भासमानज्ञेयत्वत्वाद्यवच्छिन्नेऽउपलक्षणविधया घटादिवृत्तित्वग्रहेऽतिरित्याऽ
भावप्रतियोगिकोटौ उपलक्षणतया भानस्याऽप्रामाणिकत्वेन विशिष्टव्यापकताघटकप्रत्येकयावत्पदार्थोपस्थितौ विशिष्टव्यापकताविरह

१६३

व्यावर्त्तके विशेष्यव्यापकत्वे निश्चीयमाने विशिष्टस्य सहचारग्रहमनपेक्ष्यैव विशिष्टव्यापकतानिश्चयस्य संभवेन तद्घटितधर्मव्यापकत्वरू
पस्य प्रमेयत्वादौ निश्चयोपपत्तेः सर्थं॥ इदमत्रावधेयं केवलान्वयिसाधारणव्याप्तेः साध्यसामानाधिकरण्यरूपाघटितांशाघटिततया गौरवे
ण तत्साध्यकानुमानानभ्युपगमोनुचितः पक्षवृत्तिहेतुव्यापकं साध्यमिति ज्ञानादेवानुमितेः स्वीकरणीयत्वात् यद्विच व्यापकताज्ञाने भ्रान्तियो
गित्वादिकं प्रकारः साध्याभाववद्वृत्तित्वज्ञाने तु संसर्ग इत्यतः किमपि लाघवं स्यादिति मन्यते तदा पक्षीयहेतुमत्त्वावच्छेदेन साध्यवत्तावगाहि
नः साध्यांशे व्यापकतारूपसंसर्गावगाहित्वेन हेतुतायां किं मानं पेयते व्यापकताज्ञाने वह्नित्वत्वादिविषयतानिवेशे न गौरवाच्च भिन्नभेपि तदा प्रमा
दिरूपसाध्यतावच्छेदकांशे प्रमात्वादिरूपविशेषणावच्छिन्नव्यापकतावच्छेदकत्वावगाहिज्ञानस्य प्रमेयत्वादिसाध्यकानुमितिहेतुतायां किमुपे
क्षसे प्रमात्वविषयतानिवेशस्योभयमतेतुल्यत्वात् एकरूपेणावच्छेदकत्वे प्यन्यरूपावच्छिन्नावच्छेदकत्वाभावस्य सुवचत्वात् प्रमात्वाद्य
वच्छिन्नव्यापकतावच्छेदकतायाः सुघटत्वात् विशिष्टहेतुविषयतामन्तर्भाव्य कारणताकल्पने व्यापकतापरामर्शहेतुतावादिनापि शक्यु
मिति केवलान्वयिव्यावृत्तव्याप्तेः साधनभेदस्य भेदोऽकिंचित्करः व्यधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वे साध्याभाववद्वृत्तित्व वं
ज्ञानहेतुतामतेपि केवलान्वय्यनुमानं निराबाधमेव साध्यतावच्छेदकविशिष्टसाध्याभावस्याप्रामाणिकत्वे व्यधिकरणसमवायि

के० गा०
१६४
164

त्वाद्यवच्छिन्नवाच्यत्वादिमद्देवनत्व्यधिकरणवाच्यत्वत्वविशिष्टावच्छिन्नाभावनिष्ठावच्छेदकताकाभावरूपव्याप्तेः प्रसिद्धिसंभवात्‌ नच
व्यधिकरणसाध्यावच्छिन्नाभाववद्वृत्तित्वाभावस्य व्याप्तित्वे व्यभिचारिहेतावपि साध्यावच्छिन्नान्यदीयभाववद्वृत्तित्वाभावमादाय सल्लिङ्ग
परामर्शसंभव इति वाच्यं साध्यतावच्छेदकविशिष्टसहितेताभावत्वमात्रावच्छिन्नाया अभावनिष्ठावच्छेदकताया एव व्याप्तिघटकत्वात्‌
धूमीयत्वादिना घटाभावादिमद्वृत्तित्वाभावीयप्रतियोगितानिरूपितायामभावनिष्ठावच्छेदकतायां व्यधिकरणतया धूमादेरिव
समानाधिकरणतया घटादेरप्यवच्छेदकत्वात्‌ व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकतावच्छेदकतायाः व्यधिकरण इ
वसमानाधिकरणेपि स्वीकारादिति नवीनः पन्थाः। अथ समवायित्वेन वाच्यत्ववन्नेरमिति प्रतीतिबलादीदृश एवं व्यधिकरणधर्मावि
च्छिन्नप्रतियोगितावच्छेदकताकोनत्यंताभावोपि तथा अत एव दीधितिकृता प्रमेयत्वादिधर्मावच्छिन्नहेतुकस्थले तद्रूपस्य व्यधि
करणतया प्रतियोगितावच्छेदकत्वासंभवेन साध्याभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकत्वं निराकृत्य यथाश्रुतमिश्रलक्षण
दूषणमपि संगच्छते अन्यथा समवायित्वादिना प्रमेयत्वादेरपि तादृशप्रतियोगितावच्छेदकत्वसंभवेन तल्लक्षणानिर्वाहात्‌ नच तादृशा
भावो व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताक एव न तु तादृशप्रतियोगिताकत्वेन साध्याभावसजातीय इति न तल्लक्षण

१६४

घटकइतिवाच्यं॰ सममनियतताभावैक्येनव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यापिस्वसमनियततादशाप्रतियोगि
ताकाभावरूपत्वादितिचेन्न॰ समवायितयावाच्यत्ववान्नायमितिप्रतीतिवत् समवायितयावाच्यत्ववान्नाऽयमितिप्रतीतेरपिसुवचत्वात्॥
ति॰ परेतु साध्याभाववद्वृत्तितायाः साध्यवद्वृत्तितान्यवृत्तित्वत्वेननिवेशः॥ अन्यथाऽव्याप्यवृत्तिसाध्यकाव्याप्तेः॥ अव्याप्यवृत्तिधर्माव
च्छिन्नभेदस्याव्याप्यवृत्तितानये साध्याभावस्थलेसाध्यवद्भेदनिवेशेपितदप्रतीकारात्॰ एवंचकेवलान्वयिसाध्यकेऽप्रसिद्धिनिबंधनाव्याप्ति
वारणायसाध्यवन्निरूपितवृत्तौहेतुनिष्ठत्वंनिवेशनीयं॰ तथाचवाच्यंज्ञेयत्वादित्यादौज्ञेयत्वादिहेतुनिष्ठंयत्साध्यवद्वृत्तित्वंतदन्यावृत्तिता
काशाभावादौऽप्रसिध्यातितदभावस्यज्ञेयत्वादौसत्वेनलक्षणसमन्वयः॥ नचतथापिवाच्यंप्रमेयादित्यादौसाध्यवन्निरूपितप्रमेयान
वृत्तिभिन्नवृत्त्यप्रसिध्याव्याप्तिर्दुर्वारैवेतिवाच्यं॰ स्वनिष्ठंयत्साध्यवद्वृत्तित्वंतदवच्छेदनिवेशनेनसामंजस्यात्॰ यद्वायत्रहेतुव्यक्तौलक्षणं
संगमनीयंतदास्वपदेनतस्यैवोपादेयतयातत्प्रमेयव्यक्तौसाध्यवन्निरूपिततन्निष्ठवृत्तिभिन्नप्रमेयांतरनिष्ठवृत्तित्वशून्यत्वमादायलक्षणस
मन्वयात्॰ अवच्छेदकभेदेनाधेयताभेदेहेतुनिष्ठत्वस्यानेहेतुतावच्छेदकावच्छिन्नत्वंनिवेशनीयं॰ एवंचोक्तस्थलेस्वरूपांतरावच्छिन्नसा
ध्यवद्वृत्तित्वएवविशिष्टान्यत्वप्रसिद्धिः॥ हेतौहेतुतावच्छेदकावच्छिन्नसाध्यवद्वृत्तित्वान्यरूपांतरावच्छिन्नसाध्यवद्वृत्तित्वसत्वेपिन

के०न्या०
१६५

165

क्षतिः। तादृशसाध्यवद्वृत्तित्वान्यायावृत्तित्वस्तदनवच्छेदकहेतुतावच्छेदकवत्त्वस्य विवक्षणीयत्वात्· अवच्छेदकभेदेप्याधेयताया अभेदे हे
तुतावच्छेदकनिष्ठं यत्साध्यवद्वृत्तितावच्छेदकत्वं तदन्याधेयतावच्छेदकत्वशून्यत्वं हेतुतावच्छेदके निवेशनीयमित्याशयः। अर्थापत्तेः प्रमा
णान्तरत्वं व्यवस्थापयिष्यन् व्यतिरेकव्यापकताया अपि अनुमित्युपयोगितां खंडयति एवमिति· गौरवादित्यस्य साध्याभाववद्वृत्ति
त्वापेक्षयेत्यादिः। तत्र तादृशप्रतियोगित्वज्ञानस्य विजातीयप्रमितिहेतुताया भवताप्यावश्यकत्वात्· शरीरगौरवमाकिंचित्करमत
आह व्यभिचारज्ञानेति· व्यभिचारज्ञानाविरोधिज्ञानघटितसामग्र्या अनुमितिप्रयोजकत्वे आकांक्षादिज्ञानघटितसामग्र्या अ
पि तथात्वापातेन शब्दादीनामपि स्वतंत्रप्रमाणताभंगप्रसंग इति भावः। ननु हेत्वभावाभाववे हेतौ साध्याभावसामानाधिकरण्य
ग्रहरूपव्यभिचारज्ञाने हेत्वभावे साध्याभावव्यापकताधी विरोधिन्येव व्यापकाभिमतस्याभावे व्याप्याभिमतस्य सामानाधिकर
ण्यग्रहे व्यापकताज्ञानस्य प्रतिबंधकत्वादत आह तद्धर्माभावेति· तत्र· धूमे कदाचिद्विसंध्यादिति· धूमाभावाभावत्वेन वह्न्यभावसा
मानाधिकरण्यग्रहे तुल्यवित्तिवेद्यतया वह्न्यभावसमानाधिकरणाभावप्रतियोगितया धूमाभावेभाना तादृशाभावाप्रतियोगि
त्वज्ञानस्य याप्याभावावगाहित्वादिति भावः। प्रतियोगित्वस्य संसर्गविधया ज्ञाने प्रतियोगित्वाभावज्ञानस्य प्रतिबंधकत्वं न वास्त

१६५

वमित्याशयेन कदाचिदित्युक्तं। ननु धूमत्वेनेति· तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं विरुणद्धीति विपरिणतमनुषज्यते· भिन्नप्रकारक
त्वादिति· धूमाभावाभाववत्याप्रकारकत्वेन तुल्यवित्तिवेद्यतयाधूमाभावे प्रतियोगित्वानवगाहनादित्यर्थः। ननु व्यतिरेकव्याप्तिज्ञानाद
पि पक्षे साध्यनिर्णयो भवति· तस्य च प्रत्यक्षत्वानुपपत्त्याऽसंभवेनानुमितित्वमावश्यकमित्यत आह व्यतिरेकेति· तत्वेन· अनुमितित्वेन· अननु
भवादिति· अर्थापयामीत्यनुव्यवसायस्यैव तत्रोत्पत्तेरिति भावः। ननु तत्रानुमितित्वानुभवस्य सविवादत्वेपि अनुमितिसामग्रीजन्यतया
नुमितित्वमावश्यकमित्यत आह क्लृप्तेति· साध्याभाववद्वृत्तित्वज्ञानस्यैव लाघवेनानुमितिहेतुतायाः क्लृप्तत्वादिति भावः। ननु व्यतिरे
कव्याप्तिज्ञानघटितसामग्रीजन्यत्वमपि पृथगनुमितित्वप्रयोजकं वाच्यमित्यत आह सामग्रीभेदेति· विजातीयेति· अनुमितित्वविरु
द्धजातिमतीत्यर्थः। अनुमिनोमीत्यनुव्यवसायात् प्रत्यक्षविजातीयानुमितिप्रमावत् शाब्दयामीत्याद्यनुभवबलात् शाब्दत्वप्रमित्यं
तरवत् चार्थापयामीत्यनुभवबलादपि विजातीयप्रमासिद्धेर्दुर्वारत्वात्· तस्या अनुमितित्वाननुभवेपि अनुमितित्वे शाब्दादिबुद्धेरपि त
थात्वप्रसंगात्· व्यतिरेकव्याप्तिज्ञानघटितायाश्चाकांक्षाज्ञानादिघटितायाश्च सामग्र्या अनुमितित्वप्रयोजकतासंभवादिति भावः।
नन्वेवं तत्कारणस्य प्रमाणांतरत्वप्रसंगः इत्यत्रेष्टापत्तिमाह तत्करणमपीति· अर्थापत्तिः प्रमाणांतरमेवेति योजना· अर्थापत्तिः अ

के०ग०
१६६
166

उपपद्यमानोयोर्थस्तज्ज्ञानं॰नन्वेवमन्वयव्याप्तिप्रकारेणसाध्याभावव्यापकाभावप्रतियोगित्वप्रकारेणचपक्षेहेतुमत्ताज्ञानेज्ञानयोग
पद्यानुपगमेउभयजातीयज्ञानमेवस्वीकरणीयमितिजातिसंकरप्रसंगइत्यतआह॰त्रुटितेति॰त्रुटप्रमाणद्वयसमाहारः।शाब्दानुमानादि
रूपप्रमाणद्वयसंवलनंतत्समशीलंयुगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसंधानं॰अर्थापत्त्यनुमानयोःसंवलनं॰तथाचयथातत्रैकसामग्र्या
बलवत्वान्नैकदामिथोविजातीयप्रमाद्वयसामग्रीसमावेशइतिनत्रुटितानुमितिशाब्दत्वादीनांसंकरस्तथात्रुटितेपिसामग्र्याबलवत्त्वकल्प
नेचानुभवानुरोधएवविनिगमकः।फलसंदेहेचयासामग्रीगुरुशरीरातस्याएवबलवत्त्वंकल्प्यते॰तस्यदुर्बलत्वेस्वीयफलेच्छाविशिष्टत्वे
नतत्प्रतिबंधकतायाःकल्पनीयतयाइच्छयासमंप्रविष्टकारणानांविशेष्यविशेषणभावविनिगमनाविरहेणगुरुसामग्र्याःप्रतिबंध
कतावाकल्प्येनगौरवात्॰नचोभयदिशीच्छासत्वेस्वभावसंवलनसामग्र्यैवफलजननात्तदानीमुत्तेजकत्वेनस्वभावदुर्बलसामग्रीफ
लवारणायस्वफलेच्छाविरहविशिष्टायादुर्बलसामग्रीफलेच्छायाएवबलवत्सांसामग्र्यामुत्तेजकत्वंवाच्यं॰दुर्बलसामग्र्यांचबलवत्साम
ग्रीफलेच्छाविरहविशिष्टस्वफलेच्छाविशेषणंवाच्यंतथाचदुर्बलसामग्र्यांनाधिकप्रवेशइतिकिंतस्यगौरवेणेतिवाच्यं॰इच्छाविरह
विशिष्टायाइच्छायायत्रविशेषणत्वं॰तत्रेच्छातद्विरहयोर्मिथोविशेष्यविशेषणभावेतयोःप्रत्येकंकारणांतरेणसमंविशेष्यविशेष

१६६

णाभावे विनिगमनाविरहेण प्रतिबंधकताधिक्यं· यत्र च इच्छाविशेषविरहविशिष्टेच्छायाउत्तेजकत्वं न तु विशेषणत्वं तत्र तयोरेवमिथस्त
थात्वे विनिगमनाविरहादिति प्रतिबंधकत्वस्यान्यतरत्वमिति गुरुसामग्र्या एव बलवत्त्वौचित्यात्· वस्तुतो बलवत्वयाः सामग्र्याः प्रतिबंधकता
यां इच्छाविरहविशिष्टायां इच्छायां नोत्तेजकत्वं किंतु विनिगमनाविरहभयेनेच्छाउत्तेजकीकृत्यैकं प्रतिबंधकत्वं· स्वफलेच्छावैशिष्ट्यं निवेश्य
चान्यत्प्रतिबंधकत्वं कल्प्यते· तावतैव चोभयादृशीच्छायां दृशात् दुर्बलसामग्र्या प्रतिबंधकत्वोपपत्तिरिति दुर्बलसामग्र्यामिच्छातद्विरहयो
रेकत्र निवेशो न प्रतिबंधकतावाकुल्यमिति स्फुटमेव· प्रकृते व्यतिरेकव्याप्तिज्ञानघटिता सामग्री गुरुशरीरा· तादृशव्याप्तेरधिकप
दार्थघटितत्वात्· अधिकपदार्थोपस्थितत्वज्ञानाभावादिनिवेशाधिक्याच्चेति दिक्· मास्तु· अन्यथानुपपत्तिज्ञानजन्यधीरपि· अ
नुमितिरिति· तथा च न तत्करणं प्रमाणांतरमित्यर्थः। नन्वन्वयव्याप्तिज्ञानाजन्यतया पक्षताजन्यतयापि सानकृतानुमितिसामग्रीजन्ये
तिन तत्रानुमितित्वप्रयोजकरूपवत्त्वं इत्यत आह नाघटेनेति· सामग्रीजन्यत्वापेक्षयेत्यादिः। परामर्शजन्यत्वस्य व्याप्यवत्पक्षवैशिष्ट्य
प्रत्यक्षादिसाधारणतयाऽनुमितित्वप्रयोजकत्वासंभवात्· पक्षजन्यत्वनिवेशस्यावश्यकत्वादिति भावः। एवं पक्षताजन्यत्वमात्रस्य
तथात्वे· तथात्वापत्तिः। अनुमितित्वापत्तिः। तत्रापि विषयतया पक्षताया हेतुत्वादिति भावः। पक्षतायाश्च प्रत्यक्षमेव न संभवती

के॰ ग॰
१६७
167

त्याह इच्छेति॰ एककालीनत्वादीति॰ एकक्षणावच्छिन्नसामानाधिकरण्यप्रत्यासत्तीत्यनुमितसाविरुसंबंधघटितप्रतियोगितावच्छेदकत्वेनेत्यर्थः। ह
तस्याः पक्षतायाः। अनुमितिहेतुत्वमभ्युपेत्यापि समनियतस्यैव प्रयोजकत्वमित्याशयेन हूव्यर्थेति॰ साध्यादीति॰ व्याप्यत्वमेव प्रयोजकत्वे त-
त्रमन्यथा सामग्र्या अप्यननुगमेन तज्जन्यत्वस्यापि प्रयोजकत्वासंभवादित्याशंक्य प्रयोजकत्वस्य दुर्वचतां परामर्शग्रंथोक्तां स्मारयति प्र-
योजकत्वं चेति॰ एवं च प्रयोजकताया दुर्वचत्वेन व्याप्तिज्ञानजन्यत्वं अनुभवत्वेन्यूनवृत्तिधर्मावच्छिन्नव्यापकताज्ञानजन्यत्वमनुभवत्वन्यू-
नवृत्तिधर्मावच्छिन्नत्वविशेषणाद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिव्युदासः। अन्वयव्यतिरेकव्यापकतयोरननुगमासंभवादाह आदी-
ति॰ तेनाभावज्ञानजन्यतालाभः। न चैवमप्यभावादिज्ञानानुव्यवसाये तद्विषयकत्वघटितधर्मावच्छिन्नत्वनिरूपितजन्यताविवक्षणेप
भावादिघटिताकांक्षादिज्ञानजन्यशाब्दबोधेतिप्रसंगो दुर्वार इति वाच्यं॰ जन्यत्वपदेन तत्करणकत्वस्य विवक्षणात्॰ शाब्दबोधे च पदज्ञान
त्वेनैव करणतयातिप्रसंगविरहात्॰ व्यतिरेकिस्थले प्यन्वयव्याप्तिज्ञानादेव साध्यनिश्चयो न तु व्यतिरेकव्याप्तिज्ञानात्॰ अन्वयसहचार
ज्ञानाभावेनान्वयव्याप्तिप्रत्यक्षानुपपत्तावपि व्यतिरेकव्याप्त्या तदनुमानसंभवादिति कृत्स्नानुमितिसामग्रीजन्यत्वेनासावनुमितिरेवेति न
प्रमाणाधिक्यमिति सिद्धांतसमर्थयितां मतमुपन्यस्यति साध्याभावेति॰ ननु साध्यप्रसिद्धिस्थले हेतौ साध्यव्याप्यत्वानुमानसंभवेप्यप्रसि

१६७

द्धाभावसाध्यकस्थले साध्यव्याप्यत्वस्यापि अप्रसिद्ध्यभावेन नानुमितिः संभवतीत्यत आह अप्रसिद्धसाध्यकेऽपीति साध्याप्रसिद्धिस्थले तन्नि
श्चयस्यैवानभ्युपगमात् तन्निश्चयस्थले प्रतियोग्यादिना खंडशः प्रसिद्ध्यधीनसाध्यप्रसिद्ध्यादेः कल्पनादिति भावः। न चान्वयव्यतिरेक
व्याप्त्योः साध्यव्यापकभावाज्ञानदशायामपि व्यतिरेकिहेतुना साध्यनिश्चयस्यानुभविकत्वादनुपपत्तेः प्रमाणान्तरत्वमावश्यकमिति
वाच्यं तद्व्याप्यव्यापकघटकसकलपदार्थोपस्थितिसत्वे मानसतज्ज्ञानस्य प्रकृतहेतुनिष्ठप्रकृतसाध्यान्वयव्याप्तिमानसस्यापि व्यतिरे
कव्याप्तिज्ञानदशायां सर्वत्र संभवदुक्ताशयात् अनुमितिस्थले साध्यस्य मानसनिश्चयसंभवेऽप्यनुमिनोमीत्यनुव्यवसायबलादनु
मानस्यैव साध्याभावव्यापकाभावप्रतियोगित्वरूपान्यथानुपपत्तिकालीननिश्चयेऽर्थापयामीत्यनुभवबलादर्थापत्तेः प्रमाणान्तरत्वं
दुर्वारमिति सस्वरसः केचिदित्यनेन सूचितः। ननु साध्याभाववद्वृत्तित्वस्य व्याप्तित्वे व्यतिरेकिसाध्यकस्थलेऽपि यत्र हेतुतावच्छेदकसंबंध
शून्य एवाधिकरणे साध्यव्यतिरेकप्रसिद्धिस्तत्र साध्याभाववद्वृत्तिहेतुतावच्छेदकसंबंधेन हेतोरप्रसिद्ध्या भ्रमं विना तत्रानुमितिर्विलीये
तेत्याक्षेप्तुं प्रथमतो हेतुतावच्छेदकसंबंधं उक्तव्याप्तौ निवेशयति अपीति विशिष्य वाभावः तत्तत्संबंधावच्छिन्नसाध्याभाववद्वृत्ति
त्वत्वेन रूपेणाभावो वाच्यः। तत्संबंधावच्छिन्नव्याप्तिस्वरूपतयास्वीकार्यः। इत्यादिकं समवायसंयोगादिना धूमघटादिहेतुकानु

कें०ग०६
१६८
168

मानं। अप्रसिद्धेरिति। न च साध्याभाववदनुयोगिकत्वाभाववत्संबंधप्रतियोगित्वविवक्षया नायं दोष इति वाच्यं। तर्हि मते घटत्वसंयु
क्तघटादीनामपि संयोगादिना वृत्त्यादिव्याप्यत्वापत्तेः। वृत्त्यादिमदनुयोगिकत्वसंयोगादौ वृत्त्याद्यभाववदनुयोगिकत्वाभावस
त्वात्। तादृशाभाववत्त्वप्रतियोगिकसंयोगादिसामान्यकत्वनिवेशे च सामान्यपदार्थस्य व्यापकताघटिततया व्यापकसामाना
धिकरण्यापेक्षया गौरवात्। सामानाधिकरण्यसंबंधेन साध्याभावाभाव एव व्याप्तिः। आत्मभावादेः समवायादिघटितसामानाधि
करण्याप्रसिद्धावपि तादृशव्यधिकरणसंबंधावच्छिन्नतदभावः सुलभ एवेति तु वृत्तिनियामकतया सामानाधिकरण्यस्याभाव
प्रतियोगितावच्छेदकसंबंधत्वानुपपत्त्या हेयं। एतदपि उक्तानुमानमपि केवलान्वयिनः सरणिमिति। तथा च विशेषदर्शिनां तत्र आ
त्माद्यनुमितिः नोपेयतां किंतु आत्माद्यवेव समवायप्रकृतभावकत्वादिना तत्र आत्मादिसमवेतत्वानुमितिः। साध्याभाववदसमवेतत्वा
दिग्रहविरोधिनोऽभाववत्तिसमवायादिविरहग्रहस्य सत्त्वे उक्तहेतोः सुग्रहत्वादिति भावः। स्वाधिकरणावृत्तिसाध्याभावकत्वमिति। त
था च साध्याभाववत्तिसमवायाद्यसत्त्वग्रहेऽपि साध्याभाववे हेतुसमवाय्यवृत्तित्वग्रहसत्त्वान्नोक्तानुमानानुपपत्तिरिति भावः। न चात्रापि
सत्ताभाववज्जातित्वादिसाध्यादौ हेतुमत्तिविरोधितावच्छेदकसंबंधेन वृत्तेरप्रसिद्धिग्रहदशायामनुमित्यनुपपत्तिर्दुर्वारैवेति वाच्यं।

१६८

तत्रसाध्याभाववद्वृत्तित्वादिज्ञानादेवानुमित्युपगमात्॰व्यापकताज्ञानेहेतुतावादिनापिभेदत्वावच्छेदेनहेतुमद्वृत्तित्वग्रहदशायांतादृश
व्याप्तिज्ञानादेवानुमित्युपगमेनव्यैरुक्तत्वात्॰प्रतियोग्यधिकरणाभिन्नत्वविशेषितहेत्वधिकरणघटितव्यापकतायास्तदानुपहेत्वात्॰नचसं
योगसंबंधावच्छिन्नघटाभावसाध्यकेविषयितयाघटादिहेतुकानुमितेःकागतिः।तत्रहेतुमत्तिज्ञानादौसाध्यरूपाभाववत्प्रतियोगि
तावच्छेदकसंयोगेनवृत्तेरप्रसिद्धेः।साध्याभाववृत्तित्वसंयोगिनिविषयितारूपहेतुतावच्छेदकसंबंधाप्रसिद्धेरुपदर्शितव्याप्तिद्वय
स्यासंभवादितिवाच्यं॰वृत्त्यनियामकसंबंधेनव्याप्तेःप्राचीनैरनभ्युपगमेनतत्रविषयितादिहेतुकानुमानस्यैवोपगमात्॰नन्वेवंस्वत्वा
ननुगमात्साधनतावच्छेदकभेदेनव्याप्तिभेदप्रसंगइत्यत्रेष्टापत्तिमाहस्वत्वेति॰स्वहेतुत्वादिति॰स्वव्यापकसाध्यसामानाधिकरण्य
रूपव्याप्तिवादिनापीत्यादिः।तथाप्येतन्मतेप्रतियोगितावच्छेदकत्वांशस्यसंबंधतयानिवेशेनलाघवस्यानपायादितिभावः।साध्या
भाववद्वृत्तित्वरूपव्याप्तिपक्षेप्यनुपपद्यमानतायाःसाध्यव्यभिचारिण्यविशेष्यकत्वरूपविशेषणान्तरविशिष्टत्वेनव्याप्यतायांनिर्वाह
रूपमेतन्मतेव्याप्यावलंबनप्रयोजनंदर्शयतिएतेनेति॰नीलरूपवान्नीलरूपवत्समवेतत्वसत्तिद्रव्यत्वादित्यादिकंचित्ररूपवतिव्यभिचारेणा
सदनुमानमतोनीलेतररूपसाध्यकनीलरूपवद्वृत्तसमवेतत्वविशिष्टगोत्वहेत्वनुधावनं॰गोत्वरूपविशेष्यविशेषणत्वेशाह्रुयाकर्मविशे

पाहैगगनादौ च न व्यभिचारः। नीलान्यसमवेतत्वविशिष्टगोत्वे शुद्धगोत्वानतिरेकिणि नीलेतररूपव्यभिचारविरहस्य दुर्घटत्वेपि समवेतत्वस्य
समवेतभेदेनुभिन्नत्वे गोत्वविशिष्टत्वेन गुणादिव्यावृत्तनीलान्यसमवेतत्वस्य व्यक्तिष्व्यभिचारसत्वेन विपरीतविशेष्यविशेषणभावापन्नहे
तुकानुमानमेव सुघटं। तद्विशिष्टगोत्वज्ञानदशायां गोत्वविशिष्टत्वज्ञानस्यापि संभवादिति विशिष्टगोत्वहेतुकानुमानविलोपेक्षाति
विरह इत्यालोच्याखंडं नीलसमवेतत्वाभावं विशेषणतयोपात्तवान्। न च साध्याभाववद्वृत्तितानवच्छेदकधर्म एव व्याप्तिर्वाच्या। नीलसम
वेतत्वाभावविशिष्टगोत्वत्वे न च गोत्वस्य न नीलगोवृत्तित्वमतो विशिष्टगोत्वत्वं तदनवच्छेदकमेवेति वाच्यं। विशिष्टस्यानतिरेकितया साध्या
भाववद्वृत्तितावच्छेदकविशेष्यीभूतगोत्वत्वे विशेषणान्तरविशिष्टेपि तदनवच्छेदकत्वासंभवात्। एतदभिसंधायैव द्रव्यं गुणकर्मान्यत्वे सति
सत्वादित्यत्राव्याप्तिर्नेपि दर्शिता। तत्र स्वाश्रयसमवेतत्वसंबंधेन गुणकर्मान्यत्ववैशिष्ट्यमात्रस्य साध्याभाववद्वृत्तितानवच्छेदकतयातद
दायैव विशिष्टसत्वस्य व्याप्यत्वोपपत्तेः। नीलासमवेतत्वस्याप्याश्रयासंबंधेन वैशिष्ट्यं च द्रव्यत्वादिनिष्ठसाध्याभाववद्वृत्तितायामवच्छेदकीभाति
नतन्मात्रमादायापि विशिष्टगोत्वादेर्व्याप्यत्वोपपत्तिः। अथैतत्कल्पेपि द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादावव्याप्तिः साध्याभावस्य विशि
ष्टसत्तायाः शुद्धसत्तानतिरेकितया हेत्वधिकरणवृत्तित्वादिति चेन्न। अनुयोगिताविशेषरूपसाध्याभावत्वे स्वाधिकरणवृत्तितानवच्छेदकत्वस्य वि

तास्तित्वात् अनुयोगितायाः प्रतियोगितावच्छेदकादिभेदेन भिन्नतया गुरुत्वसत्ताभावादिनिरूपिताभावत्वस्य द्रव्यादिवृत्तितावच्छेदकत्वेपि विशिष्टाभा
वनिरूपिताभावत्वे तदभावसाध्यकेऽव्याप्तेः एतेन जात्यभाववान्द्रव्यान्यत्वादित्यादौ साध्याभावस्य द्रव्यत्वादेर्हेत्वधिकरणगुणाद्यवृत्तित्वेपि स्वाभावसामा
न्यमनिवेश्याप्युपपत्तिः प्रतियोगितावच्छेदकाद्यैक्ये भावव्यक्तिभेदेनानुयोगिताभेदानभ्युपगमात् गुणत्वादिसाध्यकस्थले तथा साध्यनिरूपिताभावत्वेस्वा
धिकरणवृत्तितानवच्छेदकत्वस्य दुर्घटत्वात् अथैवमपि सत्ताभाववान् गुणकर्मान्यत्वे सति द्रव्यान्यत्वादित्यादावगतिरेव विशिष्टहेतुमति साध्यतूयाभाव
प्रतियोगितावच्छेदकसमवायेन वृत्तेरप्रसिद्धेः साध्याभाववति गुणादौ हेतुघटकविशेष्यस्य वृत्तेर्व्याप्तिघटस्यैव निर्वाहात् इति चेत् न एतदभिसंधायैव विशि
ष्टहेतुकस्थले विशेष्यविशेषणसंबंधस्य हेतुत्वमनुसृत्य परंपरेत्यादिना केचित्तु अभावस्यैव भावस्याप्यभावत्वेन वृत्तिविशेषणताविशेषेणैव नास्तीति प्रत्ययस
स्यैकजातीयसंबंधावगाहितया आनुभविकत्वादिति स्वाधिकरणे विशेषणताविशेषेण वृत्तित्वमभावस्य विवक्षणीयं आकाशाभावादेरात्मादौ आकाशाभा
वत्वादिनैव दैशिकविशेषणतया वृत्तिः ननु कालिकसंबंधावच्छिन्नस्वाभावाभावत्वेन कालएवाकाशाभावस्य कालिकसंबंधावच्छिन्नाभावो नास्तीति प्रत्यया
कालिकसंबंधावच्छिन्नस्वाभावस्याभावरूपआकाशाभावः आत्मनि साधाराधेयभावप्रत्ययेन तादृशाभावत्वस्योपलक्षणतयैव भानोपगमादित्याकाशाभाववान् का
लिकसंबंधावच्छिन्नाभावे साध्ये आत्मत्वादिहेतौ नाव्याप्तिरिति तत्तद्विशिष्टहेतुकस्थले स्वाधिकरणे साध्यव्याप्तेरेव निर्वहत्वमित्याहुः ॥॥ इति [illegible]रहस्यं ॥

के.व्य.ग.
१७०

170

श्री॥ केवलव्यतिरेकित्वसत्त्वस्य इति मू. लं. यथाश्रुते तल्लक्षणं साध्यसाधनोभयवत्तया निश्चीयमानधर्मिरूपस पक्षपदार्थस्यासिध्य
सिद्धिभ्यां पराहतमित्यतदर्थमाह यत्र व्यतिरेकसहचारेणैवेति व्यतिरेकसहचारेणैवेत्यर्थः। तथा चान्वयसहचाराग्रहीतव्याप्तिकं केवल
व्यतिरेक्यनुमितौ मितिलक्षणं पर्यवसितं तत्र व्याप्तिपदस्यान्वयव्याप्तिपरत्वेग्रहीतव्याप्तिभेदाद्भेदः। व्यतिरेकिणि व्यतिरेकव्याप्तेरेवग
मकत्वे तु स्वमतसाधारण्यानुपपत्तिरत आह दीधितौ व्याप्तिग्रह इतीति साधारणोक्तिरिति मतभेदेनान्वयव्याप्तिव्यतिरेकव्या
प्त्युभयपरमित्यर्थः। मतभेदेन लक्षणभेदात् अनुगतरूपेण व्याप्त्योरुपादानमनुचितमिति भावः स्यैव साधारणत्वमुक्तं स्वम
ते व्यतिरेकव्याप्तेरेव व्यतिरेकसहचारग्राह्यतया व्यतिरेकसहचारेण व्याप्तिग्रह इत्यस्य व्यतिरेकव्याप्तिग्रह एवानुमितिसंगमित्य
र्थे पर्यवसानात् प्रकृतानुमितेः पक्षिकव्याप्तित्वव्यापकव्यतिरेकव्याप्तित्वकत्वमित्यत्र एवं केवलव्यतिरेकित्वादिकमपि नि
र्वाच्यमित्यनेन सूचितलक्षणे पर्यवसानमिसवधेयं पूर्वपक्षिणा मीमांसकेन केवलान्वय्यनुमानानभ्युपगमात् तेन केवलान्व
यित्वाभावाऽप्यनेन केवलान्वय्यनुपपद्यमानानुमितिप्रदर्शनमसंगतमतस्तत्वेसादोपरयति तत्वेति नैयायिकस्येत्यर्थः। तथा
च स्वे नैयायिकस्य स्वमतसिद्धकेवलान्वय्यनुमानानुपसाव्यतिरेकव्याप्तिधियानुमितिहेतुत्वोपगमेन युक्त इति मूलाभिप्रायः।

१७०

पृथिवीत्वादिहेतावितरभेदरूपसाध्यनिरूपितस्य व्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्तेः स्वत्वघटितायाः पक्षातिरिक्तेऽस
त्वात्‌· अत्रासिद्ध्यानानुमानसंभव इति व्यतिरेकव्याप्त्यान्वयव्याप्त्यनुमानाशंकाया असंगतिरतो व्याचष्टे साध्यव्याप्यत्वमिति· तद्
दन्यावृत्तित्वरूपमिति· अस्याऽपि साध्यधर्मिकान्योन्याभावगर्भहेतुव्यापकताग्रहप्रतिबध्यव्यभिचारग्रहविरोधित्वेनान्वयव्या
प्तिरूपतेः· व्यतिरेकव्याप्तिबुद्धेश्च हेत्वभावे साध्याभाववन्निष्ठाभावप्रतियोगित्वबुद्धावेव विरोधितेत्याशयः· वस्तुतो यादृशधर्माव
च्छिन्नाभावव्यापकाभावप्रतियोगितावच्छेदकरूपरूपवान् सत्तद्रूपावच्छिन्नव्यापकतावच्छेदकतादृशधर्मावच्छिन्नसमानाधिकरणवृत्ति
तद्रूपवानिति सामान्यतो व्याप्त्यापक्षधर्मताबलादत्र सिद्धाया अपि पृथिवीत्वत्वावच्छिन्नव्यापकतावच्छेदकेतरभेदत्वावच्छिन्न
समानाधिकरणवृत्तिपृथिवीत्वत्वरूपान्वयव्याप्तेः पृथिवीत्वे ग्रहसंभव इति सूचनाशयेन तु पृथिवीतरभिन्नभिन्नावृत्तित्व
रूपसाध्यस्य पृथिवीमात्रवृत्तिधर्मान्तरेऽत्र सिद्धिरूपगतव्याप्तेः· तत्रापि चेद्व्यतिरेकव्याप्तिहेतुकानुमानान्तरात्सिद्धिरित्युच्यते तदा
नवस्था· मानान्तराघटितत्वसिद्धिस्तु पृथिवीत्वेपि· मानान्तरं च नानुमानान्तरं· तत्रापि साध्यत्रसिद्धपक्षणात्· न प्रसक्तं· तत्र
विपरीतकोटेरप्युपनीततया भानसंभवेन निश्चयासंभवादित्यत आह अन्ततः साध्यएवेति· साध्ये साध्यवदन्यवृत्तित्वस्यावि

के.व्य.ग.
१७१

171

रोधेन भानासंभवादुपनयसहकृतेन मनसैव तत्र साध्यवदन्यावृत्तित्वनिश्चयः संभवतीति भावः। उपस्थितभानानियमेनान्यत्रापि
कदाचिन्मानसनिश्चयसंभवेनातत इत्युक्तं। निरुपाधीतिमूलमुपाधिज्ञानाभावसहितेत्यर्थकं। तदभावस्य व्याप्तिज्ञानाकारण
तयाततेत्वप्रदर्शनस्य व्यभिचारज्ञानाभावरूपकारणसमवधानप्रदर्शनपरतया संगमयति निरुपाधीतीति। व्यभिचारज्ञानानि
रासाय। व्यभिचारज्ञानाभावसाहित्यलाभाय। पृथिवीत्वरूपपक्षतावच्छेदकसाध्यसामानाधिकरण्यविषयकस्य तद्धेतुकव्याप्ति
ग्रहस्यानुमितिप्रतिबंधकत्वं तदुभयविषयतावैलक्षण्यप्रयुक्तमिति पार्थिवीत्वमितरभेदव्याप्यमिति मूलाभिप्रेतं। तत्रानुमितेः पृथि
वीविशेष्यकत्वकथनात् व्याप्तिग्रहे पृथिवीत्वस्य विशेष्यता अनुमितौ तादृशविशेष्यत्वस्यैतावदेव तदभिप्रेतमिति। भ्रमनिरासाय दर्शि
ताकारस्य सूचितमन्यदपि वैलक्षण्यं स्पष्टयति। शुद्धेति। स्वरूपतो भासमाने इत्यर्थः। हेतुमित्त्वसर्वत्वस्य पक्षतावच्छेदकत्वे हेतुपक्ष
तावच्छेदकभेदेन सिद्धसाधनपरिहारकल्पनास्यकल्पांतरसंभव इति सूचनाय सर्वत्वस्य पक्षतावच्छेदकत्वाभिप्रायेण सर्व
पदोल्लेखवदित्याह सर्वेतीति। अवच्छेदकत्वस्फोरणायेति अव×त्व×च्छेदकत्वेन विषयतासूचनायेत्यर्थः। ननु पृथिवीत्वावच्छिन्नप
क्षकस्थले पृथिवीत्वत्वावच्छिन्नस्य हेतुत्वे पृथिवीत्वत्वांतर्गततया पार्थिवीत्वं पक्ष×रूप×धर्मतया हेतोरभानं प

१७१

रार्थस्थलेऽुपनयवैयर्थ्यं । नचेहेतुतावच्छेदकपृथिवीवृत्तित्वघटितधर्मविशिष्टपृथिवीवृत्तित्वस्योपनयादेवभानात्तद्वैयर्थ्यमितिवा
च्यं । तथाप्युद्देश्यतावच्छेदकविधेययोरैक्ये नोपनयाधीनशाब्दबुद्धेरसंभवादित्यत आह अत्र चेति । नोपनयवैयर्थ्यं । पृथिवीवृत्ति
त्वघटितधर्मविशिष्टपृथिवीत्वस्य निराकांक्षतयाऽन्वयासंभवेन उपनयस्यार्थाबोधकत्वं नेत्यर्थः । पृथिवीत्वत्वं पृथिवीनिष्ठान्योन्या
भावप्रतियोगितानवच्छेदकत्वरूपसकलपार्थिववृत्तित्वघटितमेवेत्यतोऽपि नोपनयवैयर्थ्यमितिसूचयितुमतोपीत्युक्तं । वस्तुतो व्यभि
चारावारकतया हेतुतावच्छेदकगर्भे सकलपार्थिववृत्तित्वांशस्य वैयर्थ्यं न तन्निवेश एव निर्भरः । यद्वेत्यादिकल्पमवतारयितुं पूर्वक
ल्पेऽस्वरसबीजं दर्शयति । अथेत्यादिना । न तद्ग्रहसंभवः । नान्वयव्याप्तिग्रहसंभवः । विशेषणज्ञानाभावादिति भावः । तत्सत्वे । तावत्पर्य
र्थोपस्थित्यादिसत्वे । तत एवेति । व्यतिरेकसहचारज्ञानसहकृतत्वव्यवच्छेदक एवकारः । मानाभावइति । अन्वयव्यतिरेकानुविधाना
सिद्धेरिति भावः । व्यतिरेकसहचारेणेत्यत्र, अन्वयव्याप्तिरेव, व्यतिरेकसहचारज्ञानस्य प्रयोजकत्वमेवाविवक्षितं नतु कारणत्व
मित्यभिप्रायिकाशंकां निरस्यति । नचेत्यादिना । अन्वयव्यतिरेकसहचारयोरिति । हेतुमत्वेन गृह्यमाणधर्मिणि साध्यवत्वग्रहोऽन्व
यसहचारग्रहः । तत्सत्वे तादृशधर्मिणि साध्याभावग्रहासंभवान्न तदात्मकव्यभिचारग्रहो भवतीति । एवं साध्याभाववत्वेन गृह्यमा

के०व्या०ग० सा
१७२

172

णे धर्मिणि साधनाभावावगाहिनो व्यतिरेकसहचारग्रहस्य सत्त्वे तादृशधर्मिणि साधनवत्त्वावगाहिनो व्यभिचारज्ञानस्यैव न संभ
वस्तूभयोरेव व्यभिचारशंकानिवर्तकत्वं· अत्रान्वयसहचारग्रहस्य निवर्तकत्वं दृष्टान्तविधया दर्शितं· अन्वयसहचारज्ञानस्यापि न स्वा
तंत्र्येण व्याप्तिग्राहकता न वा विशेषणज्ञानविधया· तदुक्तं पदार्थानां क्वचिदपि स्वजोपस्थित्यापि विशेष्ये विशेषणमित्यादिरीत्या तद्ग्र
हसंभवादिति यथा तस्यापि व्यभिचारशंकानिवर्तकतयैव व्यापकताग्रहोपयोगिता तथा व्यतिरेकसहचारग्रहस्यापीति पर्यव
सितार्थः। उपयोगित्वमित्यत्रैव न चेत्स्वस्य संबंधः। तद्ग्रहेपि किंचिदधिकरणान्तर्भावेन सहचारग्रहेपि शंकातादवस्थ्यात्· अन्याधिक
रणान्तर्भावेन शंकासंभवात्· नन्वेकाधिकरणे सहचारग्रहस्याधिकरणान्तरे व्यभिचारशंकानिवर्तकत्वाभावेपि तदधिकरणान्
तर्भावेन व्यभिचारशंकानिवर्तकता तिष्ठत्येव· तावतापि व्याप्तिग्रहोपयोगित्वमक्षतं· तादृशशंकाया अपि तद्ग्रहपरिपंथि
त्वादित्यत आह अधिकरणविशेष इति· साध्यवत्त्वसाधनाभाववत्त्वग्रहयोरिति· अन्वयसहचारघटकसाध्यवत्त्वांशभानस्ये
व व्यतिरेकसहचारघटकसाधनाभाववत्त्वांशभानस्यैव व्यभिचारशंकानिवृत्त्युपयोगित्वादित्यर्थः। तथा चांशान्तरघटितसहचा
रपर्यंतस्य नोपयोगित्वसिद्धिरिति भावः। न च साधनवदिदं साध्याभाववदिति व्यभिचारग्रहप्रतिबंधकतायां साध्यवत्त्वांश

१७२

स्येवतद्धर्मितावच्छेदकतया साधनवत्त्वांशस्यापि भानमुपयुज्यते । निरुक्तधर्मितावच्छेदकभानस्य विपरीतज्ञानाविरोधित्वादेव साध्याभाववद्यदिदं
साधनवदिति व्यभिचारग्रहप्रतिबंधकतायां साधनाभावांशस्येव तद्धर्मितावच्छेदकतया साध्याभाववत्त्वांशग्रहोप्युपयुज्यत इति वाच्यं । समा
नविषयकत्वेन विरोधितामते धर्मितावच्छेदकभानस्यानुपयोगित्वात् । समानधर्मितावच्छेदककत्वेन विरोधितामते साधनादिमत्वसमा
नाधिकरणत्वमात्रेण साध्यादिमत्वग्रहस्य तत्सामानाधिकरण्यमात्रेण साध्याभाववादिभानाविरोधितया सहचारदर्शनस्यैकाधि
करणांतर्भावेनापि व्यभिचारग्रहविरोधित्वायोगात् । अयमेवानुशयो दूषणांतरानुसरणबीजं । एवं व्यभिचारशंकानिवर्तकत्वेन स
हचारज्ञानस्य व्यापकताग्रहोपयोगित्वेपि कदाचित्त्वतः सिद्धव्यभिचाराग्रहात् व्यापकताग्रहणात् व्याप्तिग्राहकसहचारभेदादनुमानभेदो नो
पयुज्यत इत्यपि द्रष्टव्यं । व्यतिरेकव्याप्तिज्ञानस्यानुमित्यजनकत्वे पूर्वपक्षोक्ताव्यतिरेकव्याप्तिबोधकोदाहरणप्रयोगानुपपत्तिरपि दुर्वा
रेत्याह व्यतिरेकेति । अर्थांतरादित्यादिना उक्ताश्रमकालत्वपरिग्रहः । यत्र न साध्यं तत्र न साधनमित्युदाहरणं न व्याप्तिप्रदर्शनपरमपितु
सहचारमात्रप्रदर्शनाय एवं तावता व्यभिचारशंकानिवृत्तौ स्वतएव मानसो व्याप्तिग्रह इति नाकांक्षितव्यतिरेकव्याप्तिप्रदर्शनेनार्थांत
रापत्तेरनवकाशः इति कस्यचित्समाधानमुपन्यस्यति यत्त्विति । अर्थांतराद्यापत्तेरिति । हेतुप्रयोगानंतरं तज्जन्मकतोपायिकव्याप्तेरेवाकां

क्षितत्वादितिभावः। यच्छब्दादीति॰ आदिनावीप्सापरिग्रहः। वैयर्थ्यादिति॰ तदसत्वेपिसाध्याभाववतिनसाधनमित्यादितएवसहचार
ज्ञानसंभवादितिभावः। उदाहरणस्यव्याप्तिदर्शनपरत्वेतद्बोधार्थमेवतदुपयोगइत्यतआहव्युत्पादयिष्यतइति॰ तस्य॰ यच्छब्दादेःव्या
प्तिबोधकत्वं॰ व्याप्तिबोधोपयोगित्वं॰ यत्पदार्थांशेविधेयं यत्तद्व्यापकतायास्तत्पदोपस्थापितांशेयद्विधेयंतत्रभानस्यव्युत्पत्तिसि
द्धत्वादितिभावः। नन्वेतादृशव्याप्तिज्ञानस्यव्युत्पत्तिसिद्धत्वेपितस्याउपदार्थत्वेनशाब्दबुद्धौभानासंभवात्साध्यवाचकपदस्यसमभि
व्याहृतहेतुव्यापकताविशिष्टस्वार्थेलक्षणायैवव्याप्तिबोधउपपादनीयः। तथाचव्यतिरेक्युदाहरणादपिलक्षणयाकथंचिदन्वय
व्याप्तिलाभोभविष्यतीत्याशंक्याहनचेति॰ तदर्थं व्यतिरेक्युदाहरणादन्वयव्याप्तिबोधार्थं प्रकारांतरं॰ तदंतर्गतविभुत्वादिपदेहेतुव्याप
कत्वादिविशिष्टस्वार्थेनिरूढलक्षणा॰ व्यतिरेकव्याप्तिशरीरप्रविष्टसाध्याभावसाधनाभावयोःप्रतियोगिविधयैकदेशान्वयनिवेशा
पितुंशक्यतेनन्वितिति॰ आत्मत्वादेर्व्यतिरेकित्वंनस्यादिति॰ व्यतिरेकिलिंगतयाऽभिमतेपुरुषीयानुमितिद्वययोजकत्वंनस्यादित्यर्थः। ज
न्यैच्छादेरव्याप्यवृत्तितयाआत्मादावपितदभावसत्वेनतत्प्रतियोग्यव्याप्यवृत्त्यात्मत्वादिहेत्वभावस्याव्यापकत्वेनव्यतिरेकव्याप्तिप्रमायाअ
योगादितिभावः। संयोगादेर्व्यभिचारिहेतोः॰ आत्मत्वसाध्ये॰ तथात्वं॰ व्यतिरेकित्वे॰ अव्याप्यवृत्तेः संयोगादेरभावस्यात्मत्वाभाववा

पकत्वादितिभावः। यद्यप्यात्मत्वाभाववति ह्रदादौ संयोगाद्यभावस्याप्यभावसत्वान्न तस्यात्मत्वाद्यभावव्यापकत्वं· व्याप्तिलक्षणघटि
ष्टतद्भिन्नत्वाभावे प्रतियोगिवैयधिकरण्यविशेषणस्यात्र प्रयोजनविरहेणानिवेशात्· नच तत्र तदनिवेशेऽप्यभिन्नसंयोगिभेदादिस्य
व्याप्तिः। संयोगिभेदाभावस्य संयोगस्य साध्याभाववति द्रव्येऽभावसत्वेन साध्याभावव्यापकत्वासम्भवादितिवाच्यं। संयोगिभेदा
भावस्य संयोगरूपत्वेऽपि संयोगिभेदाभावत्वेन व्याप्यवृत्तितया आवश्यकत्वात्· अन्यथोत्पत्तिकाले घटादौ संयोगो नास्तीतिवत् सं
योगिभेदाभावो नास्तीति प्रतीत्यापत्तिरिति हेत्वभावत्वेन साध्याभावव्यापकतया आवश्यकत्वात्· तथापि तद्भिन्नत्वाभावप्रति
योगितानवच्छेदकहेत्वभावत्वरूपव्यापकतानिवेशे घटाभावादिरूपे व्यभिचारिण्यतिप्रसंगः घटाभावाद्यभावत्वस्य समनियत
घटत्वाद्यपेक्षया गुरुत्वेनाभावप्रतियोगितानवच्छेदकत्वात्· अतस्तद्घटितं किंचिद्धर्मवत्त्ववृत्तित्वविशिष्टसामान्यकं यद्युक्तं तदन्यप्र
कृतहेत्वभावत्वमेव तद्व्यापकत्वं प्रकृते विवक्षणीयं· तथाच संयोगाभावादेः साध्याभाववद्वृत्तिकिंचिद्धर्मवत्त्ववृत्तित्वविशिष्टसामा
न्यकत्वासंभवात्तेन रूपेण व्यापकत्वमक्षतमेवेति अतिव्याप्तिसंगतिः। साध्यतासाधनतावच्छेदकयोः साध्यतावच्छेदकावच्छिन्ना
भावप्रतियोगितावच्छेदकत्वेन निवेशः। शिरोवेष्टनेनेत्यादिन्यायेनानुचित इत्याशयेन ताद्रूप्येणैव तन्निवेशाय यत्तदवच्छिन्नत्वे यधि

के· व्या· ग·
१७४
174

करण्यमभावद्वये निवेशयति· साध्यतेति· तदवच्छिन्नासामानाधिकरण्यं· तदवच्छिन्नानधिकरणवृत्तित्वविशिष्टत्वं· एवं च साध्याभाव
त्वादिनिवेशवैयर्थ्यात्· साध्यतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टव्यापकतावच्छेदकसाधनतावच्छेदकावच्छिन्नानधिकर
णवृत्तित्वविशिष्टत्वाश्रयप्रतियोगित्वमिति पर्यवसितार्थः। विशिष्टसत्तावान् जातेरित्यत्र विशिष्टसत्वादित्यत्रातिव्याप्त्यव्याप्त्योर्वार
णाय साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोर्निवेशः। नन्वेवं संयोगाभाववान् विभागाभावादेतत्संयोगाभाववानेतद्वि
भागाभावादित्यादौ प्रतियोगिरूपसाध्यहेतुव्यतिरेकयोर्व्याप्तिग्रहादत्रांतस्यानुमितिर्न स्यात्· साध्याद्यसामानाधिकरण्यरूप
विशेषणावच्छिन्नव्यतिरेकाप्रसिद्धेरित्याशंकामिष्टापत्त्या परिहरति संयोगाभाव इति· अत्र संयोगाद्यव्याप्यवृत्तिमात्रप्रतियोगिक ए
वाभावो विवक्षितः। न तु संयोगत्वाद्यवच्छिन्नाभावः। तत्संयोगाद्यभावस्य साध्यत्वे व्यतिरेकित्वानुपपत्तेर्न्यूनताप्रसंगात्· द्विक्षणमात्र
स्थायिद्रव्यस्य सत्वेन संयोगवति तत्र विभागस्य संयोगाधीनस्यासत्वेन प्रतियोगिवैयधिकरण्यानवच्छिन्नयोरपि व्यतिरेकयोर्व्याप्यव्या
पकभावासत्वेन व्यतिरेकितायाअप्रसक्त्या व्याप्तिशंकायाएवानुदयात्· फक्किकानुत्थानात्· केवलान्वयीति· अत्रांतपुरुषं प्रति
अन्वयव्याप्त्यागमक इत्यर्थः। विशेषणांतरानवच्छिन्नयोरेव संयोगविभागाभावयोः साध्यहेतुभावे व्यतिरेकव्याप्त्यसंभवनियतः।

१७४

ननु विशेषणांतरविशिष्टयोरपि तथाभाव इत्याह प्रतियोगीति। तत्र संयोगाभावे साध्ये सः विभागाभावः तादृशः प्रतियोगि
वैयधिकरण्यावच्छिन्नः। व्यतिरेकेऽपीति। व्यतिरेकव्याप्त्यापि गमक इत्यर्थः। तत्र साध्याभावहेत्वभावयोः साध्यासामानाधिकर
ण्यासंभवेऽपि साध्यतावच्छेदकावच्छिन्नासामानाधिकरण्यस्य द्रव्ये संभवात्। तत्र प्रतियोगिवैयधिकरण्यावच्छिन्नयोस्तयोर
सत्वात्। द्विक्षणमात्रस्थायिद्रव्यस्याप्रामाणिकत्वे अत्रापि संयोगविशेषाभावस्य साध्यता बोध्या। यद्यपि यत्रैककपाले क्रि
ययाकपालयोरारंभकसंयोगकाले कपालांतरे क्रिया तदनंतरं कपालयोर्विभागस्तदनंतरं कपालद्वयसंयोगनाशस्तत्र घटो
त्पत्तेः प्रामाणिकत्वे घटो द्विक्षणावस्थायी स्यात्। सैवाप्रामाणिकी। उत्पत्तिक्षणे इन्द्रियसंयोगासंभवेन द्वितीयक्षणे च घटप्रत्यक्षासंभ
वात्। तृतीयक्षणे च तस्यैवासत्वात्। विषयनाशकाले प्रत्यक्षस्य सविवादत्वात्। फलेसंदेहे सामग्र्या अप्यप्रामाणिकत्वेन तल्लिंगकानु
मानस्याप्यसंभवात्। न च कपालतत्संयोगघटितसामग्र्याः प्रत्यक्षेणापि ग्रहात् फले प्रमाणकत्वमिति वाच्यं। विजातीय
संयोगस्यैव द्रव्यजनकतया तादृशवैजात्यस्य फलाभावेनानभ्युपगमसंभवात्। फलेनिश्चयसामग्र्यप्रसिद्धेरिति। तथापि यत्र महाघ
टनाशकाले तदारंभककतिपयसंयोगावर्तते तेषु द्रव्यारंभकतावच्छेदकजातिरावश्यकता। अन्यथा तद्वतु कपाले महाघटएव नोत्पद्ये

के·प्र·ग·
१७५
175

त· एवं च तत्र घटोत्पत्तिः सामग्रीफलसिद्धा· तत्र खंडघटोत्पत्तिपूर्वकालीनैककपालक्रिया यथा खंडघटस्योत्पत्तिकाले कपालद्वयविभागो द्वि
तीयक्षणे च तत्संयोगनाशे तद्घटस्य तृतीयक्षणे नाश आवश्यक इति द्वितीयक्षणमात्रस्थायि द्व्यंशमाणिकं भवतीत्यभिचारिण्यपीति
प्रसंग इति· धूमाद्यभावस्यापि कृदहनित्यादि विशिष्टत्वेन वह्न्याद्यभावव्याप्यत्वाद् वह्न्याद्यभावस्याप्यभावत्वादिना धूमाद्यभावत्वाव
छिन्नव्यापकत्वादिति भावः। नन्वभावे मेयत्वादिजातियोगिकत्वभ्रमदशायां मेयत्वाभावोऽभिधेयत्वाभावव्यापक इत्यादिभ्रमान्मे
यत्वाऽभिधेयत्वाद्यनुमितेरनुपपत्तिः। साध्याभावहेत्वभावयोरप्रसिध्या व्याप्यव्यापकभावग्रहरूपकारणासंभवादित्यत आह
साध्याभावत्वादिकं चेति· वैशानिकमिति· साध्यीयत्वाभावत्वादिना भासमानत्वरूपतया ज्ञानघटितमित्यर्थः। तथा च साधनी
यत्वधर्मितावच्छेदकतयाभासमानेऽभावत्वे साध्यधर्मितावच्छेदकतयाभासमानाभावत्वावच्छिन्ननिरूपितव्यापकतावच्छेदकत्वज्ञा
नं हेतुर्न तु वास्तवसाधनाभावत्वेन वास्तवसाध्याभावत्वावच्छिन्ननिरूपितव्यापकताज्ञानमित्यर्थः। मूले साध्याभावव्यापकसाध
नाभावाभावेनेति· साध्याभावव्यापकतयाभासमानो यः साधनाभावस्तदभाववत्तया तत्प्रतियोगितया वा पक्षे ज्ञायमानेनेत्यर्थः। साध्या
भावाभावस्य साध्याभावविरोधितावच्छेदकरूपावच्छिन्नस्य साध्यस्य साधनात्· सिद्धेरानुभविकत्वात्· व्यापकाभावे व्याप्याभावावश्यं

भावादितिनोक्तार्थहेतुः। यद्रूपावच्छिन्नसत्त्वे यद्रूपावच्छिन्नसत्त्वावश्यंभावस्तद्रूपावच्छिन्नज्ञानात्तद्रूपावच्छिन्नसिद्धेरनियमात्· केवलधूमत्वा
वच्छिन्नज्ञानाद्वह्नित्वाद्यवच्छिन्नासिद्धेः। व्यापकाभावत्वेन निश्चितात् व्याप्याभावनिश्चयावश्यंभावादित्यस्य तदर्थत्वेपि तत्सिद्धौ तत्सिद्ध्य
वश्यंभावस्य हेतुत्वासंभवादुक्तहेतुत्वेन तदभिधानासंगतेः। अन्वये व्यतिरेकव्याप्तेर्गम्यगमकभावेपि नास्य हेत्वंतरत्वं· अस्यैवार्थस्य
साधनादित्यं तेनोक्तत्वादित्यतः पूर्वं साध्याभावत्वसाधनाभावत्वाभ्यां व्याप्यव्यापकभावज्ञानाद्धेतुमत्त्वेन ज्ञातपक्षे साध्यसिद्धेरानुभवि
कत्वं व्यतिरेकव्याप्तेर्गमकताहेतुत्वेनोक्तं· इदानीमप्रसिद्धस्याप्यभावरूपसाध्यस्य प्रतियोगितावच्छेदकोयो धर्मस्तदवच्छिन्नव्यापक
तावच्छेदकावच्छिन्नीयत्वेनाभावरूपहेतुमत्ताज्ञानात्तद्धर्मावच्छिन्नीयत्वेनाभावसिद्धेस्तथात्वमित्याह व्यापकीयत्वेनेति· अप्रसि
द्धसाधारणीमिति· तेन पृथिवीतरभेदादिरूपसाध्यस्य पक्षमात्रवृत्तितयाऽप्रसिद्धस्य संभवात्· साध्याभावत्वेन हेत्वभावव्याप्यताग्र
हो न संभवतीति इतिसामग्र्यंतरकल्पनमावश्यकमिति सूचितं· यद्यप्येकदेशे पक्षतामताप्रसिद्धसाध्यकानुमितिप्रकारस्यात्रैव मूलका
राभिप्रेतत्वं· ननु पृथिवीतरभेदोभिघटे पृथिवीत्वादिति व्यतिरेकिणि साध्यमप्रसिद्धमित्यादिपूर्वपक्षानवतारः। पक्षैकदेशे साध्य
प्रसिद्धिमात्रं व्यसमाधानासंगतिश्च· तथापि साध्याभावत्वहेत्वभावत्वाभ्यां व्याप्तिग्रहरूपाप्रथमोक्तसामग्री तत्र न संभवति· प्रति

योगिज्ञानं विना व्यतिरेकनिरूपणासंभवात्। द्वितीयसामग्रीतोऽपि न तत्रानुमितिसंभवः। साध्यसंदेहरूपपक्षताविरहात्। अत्रासि
द्धस्य विशेषणस्य ज्ञानविरहेणाऽकारतया भानासंभवेनानुमितेः साध्याविशेष्यकत्वानुभवविरोधश्चेति पूर्वपक्षाशयेन संदर्भशुद्धि
निर्वाहः। साध्यसंदेहो न पक्षताऽपि तु सिषाधयिषाभावः। अनुमितेः साध्यविशेष्यकत्वं नानुभवविरुद्धं धूमादिचान्वयव्याप्तिबोधमंतरे
णापि पृथिवीतरभिन्नेत्याद्यनुमितिरनुभवसिद्धा तदाऽभावविशेष्यकानुमित्यनंतरमेव तादृशानुमितिरूपगंतव्या। पूर्वानुमिते
रेव विशेषणज्ञानत्वात्। यथा प्रतियोग्यधिकरणज्ञानसत्वेऽप्युक्ततोऽभावः प्रत्यक्षे विशेष्यतयैव भासते नंतरं च विशेषणतया।
विशेषणज्ञानस्य फलत्वादित्येकदेशमतस्याप्यन्ये लिख्यादिनोपन्यासः संगच्छत इति। व्यापकाभावेन साध्यादिमत्त्वे व्यापकाभाव
निश्चयाद्व्याप्याभावसिद्धेर्लभिप्रायाभावपदद्वयमभावनिश्चयार्थकतया व्याचष्टे अभावाविति। व्यापकाभावनिश्चयेऽपि प्रति
बंधकतया धूमादिसत्वे व्याप्याभावानिश्चयात्तन्निश्चयावश्यंभावकथनासंगतिरतः पूरयति अवश्यंभावश्चेति। व्याप्य
स्य व्याप्यत्वावच्छिन्नप्रतियोगिताकाभावो व्यापकाभावनिश्चयात्सिध्यतीति भ्रमनिरासायाह यद्रूपावच्छिन्नं प्रतीति। तद्रूपा
वच्छिन्नीयत्वेनेति। संबंधविधया धूमत्वादिरूपतद्रूपावच्छिन्नप्रतियोगिताकत्वविषयिणीत्यर्थः। फलमिति। व्यापकाभाव

निश्चयफलमित्यर्थः। प्रतियोगितया व्याप्यताघटकसंबंधावच्छिन्नत्वभानं नियमश्च व्याप्तिवादे सिद्धांतलक्षणव्याख्यावसरे प्रपंचित
इति नात्र तत्कथनं। व्यापकस्य वह्नित्वावच्छिन्नाभावनिश्चयात् व्याप्याभावासिद्धेराह यद्रूपेणेति। यद्रूपे व्याप्यतावच्छेदकत्वं गृह्यत इत्य
र्थः। तद्रूपावच्छिन्नीयत्वेनाभाववत्ताज्ञानमिति योजना। संबंधविधया तद्रूपावच्छिन्नप्रतियोगिताकत्वावगाह्यभाववत्ताज्ञानमि
त्यर्थः। एवं सति तद्धर्मावच्छिन्नप्रतियोगिधर्मिकव्यापकताज्ञानं पृथक् तद्धर्मावच्छिन्नाभाववत्ताज्ञानमप्यनुमितिजनकं विशिष्टप
रामर्शस्यैवानुमितिहेतुत्वमिति नैयायिकाभिमतनियमश्चान्यथासिद्धस्थल इत्याशयः। सर्वत्रैवैतादृशनियममुपपादयितुं प्रकृतेऽपि
विशिष्टपरामर्शं दर्शयति। व्यापकत्वविशिष्टतद्रूपावच्छिन्नीयत्वेन चेति। व्यापकतावच्छेदकत्वविशिष्टवह्नित्वाद्यवच्छिन्नप्रतियो
गिताकत्वसंबंधेन प्रतियोगिविशेषिताभाववत्ताज्ञानं चेत्यर्थः। व्यापकत्वसहितवह्नित्वावच्छिन्नप्रतियोगिताकाभावज्ञानं हेतुरि
ति यथाश्रुतार्थो न साधुः। वह्नित्वादौ व्यापकतानवच्छेदकत्वग्रहदशायामपि द्रव्यत्वादिना वह्न्यादेर्धूमादिव्यापकताग्रहात् धूमव्याप
कवह्न्यभाववानिति ज्ञानसंभवेन धूमाद्यभावासिद्धिप्रसंगात्। महानसीयवह्नित्वादौ धूमादिव्यापकतानवच्छेदकत्वग्रहे धूमादिव्या
पकतावच्छेदकद्रव्यत्ववन्महानसीयवह्न्यभाववान्पर्वत इति ज्ञानादिव तत्र धूमाभावानुमितेरनुभवविरोधेन व्याप्तेरयोगात्। ए

के॰ व्य॰ग॰
१७७

177

वं विशिष्टपरामर्शोपि पादनप्रकारश्च गुरुधर्मस्य प्रतियोगितावच्छेदकत्वोपगमेन प्रदर्शितः। अन्यथा स्वरूपत एव वह्नित्वादेः प्रति
योगितावच्छेदकत्वसंभवेन व्यापकतावच्छेदकत्वविशिष्टवह्नित्वत्वादिना प्रतियोगितावच्छेदकत्वानुपपत्तेः। न च व्यापकतावच्छेदकत्वा
दिकमुपलक्षणतया प्रतियोगितावच्छेदके वह्नित्वांशेवगाहमानमेव ज्ञानमनुमितिहेतुः संभवतीति गुरुधर्मस्य प्रतियोगितावच्छेद
कत्वाभावेपि निस्तार इति वाच्यं· प्रतियोगिनि तद्विशेषणे चोपलक्षणतया प्रकारभानानुपगमात्· एतन्मते च कारणतावच्छेदके वह्नि
त्वादेर्विषयितानविशिष्य निवेश्यते· किं तु व्यापकतावच्छेदकत्वसहिततद्धर्मितावच्छेदकावच्छिन्नविषयतात्वेनैव· अतो धूमव्यापके
तावच्छेदके धनत्ववदभाववानित्यादिज्ञानस्य न पृथक्कारणता· पूर्वक्षणवृत्तित्वादिविशिष्टधूमव्यापकतावच्छेदकवह्नित्ववदभा
ववानित्यादिज्ञानवारणाय व्यापकतावच्छेदकत्वसहिततद्धर्मितावच्छेदकतापन्नधर्मावच्छिन्नप्रतियोगिविषयतावच्छेदकताप
र्याप्तिर्निवेश्या· यत्र व्यापकतावच्छेदकत्वधर्मितावच्छेदकतया वह्नित्वांशे पूर्वक्षणवृत्तित्वादिवैशिष्ट्यं भासते तत्रानुमितिरिष्यत
एव· तत्र विशिष्टवह्नित्वादेरेव व्यापकतावच्छेदकतया भानेन वह्नित्वावधिविशेषात्· यथाश्रुतव्यापकाभाववत्ताज्ञानं हेतुतायां ह्यपति·
व्यापकप्रतियोगिकस्येति· व्यापकत्वघटितधर्मावच्छिन्नप्रतियोगिविशेषितस्येत्यर्थः। अतिप्रसङ्गत्वात्· अजनकविशिष्टव्यापका

१७७

भावादिज्ञानविषयत्वात्॰ ननु व्यापकत्वपर्याप्तिप्रतियोगितावच्छेदकत्वावगाहिज्ञानहेतुतया विशिष्टव्यापकाभावज्ञानादनुमितिवारणीयेत्य
त आह व्यापकत्वावच्छिन्नेति॰ धूमादिव्यापकत्वावच्छिन्नप्रतियोगिताकाभावस्येत्यर्थः। असार्वत्रिकत्वादिति॰ धूमादिसमानाधिकरणाभावप्रति
योगितानवच्छेदकइत्यत्वाद्यवच्छिन्नाधिकरणेकदाचिदपि सत्वादित्यर्थः। तथा चाप्रसिद्धानां कदाचिदभावेन धूमाभावाद्यप्रसिद्ध्या तादृशाभावज्ञा
नस्य न हेतुतासंभव इति भावः। ननु सर्वत्र व्यापकतावच्छेदकप्रमेयत्वाद्यवच्छिन्नसत्वेन व्यापकत्वावच्छिन्नाभावः प्रसिध्यत्येव न कथं तस्यासा
र्वत्रिकत्वाभिधानमित्यत आह संबंधविशेषेति॰ व्यापकतावच्छेदकीभूतसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकस्येत्यर्थः। संभवतोपि॰ गुणा
दो प्रसिध्यतोपि॰ ननु प्रथमकल्पे व्यापकतावच्छेदकधर्माणां यत्वतत्वेन निवेशात्तदननुगमेन द्वितीयकल्पेपि व्यापकताघटकसंबंधानां
विशिष्य निवेशानीयतया तदननुगमेन कारणानुगमाद्व्यभिचार इत्यत आह कारणाननुगम इति॰ कारणाननुगमप्रयुक्तदोषोद्धा
र इत्यर्थः। चिंतनीयः। प्रयासेन कर्त्तव्यः। तथा च कारणस्यानुगमासंभवे विशेषधर्माणां कार्यतावच्छेदकतामुपगम्य व्यभिचारो वारणीयः।
विशेषधर्मश्च जातिविशेषरूपः। न तत्कारणानंतर्यरूपश्चेति भावः। प्रथमकल्पानुसारेण जनकज्ञानाकारं दर्शयति॰ वह्निर्धूमव्यापक
इति॰ इतिज्ञानात्॰ इत्याकारकात्समूहालंबनात् ज्ञानात्॰ ज्ञानद्वयाच्च द्वितीयकल्पानुसारेणाह धूमव्यापकेति॰ धूमव्यापकतावच्छेदकवह्नित्व

के.व्य.ग.
१७८

178

तदभाववानित्यादिज्ञानादित्यर्थः। यद्यपि निर्धूमोऽयमिति बुद्धेर्धूमाभावविशिष्टबुद्धितयाऽप्रसिद्धसाध्यकपरामर्शान्न तादृशानुमितिः
प्रथमं संभवति तथाप्यत्र धूमाभाववृत्तिसाध्यविशेष्यकानुमित्यनंतरोत्पन्नानुमितेरेवाकारप्रदर्शनमिदं आनुभविकसाध्यविशे
षणकानुमित्यनुरोधेनैव साध्यविशेष्यकानुमितिरूपेयं तेन नत्वनुभवसिद्धा सेति न तदाकारप्रदर्शनं अथवा विशिष्टविशेषणके
ऽपि विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिज्ञाने न विशिष्टविशेषणज्ञानापेक्षा ज्ञानत्वादिनिर्विकल्पकानंतरज्ञा
नामीत्याकारकज्ञानत्वादिविशिष्टप्रकारकानुव्यवसायस्वीकर्तृवतो मणिकारस्याप्यनुमतमिदं काञ्चनमयत्वादिविशिष्टबुद्धेः
प्रागप्रतीत्याऽनुपनीतकाञ्चनमयत्वविशिष्टवह्निप्रकारकानुमित्यसंभवकथनं च तस्य विशिष्टविशेषणकज्ञानमात्र एव विशि
ष्टविशेषणज्ञानं हेतुरिति प्राचीनमतानुसारेण अत एव तत्र दीधितिकृता विशिष्टप्रसिद्धिसंभवेनापि विशेष्ये विशेषणमिति
न्यायेन विशिष्टप्रकारकानुमितेः संभवो दर्शितः। तथा च धूमव्यापकवह्न्यभाववानित्यादिज्ञानाद्धूमाभावत्वविशिष्टविषयकज्ञा
नमंतरेणापि धूमाभाववानयमिति ज्ञानं विशेष्ये विशेषणमिति रीत्या संभवति अभावत्वादिसामान्यलक्षणयाऽभावत्वादिज्ञा
ने कचिद्धूमाभावज्ञानात्तन्मूलकेन तत्स्मरणेन विशेषणज्ञानघटिततत्सामग्र्यसंभवात् अनुमितिसाधारण्याः स्वरूपतस्तद्विशेष

१७८

णकतद्विशिष्टबुद्धौ तज्ज्ञानहेतुतायाः अप्रामाणिकत्वाच्च । तथा च तन्मतानुसारेणैव निर्धूमो यमित्याकारप्रदर्शनं वह्नित्वेन धनत्व इव्यत्यादिनाना
धर्मावच्छिन्नाभावानां उपलक्षणीभूतव्यापकतावच्छेदकत्वेन भासमानं यद्वह्नित्वं धनत्वादि तत्पर्याप्तप्रतियोगितावच्छेदकताकत्वरूपानु
गतधर्मप्रकारेण ज्ञानं व्याप्याभावानुमितौ हेतुः प्रतियोगितासंसर्गकज्ञाने एवं प्रतियोगितावच्छेदकादौ उपलक्षणधर्मभानानुप
गमात् । अतो आस्यवच्छिन्नप्रतियोगिताकाभावो भूतलम् इति वाक्यं प्रमाणं । अप्रमाणं तु आत्ममात्मसीयाद्येव तु प पघतद् इति बुव
तां मतमाह धूमव्यापकेत्यादि । अत्रेदमस्य रसवीजं । गुरुधर्मस्य प्रतियोगितावच्छेदकताया व्यवस्थापितत्वात् । निरुक्तरूपेण धूमव्या
ता पकतावच्छेदकं वह्नित्वं यदभावव्याप्तियादिप्रतियोगिसंसर्गकज्ञानकारणत्वमेवोचितं । न तु रूप्रतियोगिताप्रकारकज्ञानहेतु
त्वं । तद्धेतुतावच्छेदकगर्भे प्रतियोगितावच्छेदकतापर्याप्त्यवगाहितानिवेशे न गौरवात् । अन्यथा महानसीयवह्नित्वावच्छिन्नाभाव
स्यापि धूमव्यापकतावच्छेदकवह्नित्वघटितधर्मावच्छिन्नप्रतियोगिताकतया व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन ता
दृशाभावविषयकज्ञानाद्यमातस्य पर्वतादौ निर्धूमत्वसिद्धिप्रसंगात् । प्रतियोगितासंसर्गकज्ञानहेतुतामते व्यापकतावच्छेदकत्वे
नद्धर्मितावच्छेदकतापन्नधर्माभियावच्छिन्नप्रतियोगिनिष्ठप्रकारतावच्छेदकतायाः स्वरूपतः पर्याप्तिनिवेशनैव प्रतियोगितावच्छेदकग

के॰व्या॰ग॰
१७१
179

भेप्रतियोगितावच्छेदकत्वविशिष्टस्य वैशिष्ट्यादेरधिकस्याविशिष्टाभावादिबुद्धौ भानेन प्रतियोगिविषयतावच्छेदकतायाः उक्तोभयधर्मवि
शिष्टेऽपर्याप्तत्वादनतिप्रसंगेन प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहित्वानिवेशात्· यत्तु महानसीयवह्निभिन्नवह्नित्वावच्छिन्नाभावस्या
पि धूमादिव्यापकतावच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकत्वं दुरपह्नवं· तत्प्रतियोगितावच्छेदकत्वविशिष्टयोर्वह्नित्वमहानसीयवह्नि
भिन्नत्वयोरेव धूमव्यापकतावच्छेदकत्वात्· तथा चोक्तरूपेण महानसादौ तादृशाभावज्ञानाद्वह्निधूमत्वसिद्धिप्रसंगः। तद्वारणाय धूमसमानाधिकरणा
भावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणभिन्नं प्रकारकज्ञानं यत्प्रकारकज्ञानं तत्त्वमेव व्यापकतावच्छेदकत्वं तदाश्रयपर्याप्तप्रतियोगितावच्छे
दकताकत्वप्रकारेणाभावज्ञानमेव हेतुरूपेयं· तादृशव्यापकतावच्छेदकत्वं च यत्त्वतत्त्वगर्भतया न विशिष्टैकार्थरूपमिति न विशिष्टपरामर्शसंभवः
स्वरसविज्ञं· तदसत्· एवं सति व्यापकत्वविशिष्टवह्नित्वाद्यवच्छिन्नविषयकज्ञानस्यापि विशिष्टपरामर्शत्वासंभवात् एवमन्यथास्थले विशिष्टपरा
मर्शो न स्यात्· तत्रापि धूमादिहेतुना महानसीयवह्निभिन्नवह्नित्वाद्यवच्छिन्नस्य महानसादौ सिद्धिवारणाय निरुक्तयत्त्वतत्त्वघटितव्यापकतावच्छे
दकत्वप्रकारकसाध्यतावच्छेदकज्ञानस्यैवानुमितिहेतुतायाउपगंतव्यत्वात्· यदि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकताप
र्याप्त्यधिकरणापर्याप्तधर्मपर्याप्त्यधिकरणत्वमेव व्यापकतावच्छेदकत्वं। मिलितयोर्महानसीयवह्निभिन्नत्ववह्नित्वयोस्तादृशाप्रतियो

१७१

गितावच्छेदकत्वपर्याप्त्यधिकरणयोस्तत्पर्याप्त्यधिकरणतायास्तादृशयोरसत्वात्· तादृशयोस्तद्वयगाहिज्ञानं भ्रम एवेत्यभ्रांतस्य महानसा
दौ तादृशसाध्यतावच्छेदकावच्छिन्नसिद्धिप्रसंगो यत्वेनत्वाघटितो व्यापकत्वावगाहि विशिष्टपरामर्शो हेतुस्तयापि शक्यवारण इत्युच्यते
तदा व्याप्याभावानुमितौ निरुक्तव्यापकतावच्छेदकतावत्पर्याप्तप्रतियोगितावच्छेदकताकत्वेनाभावावगाहिनो विशिष्टपरामर्शस्य हेतु
तोपगमेन महानसादौ महानसीयवह्निभिन्नवह्नित्वावच्छिन्नाभावेन धूमत्वावच्छिन्नाभावसिद्धिर्वारयितुं शक्यत इति· नन्वन्वयव्य
तिरेकव्यापकतासाधारणव्यापकत्वस्य अनुगतस्य दुर्वचतयानुमितिसामान्ये व्याप्तिज्ञानत्वेन हेतुत्वाभिधानं न संगच्छत इत्याशं
क्याह अत्रेति· अन्वयेति· अन्वयव्यापकत्वे व्यतिरेकव्यापकत्वे च भासमाने अवश्यं भासते योर्थः अभावत्वादिः स विवक्षित इत्य
र्थः। अन्वयव्याप्तिभाने अवश्यं भासमानस्य साध्यतावच्छेदकस्याप्रसिद्धसाध्यकव्यतिरेकपरामर्शासंग्राहकतया व्यतिरेकव्या
पकत्वोपादानं· साध्याभावव्यापकतात्मकप्रतियोगित्वाभावस्य व्यतिरेकव्याप्तिज्ञाने अवश्यं भानेन तद्घटकत्वस्यान्वयव्याप्तिभा
नासंग्राहकतयान्वयव्याप्तेरुपादानं· वस्तुतस्तु। अभावत्वादिविषयकत्वमुभयव्याप्तिज्ञानानुगमकमित्येतन्मात्रस्फोरणायाभ
यव्यापकताघटकत्वेन तादृशपदार्थोपादानं। मतांतरमाह पक्षस्येति· स्वविशेष्यस्येत्यर्थः। स्वं· फलीभूतानुमितिः। समानवि

के॰ग्र॰ग॰
१८०
180

शेष्यकत्वस्यातंत्रत्वात्॰ अनुमितिपूर्वंतद्विशेष्यकज्ञानानियमात्॰ पक्षतावच्छेदकस्येति॰ स्वविशेष्यतावच्छेदकधर्मस्येत्यर्थः।अ
नवच्छिन्नप्रकारताश्रयस्येति परमार्थः।अत्र चास्वरसः।स्वपदार्थानतिभावितदननुगमात्॰ तदनंतर्भावे च पक्षाविषयकत्वस्याव्या
वर्तकत्वात्॰ वस्तुमात्रस्यैव पक्षत्वात्॰ पक्षतावच्छेदकत्वाच्च॰ विशेषसामग्रीद्वयोरन्वयव्यतिरेकव्याप्तिज्ञानयोः परस्पर
व्यभिचारः कार्यवैचित्र्यादेव निरसनीयः।अनुमित्योर्वैचित्र्यं न जातिविशेषाभ्यां॰ अन्वयव्यतिरेकपरामर्शद्वयजन्यानुमि
तौ संस्कारेण तत्तत्परामर्शजन्यतावच्छेदकतया जातिद्वयकल्पनासंभवात्॰ अतस्तादृशानुमित्योर्विधेयविषयतावैलक्ष
ण्येन वैचित्र्यमुपपादयति॰ अन्वयि [illegible] नीत्यादि॰ तादृप्येण॰ बाहुल्यादिना॰ सिद्धिरित्यग्रिमेणान्वयः।इतरद्वृत्तियोगिकत्वेन
ति॰ इतरभेदसाध्यकेऽवृत्तियोगितासंबंधेनेतरप्रकारेणेत्यर्थः।न च तेन संबंधेनेतरावच्छिन्नस्य हेतुव्यापकताज्ञानादपि तादृश
रूपेणानुमित्युत्पत्या तत्र व्यतिरेकव्याप्तिज्ञानव्यभिचार इति वाच्यं॰ तादृशहेतुव्यापकताज्ञानादनुपयोगित्वेनेतरावैशि
ष्ट्यवैशिष्ट्यभानाद्व्यतिरेकिपरामर्शात्साध्यप्रसिध्यनंतरं केवलं विशेष्यविशेषणमित्यादिरीत्यैवेतरविशेषितभेदानुमि
तेः।साध्याप्रसिद्धिदशायां चेतरप्रकारेणभेदविशेष्यकपक्षप्रकारकानुमितेरुपगमेन वैलक्षण्यात्॰ न चैतरव्यापकी

१८०

भूतताभावप्रतियोगिज्ञानजन्येतरभेदानुमितेरन्वयिहेतुकानुमितित उक्तरीत्या वैलक्षण्योपपादनेपि इतरभेदाभावव्या
पकीभूताभावप्रतियोगिमात्रपक्षवृत्तिज्ञानजन्येतरभेदत्वविशिष्टवैशिष्ट्यावगाहिन्या अनुमितेरितरभेदत्वावच्छिन्न
व्यापकताज्ञानजन्यानुमितितो वैलक्षण्यं दुर्वचमिति वाच्यं। तत्रानुपदवक्ष्यमाणरीत्या व्याप्यतावच्छेदकतया गृही
तेतरभेदाभावत्वावच्छिन्नाभावत्वेनैवानुमित्युपगमात्. वह्न्याद्यभावसाधकव्यतिरेकिलिंगकानुमितेर्वैलक्षण्यमा
ह वह्न्यभावादीत्यादिना. वह्न्यभावादिनिषेधतया. वह्न्यभावाद्यभावत्वेनेत्यर्थः। तेन रूपेण व्यापकताज्ञानजन्यानुमि
तेस्तद्विशिष्टवैशिष्ट्यबोधरूपतया व्यतिरेकिणि च तद्रूपेणानुमितेस्तद्विशिष्टवैशिष्ट्यानवगाहितया विशेषो बो
ध्यः॥ ॥इति केवलव्यतिरेकिग्रंथरहस्यम्॥ ७॥ ७॥ ७॥ श्रीकृष्णाय नमः॥ ७॥ श्रीसदाशिवाय नमः॥ ७॥

न्याय व्यतिरेक
६३००

पुस्तकमिदं पाठकोपाख्य
रामचंद्रस्य गदाधर्याःपसमा
प्तिंधमाद्यन्य केवलव्यतिरेक
पर्यंत पत्राणि ६८
६३००